CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्मश्रीः

कन्नडमूलम् -

एस्. एल्. भैरप्पः

संस्कृतानुवादः -

जनार्दन हेगडे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

SCANNED

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्मश्रीः

कन्नडमूलम्

एस्० एल्० भैरप्पः

संस्कृतानुवादः

जनार्दन हेगडे

संस्कृतभारती
देहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

म्याक्समुल्लर्, डैसन् इत्यादीनां ऐरोप्यचिन्तकानां भारतीयनवोदयहेतुकानि लेखनानि, भारतीयचिन्तनप्रधानानि लेखनानि च पठितुं मां प्रावर्तयन् ।

कुमारस्वामिवर्यस्य जीवनविषये अहम् अधिकं न जानामि । Bagbare of Literacy इत्येतस्य ग्रन्थस्य प्रास्ताविके सम्पादकेन लिखितानां द्वित्राणां पुटानां साहाय्येन, तस्य सप्ततितमं जन्मदिनं निमित्तीकृत्य गौरवसमर्पणोद्देशेन सज्जीकृतस्य Art and Thought इत्येतस्य ग्रन्थस्य प्रस्तावनायां भरतअय्यर्-वर्येण यत् लिखितं तस्य साहाय्येन च मया ज्ञाताः अंशाः एते –

सिलोन्देशीयेन हिन्दुमूलेन पित्रा ब्रिटिश्मूलायाः मातुः उदरात् सिलोन्देशे उत्पन्नः आनन्दके ण्टिश् कुमारस्वामी । जननानन्तरं वर्षद्वयाभ्यन्तरे पितृवियोगः प्राप्तः तेन । माता शिशुना सह स्वजन्मभूमिम् इंग्लेण्ड्देशं गतवती । बालस्य विद्याभ्यासः तत्रैव प्रवृत्तः । धातुशास्त्रम् (Mineralogy) अधिकृत्य तेन डाक्टरेट्पदवी प्राप्ता । ततः सः भूगर्भशास्त्रविभागे कार्यं कर्तुं मातृभूमिं सिलोन्देशम् आगतः । तदवसरे एव तेन भारतीयकलाविषये अभिरुचिः प्राप्ता ।

ततः तेन अगाधा कार्यसिद्धिः आसादिता । भारतीयकलावस्तूनि सङ्गृह्य, सम्पाद्य, तेषां विषये विशेषसंशोधनं कृतं तेन । हिन्दुस्थानं, सिलोन्, इण्डोनेशिया इत्येतेषां देशानां शिल्पकलावस्तूनि अधिकृत्य तेन विशेषसंशोधनं कृतम् । भारतीयकलायाः सर्वविधप्रकारान् अधिकृत्य पाण्डित्यपूर्णग्रन्थाः तेन लिखिताः, लेखनमालाश्च आरचिताः । भारतीयं शैक्षणिकं सामाजिकं राजकीयं च जीवनम् अधिकृत्य, भारतीयं धर्मं तत्त्वशास्त्रं चापि अधिकृत्य तेन अनेके लेखाः लिखिताः । अपारं वैदुष्यं तस्य । प्रपञ्चस्य सर्वे महाविद्वांसः तं कलाभिज्ञं, ज्ञानिनं, मेधाविनम्, आधुनिकयुगगुरुं, महाविद्वांसं च भावितवन्तः । अमेरिकीये बोस्टन्वस्तुसङ्ग्रहालये भारतीयकलाविभागं विकास्य सः तस्य व्यवस्थिततां कल्पितवान् । भारतविषये – तत्रापि भारतीयकलाविषये – पाश्चात्यविमर्शकानां यः दृष्टिदोषः आसीत् तस्य निवारणे वैद्यायमानेषु विद्वत्सु अयम् अग्रगण्यः अस्ति । तदीयजीवनस्य भूयान् भागः पाश्चात्यदेशे यापितः अभवत् । तस्य अध्ययनं, ग्रन्थलेखनपरिश्रमः, ग्रन्थप्रकाशनं चापि पाश्चात्यदेशे प्रवृत्तम् । किन्तु मलिनप्रकाशः भारतीयः अखण्डदीपः पुनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उद्दीपितः सन् शुभ्रप्रकाशं यथा प्रसारयेत् तथा कृतवान् कुमारस्वामिवर्यः, यश्च सिलोन्देशीयस्य पितुः आंग्लमूलायाः मातुः च अभारतीयः पुत्रः !!

भारतीयकलाम् अधिकृत्य प्रवृत्ते तदीये संशोधनकार्ये अर्जेण्टैनादेशीया डोनाल्ड् लूयिसानामिका तदीया पत्नी विशेषसाहाय्यं कृतवती । साऽपि महाविदुषी एव । तयोः एकः पुत्रः अस्ति । रामः इति तस्य नाम । १९४७ तमे वर्षे कुमारस्वामिवर्यः पञ्चत्वं गतः ।

दौर्भाग्यं नाम, आधुनिकभारतीयविश्वविद्यालयेषु स्थिताः बहवः प्राध्यापकाः अपि कुमारस्वामिवर्यस्य नाम न जानन्ति क्वचित् । तदीयकृतीनां परिचयः न भवति तेषाम् । एवं स्थिते तत्र अधीयानाः विद्यार्थिनः तन्नामकृत्यादीनां परिचयं कथं वा प्राप्नुयुः ? अस्मद्देशस्य तरुणगणे स्वाभिमानशून्यता संस्कृतिविषये औदासीन्यं च यत् दृश्यते तस्य एकं प्रमुखं कारणम् - अत्रत्यः पाठ्यक्रमोऽपि । भारतीयतत्त्वशास्त्रस्य, भारतीयकलायाः च विशेषाध्ययनं ये कुर्वन्ति तेभ्यः ऋते अन्यैः राष्ट्रजीवनसम्बद्धः अयं विभागः कटाक्षेण अपि न दृश्यते !

एतद्विषये विस्तरेण लेखनं मम उद्देशः न । मम एतस्य कथाग्रन्थस्य कुमारस्वामिवर्यलेखानां च साक्षात्सम्बन्धः अपि कोऽपि नास्ति । किन्तु एतस्य कथाग्रन्थस्य निरूपकस्य व्यक्तित्वं यदत्र चित्रितं तत्र कुमारस्वामिवर्यस्य लेखानां प्रभावः भूयसा दृश्यते । तेषां लेखानां प्रकाशः एव कथावितानविस्तारस्य हेतुः । अपटुः शिष्योऽयम् अल्पां कृतिम् एतां महतो महीयसः गुरोः स्मृत्यर्थं समर्पितवान् अस्ति ।

कथाग्रन्थविषये किञ्चिदत्र वक्तव्यम् अस्ति । अत्रत्याः घटनाः, व्यक्तयः, संस्थाः वा कमपि व्यक्तिविशेषं, संस्थाविशेषं वा मनसि निधाय चित्रिताः न । एषा काचित् काल्पनिकी कथा । कल्पना कदाचित् वास्तविकजीवनस्य विशेषसादृश्यं भजते, पुनः क्वचित् अभेदम् आप्नोति, पुनः क्वचित् तत् अतिशेते अपि ! कृतिकारस्य कल्पनाशक्तिं, व्यक्तित्वं, लेखनीसंस्कारं च अवलम्ब्य तिष्ठति एषा सिद्धिः । सा च एतस्मिन् कथाग्रन्थे कियता प्रमाणेन सिद्धा इति वाचकैः भवद्भिः वक्तव्यम् ।

– एस्. एल्. भैरप्पः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आनन्द के. कुमारस्वामिवर्याय
सभक्ति समर्प्यते
एषा कृतिः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुवादकवचनम्

संस्कृतवर्षेऽस्मिन् प्रसिद्धेन कथाकारेण श्रीमता एस्. एल्. भैरप्पवर्येण विरचितस्य 'धर्मश्री'नामकस्य कथाग्रन्थस्य संस्कृतानुवादः एषः प्रकाश्यमानः अस्ति । भैरप्पवर्यः प्रसिद्धः श्रेष्ठः जनप्रियः कथाकारः । लोके जनप्रियाः कृतिकाराः सामान्याः कृतीः रचयन्ति । ये श्रेष्ठाः कृतीः रचयन्ति ते जनप्रियाः न भवन्ति । किन्तु भैरप्पवर्यस्य वैशिष्ट्यं तु सः श्रेष्ठः कृतिकारोऽपि जनप्रियः । कन्नडसाहित्यक्षेत्रे, तादृशः कोऽपि नास्ति, यश्च भैरप्पवर्यस्य नाम न श्रुतवान् स्यात् । न केवलं कन्नडक्षेत्रे, अपि तु अन्यभाषाक्षेत्रेषु अपि तदीयं नाम सुप्रसिद्धम् । यतः तस्य बह्व्यः कृतयः विविधभाषाभिः अनूद्य प्रकाशिताः सन्ति । तदीयाः काश्चन कृतयः चलनचित्ररूपम् अपि प्राप्तवत्यः सन्ति ।

पठितृषु अपूर्वं प्रभावं जनयन्ति भैरप्पवर्यस्य सर्वाः अपि कृतयः । सकृत् पठितुम् उद्युक्तः कश्चित् आसमाप्तिं प्रायः कृतिं पार्श्वे स्थापयितुं यथा नार्हेत् तथा पठितॄणां हृदयम् आकर्षति तदीया निरूपणशैली । तेन प्रतिग्रन्थं यत् विभिन्नं सामाजिकमुखं प्रदर्श्यते तत् निश्चयेन पठितॄन् चिन्तने प्रवर्तयति । तेन चित्रितानि पात्राणि, तदीयाः कृतयश्च विस्मरणानर्हाणि भवन्ति सर्वथा । पठनसमाप्तेः अनन्तरम् अपि कानिचन दिनानि पठिता पुस्तकोक्तविषये प्रगाढं चिन्तनं यथा कुर्यात् तथा कर्तुं समर्था भैरप्पवर्यस्य लेखनी निश्चयेन लोकोत्तरा हि ।

सरलशैल्या निरूपिताः कथाग्रन्थाः संस्कृतभाषायां नितरां विरलाः । यद्यपि संस्कृतसाहित्यक्षेत्रं सुसमृद्धम् अस्ति, तथापि आधुनिककाले सर्वभाषासु अपि दृश्यमानाः सरलगद्यमयाः कथाग्रन्थाः तत्र नितरां विरलाः । लोकयानादि-प्रयाणावसरे, विरामकाले वा पठितुं योग्याः सरसकथाग्रन्थाः संस्कृतक्षेत्रे कति वा दृश्यन्ते ? यावत् एतादृशकृतीनां सङ्ख्या न वर्धते तावत् सामान्यानां प्रवृत्तिः अस्यां न भवति । यावत् सामान्याः अपि भाषाकार्ये न प्रवर्तन्ते तावत् भाषाविकासः सुदुर्लभः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मयि सुमहान्तं प्रभावं जनितवतीषु कृतिषु, अन्यतमा अस्ति एषा 'धर्मश्रीः' अपि । एषा मया अनेकवारं पठिता । यावद्वारं पठिता तावद्वारम् अपि नूतने कस्मिंश्चित् विशेषचिन्तने मां प्रवर्तितवती एषा । संस्कृतज्ञाः अपि एतस्याः परिचयं प्राप्नुयुः इति निश्चित्य मया एषः अनुवादोद्यमः कृतः । 'सामान्याः संस्कृतज्ञाः अपि एतस्याः पठने प्रवृत्ताः भवेयुः' इत्येषा स्पष्टावगतिः मम आसीत् । अतः सरला भाषा अत्र प्रयुक्ता । पठनावसरे अर्थावगमने भाषा क्लेशं यथा न जनयेत् तथा जागरूकता आश्रिता अत्र । एतद्विषये मया कियता प्रमाणेन साफल्यं प्राप्तम् इत्यत्र भवन्तः एव प्रमाणम् ।

धर्मश्रीपुस्तकस्य अनुवादार्थं यदा अनुमतिः प्रार्थिता तदा ससन्तोषम् अनुमतं भैरप्पवर्येण । अतः तस्मै हार्दं कार्तज्ञ्यं समर्पयामि । सङ्गणकाक्षरसंयोजकाय श्रीधरवर्याय, मुद्रकाय चापि कृतज्ञताः समर्प्यन्ते ।

सर्वविधान् भावान् विचारान् च अकठिनशैल्या निरूपयितुम् अपेक्ष्यते कश्चन सामर्थ्यविशेषः । तत्क्षेत्रे न अहं सिद्धहस्तः । अतः निरूपणे अस्पष्टता स्यात् क्वचित् । न जाने, अनवधानोत्थिताः लोपाः कति सन्ति इति । उदारहृदयैः भवद्भिः ते सर्वे क्षन्तव्याः इति निवेद्य विरम्यते विस्तरात् ।

प्रमाथि सं।। फाल्गुनपूर्णिमा

२०.३.२००० **– अनुवादकः**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्मश्रीः

मान्यवर मित्र ! लेखककवर्य,

मम जीवने प्रवृत्तम् अन्तरहितम् आन्तरङ्गिकं तुमुलं भवान् जानाति एव । मम पाणिग्रहीत्री पत्नी मदीयां हृदयवेदनाम् अवगतवती अस्ति । मया सहैव तीव्रां वेदनां सा अनुभूतवती अस्ति अपि । तथापि सा मम जीवनगाथां समग्रतया अवगतवती अस्ति उत न इत्यत्र ममैव सन्देहः ।

आवयोः परिचयः वर्षत्रयात् पूर्वम् आरब्धः । एतदभ्यन्तरे एव आवयोः मध्ये अनिर्वचनीया आत्मीयता उत्पन्ना अस्ति । मम जीवनस्य इतिहासः अंशमात्रेण तत्र तत्र भवता श्रुतः अस्ति । किन्तु समग्रतया अद्यावधि भवता सः न ज्ञातः । मम जीवने यः सङ्घर्षः, यत् द्वन्द्वं, यच्च परिवर्तनं जातं तस्य वास्तविकः परिचयः भवता यावत् स्फुटतया प्राप्येत तावत् कल्पनाशक्तिहीनैः सामान्यैः न प्राप्येत । भवान् कश्चन कृतिकारः । अतः एव इति भाति - 'आत्मवृत्तान्तं लिखतु' इति सानुरोधं भवान् मां वदन् अस्ति । किन्तु आत्मवृत्तान्तं लेखितुं मम का वा अर्हता ? न अहं राजकीयपुरुषः, न औद्योगिकप्रमुखः, न कविः, न वा प्रसिद्धः कलावित् कश्चित् । अन्ये याः पठित्वा सन्तोषम् अनुभवेयुः तादृश्यः विशिष्टघटनाः अपि न सन्ति मम जीवने । मम जीवनवाहिन्यां सन्ति आवर्ताः, महाशिलाः, महातरङ्गाः च । ये विचाराः संस्काराः च ममैव अगोचराः आसन् तैः कृतस्य सङ्ग्रामस्य गाथा एव मम जीवनम् । एतां गाथां ये पठेयुः तेषां मनसि तादृश्यः एव मानसिकवेदनाः उद्भवेयुः, याश्च मया अनुभूताः, न तु आनन्दतरङ्गाः । एवं स्थिते अपि आत्मवृत्तान्तलेखने मां किमर्थं प्रवर्तयति भवान् इति तु न ज्ञायते ।

मयि परिशुद्धं प्रेम ये प्रदर्शितवन्तः तादृशाः सन्ति बहवः । मम पत्नी उच्चादर्शस्य उदाहरणभूता सती मन्निमित्तम् आत्मीयान् सर्वान् अपि दूरीकृतवती । मयि विचारस्फुलिङ्गान् उत्पादितवान् अस्ति वीरजीवी शङ्करः । निष्कल्मषां प्रीतिं मयि स्थापितवती आसीत् राचम्मा । भगिनी शकुन्तला, आवृत्तः सन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि स्नेहितः इव व्यवहृतवान् नञ्जुण्डः, देवप्रसादः, क्रिस्तालयस्य प्रमुखः बिषप्वर्यः इत्यादयः बहवः मम जीवनरङ्गे पदं निहितवन्तः सन्ति । मम सर्वासां क्रियाणां प्रतिक्रियां प्रदर्शितवन्तः सन्ति ते । तेषां प्रभावः मयि महता प्रमाणेन एव जातः अस्ति । ते सर्वे माम् अवगन्तुं प्रयत्नं कृतवन्तः आसन् । तथापि ते तु नाटकस्य पात्रधारिणः । स्वदृष्टिमात्रेण मां दृष्टवन्तः सन्ति ते । भवान् तु न तथा । भवान् कश्चन कृतिकारः । भवान् मानवस्य सुखं, दुःखम्, उत्थानं, पतनम् इत्यादीन् सानुकम्पं स्नेहेन द्रष्टुम् अर्हति । अतः एव मम जीवनगाथां समग्रतया भवन्तं कथयिष्यामि ।

अहं तु न कृतिकारः । साहित्यं, तत्त्वज्ञानं, धार्मिकविषयम्, अन्यान् च कांश्चन विषयान् अहं स्थूलतया अधीतवान् अस्मि । मदीयाम् एव दृष्टिम् अवलम्ब्य चिन्तनम् अंपि कृतवान् अस्मि । किन्तु न कस्मिंश्चित् अपि विषये मम पाण्डित्यम् । निरूपणकलां, वशीकरणतन्त्रं वा न अहं जाने । भवान् तु लेखनक्षेत्रे कृतपरिश्रमः । अन्यच्च एकत्र दृढचित्ततया उपविश्य मनसि स्थितं भावं कागदे अवतारयितुं सामर्थ्यम् अपि अस्ति भवतः । अतः मदीयां कथां मन्दगत्या वदन् भवामि । भवान् तां यथोचितं लिखतु । कथनतन्त्रं किमपि अहं न जानामि । भवान् अपि लेखनतन्त्रस्य उपयोगं मा करोतु । मया उच्यमानः विषयः सरलतया यथास्थितं प्रकाशितं भवतु नाम ।

मम कथां भवान् तु यथाघटितम् अवगन्तुं शक्नुयात् इत्यस्ति मम विश्वासः । किन्तु एतां पठितवान् कश्चित् - 'किमर्थम् एवं जातम् ? एवम् एव किमर्थं भवेत् ? अमुकः एवं किमर्थं कृतवान् ? विचित्रः जनः अमुकः । अमुकस्य एव दोषः अत्र' इत्येवं यदि चिन्तयेत् तर्हि मया किं वा वक्तव्यम् ? यथाघटितम् अहम् उक्तवान् अस्मि । भवान् अपि तत् तथैव लिखितवान् अस्ति । तत् तथैव किमर्थं प्रवृत्तम् इत्यस्य उत्तरं मया वक्तव्यम् एव इति तु नास्ति ।......

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बाल्ये, यदा अहं दशवर्षीयः आसं तदा, अस्माकं ग्रामस्य पूर्वस्यां दिशि स्थितस्य कासारस्य श्वेतवर्णीये जले अहं यत् तरामि स्म तत् इदानीम् अपि मम मनसि स्फुटम् अस्ति । ग्रामबालानां गणं विरचय्य अहं कासारं गच्छामि स्म । मध्येकासारं स्थितायाः वृषभशिलायाः समीपम् एकाकितया तरन् गच्छामि स्म । मम स्नेहितेषु कस्यापि तावद्दूरं तरणे धैर्यं न आसीत् ।

दशमे एव वयसि मम शरीरं सुदृढम् आसीत् । अहम् उन्नतः अपि आसम् । सामान्यः वर्णः आसीत् मम । आरक्षकः इव काखिवर्णीयम् अर्धोरुकं धृत्वा रथयात्रावसरे क्रीतं वस्त्रमयं कटिपट्टं च धृत्वा कदलीत्वचा निर्मितां पादरक्षां च परिधाय हस्तेन वेणुनिर्मितं खड्गं गृहीत्वा अहं ग्रामे अटामि स्म ।

तत्काले मम ग्रामे बालानां गणद्वयम् आसीत् । एकस्य गणस्य सेनाधिपतिः अहम् एव । उभयोः अपि गणयोः युद्धम् अपि प्रचलति स्म क्वचित् । नञ्जुण्डः एव अस्माकं पक्षस्य राजा । आपणिकस्य चेन्नप्पश्रेष्ठिनः पुत्रः गुरुवः एव मन्त्री । राजा मन्त्री च यद्यपि भवतः स्म, तथापि आस्थानस्य सर्वे व्यवहाराः सेनाधिपतेः ममैव अधीनाः भवन्ति स्म । तत्र कारणं मम बलशालिता, धैर्यशालिता, धृष्टता च ।

धृष्टबालाः मातुः प्रियाः भवन्ति इति श्रूयते । ममापि माता मयि विशेषवात्सल्यं प्रदर्शयति स्म । वर्षात् पूर्वं मम अग्रजः अग्रजा च प्लेग्रोगेण परलोकं श्रितवन्तौ आस्ताम् । अवशिष्टः एकमात्रपुत्रः अहम् । त्रिवर्षीया भगिनी अपि मम गृहे आसीत् । अहम् अद्वितीयः पुत्रः आसम् इत्यतः मम तर्जने दण्डने च माता कदापि न उत्सहते स्म । 'यदि अहं ग्रामे एव वसेयं तर्हि परमदुष्टः भवेयम्' इति सा चिन्तयति स्म । अतः एव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सा मां स्वस्य अग्रजस्य - तन्नाम मम मातुलस्य - गृहं प्रति प्रेषितवती। दशमे एव वयसि सेनाधिपत्यं प्राप्य विराजमानेन मया अर्धराज्यं परित्यज्य दुःखेन वृषभशकटः आरोढव्यः अभवत्। रात्रौ अन्धकारप्रसारानन्तरं मातुलस्य ग्रामः प्राप्तः मया। यः अहं धैर्येण साहसेन च युद्धेषु भागं गृहीत्वा जयं प्राप्य वीराग्रणीत्वम् आसादितवान् आसं, सः अहं मातुः वियोगसमये तावत् किमर्थं रुदितवान् इति तु मयैव न ज्ञायते।

मम मातुः श्रेष्ठं व्यक्तित्वम्। स्वस्मै किमपि नावशिष्यते चेदपि अन्यस्मै दाने तस्याः महती उदारता। बहवः अपरिचिताः अपि मम गृहे भोजनं कृत्वा गच्छन्ति स्म। मम गृहम् आगतः कोऽपि भिक्षुकः रिक्तहस्ततया न प्रतिगच्छति स्म। ललाटे विशालं दीर्घं तिलकं धृत्वा कपोले हरिद्रां विलिप्य अम्बा प्रतिशनिवासरं श्रीरामपूजां यत् करोति स्म तत् इदानीम् अपि अहं स्मरामि।

वर्षद्वयात् पूर्वम् अस्मद्ग्रामीणः रङ्गः मिलितः आसीत्। मम गृहस्य पार्श्वे एव आसीत् तदीयं गृहम्। सः मत्तः षड्भिः मासैः कनीयान्। सः वदति - ''मदीये शैशवे मम माता केनचित् विलक्षणेन रोगेण पीडिता आसीत्। स्तनन्धयस्य अपि मम सान्निध्यं सा न सहते स्म। 'यदि शिशुं मत्समीपम् आनयन्ति भवन्तः, तर्हि तस्य कण्ठं निपीड्य मारयिष्यामि' इति साक्रोशं वदति स्म सा। पिशाचग्रस्ता इव जाता आसीत् सा। स्तन्याभावतः मरणावस्थाम् आपन्नं मां भवतः माता एव स्तन्यं पायितवती इति श्रूयते। भवान् अपि तदा स्तनन्धयः आसीत्। औरसाय भवते अपि स्तन्यम् अदत्त्वा मह्यं दत्तवती आसीत् सा। तस्याः कारणतः एव अहं जीवितः। देवता खलु सा'' इति। एवं कथनसमये तस्य नेत्रे सजले भवतः स्म।

मम पितुः तु विलक्षणः स्वभावः। तस्य व्यक्तित्वं कीदृशम् आसीत् इति अवगन्तुम् इदानीम् अपि अहं न शक्तः। कस्यापि अहितं न चिन्तयति स्म सः। किन्तु कस्यापि उपकारम् अपि न करोति स्म। व्यवहारे सर्वथा अदक्षः आसीत् सः। पिशुनानां वचनं श्रुत्वा सः पैतृकसम्पत्तेः अपव्ययं स्वेच्छया कृतवान् आसीत्। अवशिष्टं यत् अल्पं क्षेत्रम् आसीत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः यत् धान्यं प्राप्यते स्म, ततः अस्माकं कुटुम्बस्य जीवनं कष्टेन प्रचलति स्म । पिता किमपि कार्यं न करोति स्म । कर्तव्यहीनता एव तस्य स्वभावः आसीत् । तावदेव न, कदाचित् मातरं विना कारणम् अवाच्यैः शब्दैः भृशं निन्दति स्म सः । माता तु पितुः निन्दनं मौनेन सहमाना हसन्मुखी एव श्रीरामस्य पूजां करोति स्म ।

मम ग्रामस्य पार्श्वे 'संन्यासिमन्दिरं' नाम कश्चन देवालयः अस्ति । तत्र अज्ञातकुलगोत्रः कश्चन श्मश्रुलः पुरुषः निवसति स्म । तेन सह उपविश्य मम पिता तत्त्वपदानि, जानपदगीतानि, आत्मानन्दगीतानि च गायति स्म । उभौ अपि एकतन्त्रीवाद्यं वादयन्तौ गायतः स्म । प्रतिदिनम् अपि पिता भोजनसमये गृहे अवश्यम् उपस्थितः भवति स्म । उत्सवादिदिनेषु तु सः अन्यैः खादितं वा न वा इत्यपि अपरिशील्य भक्ष्यभोज्यादिकम् आकण्ठं भुक्त्वा संन्यासिमन्दिरं प्रति गच्छति स्म ।

धीवरपल्ल्याः गङ्गमाटः मम पितुः सहचरः आसीत् । सः प्रतिदिनम् अपि कासारस्य जलं कुल्याद्वारा सर्वेषां क्षेत्राणि प्रापय्य तत्त्वपदानि श्रोतुं गच्छति स्म । मम पिता तन्त्रीवाद्यं दक्षिणहस्तेन वादयन् वामहस्तेन शब्दम् उत्पादयन् सुन्दरतया गायति स्म । गङ्गमाटः आतोद्यवाद्यं वादयति स्म । संन्यासी मध्ये मध्ये 'शिव शिव' इति वदन् हुक्कासेवनं करोति स्म । क्वचित् हुक्कासेवनभाग्यं मम पित्रा गङ्गमाटेनापि प्राप्यते स्म । कदाचित् अहं हुक्कासेवनसमये तत्र उपस्थितः सन् तेषां ताडनं प्राप्य रुदन् गृहम् आगतवान् आसम् ।

मम गृहे मम पितामही आसीत् । त्रिवर्षीया भगिनी चापि आसीत् । पितामह्याः सात्त्विकः स्वभावः । पितुः प्रवृत्तिं दृष्ट्वा सा कुपिता भवति स्म । पत्युः एतादृशं स्वभावं शान्ततया सोढ्वा हसन्मुखतया तिष्ठन्तीं मम मातरम् उद्दिश्य अपि कदाचित् सा कोपं प्रदर्शयति स्म । अनन्तक्षणे एव हसन्ती 'सर्व प्राचीनं कर्म' इति वदति स्म ।

माता मम हितम् इच्छन्ती एव मां मम अनिच्छाम् अपि अविगणय्य मातुलंगृहं प्रति प्रेषितवती इति मया पूर्वम् एव उक्तं खलु ?

मातुलः यद्यपि मम मातुः सहोदरः, तथापि तस्य स्वभावः तावत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातुः स्वभावात् सर्वथा भिन्नः एव । मम माता सहनामूर्तिः आसीत् । किन्तु मातुलः उग्रनरसिंहः ! कोपः सदा तस्य नासाग्रे एव वसति स्म । अनपत्यः सः । तथापि बालानां विषये वात्सल्यं, प्रीतिः, दया, करुणा वा लेशमात्रेण अपि तस्मिन् न आसीत् । 'योग्येन दण्डनेन एव बालाः सन्मार्गम् अनुसरेयुः' इति मत्त्वा एव माता मां मातुलगृहं प्रति प्रेषितवती आसीत् । मातुलगृहे दण्डनस्य अभावः सर्वथा न आसीत् । मन्निमित्तम् एव मातुलः कृशं दीर्घं वेत्रदण्डं सज्जीकृतवान् आसीत् ।

मातुलान्याः अपि मयि अनादरः आसीत् । मां दासं मन्यते स्म सा । मां सा 'सत्य !' इति, 'सत्यनारायण !' इति वा न आह्वयति स्म कदापि । 'अये !' इत्येव सर्वदा सम्बोधनं तस्याः । हिन्दुसम्प्रदाये पुरुषैः यादृशानि कार्याणि न करणीयानि तादृशानि अपि कार्याणि मद्द्वारा कारयति स्म सा । अतः उच्छिष्टस्य अपसारणं, गोमयेन उपलेपनं, पेषणं, कुट्टनम् इत्यादीनि कार्याणि अपि मया करणीयानि भवन्ति स्म । अहम् आ बाल्यात् दृढकायः एव । अतः कार्यकरणे मम क्लेशः कोऽपि न आसीत् । तया उच्यमानानि सर्वाणि कार्याणि करोमि स्म अहम् । तथापि तस्याः कठोरवचनानि न्यूनानि न भवन्ति स्म । स्वनिमित्तं कृतं पाकं मह्यं न परिवेषयति स्म सा । दासाय धेनवे वा यादृशं दीयेत तादृशं मह्यं ददाति स्म सा । अहं तदपि विना विरोधं खादामि स्म । मया गृहस्य पृष्ठभागे स्थितायां वाटिकायां भोजनं करणीयं भवति स्म । तथापि अहं मौनेन तिष्ठामि स्म । एवं स्थिते अपि तस्याः तर्जनं तु कदापि न्यूनं न भवति स्म ।

मातुलः दिने दशाधिकवारं मां वेत्रेण ताडयति स्म । ताडनं स्वकर्तव्यं मन्यते स्म सः । मम ताडनार्थं कारणं न अपेक्षते स्म सः । शालातः आगमनावसरे एकनिमेषात्मकः विलम्बः चेत् द्विवारं ताडनम् । रोदनं कृतं चेत् पुनः ताडनम् । कार्यकरणे विलम्बः चेत् चतुर्वारं ताडनम् । एवं निरन्तरताडनस्वीकारः मम प्रवृत्तिः जाता आसीत् । प्रतिदिनम् अपि तृणराशेः पार्श्वे उपविश्य किञ्चित् रोदनं कृत्वा दुःखोपशमनं प्राप्य आगच्छामि स्म अहम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'यदि मम पुत्रः अग्रजस्य गृहे भवेत् तर्हि बुद्धिमान् भवेत्' इति मम मातुः भावना आसीत् । उभौ पुत्रौ दिवङ्गतौ आस्ताम् इत्यतः मत्तः बहु निरीक्षते स्म सा । किन्तु मातुलगृहे यत् वातावरणम् आसीत् तत् तु अन्यत् एव । यदा पशुपालनार्थं ग्रामात् बहिः गच्छामि स्म तदा अन्ये बालाः मातुलम् अधिकृत्य वदन्ति स्म - 'सः असत्यवादी, सः चोरः, सः वञ्चकः, सः दुष्टः.....' इत्येवम् । 'भवन्तं स्वसदृशं दुर्मार्गगामिनं कर्तुम् एव अत्र आनीतवान् अस्ति सः' इति ते मां वदन्ति स्म । अन्ये बालकाः मया सह सम्भाषणं न कुर्वन्ति स्म । 'सः तद्गृहीयः भोः !' इति माम् अङ्गुल्या निर्दिशन्ति स्म ते ।

मम मातुलस्य नारिकेलोद्यानं न आसीत् । तथापि तस्य गृहस्य अट्टे सर्वदा नारिकेलानि भवन्ति स्म एव । मध्यरात्रे एकाकी एव सः गृहात् निर्गच्छति स्म । प्रातः नारिकेलानि स्वीकृत्य प्रत्यागच्छति स्म । अन्यानि वस्तूनि अपि आनयति स्म सः ।

सः देवालयस्य अर्चकः अपि आसीत् । देवालयः ग्रामात् बहिः आसीत् । देवालयस्य गर्भगृहे घोरः सर्पः अस्ति इति वार्तां प्रसारितवान् आसीत् सः । अतः कोऽपि देवालयस्य अन्तः न गच्छति स्म । मातुलः तु निर्भयम् अन्तः गच्छति स्म । गर्भगृहे नारिकेलानि, कदलीफलानि, कलायाः इत्यादीनि राशीकृतानि भवन्ति स्म । अन्धकारप्रसारानन्तरं तानि तेन स्वगृहं प्रति आनीयन्ते स्म । कदाचित् मया अपि साहाय्यं क्रियते स्म । यदा मम साहाय्यम् आरब्धं ततः आरभ्य प्रहाराः न्यूनाः जाताः । किन्तु सर्वथा लुप्ताः तु न जाताः । दण्डने न्यूनता भवति इति जानन् अहं तस्य साहाय्यम् अधिकाधिकतया करोमि स्म ।

तर्जन-ताडनादीनां प्राप्तिः मम जीवने सहजा जाता आसीत् । आरम्भे मातरं स्मरन् अहं रोदिमि स्म । अनन्तरकाले तत् न्यूनं जातम् । मातुलः तदा तदा मह्यं मिष्टकं दापयति स्म । ततः अहं सन्तुष्टः भवामि स्म । मातुलानी तु अहोरात्रं मां तर्जयति स्म । 'यदि सा तर्जयति तर्हि तस्याः मुखस्यैव वेदना भवेत्' इति उच्चविचारेण प्रेरितः अहं मौनम् आश्रयामि स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अहम् अधिकं न पठामि स्म । तथापि शालां तु प्रतिदिनं गच्छामि स्म । गृहे पठनार्थम् अवकाशः न प्राप्यते स्म । पुस्तकक्रयणार्थं ग्रामतः धनं तु आगच्छति स्म । किन्तु तत् मातुलः वशीकरोति स्म । धनस्वीकारानन्तरं दिनद्वयं प्रहारः न भवति स्म इत्यतः अहं सन्तोषेण एव मातुलाय धनं ददामि स्म ।

मातुलस्य गृहं प्रति आगमनस्य अनन्तरं वर्षत्रयम् अतीतम् आसीत् । अहं माध्यमिकशालायाः द्वितीये वर्षे पठामि स्म । वर्षे एकवारं गृहं प्रति गन्तुं, सप्ताहं यावत् स्थातुं च अवकाशः भवति स्म । 'अधिकदिनानि गृहे स्थितितः बालः दुष्टः भवेत्' इति मातुलः वदति स्म । माता अग्रजस्य वाक्यं वेदवाक्यं मन्यते स्म । अतः ग्रामं गतः अपि अहं मम दुरवस्थां मातरं वक्तुं न शक्नोमि स्म । 'मातुलगृहात् प्रत्यागन्तव्यम् इति उद्देशेन अविद्यमानं प्रकल्प्य वदति एषः' इति माता भावयति स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुनः एकं वर्षम् अतीतम् । अहं माध्यमिकविद्यालयस्य तृतीयकक्ष्यायाम् उत्तीर्णः जातः । मातुलगृहे मम आवश्यकता दिने दिने वर्धते स्म । अतः प्रहारप्राप्तिः न्यूना जाता आसीत् । प्रहारप्राप्तिः अभ्यस्ता आसीत् इत्यतः तद्विषये मम काऽपि चिन्ता न भवति स्म ।

ग्रीष्मकालः समाप्तः आसीत् । ज्येष्ठमासस्य वृष्टिबिन्दवः मन्दगत्या पतन्ति स्म । एकस्मिन् दिने धाराकारवृष्टिः आरब्धा आसीत् । प्रातःकालस्य दशवादनसमयः । अस्मद्ग्रामीणः कश्चन कृषिकः मातुलस्य गृहम् आगतवान् । तम् अहम् अभिज्ञातवान् । अहं गृहस्य पृष्ठतः कार्यं कुर्वन् आसम् । कार्यं मध्ये परित्यज्य आगत्य सम्भाषणं कर्तुं मम स्वातन्त्र्यं न आसीत् इत्यतः अहं मौनम् आश्रितवान् । मातुलः, सः कृषिकः च किञ्चित्कालं किमपि सम्भाषणं कृतवन्तौ । मातुलः माम् आहूय आदिष्टवान् - ''अविलम्बेन शालां गच्छतु ।''

ऐदम्प्राथम्येन मातुलः मां शालागमनं स्मारयन् आसीत् । किमर्थम् एवम् इति चिन्तयन् अहम् उपाहारे अस्वीकृते अपि पुस्तकस्यूतम् उन्नीय शालां गतवान् । मध्याह्ने सार्धैकवादने भोजनविरामार्थं शाला उन्मुक्ता । गृहं प्रति आगमनसमये मिष्टकविक्रेत्री आपणे उपविश्य एव मां स्वसमीपम् आहूय पृष्टवती - ''भवतः मातुलः कुत्र गतः ? द्विचक्रिकाम् आरुह्य गतवान् खलु सः !'' इति ।

''अहं न जानामि'' इति उक्त्वा अहं गृहम् आगतवान् । मातुलगृहस्य पार्श्वे एका वृद्धा वसति स्म । मयि विशेषवात्सल्यं तस्याः । मम मातरं सा एव पोषितवती आ बाल्यात् । बाल्ये एव मातृवियोगं प्राप्तवती आसीत् मम माता । अतः सा वृद्धा एव मम मातरं वात्सल्येन दृष्टवती आसीत् । सा आगच्छन्तं मां दृष्ट्वा आहूतवती । 'मातुलः तर्जयेत्' इति चिन्तनं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुर्वन् अहं क्षणकालं मार्गे एव स्थितवान् । एतत् जानती इव सा माम् उक्तवती - ''अलं भीत्या । आगच्छतु वत्स !'' अहम् अन्तः गतवान् ।

सा मम पार्श्वे उपविश्य वात्सल्येन शिरः स्पृशन्ती पृष्टवती - ''इतः कियद्दूरे अस्ति भवदीयः ग्रामः ?''

''अष्टमैल्दूरे ।''

''अहम् एकं प्रश्नं पृच्छामि । झटिति उत्तरं वक्तव्यं भवता।''

''अस्तु ।''

''एकः कासारः । तस्य मध्ये कश्चन मृद्राशिः । सः न अत्युन्नतः । तदुपरि एकः अजः, एकः व्याघ्रः च अभिमुखं तिष्ठतः । एतादृशे अवसरे अजः किं तरणं कृत्वा तीरं प्राप्नुयात्, उत व्याघ्रस्य आहारः भवेत् ?''

''किमर्थम् एषः प्रश्नः ? मया किमपि न अवगतम् ।''

''उद्देशः यः कोऽपि भवतु नाम । अजस्य का गतिः इति वदतु ।''

''व्याघ्रस्य आहारः भवति सः । यतः व्याघ्रः अजात् प्रबलः खलु ?''

''धिक् एतत् । शान्तं पापम् । प्रतिहतम् अमङ्गलम् ।''

एतस्य सम्भाषणस्य तात्पर्यं किमिति मया न अवगतम् । 'अत्रैव भोजनं करोतु' इति सानुरोधं माम् उक्तवती सा । मया न अङ्गीकृतम् ।

''भवतः मातुलानी न तर्जयिष्यति । अलं भीत्या । अहं ताम् उक्तवती अस्मि । उत्तिष्ठतु भोजनार्थम्'' इति वदन्ती सा यदा धैर्यवचनानि उक्तवती तदा अहं भोजनार्थम् उत्थितवान् । तस्याः स्नुषा परमसाध्वी स्नेहमयी च । सा भोजनं परिवेषितवती । वृद्धा मम पार्श्वे एव उपविष्टवती । प्रातः उपाहारः न सेवितः इत्यतः वा, अन्येन कारणेन वा, न ज्ञायते, मह्यं भोजनं किञ्चिदपि न अरोचत । उदरे कश्चन तापः बाधते स्म । वृद्धायाः अनुरोधस्य कारणतः द्वित्राः कवलाः मुखे स्थापिताः । तावता एव वमनशङ्का माम् अबाधत । अजानतः एव मम नेत्राभ्याम् अश्रूणि आगतानि । अहं सशब्दं रोदनं कृतवान् ।

''एषः भोजनम् अपि न कृतवान् । देवेन एव रक्षणीयः एषः । देवगृहे दीपं वा ज्वालयतु वत्से !'' इति स्नुषाम् आदिष्टवती वृद्धा।

''भवती असम्बद्धं किमपि मा वदतु अम्ब !'' इति उक्तवती स्नुषा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतावता वृद्धायाः नेत्राभ्याम् अपि अश्रूणि आगतानि । मया तु न ज्ञातं - किं प्रवर्तमानम् अस्ति इति । उदरे कश्चन तापः । मनसि अनिर्वचनीया वेदना । किमर्थम् एवं भवत् अस्ति इति मया न ज्ञातम् । वृद्धया निषिध्यमानः अपि अहं - 'शालायाः विलम्बः भवति' इति वदन् ततः निर्गतवान् ।

कक्ष्यायाम् अपि किञ्चन मनोमौढ्यम् आसीत् मम । शरीरे तापः अनुभूयते स्म इव । उपाध्यायस्य कस्यापि प्रश्नस्य उत्तरं न दत्तं मया । सायं पञ्चवादने घण्टानादः जातः । अन्तरङ्गे अव्यक्तवेदनाम् अनुभवन् एव अहं निर्विण्णमनस्कः सन् 'सायङ्कालिककार्यस्य विलम्बः स्यात्' इति चिन्तयन् गृहम् आगतवान् ।

मातुलः स्वागतप्रकोष्ठे कोणे उपविष्टः आसीत् । प्रतिवेशिनी वृद्धा स्तम्भम् अवलम्ब्य उपविष्टवती आसीत् । गृहे श्मशानमौनं प्रसृतम् आसीत् । वृद्धा माम् आहूय स्वपार्श्वे उपवेशितवती । मां प्रीत्या आलिङ्ग्य "एतस्मिन् अल्पे एव वयसि अनाथत्वं स्यात् इति भवतः ललाटे लिखितम् आसीत् इति मन्ये" इति वदन्ती सशब्दं रुदितवती । तस्याः कथनं मया किमपि न अवगतम् । मया अपि रोदनं प्राप्तम् । तस्याः अङ्के मुखं निवेश्य अहम् अपि रोदनं कृतवान् । किञ्चित्कालानन्तरं मया मुखम् उन्नीतम् । मातुलस्य मुखे अपि अश्रूणि । कठिनस्य निर्दयस्य क्रूरस्य अपि मातुलस्य नेत्राभ्याम् अश्रूणि ! तस्य हृदये करुणा लवमात्रेण अपि नास्ति इति मया चिन्तितम् आसीत् ! तादृशः अपि इदानीं रोदिति । केन कारणेन स्यात् ?

अहम् आश्चर्येण तं पश्यन् स्थितवान् । तदा वृद्धा एव क्षीणस्वेरण उक्तवती - "वत्स ! भवतः अम्बा गतवती किल !" इति ।

'भवतः अम्बा' नाम मम अम्बा एव । 'गतवती' इत्यस्य कः अर्थः ?

"प्लेग्रोगेण सा दिवङ्गता वत्स ! प्रातः एव भवद्ग्रामतः कश्चन कर्मकरः आगतः आसीत् । 'प्लेगयुक्तं ग्रामं प्रति मम पुत्रं मा आनयन्तु । सः सकुशलं तत्रैव तिष्ठतु' इति मरणात् पूर्वं भवतः माता सूचितवती आसीत् । अतः भवतः मातुलः एकः एव गत्वा उत्तरक्रियां समाप्य आगतवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अल्पवयस्कायाः तस्याः मरणात् अपि वृद्धायाः जीर्णकायायाः मम मरणम् एव वरम् अभविष्यत् ।.... सर्वं भगवतः लीला...''

मातुलः वस्त्राञ्चलेन अश्रूणि मार्जयन् आसीत्। मम नेत्राभ्यां तु एकः बिन्दुः अपि न निर्गतः ।

मम अम्बा, या मयि वात्सल्यांतिशयं प्रदर्शयत्सु अद्वितीया आसीत् सा, दिवं गता आसीत् ।

उपविष्टः अहम् उत्थितवान् । ततः बहिः गन्तुम् उद्युक्तः च । तदा झटिति उत्थाय मत्समीपम् आगत्य मातुलः मम हस्तं गृहीत्वा पृष्टवान् - ''कुत्र गम्यते ?''

''मां मुञ्चतु । अहं मम ग्रामं गमिष्यामि ।''

''तत्र गत्वा किं वा क्रियते ?''

'सत्यम् ! तत्र गत्वा मया किं वा कर्तुं शक्येत ? माता तु भस्मीभूता अस्ति' इति चिन्तयन् अहं मौनेन प्रत्यागत्य गृहस्य अन्तः गतवान् । मातुलः मां स्वयं स्नापितवान् ।

इतः सप्तमे दिने सः मां मम ग्रामं नीतवान् । मातुः स्वर्गप्रापकः पुण्यवान् पुत्रः अहम् एकः एव आसं खलु ?

श्राद्धकर्मादिकं समाप्य मातुलः मां स्वग्रामम् एव आनीतवान् । सुखं, दुःखं, कष्टम्, आनन्दः इत्यादयः मम दृष्ट्या समानाः आसन् तदा । किन्तु मातुः मरणानन्तरं मातुलस्य गृहे अल्पं परिवर्तनं दृश्यते स्म । मातुलः प्रहारदाने अल्पां न्यूनतां कृतवान् आसीत् । मातुलानी अपि तर्जनविषये अल्पतां प्रदर्शयन्ती कृपां दर्शितवती आसीत् ।

* * *

मासः अतीतः । अहं शालां तु गच्छामि स्म, प्रत्यागच्छामि स्म च। एतदभ्यन्तरे मयि एकं विशेषपरिवर्तनं जायमानम् आसीत् । यावत् अम्बा जीवति स्म तावत् मातुलः यमः इव दृश्यते स्म । किन्तु इदानीं मातुलदर्शनात् भयं न भवति स्म । तेन दीयमानाः प्रहाराः अपि मयि भीतिं न जनयन्ति स्म । प्रहारं सहमानः महिषः इव अहं मौनेन तिष्ठामि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्म । मातुलेन निषिध्यमानः अपि अहं अन्यैः बालैः सह तरणार्थं गच्छामि स्म ।

विरामदिनेषु मध्याह्ने गोपालकैः सह पर्वतं गच्छामि स्म । अन्ये गोपालकाः इव अहम् अपि धूमपानम् आरब्धवान् । धूमपानविषये मातुलः एव मम आदर्शः ।

एकदा मध्याह्ने आतपे प्रत्यागच्छन् आसम् । तीव्रा पिपासा बाधते स्म । पार्श्वे एव नारिकेलोद्यानम् आसीत् । तत्तु मम गुरोः एव । एतत् जानन् अपि अहं धाष्टर्येन अन्तः प्रविश्य वृक्षम् आरुह्य त्रीणि नारिकेलफलानि उत्पाट्य अन्तःस्थं जलं पीतवान् ।

तत् उद्यानं नञ्जुण्डार्यस्य आसीत् । सः मम माता च सहाध्यायिनौ आस्ताम् । अतः मयि विशेषवात्सल्यम् आसीत् तस्य । कक्ष्यायाम् अपि यदि मया योग्यम् उत्तरं दीयते तर्हि साधुवादेन मां प्रशंसति स्म सः । अनुचितम् उत्तरं दत्तं चेदपि मां तु सः न ताडयति स्म । प्रतिदिनं पर्याप्तमात्रेण प्रहारान् अहं गृहे एव प्राप्नोमि इति सः जानाति स्म । मातुलस्य बहुषु व्यवहारेषु अहं सहायकः आसम् इत्यपि सः न जानाति स्म ।

एकदा सायं शालासमाप्तेः अनन्तरं सः मां स्वगृहं नीतवान् । प्रीत्या खाद्यं दत्तवान् । तस्य खादने मम महान् सङ्कोचः । ग्रामपरित्यागस्य अनन्तरम् अहं प्रीत्यादरादीन् न दृष्टवान् आसम् एव । एवं स्थिते प्रीत्या खाद्यं दत्त्वा सः यदि पार्श्वे उपविशेत् तर्हि अहं कथं वा खादितुं शक्नुयाम् ? मन्दम् अहं खादनं समापितवान् ।

तदनन्तरं सः उक्तवान् - ''अहं किमपि पृच्छामि । सत्यं वक्तव्यं भवता ।''

''अस्तु, वदामि ।''

''भवान् उत्तमः बालः इति अहं जानामि । भवतः माता उत्तमा आसीत् । तस्याः पुत्रः भवान् असज्जनः कथं भवेत् ?'' इति मम प्रशंसां कृत्वा - ''वस्तुतः भवान् बुद्धिमान् एव । यदि भवान् सम्यक् पठेत् तर्हि सर्वप्राथम्यं प्राप्नुयात् । किन्तु पठनार्थं गृहे समयः नास्ति भवतः। अन्यच्च मातुलस्य केचन कल्याणगुणाः भवति अपि सङ्क्रान्ताः सन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परह्यः भवान् मम उद्यानात् नारिकेलानि चोरितवान् खलु ?'' इति पृष्टवान् ।

मम मुखं विवर्णं जातम् । 'नारिकेलचौर्यं तु केनापि न दृष्टम् आसीत् । त्वगादीनि अहं कूपे क्षिप्तवान् आसम् । तथापि चौर्यवार्ता एतेन कथं ज्ञाता ?'

''चौर्यार्थं भवन्तं न तर्जयामि । सत्यं वदतु - नारिकेलानि चोरितानि खलु भवता ?''

''आम् ।''

क्षणकालस्य मौनस्य अनन्तरं सः मन्दस्वरेण उक्तवान् - ''अत्र दोषः न भवतः । मातुलस्य गुणाः भवति दृश्यमानाः सन्ति । परिसरानुगुणं फलम् । अस्तु, इदानीं गच्छतु भवान् ।''

एतदनन्तरम् अहं द्वित्रवारं तस्य अध्यापकस्य गृहं गत्वा आगतवान् । सप्ताहानन्तरं सः माम् उक्तवान् - ''यदि भवान् अत्र एव वसेत् तर्हि दुष्टः भवेत् । नरसापुरे मम स्नेहितः कश्चन अस्ति । स्वामी इति तस्य नाम । माध्यमिकविद्यालये अध्यापकः सः । अहं तस्मै पत्रं लेखिष्यामि । भवान् एतं ग्रामं परित्यज्य तत्र गच्छतु । सः मार्गं दर्शयिष्यति । वारान्नेन उदरम्भरणं शक्यम् । बुद्धिमान् भवान् तत्र सुयोग्यः भवेत् । चोरस्य गृहे वसन् भवान् चोरः न भवेत् इति मम अपेक्षा'' इति ।

एतावत् उक्त्वा सः अन्तः गतवान् । अहं गृहं प्रत्यागतवान् । मातुलः धूमपानं कुर्वन् गृहस्य पुरतः उपविष्टः आसीत् । मां दृष्ट्वा सः कोपेन पृष्टवान् - ''करणीयं कार्यं परित्यज्य कुत्र गतः आसीत् रे ?'' इति ।

एतत् गृहं परित्यज्य गच्छतः मम भयं कुतः ? अहं धैर्येण तस्य पुरतः स्थित्वा उक्तवान् - ''अहम् एतं ग्रामं परित्यज्य गच्छन् अस्मि ।''

''कुत्र गच्छति भवान् ?''

''नरसापुरं प्रति । तत्रैव अध्ययनं करिष्यामि ।''

''अत्र कः क्लेशः भवतः ?''

''अहं भवतः गृहे वासं कर्तुं न इच्छामि । चोरः भवितुं न इच्छामि ।''

सामान्यदिनेषु क्रूरतमस्य मातुलस्य पुरतः स्थित्वा किमपि वक्तुं धैर्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वथा न भवति स्म मम । अद्य तु मयि विशेषशक्तिः आविष्टा आसीत् । अहं धैर्यवान् जातः आसम् । पूर्वं यदा मम ग्रामे सेनापतिपदे आसं तदा यत् धैर्यम् आसीत् तादृशम् एव धैर्यम् आगतम् आसीत् अद्य । मातुलस्य नेत्रे अग्निगोलायेते स्म । वेत्रदण्डं स्वीकर्तुम् अत्थितवान् सः । "अद्य यदि भवान् ताडयेत् तर्हि परिस्थितिः विषमा भवेत्" इति वदन् अवाच्यैः शब्दैः अहं तं भृशं निन्दितवान् । एतस्मात् दिग्भ्रान्तः मातुलः मौनम् आश्रितवान् ।

अहं मम युतकम्, अर्धोरुकम्, आच्छादकं च स्वीकृत्य गृहात् निर्गतवान् । मातुलः मौनी आसीत् । 'प्रतिवेशिनी वृद्धा सूचनीया' इति कश्चन विचारः आगतः । तथापि विलम्बभीत्या अहं ताम् अविसूच्य एव ततः निर्गतः ।

सायङ्कालः आसन्नः आसीत् । मार्गदीपाः ज्वालिताः आसन् । नरसापुरं ततः अष्टमैल्दूरे । अमावास्यासमीपस्थानि आसन् तानि दिनानि । अतः सर्वत्र अन्धकारः आसीत् । तथापि अहं ततः प्रस्थितवान् । अन्धकारात् भीतिः न आसीत् । अज्ञातग्रामं गच्छन् अस्मि इति आतङ्कः अपि न आसीत् । अग्रे किम् इति प्रश्नपीडा अपि न आसीत् । अपूर्वां सिद्धिं प्राप्तवान् इव सन्तुष्टः आसम् अहम् । 'दुष्टत्वप्राप्तितः दूरं गच्छन् अस्मि' इति भावना आसीत् मनसि ।

विना चिन्तां रात्रौ दशवादने नरसापुरं प्राप्तम् । ग्रामसीमायां सरोवरम् आसीत् । तत्र पादौ प्रक्षालितौ । जलस्पर्शतः अङ्गुलीनां सन्धिषु वेदना अनुभूता । ताम् अपरिगणय्य अहं ग्रामं प्रविष्टवान् ।

ग्रामे विद्युद्दीपव्यवस्था न आसीत् । ग्रामसमित्या तत्र तत्र दीपव्यवस्था कृता आसीत् । नरसापुरं पूर्वं मया सकृत् दृष्टम् आसीत् इत्यतः मार्गपरिचयः स्थूलतया आसीत् । ग्राममध्ये स्थितं देवालयं प्रति गतवान् अहम् । देवालयस्य पुरतः मन्दः दीपप्रकाशः आसीत् । तत्र स्थित्वा पादयोः उपरि दृष्टिं पातितवान् अहम् । शिलाघट्टनात् उत्पन्नं रक्तं तत्र घनीभूतम् आसीत् । श्रान्तिः मां बाधते स्म । वस्त्राणि उपधानीकृत्य देवालयस्य पुरतः स्थितायां कृष्णशिलामय्यां भूमौ अहं शयनं कृतवान् । गाढा निद्रा माम् आलिङ्गितवती ।

प्रातः शैत्यकारणतः जागरणं जातम् । झटिति अहम् उत्थितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अग्रे कुत्र गन्तव्यं, किं करणीयम् ?' इति चिन्ता आरब्धा । मातुलग्रामे उदरपूरणस्य तु समस्या न आसीत् । अद्य सा समस्या पुरतः आगता । नञ्जुण्डार्यस्य कथनश्रवणमात्रेण अहं गृहात् निर्गतवान् आसम् । तेन काऽपि व्यवस्था अपि न कृता आसीत् । अविचार्य त्वरया अहं प्रस्थितवान् आसम् । अग्रे का वा गतिः ?

नञ्जुण्डार्यस्य मित्रस्य नाम स्वामी इति, सोऽपि अध्यापकः एव इति च स्मरामि स्म अहम् । अतः कञ्चित् पृष्ट्वा स्वामिवर्यस्य गृहस्य अभिज्ञानं प्राप्य अहं तत्र गतवान् । स्वामिवर्यः गृहे आसीत् । अङ्गणे विंशत्यधिकान् छात्रान् उपवेश्य पाठयन् आसीत् सः । अहं साक्षात् गत्वा तं नमस्कृतवान् ।

अश्वेतः दृढकायः च आसीत् स्वामिवर्यः । त्रिशंद्वर्षीयस्य तस्य मुखे विश्वासजनकः मृदुहासः विलसति स्म । युतकं धृतं चेदपि अन्तःस्थं शिवसूत्रं तु स्फुटं दृश्यते स्म ।

''कः भवान् वत्स !'' - पृष्टवान् स्वामिवर्यः ।

''नागूरुतः आगतः अस्मि श्रीमन् ! नञ्जुण्डार्यः मां प्रेषितवान् ।''

''एवम् । आगच्छतु, उपविशतु । सः पत्रं तु लिखितवान् आसीत् । तत् ह्यः एव प्राप्तं मया । तावता भवान् उपस्थितः । तथापि अलं चिन्तया । किं नाम भवतः ? पत्रे लिखितं भवदीयं नाम न स्मरामि इदानीम् ।''

''सत्यनारायणः इति मम नाम श्रीमन् !''

''अस्तु, उपविशतु । प्रमाणपत्रं किमपि आनीतं वा भवता ?''

''न । तत् आनेतव्यम् इति न जानामि स्म अहम् ।''

''अलं चिन्तया । नञ्जुण्डार्याय लिखित्वा तत् अहम् आनाययिष्यामि ।''

पाठार्थम् आगताः सर्वे बालाः यदा गताः तदा स्वामिवर्यः उक्तवान् - ''भवान् ब्राह्मणकुले जातः इति नञ्जुण्डार्यः पत्रे लिखितवान् आसीत् इति स्मरामि । यावत् वारान्नव्यवस्था न भविष्यति तावत् भवान् किं मम गृहे भोजनं कर्तुं शक्नुयात् ? वयं तु लिङ्गवत्कुलीयाः ।''

अहं झटिति उत्तरं किमपि न उक्तवान् । तदा स्वामिवर्यः एव पुनः उक्तवान् - ''अलं चिन्तया । मम गृहस्य प्रकोष्ठे वसन् भवान् स्वपाकं कृत्वा भोजनं कर्तुम् अर्हति ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इतः पूर्वं मया बहूनां सम्पर्कः प्राप्तः आसीत् । किन्तु स्वामिवर्यस्य सम्पर्कः अतिविलक्षणः । तस्य प्रभावः मम जीवनस्य गतिम् एव पर्यवर्तयत् ।

विशेषचिन्तनम् अकृत्वा एव स्वतन्त्रप्रवृत्त्या प्रेरितः सन् अहं नरसापुरम् आगतवान् आसम् । भविष्यतः विषये मम चिन्ता सर्वथा न आसीत् । नरसापुरस्य माध्यमिकशालायां तृतीयाकक्ष्यायां छात्रः अभवम् । स्वामिवर्यः समग्रे ग्रामे सुपरिचितः आसीत् । अतः द्वित्रदिनाभ्यन्तरे एव मम वारान्नव्यवस्था जाता । वासः तु स्वामिवर्यस्य गृहे ।

मातुलस्य ग्रामात् आगमनस्य अनन्तरं मासाभ्यन्तरे अभासत यत् आश्चर्यकरी शक्तिः मयि अस्ति इति । अध्ययने अहं कदापि पृष्ठवर्ती न आसम् । मातुलगृहे तु क्रौर्यस्य दास्यजीवनस्य च कारणतः पठने मया अवकाशः एव न प्राप्यते स्म । किन्तु अत्र तथा न आसीत् । अदृष्टपूर्वां प्रीतिं मयि प्रदर्शयतः स्म स्वामिवर्यः तत्पत्नी च । निर्भीकवातावरणम् आसीत् अत्र । कक्ष्यायाः सर्वाणि पुस्तकानि मया पठितानि । अग्रिमकक्ष्यायाः पुस्तकानि अपि पठितानि । सर्वे विषयाः स्मृतिपथे दृढमूलाः जाताः । एकस्य उदाहरणस्य सकृत् दर्शनानन्तरं कठिनातिकठिनस्य अपि गणितस्य उत्तरं लीलया प्राप्नोमि स्म । प्रतिदिनं प्रातः स्वामिवर्येण सह वायुविहारार्थं कासारतीरे अटन् अशुद्धया अपि आंग्लभाषया वार्तालापं करोमि स्म । मम सम्भाषणे स्थितान् व्याकरणदोषान् स्वामिवर्यः निवारयति स्म । नूतनपदानाम् अर्थं विवृणोति स्म अपि । आंग्लसम्भाषणप्रवृत्तिं प्रोत्साहयति स्म सः । अतः मासद्वयाभ्यन्तरे एव तादृशम् आंग्लभाषाज्ञानं मया सम्पादितं, यादृशं च प्रौढशालाच्छात्रस्य अपि न भवेत् । बालानां निमित्तं रचितानि लघूनि आंग्लकथापुस्तकानि मह्यम् आनीय ददाति स्म स्वामिवर्यः । तानि अहं पठामि स्म । यत्र अर्थः न ज्ञायते तत्र तं पृच्छामि स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वामिवर्यस्य गृहं प्रति विंशत्यधिकाः छात्राः पाठार्थम् आगच्छन्ति स्म । स्वामिवर्यः उत्तमः अध्यापकः यथा, तथैव उत्तमः इस्पीट्क्रीडापटुः अपि । रात्रौ भोजनं समाप्य क्लब्भवनं गतं चेत् प्रत्यागमनं मध्यरात्रसमये एव । पाठार्थम् आगतान् छात्रान् अहम् एव पाठयामि स्म । शालायाः अन्ये अध्यापकाः मां 'लघुस्वामिवर्यः' इति निर्दिशन्ति स्म ।

यदा छात्राः भवन्ति तदा पाठयामि स्म । अवशिष्टे समये स्वामिवर्येण आनीय दीयमानानि पुस्तकानि अर्थे अज्ञाते अपि पठामि स्म । कैश्चित् छात्रैः सह तरणार्थं कासारं गच्छामि स्म । कासारस्य जले उत्तानमुखः सन् शयानः प्लवनं करोमि स्म । कासारस्य मध्यम् अपि लीलया गच्छामि स्म । ग्रामे स्थितेषु तरणकुशलेसु अहम् एव प्रथमः जातः आसम् । मम जन्मग्रामे यत् सेनापतिपदम् आसीत् तत् एव इदानीं प्राप्तम् आसीत् मया । किन्तु तन्नाम्ना निर्देशः तु न आसीत् । अहं केषाञ्चित् अध्यापयिता अपि आसम् इत्यतः मम महत्ता प्रवृद्धा आसीत् । अत्र भयस्य सम्पर्कः न आसीत्, अमानुषप्रहरणम् अपि न आसीत् । निर्भयपरिसरे, स्वामिवर्यस्य तत्पत्न्याः च वात्सल्यमये परिवेषे, मम बुद्धिः ज्ञानं च वर्धते स्म । शरीरवृद्धिः अपि सम्यक् एव आसीत् । चतुर्दशवर्षीयः अपि अहम् उन्नतेन दृढेन शरीरेण शक्त्या च युक्तः आसम् ।

अत्रान्तरे काचित् घटना प्रवृत्ता, यस्याश्च कारणतः समग्रे नरसापुरे मम नाम ख्यातं जातम् । नरसापुरे पञ्चशताधिकाः ग्रामाः सन्ति । माध्यमिकशाला एव तत्रत्या महाविद्यासंस्था । तत्र कदाचित् चर्चास्पर्धा काचित् आयोजिता आसीत् । स्वामिवर्यः माम् अपृष्ट्वा एव मम नाम अपि स्पर्धार्थिनाम् आवलौ योजितवान् आसीत् । गृहम् आगत्य सः मां सूचितवान् – ''भवता अत्युत्तमरीत्या भाषणं करणीयम् । क्रिश्चियन्बालिका काचित् अस्ति खलु राचम्मा इति, सा भवत्कक्ष्यीया एव । 'मत्समानः भाषणकर्ता अन्यः कोऽपि विद्यालये नास्ति' इति सा भावयति । भवता सा अतिशयितव्या'' इति ।

''अहं भाषणं न जानामि खलु !''

''अलं चिन्तया । भवता कथापुस्तकादिकं पठ्यते खलु । तत्र यथा लिख्यते तथा प्रौढभाषया भाषणं करोतु । जयः भवतः एव भविष्यति ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राचम्मा अतिशयितव्या इति प्रबला इच्छा मयि अपि उत्पन्ना । चर्चाविषयः आसीत् – 'ग्रामजीवनं श्रेष्ठम्, उत नगरजीवनम्' इति । सायं चतुर्वादने सर्वे विद्यार्थिनः शालायाः मध्यभागे स्थिते चतुःशालरूपे अङ्गणे सम्मिलिताः अभवन् । सर्वे उपाध्यायाः अपि उपस्थिताः । इस्पीट्सङ्घस्य अध्यक्षः संवित्करः सीतारामय्यवर्यः एव सभाध्यक्षः । आदौ राचम्मा भाषणं कृतवती । नगरवासः एव श्रेष्ठः इति सा प्रतिपादितवती । ग्रामवासस्य प्रतिपादकत्वेन भाषणं कर्तुं यदा अहम् उत्थितः तदा स्वामिगृहपाठच्छात्राः, तरणसहचारिणः च करताडनं कृतवन्तः । मयि आवेशः आगतः । तेन उत्साहितः अहम् उच्चस्वरेण भाषणं कृतवान् । 'ग्रामतः एव नगरस्य सुस्थितिः । ग्रामे केदाराः भवन्ति, नगरे शून्यता भवति' इत्येवं निरन्तरं भाषणं कृतं मया । पुस्तके यानि वाक्यानि क्वचित् पठितानि आसन् तानि अप्रासङ्गिकानि चेदपि उद्धृतानि मया । मम भाषणस्य अनन्तरं सर्वे करताडनं कृतवन्तः । अन्येषां त्रिचतुराणां भाषणस्य अनन्तरं भाषणार्थम् उत्थितः अध्यक्षवर्यः मम वक्तृतायाः प्रशंसां कृत्वा – 'एषः भाविनि काले महापुरुषः भविष्यति' इति अवदत् । प्रथमपारितोषिकं मया प्राप्तम् । तेन अहम् आकाशस्पर्शी इव अभवम् । राचम्मया द्वितीयं पारितोषिकं प्राप्तम् ।

ततः ग्रामे मम नाम नितरां प्रसिद्धं जातम् । स्वामिवर्यस्य तु अपरिमितः सन्तोषः ।

चर्चास्पर्धायाः अनन्तरं कक्ष्यानायकत्वेन अहम् एव चितः । तत्काले, तत्रापि मम विद्यालये, कक्ष्यानायकत्वं नाम जनपदाधिकारित्वतुल्यं भवति स्म । सर्वे ततः भीताः भवन्ति स्म । अहं कस्यापि विषये दर्पं न प्रदर्शयामि स्म । कक्ष्यानायकत्वप्राप्तेः अनन्तरं राचम्मा मया सह सम्भाषणार्थं प्रयत्नं कृतवती । अभिमानवशात् अहं तम् अवकाशं तिरस्कृतवान् ।

सा न नरसापुरीया । नरसापुरात् मैल्दूरे एसुपुरनामकः ग्रामः अस्ति । तं ग्रामं प्रति गमनार्थं तत्कासारतीरस्थः एव मार्गः अनुसरणीयः भवति, यस्मिन् च अहं सदा तरामि । बहुवारं सा शालातः बहिः आत्मना अज्ञातं गणितादिकं मां पृष्टवती आसीत् । अहं सुमुखतया उत्तरं न दत्तवान् आसम् ।

कदाचित् अहं कक्ष्याम् अगत्वा मित्रैः सह तरणार्थं गतः । तरणसमये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इहप्रपञ्चः एव मया विस्मर्यते स्म । मध्याह्नसूर्यस्य किरणानां कारणतः प्रकाशमानानां तरङ्गाणां उपरि प्लवमानः अहं कासारमध्यं गतः । ततः तीरं यदा दृष्टं तदा तत्र मित्राणि न दृष्टानि । विलम्बकारणतः सर्वे मां परित्यज्य गताः आसन् । मन्दं तरन् अहं तीरम् आगतः । तत्र सोपानसमीपे मम वस्त्राणां पार्श्वे राचम्मा उपविष्टवती आसीत् । तीरं प्राप्तवन्तं मां सा उक्तवती - ''कियद्दूरं तरति भवान् ! द्रष्टृषु भीतिं जनयति एतत्'' इति ।

अहं प्रत्युत्तरं किमपि न दत्तवान् । मौनेन वस्त्राणि धृतवान् अहम् । सा मां पृष्टवती - ''किमर्थं मया सह सम्यक् सम्भाषणं न करोति भवान् ?'' इति ।

''किं सम्भाषणं करणीयम् अस्ति ?'' - अहं पृष्टवान् ।

''किमपि नास्ति । त्यजतु तं प्रस्तावम्'' इति उक्त्वा सा उत्थितवती । एवं वदन्त्याः तस्याः नेत्रे अश्रुपूर्णे आस्ताम् । अहं पीडाम् अनुभवन् तस्याः समीपं गत्वा पृष्टवान् - ''किमर्थं रोदिति भवती ।''

''किमर्थं मद्विषये विलक्षणव्यवहारः प्रदर्श्यते भवता ?''

''अलं रोदनेन । इतः परं सम्यक् व्यवहरिष्यामि'' इति वदन् अहं तस्याः सान्त्वनं कृतवान् । तदा मध्याह्नस्य एकवादनम् । सा बलात् मां स्वग्रामं नीतवती । यद्यपि मम भोजनं न समाप्तम् आसीत् तथापि तया सह अहं प्रस्थितः ।

राचम्मा प्रायः मत्समवयस्का । अथवा वर्षेण कनिष्ठा अपि स्यात् सा । नारीयोग्यः दीर्घः, सुन्दरः आकारः आसीत् तस्याः । ललाटे सङ्कलनचिह्नसदृशीं पत्रलेखां धरति स्म सा । ललाटे तिलकं किमपि न भवति स्म ।

अहं तां पृष्टवान् - ''किमर्थं तिलकं न धरति भवती ?''

''वयं क्रिस्तीयाः । अतः''

''क्रिस्तीया अपि भवती तिलकं धरति चेत् का क्षतिः ?''

''अहं न जाने । अस्माकं धर्मगुरुः तिलकधारणं न सहते ।''

सा सुन्दरी बालिका । अन्यासां यावत् ततोऽपि अधिकम् अलङ्कारं करोति स्म सा स्वस्य । प्रतिदिनं पाटलपुष्पं धरति स्म । हस्ते काचककङ्कणानि सदा भवन्ति स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कासारतीरमार्गेण हरितकेदारान् अतिक्रम्य नारिकेलोद्यानमध्यस्थं तस्याः ग्रामम् आवां प्राप्तवन्तौ । ग्रामस्य मध्यभागे मृच्छदावृतम् उन्नतं गृहम् आसीत् । गृहं परितः शाकोद्यानम् । 'एतत् एव अस्माकम् उपासनागृहम् (चर्च्) । अत्रैव धर्मगुरुः वसति'' इति उक्तवती राचम्मा ।

जोसेफगौडः इति तस्याः पितुः नाम । एसुपुरग्रामस्य प्रमुखः सः । मया सह प्रीतिपूर्वकं वार्तालापं कृतवान् सः । राचम्मा माम् अपि भोजनार्थं निमन्त्रितवती । अहं निराकृतिं प्रदर्शितवान् । तया पृष्टः अहम् उक्तवान् - ''भवन्तः क्रिश्चियन्मतीयाः । भवज्जातीयगृहेषु मया भोजनं न करणीयम्'' इति । एतत् श्रुत्वा सा मौनम् आश्रितवती । मां विना भोजनं कर्तुम् अनिच्छन्ती सा भोजनम् अकृत्वा यत्किञ्चित् खादितवती । अट्टम् आरुह्य शुष्कनारिकेलं गुडं च आनीय दत्तवती । भृष्टतण्डुलान् अपि आनीय दत्तवती सा । तस्याः पिता लवित्रं दत्त्वा 'नारिकेलजलं पीयताम्' इति उक्त्वा आवां नारिकेलोद्यानं प्रति प्रेषितवान् । उद्यानं गतः अहं स्वयं वृक्षम् आरुह्य नारिकेलानि पातितवान् । तत् दृष्ट्वा राचम्मा उक्तवती - ''अहो, भवतः सामर्थ्यम् ! स्पर्धायां सम्यक् भाषते । कक्ष्यायां प्रथमस्थानं प्राप्यते । सर्वत्र प्रथमस्थानं भवतः एव । तरणे तु भवान् मीनः इव । वृक्षारोहणे अपि सुनिपुणः । भवन्तम् अतिशेतुं कः समर्थः ?''

तस्याः वचनम् अभिमानपूर्णं स्निग्धं च आसीत् । तस्यै नारिकेलं यच्छन् अहम् उक्तवान् - ''भवती अपि न सामान्या ।''

उभौ अपि नारिकेलजलम् आतृप्ति पीतवन्तौ । सायं यावत् आवाभ्याम् उद्याने एव स्थितम् । आतृप्ति जल्पनं प्रवृत्तम् । मम ग्रामः, मातुलस्य व्यवहारः, नरसापुरं प्रति आगमनस्य कारणम् इत्यादीन् सर्वान् विषयान् अधिकृत्य अहम् उक्तवान् । मम मातुः मरणवार्तां श्रुत्वा अश्रूणि स्रावितवती सा । स्वगृहविषयम् अपि सा उक्तवती - ''मम पिता एव ग्रामस्य प्रमुखः । पितामहादयः कृषिनिरताः आसन् । पूर्वं कदाचित् ग्रामे महाज्वरपीडा उत्पन्ना इति श्रूयते । तदा कश्चन क्रिश्चियन्धर्मगुरुः अत्र आगत्य सर्वेभ्यः औषधं दत्तवान् । तत् एसुस्वामिना एव निर्मितम् इति सः बोधितवान् । अतः धर्मगुरोः आदेशानुगुणं तत् औषधं पीतवन्तः सर्वे एकैकशः क्रिस्तमतानुयायिनः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जाताः । मम अग्रजायाः पतिगृहं हासने अस्ति । मैसूरुनगरे अपि अस्माकं बान्धवाः सन्ति ।.....''

उद्यानस्थम् एकं सुन्दरं पाटलपुष्पं सा मह्यं दत्तवती । सूर्यास्तसमये अहं गृहं प्रति प्रस्थितवान् । मां प्रेषयितुं केदारान्तं यावत् आगता सा पृष्टवती - ''श्वः आरभ्य मया सह सम्यक् वार्तालापः क्रियते खलु ?''

''यदि न क्रियेत ?.....''

''न अङ्गीक्रियते मया । भवता वार्तालापः करणीयः एव ।''

''अस्तु'' इति उक्त्वा अहं ततः प्रस्थितवान् ।

तस्मिन् दिने मम मनः उल्लसितम् आसीत् । अर्धदिनाभ्यन्तरे आवयोः मैत्री जाता आसीत् । 'इतः परं सा न रोदनीया । मया एव आदौ वार्तालापः करणीयः' इति अहं सङ्कल्पं कृतवान् । राचम्मागृहं गतम् आसीत् मया इति यदा उक्तं तदा स्वामिवर्यः सविनोदम् उक्तवान् आसीत् - 'किं भवान् तां क्रिश्चियन्बालिकां परिणेष्यति ?' इति ।

* * *

नरसापुरं प्रति आगमनानन्तरं मासत्रयम् अतीतम् । माध्यमिकशालायाः मदीयं तृतीयं वर्षम् अपि अतीतम् । ग्रीष्मविरामः च आरब्धः । अत्रान्तरे काचित् घटना प्रवृत्ता । अहं ब्राह्मणः आसम् इत्यतः वारान्नार्थं गृहेषु भोजनं करोमि स्म । प्रातःकालिकोपाहारार्थं स्वामिवर्येण एकस्मिन् उपाहारमन्दिरे व्यवस्था कल्पिता आसीत् । स्वामिवर्यस्य तत्पत्न्याः च आत्मीयता यथा यथा प्रवृद्धा तथा तथा मयि भावः उत्पन्नः यत् एतस्मिन् गृहे मया जलम् अपि न पीयते यत् तत् अनुचितम् इति । केभ्यश्चित् दिनेभ्यः अहं स्वामिवर्यम् 'अग्रज'पदेन, तत्पत्नीं च 'भ्रातृजाया'पदेन च निर्दिशन् आसम् । स्वामिवर्यः तु माम् अनुजभावेन एव पश्यति स्म । 'एवं स्थिते अपि अत्र उपाहारादिसेवनं कुतो निवारणीयम्'' इति प्रश्नः मां तदा तदा बाधते स्म । तथापि तूष्णीम् आसम् । स्वामिवर्यः तत्पत्नी वा कदाचित् अपि आहारस्वीकारविषये अनुरोधं न कृतवन्तौ । अत्रान्तरे अग्रहारे काऽपि किंवदन्ती उत्पन्ना - 'सः बालकः लिङ्गवतां गृहेषु उपाहारं सेवते ।'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'एतादृशाय अस्मद्गृहे भोजनं कथं दातुं शक्येत ?' इति केचन अपस्वरम् उत्पादितवन्तः । एषा वार्ता स्वामिवर्येण अपि श्रुता । मया प्रातःकाले उपाहारः गुरुरायोपाहारमन्दिरे एव स्वीक्रियते इति तु सर्वजनवेद्यम् । अतः स्वामिवर्यगृहे मया उपाहारः न स्वीक्रियते इति ससाक्ष्यं प्रमाणीकर्तुं शक्यम् आसीत् । किन्तु प्रमाणीकरणं कस्य पुरतः ? कोऽपि प्रत्यक्षं किमपि न वदति स्म । गृहद्वयस्य जनाः व्याजम् उक्त्वा भोजनदानं स्थगितवन्तः । एतत् श्रुत्वा कदाचित् स्वामिवर्यः कोपेन उक्तवान् - ''रे सत्य ! शृणोतु अत्र ।''

''किम् ?''

''इतः परं कस्यापि गृहं प्रति भोजनार्थं गमनं मास्तु । अस्मद्गृहे एव भोजनं प्रचलतु भवतः । भवान् तु अनुपनीतः । आवश्यकतायां सत्यां शुद्धिम् अनन्तरकाले कारयाम ।''

तस्मिन् दिने मया सम्यक् चिन्तितम् । 'स्वामिवर्यस्य कथनम् एव युक्तम्' इति अभासत । अतः तस्मात् दिनात् भोजनार्थम् अन्यगृहं न गतम् एव । स्वामिवर्यः अवदत् - ''कोऽपि सङ्कोचः मास्तु भवतः । गृहम् आगतान् सर्वान् अपि बालकान् वस्तुतः भवान् एव पाठयति । अतः यावत् मया वेतनरूपेण प्राप्यते ततोऽपि अधिकं प्राप्यते गृहपाठतः । गृहार्थं मत्तोऽपि अधिकं सम्पादयति भवान् एव ।''

स्वामिवर्यः कदापि मम स्वाभिमानं न ह्रासयति स्म, प्रत्युत पोषयति स्म । तस्य वचनतः स्वावलम्बनबुद्धिः मयि उत्पन्ना । अहं पूर्णतः स्वामिवर्यस्य गृहे एव भोजनम् आरब्धवान् । ततः ब्राह्मणसमाजे पुनरपि कोलाहलः उत्पन्नः । किन्तु स्वामिवर्येण एतादृशविषयाः उपेक्षया दृष्टाः । द्वित्राणां ब्राह्मणानां पुरतः सः उच्चस्वरेण उक्तवान् - ''स्वमतस्य एकस्य बालकस्य भोजनव्यवस्थां कर्तुं सामर्थ्यं नास्ति । तथापि भाषणं तु सुमहत् । यदि एते तं बालकं स्वगृहेषु पोषितवन्तः स्युः तर्हि मया निषेधः तु न क्रियेत'' इति ।

ततः आरभ्य एषः वर्णसङ्करविवादः उपशान्तः ।

यदा स्वामिवर्यस्य पत्नी बहिष्ठा भवति स्म तदा अहम् एव पाकं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

करोमि स्म । तयोः अष्टवर्षीया पुत्री आसीत् । स्वामिवर्यस्य पत्नी कदाचित् विनोदेन वदति स्म - 'एषा पुत्री अग्रे भवते एव दीयते' इति ।

मम राचम्मायाः च गाढा मैत्री आसीत् । शालायाः समाप्तेः अनन्तरम् आवां प्रतिदिनम् अपि मिलावः स्म । प्रतिभानुवासरं मध्याह्ने अहं तस्याः गृहं गच्छामि स्म । ग्रीष्मविरामे मां द्रष्टुं सा द्विवारं नरसापुरम् आगतवती आसीत् । परस्परदर्शनार्थम् आवयोः कृते कारणविशेषः कोऽपि न आवश्यकः भवति स्म । परस्परदर्शनेच्छा एव कारणम् । ततः एव तृप्तिः ।

कदाचित् प्रातःकालिकस्य उपाहारस्य अनन्तरम् अहं तस्याः ग्रामं गतवान् । ''इतः क्रोशमिते दूरे अस्माकम् अन्यत् क्षेत्रम् अस्ति । तत्र तरणार्थं कासारः अपि अस्ति'' इति उक्तवती राचम्मा । 'तर्हि तत्रैव गच्छाम अद्य' इति उक्तवान् अहम् ।

उभौ अपि प्रस्थितवन्तौ । तस्याः हस्ते कश्चन लघुस्यूतः आसीत् । मार्गे कश्चन लघुग्रामः प्राप्तः । तं प्रविश्य एव अग्रे गन्तव्यम् आसीत् । ग्रामे कुटीरसदृशेषु गृहेषु भित्तौ चर्मवाद्यानि दृष्टानि । तत् दृष्ट्वा अहम् आश्चर्येण पृष्टवान् - ''अत्र के वसन्ति ?''

''एते पञ्चमाः । नरसापुरस्य रथोत्सवे वितानंनिर्माणं कुर्वन्ति एते एव । देवस्य पुरतः चर्मवाद्यवादनम् अपि एते एव कुर्वन्ति ।''

''एते पञ्चमाः इति ज्ञात्वा अपि भवती मां किमर्थम् अत्र आनीतवती ? इदानीं मया पुनः स्नानं करणीयम् ।''

''किमर्थं तथा ?''

''न जानाति भवती किमपि । ते तु पञ्चमाः ।''

सः ग्रामः मलिनतापूर्णः आसीत् । ग्रामवासिषु कस्यापि शरीरे योग्यं वस्त्रं न दृश्यते स्म । धृतानि अपि छिन्नवस्त्राणि पूर्वयुगे क्षालितानि इव भान्ति स्म । गृहात् अनतिदूरे एव बालैः मलविसर्जनं कृतं दृश्यते स्म । द्वित्राः मध्याह्नकाले अपि सुरापात्रं वहन्तः कुत्रापि गच्छन्तः दृष्टाः ।

क्षेत्रं प्रति गमनानन्तरम् एव अहं धृतानि वस्त्राणि अपनीय प्रक्षाल्य शोषणार्थं प्रसार्य जले पतितवान् । विशाले सरोवरे स्वेच्छया तरणं कृतवता मया तस्मात् कूपसदृशात् कासारात् तृप्तिः न प्राप्ता । अतः अचिरात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एव अहम् उपरि आगतवान् । श्वेतशिलाभिः निर्मितं भस्म धृत्वा अहं वृक्षस्य अधः उपविष्टवान् । राचम्मा पार्श्वे उपविष्टवती । आवाम् आतृप्ति जल्पनं कृतवन्तौ । जल्पनविषयस्य परस्परसम्बन्धः कोऽपि न भवति स्म । यदा अहं निरन्तरं वदन् भवामि स्म तदा राचम्मा विशाले नेत्रे उन्मील्य कुतूहलेन सर्वं शृणोति स्म ।

सद्यः पठितस्य कस्यचित् साहसमयग्रन्थस्य कथायाः वर्णने अहम् उद्युक्तः आसम् । राचम्मा स्यूततः दोसाखाद्यं बहिः आनीतवती । भागद्वयं कृत्वा एकं मम पुरतः स्थापितवती । कथावर्णननिरतः अहं किं कुर्वन् अस्मि इति अजानन् एव दोसाखाद्यस्य एकं खण्डं मुखे स्थापितवान् । तावता मया विवेकः प्राप्तः । मुखे स्थितं पार्श्वे पातितवान् अहम् । राचम्मा दिग्भ्रान्त्या एतत् दृष्टवती । क्रुद्धः अहं हस्तम् उन्नीय तां कपोले बलात् ताडितवान् । 'किं क्रियमाणम् अस्ति' इति अहम् एव न जानामि स्म । तस्याः नेत्राभ्याम् अश्रुधारा निर्गता । सा हस्ताभ्यां मुखं पिधाय रोदनम् आरब्धवती । अहं क्रोधमिश्रितस्वरेण उच्चैः उक्तवान् - ''अन्यासक्ताय मह्यम् उपायेन खाद्यं दत्त्वा मम जातिभ्रष्टता सम्पादनीया इति खलु आसीत् भवत्याः यत्नः ? कुतः आसादिता एषा कपटविद्या ?''

राचम्मा सगद्गदम् उक्तवती - ''भोः, भवतः पादौ गृहीत्वा प्रार्थये । क्षन्तव्या अहम् । देवनाम्ना शपे, मया दुरुद्देशेन तथा न कृतम् । भवदर्थम् एव भृष्टतण्डुलाः आनीताः आसन् मया । कथाश्रवणव्यग्रा अहं विस्मृतिवशात् तथा कृतवती । कृपया क्षाम्यतु माम् ।''

''सर्वं जानामि अहम् । एषोऽहं प्रस्थितः'' इति उक्त्वा अहं ततः प्रस्थितवान् । सः झटिति उत्थाय धावन्ती आगत्य मम हस्तौ गृहीतवती । अहं गमनं स्थगितवान् । सा तु रुदती एव आसीत् । द्वित्रनिमेषाभ्यन्तरे मम कोपः उपशान्तः । पुनः उभौ अपि वृक्षमूले उपविष्टवन्तौ । तां सान्त्वयन् अहम् उक्तवान् - ''मया ताडितं यत् ततः खिन्ना वा भवती ?''

''खेदः सर्वथा नास्ति मम । एतत् निमित्तीकृत्य भवता मया सह सम्भषणं कदापि न स्थगनीयम् । मया उद्देशपूर्वकं न कृतम् । क्षन्तव्या अहम् ।''

''अहम् अपि क्षमां याचे । ताडयता मया अनुचितं कृतम् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सा दोसां न खादितवती । उभौ अपि भृष्टतण्डुलान् आतृप्ति खादितवन्तौ । अहं नारिकेलवृक्षम् आरुह्य द्वित्राणि नारिकेलानि पातितवान् । तीक्ष्णस्य शिलाखण्डस्य साहाय्येन रन्ध्रं कृत्वा नारिकेलजलं पीतम् । अन्तःस्थः सारभागः अपि खादितः । अर्धघण्टाभ्यन्तरे आवां यथापूर्वं सुहृदौ जातौ । राचम्मा सद्यः आगतस्य धर्मगुरोः मन्त्रतन्त्रसामर्थ्यम् अधिकृत्य उक्तवती । 'सः महान्तम् अपि रोगं वध्यचिह्नलेखनमात्रेण उपशामयति' इति उदारहणपुरस्सरं निरूपितवती ।

कालः कथं गतः इति आवाभ्यां न ज्ञातम् । सायं पञ्चवादनपर्यन्तम् आवां जल्पनं कृतवन्तौ । बुभुक्षा आवां न अबाधत । अत्रान्तरे मम शरीरे शैत्यम् अनुभूतम् । अर्धघण्टाभ्यन्तरे शरीरे कम्पनम् उत्पन्नम् । ज्वरः अपि आरब्धः । राचम्मा ललाटं स्पृष्ट्वा तापम् अनुभूय भीता जाता । माम् उत्थाप्य मन्दगत्या गृहं नीतवती । गृहप्राप्त्यनन्तरं तस्याः पित्रा कृतं शय्याप्रसारणमात्रम् अहं स्मरामि । पुनः यदा स्मृतिः प्राप्ता तदा प्रातःकालः जातः आसीत् । तस्याः पिता मां किमपि पाययति स्म । मध्याह्नसमये ज्वरतापः किञ्चित् न्यूनः जातः । सायम् इतोऽपि उल्लाघता दृष्टा । एतावत् प्रवृत्तं चेदपि अहं तत्र उष्णीकृतक्षीरात् ऋते अन्यत् किमपि न सेवितवान् । गृहजनैः अपि न दत्तम् । सायं मयि सञ्चारसामर्थ्यं यदा आगतं तदा राचम्मा उक्तवती - ''अस्माकं धर्मगुरुः आशीर्वादपुरस्सरं याः गुलिकाः प्रेषितवान् तासां सेवनतः एव भवतः ज्वरः अपगतः । तं दृष्ट्वा आगच्छाम किम् ?'' इति ।

धर्मगुरोः दर्शनकुतूहलेन अहं प्रस्थितवान् । राचम्मायाः पिता गृहे न आसीत् । अतः सा एव मया सह आगतवती । क्रिस्तालयस्य पृष्ठभागे विशालाः त्रयः प्रकोष्ठाः आसन् । एकस्मिन् प्रकोष्ठे धर्मगुरुः सुखासने उपविश्य आंग्लपुस्तकं पठन् आसीत् । चिकित्सालये इव तत्र विविधानि औषधानि दृश्यन्ते स्म । धर्मगुरुः उन्नतः श्वेतकायः च । मुखे कृष्णवर्णीयं श्मश्रु । आप्रपदीनं श्वेतयुतकं च धृत्वा कटौ श्वेतवस्त्रपट्टिकया बन्धनं कृतवान् आसीत् सः । आवां दृष्ट्वा सः माम् उद्दिश्य पृष्टवान् - ''सत्यः इति खलु भवतः नाम ?''

तस्य उचारणरीतिः विलक्षणा आसीत् । 'मम नाम एतेन कथं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञातम् ?' इति चिन्तयन् एव अहम् ''आम्'' इति उक्तवान् । तेन दर्शिते दीर्घपीठे आवाम् उपविष्टवन्तौ । धर्मगुरुः मम नाडीं परीक्ष्य उक्तवान् - ''इदानीं सुस्थः अस्ति भवान् ।''

ततः तेन मम हस्ते तिस्रः गुलिकाः स्थापिताः । एसुदेवस्य लघुचित्रं दत्त्वा सः उक्तवान् - ''एतासु एकाम् इदानीम्, अपरां रात्रौ, अन्यां श्वः प्रातः च सेवताम् । उष्णजलं पिबतु । देवस्मरणं करोतु । रोगः पूर्णतया उपशान्तः भविष्यति । अग्रे कदाचित् यदा एतं ग्रामं प्रति आगम्यते तदा एतं देवालयं प्रति अपि आगच्छतु'' इति ।

यावत् आवां प्रत्यागतौ तावता स्वामिवर्यः राचम्मायाः गृहे उपस्थितः आसीत् । कमपि अनुक्त्वा ह्यः एव अहं गृहात् निर्गतः आसम् । अतः एव आतङ्केन माम् अन्विष्यन् आगतवान् आसीत् सः । अनुक्त्वा यत् आगतं तदर्थं सः मां तर्जितवान् । मम शरीरे अधिकशक्तिः न आसीत् । अतः राचम्मायाः पिता वृषभशकटं व्यवस्थाप्य स्वामिवर्येण सह मां प्रेषितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातुः मरणानन्तरं मया कदापि स्वग्रामः न गतः आसीत् । ग्रामे मम अनुजा पितामही च वसतः स्म । पितुः दर्शनेच्छा तु मम कदापि न आसीत् एव । अत्रान्तरे मया काचित् वार्ता श्रुता – 'पत्न्याः मरणस्य अनन्तरं पिता ग्रामे न वसति' इति । मातुः आभरणानि कानिचन गृहीत्वा सः तीर्थयात्रार्थं गतः इति श्रुतम् । वर्षानन्तरम् अपि न प्रत्यागतः आसीत् सः । ग्रामे पितामही पौत्री च वसतः । 'पुत्रस्य उपस्थितिः अनुपस्थितिः च समाना' इति मत्वा पितामही पौत्रीं पोषयन्ती दिनानि यापयति स्म । क्षेत्रतः प्राप्यमाणेन आयेन तयोः जीवनं कथञ्चित् प्रचलति स्म ।

'कदाचित् वा गृहं प्रति गत्वा आगन्तव्यम्' इति वदति स्म मम मनः । ग्रामस्मरणमात्रेण मां प्रेम्णा लालितवत्याः मातुः मुखं स्मृतिपटले दृश्यते स्म । अन्यग्रामे वसन् अहं स्वामिवर्यस्य सहवासेन, पठनेन, इतरव्यापारैः च मातुः स्मृतिं तिरोदधामि स्म । ग्रामगमनात् दुःखम् उद्गतं भवितुम् अर्हति स्म । अतः एव ग्रामगमनस्मरणमात्रेण मनः दूयते स्म । अन्यच्च मातुलग्रामम् अतिक्रम्य एव मम ग्रामः गन्तव्यः आसीत् । मातुलग्रामाभिमुखं पदनिक्षेपः एव मयि जुगुप्सां जनयति स्म । एवं जन्मस्थलस्य, गृहस्य, बान्धवानां च सम्बन्धतन्तुं च्छित्वा नूतने स्थले अहं जीवामि स्म । जीवनरीतिविषये अहं न चिन्तयामि स्म । तादृशचिन्तनार्थं योग्यं वयः अपि न आसीत् मम ।

माध्यमिकशालायाः अन्तिमे वर्षे अहम् आसम् । परीक्षार्थं पञ्चरूप्यकात्मकं शुल्कं दत्तम् आसीत् अपि । परीक्षार्थं पठनस्य चिन्ता तु मम सर्वथा न आसीत् । यतः पाठ्यपुस्तकस्थाः सर्वे अपि विषयाः मम मुखे एव आसन् । स्वामिवर्यस्य गृहं प्रति पाठार्थम् आगच्छन्तौ उभौ मत्कक्ष्यीयौ मया एव पाठ्येते स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राचम्मा अपि बुद्धिमती आसीत् । अतः सा अपि आदिनं न पठति स्म । यथापूर्वम् आवां सहैव भवावः स्म । एतावतां दिनानां सहवासात् आवयोः स्नेहः गभीरः जातः आसीत् । परस्परदर्शनं विना एकं दिनम् अपि स्थातुं न शक्यते स्म आवाभ्याम् । प्रायः भानुवासरे मध्याह्ने अहं तस्याः गृहं गच्छामि स्म । क्वचित् क्रिस्तमन्दिरम् अपि गच्छामि स्म । कृष्णश्मश्रुकः धृतश्वेतयुतकः धर्मगुरुः क्रिस्तविषये मां किमपि किमपि बोधयति स्म । हिन्दुदेवान् अधिकृत्य विविधान् प्रश्नान् पृच्छति स्म अपि ।

मार्च्मासे परीक्षा अपि समाप्ता । परीक्षालेखनार्थं वयं सर्वे तालूकुमुख्यस्थलं चलुवरायपत्तनं प्रति गतवन्तः । परीक्षानन्तरं राचम्मायाः दर्शनं न जातम् आसीत् । नरसापुरे समययापनं कष्टकरम् आसीत् । अतः एकदा मध्याह्ने राचम्मायाः गृहं प्रति गच्छन् अहं सरोवरतीरे चलन् आसम् । तदा उपाहारमन्दिरस्वामी गुरुरायः इस्पीट्सङ्घस्य कार्यदर्शी रेवण्णः च अभिमुखम् आगतौ । तयोः आत्मीयपरिचयः आसीत् मम । 'किमपि कार्यम् अस्ति । आवाभ्यां सहैव आगच्छतु' इति वदन्तौ तौ मां नरसापुरं प्रत्यानीतवन्तौ । स्वामिवर्यस्य गृहस्य प्राप्तेः अनन्तरं रेवण्णः पृष्टवान् - ''किं तां क्रिस्तीयकन्यकां परिणेतुं गच्छन् आसीत् भवान् ?''

गुरुरायः मध्ये उक्तवान् - ''विवाहः क्रिस्तमतानुसारं क्रिस्तमन्दिरे एव प्रचलेत् । तस्यां प्रबला अनुरक्तिः भवतः । एवं ननु ?''

तयोः कथनस्य तात्पर्यं न अवगतं मया । अहं तु किञ्चिदपि विचलितः न जातः । तयोः ध्वनौ कोपः भर्त्सनं वा न आसीत् । गुरुरायः स्वामिवर्यं पश्यन् उक्तवान् - ''भवतः शिष्यः एषः इदानीं जामातृत्वसुखप्राप्त्यर्थम् एसुपुरं प्रति गच्छन् आसीत् । मार्गे आवां मिलितौ । बलात् एषः आनीतः अत्र । प्रवर्तमानं सर्वं जानाति खलु भवान् ?''

द्वित्रनिमेषाणाम् अनन्तरम् अदृष्टपूर्वेण गाम्भीर्येण स्वामिवर्यः माम् उक्तवान् - ''भोः, इतः परं तया सह न मेलनीयं भवता । तस्याः ग्रामे पदम् अपि न स्थापनीयम् । अवगतं खलु ?''

अहं मौनेन एव आसम् ।

''यदि पुनः तत्र भवतः गमनं स्यात् तर्हि अहं तूष्णीं न तिष्ठेयम् । स्मरतु एतत् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वामिवर्यस्य वचनात् अहं खिन्नः । मया कः अपराधः कृतः ? 'पूर्वं यदा अहम् एसुपुरे अस्वास्थ्यकारणतः शयनं कृतवान् आसं तदा स्वामिवर्यः किञ्चित् तर्जितवान् आसीत् । तदनन्तरम् एतद्विषये किमपि न उक्तम् आसीत् एव । अद्य तु कोपेन वदन् अस्ति । मम पुरतः स्थितौ एतौ तं पिशुनवचनं किमपि उक्तवन्तौ स्यातां वा ? मया राचम्मा दृष्टा चेत् एतयोः किं वा छिन्नं भवेत् ? तया स्पृष्टं जलम् अपि मया अद्यावधि न पीतम् । अग्रे अपि न पास्यामि । एवं स्थिते अपि किमर्थं तर्जनं प्राप्तं मया ? ..... किमर्थम् ..... ?'

अहम् उत्थाय गत्वा मदीये प्रकोष्ठे शयनं कृतवान् । मनः निराशापूर्णं खिन्नं च आसीत् । बहिः इस्पीट्क्रीडायां मग्नानां तेषां त्रयाणां सम्भाषणम् अप्रयत्नेन एव मया श्रूयते स्म । 'सः एसुपुरस्य धर्मगुरुः महाधूर्तः । सः पार्श्वस्थां पल्लीं प्रति तदा तदा गच्छति । अस्वस्थेभ्यः किमपि औषधं ददाति निश्शुल्कम् । सूच्यौषधदानावसरे 'एतस्य अन्तः एसुतीर्थम् अस्ति' इति वदन् जनेषु एसुविषये श्रद्धां जनयितुं प्रयतते । गुलिका एसुप्रसादात् प्राप्ता इति वदति । एवं कृत्वा पल्लीवासिनः त्रिंशद्गृहीयान् अपि वशीकृतवान् अस्ति सः । अन्यानि अपि बहुविधानि प्रलोभनानि दर्शयति सः । एवं सर्वं कृत्वा ह्यः एव सः सर्वान् पल्लीवासिनः क्रिस्तमतीयान् कृतवान् अस्ति । इतः परं सा पल्ली क्रिस्तपल्लीनाम्ना निर्दिश्यते इति श्रूयते । .....'

रेवण्णः वदति स्म - ''कदाचित् ते अस्मान् अपि क्रिस्तमतीयान् करिष्यन्ति ।''

तदा स्वामिवर्यः उक्तवान् - ''इदानीं सर्वं सुस्पष्टम् । यदा यदा अस्मच्छिष्यः तं ग्रामं गच्छति स्म तदा सः धर्मगुरुः क्रिस्तचित्रं ददाति स्म । यदा एषः अस्वस्थः आसीत् तदा औषधं दत्त्वा रोगं निवार्य - 'रोगनिवारणम् औषधबलात् न जातम्, प्रत्युत एसुकृपया एव जातम्' इति बोधितवान् आसीत् सः ।''

रेवण्णः अन्ते उक्तवान् - ''भवान् शिष्यं निगृह्णातु । सः वृद्धिं गच्छेत् इति अस्माकम् अपेक्षा । तस्याः कन्यकायाः आकर्षणेन गतः सः धर्मगुरोः सहवासात् कुलभ्रष्टः न भवेत् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मम मनसि अपि विचारकोलाहलः । सा पल्ली मया अपि गता आसीत् । तत्र वसन्तः सर्वे पञ्चमाः । सः ग्रामः यदा प्रविष्टः तदा मया शुद्ध्यर्थं वाटिकाकूप्याः जलेन स्नानं कृतम् आसीत् । 'सः क्रिस्तधर्मगुरुः कीदृशः धूर्तः स्यात् । इतःपरं सः न द्रष्टव्यः एव । राचम्मा ? अन्यः कोऽपि यथा न जानीयात् तथा गत्वा सा तु द्रष्टव्या ।'

रेवण्णस्य गुरुरायस्य च निर्गमनस्य अनन्तरं अहं स्वामिवर्यसमीपं गत्वा उक्तवान् - ''अहं किमपि न जानामि स्म । इतः परम् अहं तं ग्रामं न गमिष्यामि ।''

''साधु ! साधु !'' इति साधुवादः उक्तः स्वामिवर्येण । तस्य वचनं निष्कपटम् आसीत् ।

अनन्तरदिने प्रातः सूर्यकिरणानाम् उदयात् पूर्वम् एव अहं सरोवरतीरमार्गं परित्यज्य केदारमार्गेण एसुपुरं गतवान् । राचम्मायाः पिता केदारं गच्छन् मध्येमार्गं मिलितः । ततः ज्ञातं यत् राचम्मा ग्रामे नास्ति इति । हासनस्थं भगिन्याः गृहं गतवती आसीत् सा । विरामसमाप्तिं यावत् सा तत्रैव स्थास्यति इति उक्तवान् राचम्मापिता । यद्यपि सन्तोषेण एव सः मया सह वार्तालापं कृतवान्, तथापि मम मुखं म्लानं जातम् आसीत् । अहं खेदेन नरसापुरं प्रत्यागतवान् । पुनः एसुपुरं प्रति नैव गतं मया ।

इतः पक्षाभ्यन्तरे नरसापुरे नृसिंहदेवस्य रथोत्सवः प्रवृत्तः । एतदवसरे पल्लीवासिनः वितानानिर्माणार्थं वाद्यवादनार्थं वा न आगताः । प्रत्युत विंशत्यधिकाः जनाः सम्भूय आगत्य मन्दिरप्रवेशार्थं यत्नं कृतवन्तः । अर्चकः तेषां प्रवेशं निवारितवान् । तदा पल्लीवासिनः उक्तवन्तः - ''वयम् इदानीं पञ्चमाः न, अपि तु क्रिस्तमतीयाः । देवालयं पञ्चमाः प्रवेष्टुं न अर्हन्ति इति खलु भवतां शास्त्रं वदति ? क्रिस्तमतीयानां प्रवेशे को दोषः ?''

अन्ते दीर्घचर्चायाः अनन्तरं धर्माधिकारिणा निर्णयः श्रावितः - 'पल्लीवासिनः इदानीं पञ्चमाः न इत्यतः अन्यैः सह ते अपि मन्दिरं प्रवेष्टुम् अर्हन्ति' इति । पल्ल्यां गृहत्रयस्य जनाः इतोऽपि क्रिस्तमतं न अङ्गीकृतवन्तः आसन् । क्रिस्तमतम् अङ्गीकृतं चेत् नृसिंहमन्दिरस्य प्रवेशः शक्यते इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञात्वा तेऽपि पक्षाभ्यन्तरे क्रिस्तमतीयाः जाताः ।

ग्रीष्मविरामः समाप्तप्रायः आसीत् । परीक्षापरिणामः इतोऽपि घोषितः न आसीत् । अहं प्रथमश्रेणीं प्राप्स्यामि इत्यत्र स्वामिवर्यस्य सन्देहः एव न आसीत् । अग्रे पठनीयम् एव इति मम मनसि प्रबला इच्छा आसीत् । किन्तु एतदर्थं साहाय्यं प्रोत्साहः च कुतः प्राप्येत इति तु न चिन्तितम् आसीत् । भविष्यविषये अकल्पिता काचित् श्रद्धा मयि उत्पन्ना आसीत् । प्रौढशाला गन्तव्या, महाविद्यालयीयः विद्याभ्यासः अपि समापनीयः, बहूनि पुस्तकानि पठनीयानि इति एतावत् एव मम मनसि आसीत् । उत्तमम् उद्योगं प्राप्य धनं सम्पाद्य विराजनीयम् इति इच्छा लेशमात्रेण अपि न आसीत् मयि ।

फलितांशः प्रकटितः । स्वामिवर्यस्य निरीक्षा सफला जाता । अहं तालूकुकेन्द्रस्य एव प्रथमः आसम् । राचम्मा अपि उत्तीर्णतां प्राप्तवती आसीत् । अग्रे ..... ?

स्वामिवर्येण एकः उपायः सूचितः - ''विद्यालयप्रवेशार्थं तात्कालिकव्ययार्थं च अहं किञ्चित् धनं दास्यामि । भवान् चलुवरायपत्तनं गत्वा प्रौढशालां प्रविशतु । भवज्ञातीयाः कुर्वन्ति किल - पात्रं गृहीत्वा 'भवति भिक्षां देहि' इति उक्त्वा भिक्षायाचनं - तदेव भवान् अपि करोतु । तेन उदरपूरणसमस्या परिहृता भविष्यति । सामान्यव्ययार्थं यावत् आवश्यकं तावत् गृहपाठद्वारा भवान् सम्पादयतु । भवतः सम्पादनं यावत् न भवति तावत् अहं किञ्चित् अर्थसाहाय्यं करिष्यामि'' इति ।

चलुवरायपत्तने स्वामिवर्यस्य परिचितः कोऽपि आसीत् । तस्य साहाय्यात् गमनसमनन्तरम् एव वासार्थं मया कश्चन प्रकोष्ठः प्राप्तः । चतुर्षु स्थलेषु गृहपाठः अपि प्राप्तः । ते सर्वे सप्तमकक्ष्यां प्रति गन्तुम् उद्युक्ताः छात्राः । 'सद्यः एव सप्तमकक्ष्याम् उत्तीर्णः एषः एतान् समर्थतया पाठयितुं किं शक्नुयात् ?' इति सन्देहः छात्राणां पितृणां मनसि उत्पन्नः । मम वयः तदा षोडषवर्षमात्रात्मकम् । अतः पाठसमये पितरः मत्पुरतः एव उपविष्टवन्तः द्वित्राणि दिनानि । ततः ते विगतसन्देहाः जाताः । चतुर्णां पाठतः मया प्रतिमासं पञ्चदश रूप्यकाणि प्राप्यन्ते स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मम उपनयनम् इतोऽपि न सञ्जातम् आसीत् । मदर्थं तं विधिं को वा निर्वर्तयेत् ? 'विद्याभ्यासार्थम् असत्यकथनं न दोषाय' इति विचिन्त्य अहम् अर्धाणकेन एकं यज्ञोपवीतं क्रीत्वा धृतवान् । प्रतिदिनम् अपि मध्याह्ने भिक्षार्थं गच्छामि स्म । द्विवारं भोजनार्थं यावत् आवश्यकं तावत् ततः प्राप्यते स्म । अर्थव्यवस्था अपि कथञ्चित् भवति स्म एव । 'प्रौढशालाच्छात्रः अस्मि अहम्' इति अभिमानः मम । 'इतः परं वर्षत्रयान्तरम् अहम् अपि अध्यापकस्य यावत् तावत् ज्ञानं प्राप्स्यामि' इति चिन्तयन् अभिमानम् अनुभवामि स्म ।

दिनानि गतानि चेदपि मनसः तृप्तिः तु न आसीत् अत्र । राचम्मायाः स्मरणं तदा तदा मां बाधते स्म । सा कुत्र अस्ति इति न ज्ञायते स्म । कक्ष्यायाम् अहम् एव प्रथमः भवामि स्म अत्रापि । अध्यापकेन आंग्लभाषया पृष्टस्य प्रश्नस्य उत्तरम् आंग्लभाषया एव दातुं समर्थः कक्ष्यायाम् अहम् एकः एव आसम् । विद्यालयस्य पाठः अपर्याप्तः भवति स्म मम कृते । 'अधिकं ज्ञातव्यम्' इति अहर्निशं चिन्तयतः मम कृते शालायाः शुकपाठः सर्वथा अपर्याप्तः आसीत् । नरसापुरे तु स्वामिवर्यः विद्यालयीयग्रन्थागारात् पुस्तकानि आनीय ददाति स्म । ग्रामत्यागात् पूर्वम् अहं तत्र उपलभ्यमानान् सर्वान् ग्रन्थान् पठितवान् आसम् । अस्माकं विद्यालये ग्रन्थभाण्डारनाम्ना एकः प्रकोष्ठः तु आसीत् । किन्तु ततः पुस्तकानि तु प्राप्तुं न शक्यते स्म । विद्यालयस्य कस्यापि अध्यापकस्य वैयक्तिकः परिचयः न आसीत् मम । माध्यमिकशालायां तु सर्वेषाम् आदरपात्रतां गतः आसम् अहम् । विद्यालयप्रथमत्वेन, वाग्मित्वेन च तत्र ख्यातः आसम् । सर्वे अध्यापकाः माम् आदरेण पश्यति स्म । प्रौढशालां प्रति आगमनस्य अनन्तरम् एकस्यां चर्चास्पर्धायाम् अहं भागं गृहीतवान् । तथापि कोऽपि अध्यापकः मयि विशेषासक्तिं न प्रदर्शितवान् । तस्य कारणम् अनन्तरकाले मया ज्ञातम् । छात्रयोग्यप्रकाशमयशक्त्या युक्तोऽपि अहं कश्चन भिक्षान्नजीवी छात्रः आसम् । अतः एव तेषाम् अनादरः मयि । अन्योऽपि दुर्गुणः आसीत् मयि । कक्ष्यायाम् अध्यापकस्य अभिप्रायः मम सम्मतः न भवति चेत् विना सङ्कोचम् उत्थाय धैर्येण प्रश्नं करोमि स्म । एतां प्रवृत्तिं स्वामिवर्यः मयि उप्तवान् आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुख्योपाध्यायः कदाचित् मम कक्ष्यायां पाठयन् - ''जगति सर्वधर्मेभ्यः अपि हिन्दुधर्मः एव श्रेष्ठः'' इति उक्तवान् ।

अहम् उत्थाय पृष्टवान् आसम् - ''केन आधारेण तस्य श्रेष्ठता अङ्गीकरणीया अस्माभिः ?'' इति ।

एतेन कुपितः मुख्याध्यापकः - 'अयोग्य, गेट् औट्' इति आदिश्य मां बहिः प्रेषितवान् आसीत् । कक्ष्यायां प्रश्नं प्रष्टुं भिक्षान्नजीविनः छात्रस्य को वा अधिकारः ?

प्रौढशालाप्रवेशानन्तरं पञ्च मासाः अतीताः । मासत्रयानन्तरं मम प्रथमवर्षीयम् अध्ययनं परिसमाप्यते स्म । एतदभ्यन्तरे एव अनूह्या काचित् घटना घटिता -

अनुपनीतः ब्राह्मणच्छात्रः भिक्षायाचनं न कुर्यात् इति नियमः आसीत् । 'आपणात् यज्ञोपवीतं क्रीत्वा धृतवान् आसम्' इति मया पूर्वम् उक्तं खलु ? एषा वार्ता अग्रहारे केनचित् ज्ञाता इति मन्ये । सम्प्रदायनिष्ठानां दृष्ट्या एषः अक्षम्यः अपराधः । कर्णाकर्णिकया एषा वार्ता सर्वत्र प्रसृता ।

एकदा अहं मध्याह्नकाले यथापूर्वं भोजनपात्रं गृहीत्वा भिक्षार्थं गतवान् । पञ्चभ्यः गृहेभ्यः भिक्षां प्राप्य अहम् अग्रे गतः । तदा काचित् गृहिणी उपहासपूर्वकम् उक्तवती - ''अनुपनीतेन भिक्षायाचनं न करणीयम् इति न ज्ञायते वा बाल ? किमर्थम् एवम् असत्यम् उच्यते ?'' इति ।

ततः अहम् अग्रे गतवान् । तस्य गृहस्य स्वामी उक्तवान् - ''अल्पे एव वयसि एवं मिथ्यायज्ञोपवीतधारणं कृतवान् भवान्, न जाने, अग्रे किं करिष्यति इति'' इति ।

तस्मात् गृहात् अपि भिक्षा न स्वीकृता मया । तत् दृष्ट्वा गृहस्वामी पुनः उक्तवान् - ''भिक्षान्नयाचकस्यापि बालस्य कियत् धाष्टर्यम् !''

मध्याह्ने आतपे अटितं यत् ततः मम शिरः भ्रमति स्म । अनतिदूरे एव स्थितस्य जीर्णदेवालयस्य पुरतः किञ्चित्कालम् उपविश्य अहम् साक्षात् मम प्रकोष्ठं गतवान् । भिक्षान्नखादने इच्छा न आसीत् । अतः कञ्चित् शुनकम् आहूय भिक्षान्नं समग्रं तस्मै समर्पितवान् । कोषे विद्यमानं धनम् उपयुज्य उपाहारगृहं गत्वा भोजनं समापितं मया । मध्याह्ने शालां प्रति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मया न गतम् । अग्रिमाध्ययनविषये काऽपि योजना मम मनसि रूपं प्राप्नुवती आसीत् । चिन्तयन् एव अहं निद्रावशं गतः । यदा जागरणं प्राप्तं तदा रात्रेः एकवादनम् !

शास्त्रोक्तक्रमेण यज्ञोपवीतम् अधृत्वा भिक्षान्नं प्राप्तम् इति तु तेषां प्रमुखः आक्षेपः आसीत् । किन्तु एवं किमर्थं क्रियते इति केनापि न चिन्तितम् एव । कीदृशं ब्राह्मण्यम् एतत् ! गतस्य विषये अधिकं चिन्तयितुं मनः न उत्सहते स्म । दिनद्वयतः विद्यालयं प्रति न गतम् आसीत् मया । कोषे पञ्चषाणि रूप्यकाणि आसन् । तानि अपि यदा व्ययितानि भविष्यन्ति तदा किं वा करणीयम् ? जीवननिर्वहणार्थं कोऽपि उद्योगः अन्वेष्टव्यः । अल्पवयस्काय मह्यं को वा उद्योगं दद्यात् ?

तस्मिन् एव दिने सायम् अकस्मात् स्वामिवर्यः तत्र आगतः । 'अहं मुख्याध्यापकपदवीं प्राप्तवान् अस्मि । अतः नरसापुरतः तुमकूरुजनपदस्य कल्लनकेरेग्रामं प्रति गच्छन् अस्मि' इति आगमनकारणं विवृतवान् सः ।

स्वामिवर्यः मुख्याध्यापकत्वं प्राप्तवान् इति ज्ञात्वा मया महान् आनन्दः प्राप्तः । तथापि चत्वारिंशत्मैल्दूरं गमिष्यति सः इति अल्पः खेदः ।

रात्रौ शयनसमये मदीया स्थितिः विवृता मया । सर्वं श्रुत्वा स्वामिवर्यः उक्तवान् - ''क्रिश्चियन्जातीयाः भवादृशाय बुद्धिमते छात्राय अशन-भोजनादिव्यवस्थां निश्चयेन करिष्यन्ति । विद्यार्थिवेतनम् अपि दास्यन्ति । अस्मज्जातीयानां तु एषा दुरवस्था'' इति ।

रात्रौ दीर्घकालं यावत् आवाभ्यां वार्तालापः कृतः । यदा उभाभ्याम् अपि निद्रा प्राप्ता तदा उषःकालः सन्निहितः आसीत् । प्रातः अष्टवादने यावत् अहं जागरितः तावता स्वामिवर्यः उत्थाय बहिः गतः आसीत् । स्नानादिकं मम यावत् समाप्तं तावता प्रत्यागतः सः - ''भवान् पठनं सर्वथा मा स्थगयतु । भवदर्थम् एकम् उद्योगम् अन्विष्टवान् अस्मि । कष्टं भवेत्, तथापि न अन्या गतिः । अवशिष्टं मासत्रयं कथञ्चित् यापयतु । ततः पश्याम'' इति उक्तवान् ।

''कः सः उद्योगः ?'' - अहं पृष्टवान् ।

''एतन्नगरस्य चलनचित्रमन्दिरस्य स्वामी सुपरिचितः । भवतः विषयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मया तत्पुरतः उक्तः । भवता प्रथमस्य द्वितीयस्य च प्रदर्शनस्य काले द्वाररक्षककार्यं करणीयम् । मम कथनस्य प्रभावतः स्वामी भवते अधिकम् एव वेतनं दास्यति । प्रतिमासं विंशतिः रूप्यकाणि दास्यन्ते । पाठनात् अपि किञ्चित् प्राप्यते खलु ? ततः निर्वहणं भवेत् ।''

विद्याभ्यासस्य अपरित्यागः मम ललाटे लिखितः आसीत् । तस्मिन् एव दिने मां चित्रमन्दिरस्वामिनः समीपं नीत्वा परिचयं कारयित्वा स्वामिवर्यः निर्गतः । प्रस्थानात् पूर्वं मह्यं तात्कालिकव्ययार्थं दश रूप्यकाणि दत्त्वा - ''भवान् सम्यक् पठिष्यति इत्यत्र मम नास्ति सन्देहः । किन्तु चित्रमन्दिरे कार्यम् एव क्लेशाय । अन्योद्योगिनां सहवासः आधिक्येन मास्तु । उपाहारमन्दिरोद्यमे, चित्रमन्दिरोद्यमे, नाटकमन्दिरोद्यमे च ये भवन्ति ते अचिरात् एव भ्रष्टमार्गानुयायिनः भवन्ति । अतः जागरूकता भवतु । काले काले पत्रं लिखतु'' इति उक्तवान् स्वामिवर्यः ।

चित्रमन्दिरे कार्यं कृत्वा पठनं क्लेशाय एव भवति स्म । द्वितीयप्रदर्शनस्य समाप्तिः रात्रौ द्विवादने । तावत् जागरणं करणीयम् एव भवति स्म । ततः आगत्य प्रकोष्ठे शयनं कृतं चेत् निद्रा न आलिङ्गति स्म । अतः प्रातः उत्थाने विलम्बः भवति स्म । मध्याह्ने भोजनानन्तरं कक्ष्यायाम् उपवेशनसमये निद्रा बाधते स्म । निद्राकरणं दृष्टं चेत् अध्यापकाः तर्जयेयुः इति चिन्तयित्वा आर्द्रकरवस्त्रेण तदा तदा नेत्रे मार्जयामि स्म ।

चित्रमन्दिरस्य पार्श्वे स्थिते भोजनालये अहं भोजनं करोमि स्म । रात्रौ शैत्यं बाधते स्म । शैत्यबाधानिवारणार्थं धूमपानाभ्यासः आरब्धः मया । अन्ये द्वाररक्षकाः तावत् अशिक्षिताः । तेषां वार्तालापविषयः अन्यः एव भवति स्म । अतः तैः सह वार्तालापार्थं मनः न उत्सहते स्म । तथापि गच्छता कालेन मनः तदर्थं सिद्धं जातम् । चित्रप्रदर्शनकाले द्वारपार्श्वे स्थित्वा दृष्टम् एव चित्रं पौनःपुन्येन पश्यामि स्म । चित्रस्य गीतानि, नायकस्य अभिनयः, खड्गचालनकर्तुः वीरस्य धैर्यं, स्ववादम् उपस्थापयतः न्यायवादिनः वाक्कौशलम् इत्यादयः मया सम्यक् अभ्यस्ताः । भिक्षान्नकाले आत्मावहेलनं प्रचलति स्म । एतज्जीवनतः स्वावलम्बिता अभ्यस्ता । दिनयापनसमस्या परिहृता आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

प्रशान्तायां मम जीवनगतौ पुनः कश्चन महातरङ्गः उद्भूतः । कदाचित् कक्ष्यायाम् उपविष्टः आसम् । तदा सेवकः एकां चिटिकाम् आनीय अध्यापकाय दत्तवान् । तत् दृष्ट्वा अध्यापकः - ''सत्यनारायण ! मुख्याध्यापकः भवन्तं द्रष्टुम् इच्छति । गच्छतु तावत्'' इति आदिशत् ।

अहं मुख्याध्यापकस्य प्रकोष्ठं गतवान् । 'उपविश' इति छात्रम् उद्दिश्य कथनम् अनुचितं मन्यते स्म मुख्याध्यापकः । स तु गान्धिवादानुयायी अपि ! अतः अनुशासनविषये विशेषादरः तस्य !

''भवान् चित्रमन्दिरे उद्योगं करोति इति श्रुतम् । किम् एतत् सत्यम् ?'' - गाम्भीर्येण पृष्टवान् सः ।

''आं, श्रीमन् !'' - धैर्येण उत्तरं दत्तवान् अहम् ।

''भवता तत् कार्यं परित्यक्तव्यम्'' - आदिष्टं तेन । मौनम् एव मम उत्तरम् आसीत् ।

''मम विद्यालये पठन्तः छात्राः सर्वे सद्व्यवहारवन्तः स्युः इति मम अपेक्षा । चित्रमन्दिरे कार्यं कुर्वतां कृते अत्र अवकाशः नास्ति ।''

अहं मम आर्थिकीं दुरवस्थां विवृत्य विनयेन उक्तवान् - ''यदि भवता निषिध्येत तर्हि अहम् एतम् उद्योगं त्यक्तुं सिद्धः एव । किन्तु भवता अन्यत्र कुत्रापि उद्योगः दापनीयः भवेत् । उद्योगं विना मम जीवनरथः न चलति ।''

''भवते उद्योगदापनं मम दायित्वं न ।''

तस्य कोपोक्तिः मयि खेदम् अजनयत् । अहम् अपि दृढस्वरेण उक्तवान् - ''एवं तर्हि 'उद्योगं परित्यजतु' इति वक्तुम् अपि भवतः अधिकारः नास्ति ।''

एतत् श्रुतवतः मुख्याध्यापकस्य नेत्रे आरक्ते जाते । वचनं स्थगितम् अभवत् । अहं निमेषद्वयस्य अनन्तरम् - ''श्रीमन् ! एषोऽहं गच्छामि'' इति उक्त्वा ततः बहिः आगतवान् ।

एतस्य प्रकरणस्य अनुवर्तनं तु न जातम् । किन्तु मया प्राप्तव्यं विद्यार्थिवेतनं न प्राप्तम् । तद्विषये मया विशेषचिन्ता अपि न कृता ।

परीक्षाः समाप्ताः । मित्रैः यथा आशङ्कितं तथा मया अनुत्तीर्णता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तु न प्राप्ता । ग्रीष्मविरामस्य दिनत्रयम् इतोऽपि अवशिष्टम् आसीत् । अहं यानस्थानकीये उपाहारमन्दिरे उपविश्य चायं पिबन् आसम् । मम पुरतः मत्समवयस्कः दृष्टपूर्वः इव भासमानः कश्चन तरुणः उपविष्टः आसीत् । ऊरुकं युतकं च धृतवान् आसीत् सः । तस्य पार्श्वे पञ्चाशद्वर्षीयः कश्चन उष्णीषधारी ज्येष्ठः उपविष्टः आसीत् । तस्य दृष्टिः अन्यत्र आसीत् इत्यतः तदीयं मुखं मया न दृश्यते स्म । तरुणः तु दृष्टपूर्वः एव इति मनः वदति स्म । किन्तु अभिज्ञातुं न शक्यते ।

अन्ते अहम् एव उत्थाय तयोः समीपं गतवान् । वृद्धस्य अभिज्ञानं प्राप्तम् । सः अध्यापकः नरसिंहार्यः । यदा अहं ग्रामे पठन् आसं तदा एषः एव अक्षराणि मां बोधितवान् आसीत् । अतः अहं पूर्वाभिभाषिताम् अवलम्बमानः – ''अहं सत्यनारायणः । अभिज्ञातं खलु !'' इति उक्तवान् ।

द्वित्रक्षणानन्तरं सः – ''अये ! झटिति नैव अभिज्ञातः भवान् । अपि कुशलम् ! कियदुन्नतं प्रवृद्धः अस्ति भवान् ! मुखे श्मश्रूद्गमः ! भवतः मातुः मरणस्य अनन्तरं मया ग्रामान्तरं प्रति गतम् । इदानीं कुत्र स्थीयते ? आगच्छतु, उपविशतु तावत्'' इति सहर्षम् उक्तवान् ।

अत्रान्तरे सः तरुणः माम् उद्दिश्य – ''अये सत्य ! मत्तः अपि उन्नतः दृश्यते खलु भवान्'' इति सोत्साहम् उक्तवान् ।

सः नञ्जुण्डः । अहं ग्रामे यदा सेनापतिः आसं तदा सः राजा आसीत् । नञ्जुण्डस्वामी इति तस्य पूर्णनाम । तस्यापि मुखे श्मश्रूद्गमः दृश्यते । सोऽपि प्रवृद्धः दृश्यते । किन्तु सेनापतिः अहं यावत् तावत् तु न । कुशलप्रश्नानन्तरं नरसिंहार्यः आगमनोद्देशं विवृतवान् – ''एषः नञ्जुण्डः मैसूरुनगरे पठति । अहम् इदानीम् एतस्मिन् एव उपमण्डले कस्याश्चित् शालायाः मुख्याध्यापकः अस्मि । वेतनस्वीकरणार्थम् अहम् अत्र आगतः । एतं मैसूरुयानम् आरोप्य ग्रामं गच्छामि इति मम योजना आसीत् । वेतनं तु प्राप्तम् । किन्तु अन्तिमं मैसूरुयानम् अपि निर्गतम् अस्ति । अद्यैव मया ग्रामः गन्तव्यः । अपरिचिते स्थले एतस्य वासव्यवस्था कथम् इति चिन्ताक्रान्तः अस्मि'' इति ।

''अद्य रात्रौ मया सह मम प्रकोष्ठे वसतु सः'' इति उक्तवान् अहम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

तावता नरसिंहार्येण गन्तव्यस्य ग्रामस्य यानम् आगतम् । सः तत् यानम् आरुह्य निर्गतवान् । वस्तुभिः सह अहं नञ्जुण्डः च मत्प्रकोष्ठम् आगतौ ।

नञ्जुण्डस्य मम च बलवती मैत्री आसीत् बाल्ये । सौम्यस्वभावः, मृदुहृदयः राजा यदि स्यात् तर्हि दुर्बलः अपि सेनापतिः राजानं धिक्कृत्य स्वयं सिंहासनारोहणं कुर्यात् । किन्तु मया तथा न कृतम् आसीत् । अस्मद्दलस्य समग्रः शासनव्यवहारः मदधीनः आसीत् चेदपि अहं तस्य राजत्वम् उपेक्षया नैव दृष्टवान् आसम् । प्रतिदिनं सायङ्काले कासारतीरस्थस्य देवालयस्य प्राङ्गणे अस्माकं राजसभा प्रवर्तते स्म । तस्यां तमेव सिंहासने (महत्याः शिलायाः उपरि) उपवेश्य - 'कुशलं खलु प्रजानाम् ? कुशलं खलु सेनावर्गस्य ?...' इत्यादिकं वाचयामि स्म । मयि तस्य विशेषप्रीतिः आसीत् । तस्य मातुः, मम मातुः च जन्मग्रामः अभिन्नः आसीत् । तयोः सख्यम् अपि बलवत् आसीत् । आवयोः गृहम् अपि परस्परसंलग्नतया एव । अतः आवयोः बलवती मैत्री प्रवृद्धा आसीत् ।

तस्यां रात्रौ अहं चित्रमन्दिरकार्यार्थं न गतः । उभौ अपि यद्यपि शयनं कृतवन्तौ, तथापि केनापि निद्रा तु न प्राप्ता । आरात्रि सम्भाषणं कृतम् आवाभ्याम् । ''मातुलगृहं प्रति भवतः गमनस्य अनन्तरं मया राजत्वं परित्यक्तम् । सर्वदा भवन्तम् एव स्मरामि स्म । गण्डसिग्रामे माध्यमिकविद्याभ्यासं समाप्य अहं प्रौढशालाविद्याभ्यासार्थं मैसूरुनगरं गतवान् अस्मि'' इति स्वस्य इतिवृत्तम् उक्तवान् सः ।

अहं मम जीवनकथां श्रावितवान् । राचम्मासम्पर्कं परित्यज्य एतत् चलुवरायपत्तनं प्रति आगमनानन्तरम् ऐदम्प्राथम्येन आत्मीयः लब्धः आसीत् मया । नरसापुरे प्राप्तं बौद्धिकस्वातन्त्र्यं, कृतं पुस्तकपठनम्, अत्र अनुभूयमाना अननुकूला परिस्थितिः इत्यादिकं सर्वम् अहं तम् उक्तवान् । भिक्षान्नकथा श्राविता । उद्योगवार्ता अपि उक्ता । सर्वं सानुकम्पं श्रुत्वा नञ्जुण्डः शय्यायाम् उपविशन् मां पृष्टवान् - ''मम मनसि किञ्चित् भासते । तदनुगुणं किमर्थं न करणीयं भवता ?'' इति ।

''किं तत् चिन्तनम् ?'' - अहं कुतूहलेन पृष्टवान् ।

''मैसूरुनगरे मदीयः कश्चन प्रकोष्ठः अस्ति एव । भवान् अपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मैसूरुनगरम् आगच्छतु । अहं भोजनार्थं बन्धुगृहं गच्छामि । भवान् अनाथालये भोजनं प्राप्तुं शक्नुयात् । भवादृशः बुद्धिमान् तत्र अवश्यं भोजनं प्राप्नुयात् । गृहपाठकार्यम् अपि सम्पाद्य अन्यव्ययः निर्वोढुं शक्यः'' इति सूचितवान् सः ।

एतत् युक्तम् इति अभासत । 'विद्यमानं परित्यज्य महानगरं प्रति असहायस्य मादृशस्य जनस्य गमनं किं शोभते ?' इति चिन्ता मम मनसि आगता । मम सन्देहं परिहरन् नञ्जुण्डः उक्तवान् - ''अलम् अधिकचिन्तया । सर्वं सुष्ठु भविष्यति । अहं शारदाविलासप्रौढशालायां पठामि । भवान् अपि तम् एव विद्यालयं प्रविशतु । विद्यालये उत्तमः ग्रन्थालयः अस्ति । यथेच्छं पुस्तकानि प्राप्तुं शक्यानि तत्र । तत्रत्याः अध्यापकाः अपि उत्तमाः एव । भवादृशस्य शिष्यस्य निमित्तं यत्किमपि कर्तुं सिद्धाः भवन्ति ते'' इति ।

तस्य वचनात् मम उत्साहः प्रवृद्धः । 'नूतनप्रदेशं प्रति गमनानन्तरं सर्वं सौलभ्यं स्वयं सेत्स्यति । नूतने स्थले अल्पं कष्टं भवेत् कदाचित् । गते जीवने मया अननुभूतं कष्टं किं वा अस्ति ? नञ्जुण्डः यथा वदति तथा मैसूरुनगरे अवकाशाः अधिकाः । उत्तमः ग्रन्थालयः । अनुकूलाः अध्यापकाः । प्रोत्साहसम्भावना अपि अधिका । अन्यच्च अत्रत्यः अनुभवः अपि अमधुरः एव । एतत् स्थलं त्यक्तं चेदेव वरम् ।'

मम स्वभावः एव तादृशः । मनसि आगतः विचारः अविलम्बेन एव क्रियान्वितः भवेत् । अहम् उत्थाय उपविश्य नञ्जुण्डम् उक्तवान् - ''अस्तु, अहम् अपि भवता सह मैसूरुनगरम् आगमिष्यामि । किन्तु अद्य भवतः गमनं मास्तु । अहम् अद्य विद्यालयतः प्रमाणपत्रादिकं प्राप्स्यामि । श्वः उभौ अपि मिलित्वा गच्छाव ।''

मम निर्णयं श्रुत्वा नञ्जुण्डः नितरां सन्तुष्टः । मुख्याध्यापकः विशेषकथनं विनैव स्थानान्तरं प्रति गमनार्थम् अनुमतिपत्रं (T.C) दत्तवान् । किन्तु प्रेषणसमये - ''शुभं भवतु । भवतः निर्गमनात् विद्यालयस्यापि हितं भविष्यति'' इति उक्तवान् ।

प्रमाणपत्रादिकं प्राप्य अहम् अपि - ''भवतः विद्यालयस्य परित्यागः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ममापि अभ्युदयाय भविष्यति'' इति उक्त्वा ततः निर्गतवान् ।

मम निर्गमनवार्तां श्रुत्वा चित्रमन्दिरस्वामी किञ्चिदिव खिन्नः । अहं तस्य विश्वासार्हः उद्योगी आसम् । एषु दिनेषु गणनालेखनादिषु अपि अहं तस्य साहाय्यं करोमि स्म । मम हठात् उद्योगत्यागं श्रुत्वा अपि यथायोग्यं वेतनं दत्त्वा मां प्रेषितवान् सः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निश्शुल्कछात्रावासाः मैसूरुनगरे यावन्तः सन्ति तावन्तः अन्यनगरे न सन्ति प्रायः । सर्वमतीयानां कृते अपि तत्तन्मतीयाः छात्रावासाः निश्शुल्कछात्रावासाः च सन्ति तत्र ।

दिवङ्गतस्य सुब्बुकृष्णय्यस्य ब्राह्मणानाथालयः आ प्रारम्भकालात् बहूनां विद्यार्थिनाम् आश्रयस्थानम् । तस्याः संस्थायाः साहाय्यं प्राप्य अध्ययनं कृतवन्तः बहवः अद्य उच्चोद्योगे सन्ति । अनाथालयस्य विशालं भवनम् अस्ति । बहवः प्रकोष्ठाः, विशाला भोजनशाला, शौचगृह-स्नानगृहादयः च सम्यक् सन्ति । स्थापकस्य सुब्बुकृष्णय्यवर्यस्य दिवङ्गतेः अनन्तरम् अनाथालयस्य निर्वहणदायित्वं कस्यचित् व्यवस्थापकस्य अधीनं जातम् । सः व्यवस्थापकः अत्र आगमनात् पूर्वं विश्वविद्यालये गणनाविभागप्रमुखः सन् कार्यं कृत्वा निवृत्तिं प्राप्तवान् आसीत् । अहं यदा मैसूरुं गतवान् तदा सः अशीतिवर्षीयः । बहवः छात्राः तस्य नाम एव न जानन्ति स्म । छात्राः, सार्वजनिकाः, व्यवस्थापकवर्गीयाः, उद्योगिनः चापि तं 'व्यवस्थापकवर्य !' इत्येव सम्बोधयन्ति स्म । वयःकारणतः सः अवनम्य दण्डरसाहाय्येन सञ्चरति स्म । अल्पे एव वयसि सः कौटुम्बिकजीवनात् वञ्चितः जातः आसीत् । 'सर्वं पूर्वजन्मनः पापस्य फलम् । इदानीं वा यथाशक्ति पुण्यकार्यं करणीयम्' इति आलोच्य सः स्वस्य समग्रं समयं शक्तिं च अनाथालयकार्याय अर्पितवान् आसीत् । यः कोऽपि छात्रः तं दृष्ट्वा यदि स्वकीयं कष्टजातं निवेदयेत् तर्हि सः ततः अल्पं वा साहाय्यं प्राप्नुयात् एव । यदि किमपि न शक्येत तर्हि द्वित्राणां दिनानां भोजनव्यवस्थां वा सः करोति स्म एव । पौत्रेषु इव तस्य प्रीतिः अनाथालयबालेषु ।

मैसूरुं प्रति गमनानन्तरं सप्ताहाभ्यन्तरे एव अनाथालये मम पूर्णभोजनव्यवस्था जाता । वासः नञ्जुण्डस्य प्रकोष्ठे । मासाभ्यन्तरे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गृहपाठकार्यम् अपि प्राप्तं मया । ततः प्रतिमासं पञ्चदशरूप्यकात्मकः आयः भवति स्म ।

अहम् अपि शारदाविलासविद्यालये प्रवेशं प्राप्तवान् । नञ्जुण्डेन उक्तम् अवितथम् आसीत् । कक्ष्यायां यदि प्रश्नः पृच्छ्येत तर्हि ऋते द्वित्रेभ्यः, सर्वे अपि विना कोपम् उत्तरं यच्छन्ति स्म । यदि कस्यचित् पुस्तकस्य आवश्यकता निवेद्येत तर्हि स्वनाम्ना तत् दापयन्ति स्म । पुस्तकप्रत्यर्पणसमये तत् पुस्तकम् अधिकृत्य प्रश्नान् कृत्वा ज्ञानं निशितं कुर्वन्ति स्म । चलुवरायपत्तने रुद्धश्वासः इव जातः अहम् अत्र स्वच्छन्दविहारी पक्षी इव अभवम् । 'कथापुस्तकादिभिः सहैव महापुरुषजीवनचरितान् विमर्शग्रन्थान् च पठतु' इति अध्यापकाः प्रोत्साहयन्ति स्म ।

अनाथालयः इदानीं कथम् अस्ति इति न जाने, तदा तु छात्रैः पूर्णः भवति स्म । प्रथमश्रेणीं प्राप्तवताम् एव तत्र अवकाशः । तत्र वसन् कोऽपि यदि प्रथमश्रेणीं न प्राप्नुयात् तर्हि तं निर्दाक्षिण्यं निष्कासयन्ति स्म । अतः सर्वे छात्राः श्रद्धया पठन्ति स्म । न केवलं पदवीच्छात्राः, अपि तु स्नातकोत्तरपदवीच्छात्राः अपि तत्र वसन्ति स्म । रात्रौ भोजनसमये सर्वे सम्भूय कञ्चित् विषयम् अधिकृत्य चर्चां कुर्वन्ति स्म । राजकीयं, धर्मः, साहित्यम् इत्यादिषु कोऽपि अंशः चर्चाविषयः भवति स्म । पर-विरोधपक्षम् अवलम्ब्य वादः उत्साहेन प्रवर्तते स्म । क्वचित् परिविष्टम् अन्नादिकं विस्मृत्य ते वादप्रतिवादादिषु मग्नाः भवन्ति स्म । किन्तु एते वादाः कदापि वैयक्तिकवैमनस्यस्य कारणं न भवन्ति स्म । भोजनोत्तरं सर्वे मिलित्वा हसन्तः निर्गच्छन्ति स्म ।

ते वादस्य आरम्भसमये कन्नडम् अवलम्बन्ते स्म, किन्तु अनुवृत्तिः तु भवति स्म आंग्लभाषया । केचन आंग्लसम्मिश्रया कन्नडभाषया वदन्ति स्म । मया सर्वोऽपि अवगम्यते स्म । कदाचित् मध्ये प्रविश्य मया अपि आंग्लभाषया वक्तव्यम् इति इच्छा प्रबला भवति स्म । तथापि मम भाषासम्पत्तेः विषयसङ्ग्रहस्य च अपर्याप्ततां स्मरन् मौनेन तिष्ठामि स्म । वादावसरे ते अश्रुतपूर्वाणां बहूनां ग्रन्थकर्तॄणां नामानि उद्धरन्ति स्म । केचन अध्यायादीनां सङ्ख्याम् अपि उल्लिखन्ति स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कदाचित् रात्रौ भोजनसमये हिन्दुधर्मस्य लोपदोषादयः चर्चाविषयाः अभवन् । कश्चित् आंग्लभाषया अवदत् - ''विग्रहाराधनमयः अस्ति हिन्दुधर्मः । मार्गे गच्छन् कश्चित् यदि काञ्चित् कृष्णशिलां पश्यति तर्हि ताम् एव देवं मत्वा तत्र एकं देवालयं रचयति । निस्सन्तानः सन्तानप्राप्त्यर्थं मन्दिरं रचयति । धनिकः उदरवेदनानिवारणार्थं देवस्थानं निर्माति । शिलापूजनादयः अन्धविश्वासाः अस्माकं धर्मे सन्ति अनेके । अन्यमतेषु एवं नास्ति । अतः एव अहम् आत्मानं हिन्दुधर्मीयं वक्तुं लज्जाम् अनुभवामि ।''

एतस्य श्रवणात् भोजनालये गम्भीरपरिसरः निर्मितः अभवत् । तदा अपरः विद्यार्थी आंग्लभाषया उत्तरं दत्तवान् - ''आत्मानं हिन्दुधर्मीयं वक्तुं लज्जा अनुभोक्तव्या नास्ति सर्वथा । अहं तु तथाकथने गर्वम् अनुभवामि । विग्रहाराधनस्य उद्देशम् उपयुक्ततां यः अवगतवान् भवति सः एवं न वदति ।''

तदा पूर्वं सम्भाषितवान् विद्यार्थी अवदत् - ''हिन्दुधर्मस्य उपयुक्ततां किञ्चित् विवृणोतु तावत् ।''

''स्वामी विवेकानन्दः एतद्विषये सामान्यानाम् अपि अवगमनं यथा स्यात् तथा विवृतवान् अस्ति स्वग्रन्थे । भगवन्तं प्रतिमारूपेण अन्याकारविशेषरूपेण वा परिमितीकर्तुं न शक्यते । सः अनन्तः, निराकारः, निर्गुणः, रूपकालदेशातीतः च । किन्तु एतत् वचनं ते कथयितुम् अर्हन्ति, ये च ज्ञानमार्गेण कानिचन पदानि गत्वा विचारं कुर्वन्ति । ज्ञानमेव मुक्तेः अद्वितीयः मार्गः न । आध्यात्मजीवनस्य आरम्भदशायाम् एषः गहनः विचारः केनापि न अवगम्यते प्रायः । भगवान् निर्गुणः निराकारः च इति कथनं सुकरम् । किन्तु तेन रूपेण तस्य आराधनं तु दुष्करम् । सामान्याः एतत् कर्तुं नार्हन्ति ।''

''तन्नाम स्ववचनविरोधम् एव प्रदर्शयन् अस्ति भवान् !''

''सामान्यानां दृष्ट्या आध्यात्मविचाराः परस्परविरोधिनः इव आभासन्ते । सानान्यमानवस्य चित्तं केन्द्राभिमुखं कर्तुं प्रतिमा महत्तमं साधनम् । साधकस्य ऊर्ध्वमुखमार्गे विग्रहः निश्रेणी इव आचरति । वस्तुतः निराकारतत्त्वं तर्कस्य चरमसीमां नीतवन्तः अस्मदीयाः एव, न अन्ये । तथापि साकारपूजाविषयस्य प्राशस्त्यम् अपि अस्माभिः एव कल्पितम् अस्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत् वैशाल्यम् एव हिन्दुधर्मस्य वैशिष्ट्यम् । आध्यात्ममार्गे स्तरविशेषं प्राप्तवतः अभिप्रायस्य सर्वेषु बलात् आरोपणं धार्मिकी असहिष्णुता एव । सर्वस्तरीयाणां साधकानां लक्ष्ये स्थिताम् अभिन्नतां प्रतिपादयति हिन्दुधर्मः । विग्रहाराधनं मूढविश्वासस्य फलरूपं न । प्रत्युत बौद्धिकविजयस्य सङ्केतः सः, यत्र च बुद्धेः परिमितिः बुद्धिशक्त्या अभिज्ञायते ।''

एतस्य सर्वस्य कथयिता आवेशयुक्तः इव भासते स्म । तस्य नेत्रयोः विचारप्रखरता निस्सरति स्म । अन्ये सर्वे तदेकचित्ततया तस्य कथनं शृण्वन्तः आसन् । तस्य वादसरणिः, निरर्गलता, अभिप्रायशुद्धता च सर्वैः सम्यक् अवगताः । चर्चाम् आरब्धवतः मुखं पिहितम् आसीत् । सः पुनः उक्तवान् - ''शङ्कररावृवर्यः ! अहं जानामि - भवान् राष्ट्रिय-स्वयंसेवकसङ्घस्य जनः इति । भवन्तः सङ्घीयाः वादे कदापि पराजयं न प्राप्नुवन्ति । वादप्रतिवादपारीणाः भवन्तः'' इति ।

तदा शङ्कररावः शान्तस्वरेण एव, किन्तु शक्तियुतेन ध्वनिना, उक्तवान् - ''अहं यो वा को वा स्याम् । यदि मया उपस्थापितः विषयः भवतः सम्मतः न, तर्हि सुस्पष्टं वदतु भवान् । चर्चां करवाम । स्वाभिमानशून्याः वयं संस्कृति-धर्माचार-व्यवहारेषु लज्जाम् अनुभवामः । तेषां महत्तायाः अज्ञानम् एव एतस्य कारणम् । तस्याः ज्ञानार्थं मया सूच्यमानान् कांश्चन ग्रन्थान् भवान् पठतु । ततः भवतः अभिप्रायः परिवृत्तः भवितुम् अर्हति ।''

चर्चासमाप्तिसङ्केतम् अनुलक्ष्य सर्वे भोजने निरताः जाताः । शङ्कररावस्य वादसरणिः, तदीयवचने दृश्यमाना श्रद्धा, दृढविश्वासः च मयि विशेषपरिणामम् अजनयत् । इतः पूर्वम् अपि अहं शङ्कररावं दृष्टवान् आसम् । तदीयवचनानि श्रुतवान् आसं च । तथापि अद्य ऐदम्प्राथम्येन अभासत यत् तस्य व्यक्तित्वे काचित् विशिष्टा शक्तिः अस्ति इति ।

षट्पादपरिमितम् औन्नत्यं तस्य । कृशं शरीरम् । त्रयोविंशतिवर्षीयः सः कृष्णवर्णीयः । शिरसि वलयिताः केशाः । दृढनिश्चयसूचकः स्थूलः अधरः । वार्तालापसमये श्वेता दन्तपङ्क्तिः प्रकाशते स्म । नेत्रयोः विचारस्फुलिङ्गाः निस्सरन्ति स्म । सम्भाषणसमये पुरतः स्थितस्य अन्तरङ्गस्य शोधके इव दृश्येते स्म तस्य नेत्रे ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यावत् भोजनं समाप्य हस्तौ प्रक्षाल्य युतकं धृत्वा अहं बहिः आगच्छन् आसं तावता सः द्विचक्रिकायाः दीपं सज्जीकुर्वन् आसीत् । अहम् अग्रे गतः । सः पृष्ठतः आगतवान् । अहम् उच्चध्वनिना तम् आहूतवान् - ''भोः, शङ्करराववर्य !''

सः द्विचक्रिकातः अवतीर्य मत्समीपम् आगतः । अहं पृष्टवान् - ''भोजनसमये विग्रहाराधनविषये भवता यत् उक्तं तत् मह्यं नितराम् अरोचत । तत्र मम केचन सन्देहाः सन्ति । किम् अहं कांश्चन प्रश्नान् पृच्छानि ?''

''पृच्छतु कामम् ।''

''सद्यःकाले अहं राजाराममोहनरायस्य जीवनचरित्रं पठितवान् । सः किमर्थं विग्रहाराधनस्य विरोधं करोति ?''

''कश्चित् कयाचित् दृष्ट्या कस्यचित् क्रमस्य विरोधं यदि करोति तर्हि तस्मिन् दूषितताबुद्धिः, तस्य तिरस्कारः वा न उचितः । राममोहनरायः उपनिषद्विचारम् आदर्शं मन्यते । उपनिषत्काले मूर्तिपूजा व्यवहारे न आसीत् । अनन्तरकाले आगता पद्धतिः सा । इतिहासे धर्मः, देवतार्चनं, पूजाक्रमः इत्यादयः बहुधा रूपपरिवर्तनम् अवाप्नुवन् इति तु सत्यम् एव । राममोहनरायः वदति यत् मध्यकालिकम् इतिहासम् उपेक्ष्य प्राचीनपद्धतिम् अनुसरन्तु इति । ज्ञानदृष्ट्या तर्कदृष्ट्या च तस्य अभिप्रायः अङ्गीकारार्हः एव इत्यत्र नास्ति विप्रतिपत्तिः । तथापि एतत् अपि स्पष्टं यत् ब्रह्मसमाजीयः वादः शुद्धजिज्ञासुमतीनां कृते एव रोचेत, न तु सामान्यजनेभ्यः । अतः एव ब्रह्मसमाजस्य विकासः कुण्ठितः जातः ।''

''विकासः कुण्ठितः भवतु नाम । ज्ञानदृष्ट्या तस्य वादः युज्यते एव इति तु भवान् अङ्गीकरोति खलु ?''

''ज्ञानिनां वचनं तत् । अन्यच्च ज्ञानिनः अपि मूर्तिपूजा त्याज्या इति न वदन्ति । प्रत्युत 'सर्वव्यापिनं सर्वशक्तं च भगवन्तं मूर्तिमात्रे परिमितं मा कुर्वन्तु' इति वदन्ति ते । निराकारतत्त्वस्य एव प्रतिपादकः शङ्कराचार्यः शारदादेव्याः मूर्तिं किमर्थं प्रतिष्ठापितवान् ? सामान्यजनानाम् अनुग्रहाय तत् । वयम् अपि यदा शङ्कराचार्यतुल्यतां भजामः तदा प्रायः मूर्तिपूजा न आवश्यकी स्यात् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अहं मौनेन एव आसम् । शङ्कररावः कथनम् अनुवर्तितवान् - "अत्र अन्योऽपि अंशः मनसि स्थापनीयः अस्ति । यत्र मूर्तिपूजायाः अवसरः न भवति तत्र शिल्पकला अपि परिपुष्टिं न प्राप्नोति । भारतीयकलायाः इतिहासं पश्यतु भवान् । यदि निर्गुणकल्पनामात्रं स्यात्, सगुणकल्पना न स्यात् तर्हि प्रायः कोऽपि सुन्दरः देवालयः, रमणीया मूर्तिः वा निर्मितः न स्यात् । धर्मः बौद्धिकतृप्तिमात्रं ददाति चेत् न अलम् । बुद्धिः एव जीवनस्य परमश्रेष्ठं तत्त्वं न । मानवेषु स्थितानाम् अन्यविधशक्तीनां प्रवृत्तीनां च विकासार्थं समुचितः अवकाशः यदा दीयते तदा एव धर्मः सर्वमान्यः भविष्यति । तदा एव सः जीवनस्य विविधेषु अङ्गेषु प्रतिफलितः भविष्यति अपि ।"

"किन्तु क्रिस्तमतीयाः मूर्तिपूजां न कुर्वन्ति खलु ?"

"भवतः कथनं पूर्णतः अवितथं न । मैकेल्-एञ्जेलोप्रभृतयः कलाविदः क्रिस्तमतीयकथापुराणादिकं चित्ररूपेण रचितवन्तः सन्ति । वध्यचिह्नं गतस्य येसुक्रिस्तस्य चित्रं सर्वत्र दृश्यते । 'परलोकगत ! अयि भोः पितः ! ...' इति प्रार्थनां कुर्वतां क्रिस्तमतीयानां मनसि कस्यचित् चित्रस्य आकारः आगतः स्यात् एव खलु ? वयम् इव ते चित्रं गन्धपुष्पादिभिः न पूजयेयुः नाम । तथापि ते सिक्थवर्तिकां प्रज्वाल्य प्रार्थनां यस्मै समर्पयन्ति तच्च सगुणस्वरूपं चित्रम् एव । तैः क्रिस्तालयस्य वेदिका किमर्थम् अलङ्करणीया ? मूर्तिपूजाप्रवृत्तिं पूर्णतया नाशयितुं केनापि न शक्यते । अतः तस्याः एव प्रवृत्तेः भावरूपेण उपयोगः मुक्तिप्राप्त्यर्थं कृतः चेत् को दोषः ?"

शङ्कररावेण सह चर्चां कर्तुम् अपेक्षितं ज्ञानं मम न आसीत् । मया तावत् अध्ययनं न कृतम् आसीत् । तेन उक्ताः सर्वे विषयाः मया न अवगम्यन्ते स्म ।

"राममोहनवर्येण कृतस्य समाजपरिष्कारस्य हिन्दुसमाजस्य च विषये भवतः कः अभिप्रायः ?" - अहं पृष्टवान् ।

किञ्चित् अपि विलम्बम् अकृत्वा सिद्धोत्तरः सः अवदत् - "तस्य सामाजिकपरिवर्तनम् अहं विशेषतः इच्छामि । हिन्दुधर्मस्य हिन्दुसमाजस्य च अभिन्नता न परिभावनीया अस्माभिः । इदानीं हिन्दुसमाजस्य परिष्कारः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आवश्यकः, न तु हिन्दुधर्मस्य । समाजशब्दस्य उत्तमः वास्तविकः यः अर्थः अस्ति सः अद्य हिन्दुसमाजे न दृश्यते । राधाकृष्णन्वर्येण लिखितः 'हिन्दुजीवनदृष्टि'नामकः ग्रन्थः भवता किं पठितः ?''

''न ।''

''अवश्यं पठनीयः सः ग्रन्थः । हिन्दुधर्मं, समाजं, कलां च अधिकृत्य आनन्दकुमारस्वामिवर्येण लिखितानि पुस्तकानि लेखनानि च भवता पठनीयानि । मत्सकाशे कानिचन पुस्तकानि सन्ति । तानि अहं दास्यामि भवते । तानि पठतु भवान् । तेन हिन्दुधर्मसंस्कृत्योः सुस्पष्टः परिचयः प्राप्यते ।''

तदा अहं किञ्चिदिव सङ्कोचेन उक्तवान् - ''ते ग्रन्थाः प्रायः आंग्लभाषया विरचिताः स्युः । पठनेच्छा तु मम महती अस्ति । किन्तु न जाने, तान् ग्रन्थान् अहम् अवगन्तुं शक्नुयां वा न वा इति ।''

''इदानीं भवान् कस्यां कक्ष्यायां पठति ?''

''फिफ्त् फारम् ।''

''अद्यावधि आंग्लभाषोपनिबद्धं किमपि न पठितं वा भवता ?''

''माध्यमिकशालायां यदा आसं तदा आंग्लभाषोपनिबद्धाः काश्चन लघुकथाः पठिताः मया । इदानीं प्रतिदिनम् अपि आंग्लपत्रिकां पठामि । क्वचित् अर्थबोधः न भवति'' इति आंग्लभाषया उक्तवान् अहम् ।

''एतावता अलम् । अहं पुस्तकानि दास्यामि । अनवगतस्य भागस्य विषये मां पृच्छतु । शब्दकोषसाहाय्यम् अपि प्राप्नोतु ।''

''भवतु नाम । भवतः का कक्ष्या ?''

''बि.ए. स्नातकप्रतिष्ठाकक्ष्या (आनर्स्) । द्वितीयवर्षीयः अहम् । संस्कृतं मम मुख्यविषयः ।''

एतावता एव रात्रेः एकादशवादनम् आसीत् । मार्गे जनसञ्चारः विरलतया दृश्यते स्म । अहम् उक्तवान् - ''धर्म-संस्कृत्यादिविषये अधिकाधिकं ज्ञातव्यम् इति मम इच्छा । किन्तु किं पठनीयम् इति न ज्ञायते । कन्नडभाषया रचितानि पुस्तकानि क्वचित् पठामि । तत्रैव अनन्ताः सन्देहाः उद्भवन्ति । अद्य यथा भवान् मिलितः तथा यदि कोऽपि मिलेत् तर्हि चर्चाद्वारा बहवः अंशाः अवगताः स्युः ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''आंग्लभाषया रचितानां ग्रन्थानाम् अध्ययने भवान् क्रमशः परिणतः भवतु । सन्देहे सति मां पृच्छतु । यथामति समाधानं वक्ष्यामि । मम गुरुः कश्चन अस्ति । आवाभ्याम् अपि अनवगतं तं पृच्छाम । अस्तु, इदानीं महान् विलम्बः जातः । सङ्घकार्यं किञ्चित् अस्ति मम । इदानीं गत्वा गणनादिकं द्रष्टव्यं मया । भवतः प्रकोष्ठः कुत्र ?''

''लक्ष्मीपुरे । भवतः ...... ?''

''अहं सङ्घकार्यालये एव वसामि । श्वः पुनर्मिलाम'' इति उक्त्वा द्विचक्रिकाम् आरुह्य सः ततः निर्गतवान् ।

तस्मिन् दिने मम अवर्णनीयः आनन्दः । शङ्कररावतः मया नूतनः विचारः ज्ञातः आसीत् । तेन उक्तं सर्वं मया अवगतम् इति न । तथापि विचारप्रकाशः मयि सङ्क्रान्तः आसीत् । मम शिरसि तेन दत्तम् आश्वासनम् एव भ्रमति स्म । 'सः उत्तमानि बहूनि पुस्तकानि दास्यति । तानि पठित्वा अनवगतं चर्चया अवगत्य बहून् विषयान् ज्ञात्वा... । अहो आनन्दः !' कल्पनामात्रेण एव अहं नितरां सन्तुष्टः आसम् ।

प्रकोष्ठः यावत् प्राप्तः तावता नञ्जुण्डः मां प्रतीक्षमाणः आसीत् । अहं कदापि प्रत्यागमने विलम्बं न करोमि स्म । अतः सः विलम्बकारणं पृष्टवान् । अहं शङ्कररावस्य मेलनादिकं विस्तरेण उक्तवान् । तत् श्रुत्वा सः उक्तवान् - ''तस्य सम्पर्कः आधिक्येन मास्तु ।''

''किमर्थम् ?''

''आर्. एस्. एस्. जनानां स्वभावः एव सः । स्वाभिप्रायं प्रति अन्यान् आकर्षन्ति ते । तेषां सम्पर्कतः अस्माकम् अभिप्रायः अपि परिवर्तते ।''

''भवतु नाम । का हानिः तेन ?''

मम प्रश्नस्य किम् उत्तरं वक्तव्यम् इति तेन न ज्ञातम् । ''तान् सर्वकारः न सहते । एवं स्थिते तेषां सहवासः किमर्थम् ?'' इति उक्तवान् सः ।

एतत् श्रुतवतः मम हासः आगतः । सङ्घं सर्वकारः न सहते इति एकेन एव उद्देशेन युक्तः अपि तेषाम् अभिप्रायः किम् अस्माभिः न अनुमन्तव्यः ? अभिप्रायस्य अङ्गीकारः निराकरणं वा अस्मदधीनम् । धर्मसंस्कृत्यादिविषये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मम अध्ययनार्थं साहाय्यं कर्तुं समर्थः ज्ञातपूर्वेषु अन्यः कोऽपि नास्ति, ऋते शङ्कररावात् । अध्यापकाः अपि अत्र असमर्थाः । शङ्कररावः तु आत्मीयभावेन श्रद्धया विषयविवेचनं करोति । एषा प्रवृत्तिः अन्येषु न दृश्यते । मया अपृष्टः एव सः उक्तवान् अस्ति - 'पुस्तकानि पठनार्थं दास्यामि' इति । सः अपि मादृशः एव कश्चन विद्यार्थी, किन्तु प्रगतः ।

मद्विषयकप्रीतिमात्रेण नञ्जुण्डः एतं सहवासम् आक्षिप्तवान् आसीत् । वस्तुतः सः मम श्रेयोभिलाषी एव । अतः एव पितरम् अपि अविसूच्य मां मैसूरुनगरं नीतवान् आसीत् सः । 'अधिकाधिकम् अधीत्य मया महापुरुषेण भवितव्यम्' इत्येव हार्दिकी इच्छा आसीत् तस्य ।

तस्य स्वभावः एव विलक्षणः । मम पठनं सः प्रोत्साहयति स्म । किन्तु स्वयं तु पाठ्यपुस्तकात् ऋते अन्यत् किमपि न पठति स्म । 'यदि सर्वे पठने प्रवृत्ताः स्युः तर्हि ग्रन्थालयस्थानि पुस्तकानि कथं पर्याप्तानि स्युः ?' इति वदति स्म सः ।

एतावता उपनीतः आसीत् सः । तदीयः पिता सम्प्रदायाचरणे बद्धादरः । सः एव गुणः एतस्मिन् अपि सङ्क्रान्तः आसीत् । कदाचित् विद्यालये गणपतिपर्व प्रवृत्तम् । प्रसादरूपेण दध्यन्नं वितीर्णवन्तः अन्यजातीयाः विद्यार्थिनः । नञ्जुण्डः तु यद्यपि प्रसादं स्वीकृतवान् तथापि न सेवितवान् । सः प्रतिदिनं शीतलजलेन शिरःस्नानं कृत्वा भस्म धृत्वा कौशेयवस्त्रं च परिधाय सन्ध्यावन्दनं करोति स्म । परीक्षादिने अपि अष्टोत्तरशतवारं गायत्रीजपं करोति स्म । धार्मिकाचारविषये स्थिता तदीया श्रद्धा मयि सन्तोषं जनयति स्म । किन्तु बहुषु विषयेषु तदीयाः अभिप्रायाः अविचारितरमणीयाः भवन्ति स्म । धर्मशुद्धतयोः एकीभवनं यथा स्यात् तथा व्यवहरति स्म क्वचित् सः । तादृशान् विषयान् अधिकृत्य मुक्तमनसा चर्चाम् अपि कर्तुं न इच्छति स्म सः । क्वचित् चर्चां प्रति तम् आनेतुम् एव न शक्यते स्म । 'पूर्वजैः निश्चितं व्यवहारं विमृष्टुम् अस्माकं कः अधिकारः ? एतादृशेषु विषयेषु एवं न वक्तव्यम्' इति वदन् सः चर्चां स्थगयति स्म । यद्यपि आवयोः एवम् अभिप्रायभेदः आसीत्, तथापि परस्परविश्वासः तु कदापि न्यूनः न जातः आसीत् । स्वस्य अभिप्रायम् अन्यस्मिन् आरोपयितुम् आवयोः कोऽपि न इच्छति स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मैसूरुनगरं प्रति आगमनानन्तरं मासचतुष्टयाभ्यन्तरे एव विद्यालये मम नाम प्रसिद्धं जातम् । शारदाविलासप्रौढशाला प्रतिवर्षम् अपि प्रौढशालास्तरीयां चर्चास्पर्धां व्यवस्थापयति । तस्यां स्पर्धायाम् अहम् अस्मच्छालाप्रतिनिधित्वेन भागं गृहीतवान् । चर्चायाः विषयः आसीत् - 'विश्वशान्त्यै विज्ञानात् अपि धर्मः एव आधिक्येन उपकरोति' इति । एतावता अहं शङ्कररावस्य आत्मीयः जातः आसम् । ततः विषयसङ्ग्रहं कृत्वा अहं चर्चादिने सम्यक् विषयोपस्थापनं कृतवान् । मया वैयक्तिकरूपेण प्रथमं पारितोषिकं प्राप्तम् । विद्यालयीयपारितोषिकम् अपि अस्मच्छालया एव प्राप्तम् । ततः आरभ्य चर्चास्पर्धार्थं कोऽपि प्रेषणीयः चेत् विद्यालयजनाः माम् एव चिन्वन्ति स्म । यत्र यत्र अहं गच्छामि तत्र सर्वत्र वैयक्तिकं विद्यालयीयं च पारितोषिकं प्राप्नोमि स्म प्रायः । एतस्य परिणामतः मुख्याध्यापकम् अप्रार्थ्य एव अहं विद्यार्थिवेतनं प्राप्तवान् ।

उत्तमे मुहूर्ते मया मैसूरुनगरे पदं स्थापितम् इति भाति । सर्वविधानुकूल्यानि अपि प्राप्तानि मया । मम बुद्धिशक्तेः विकासार्थं समुचितः अवसरः अपि मया प्राप्तः । आत्मीयमित्रेण नञ्जुण्डेन सह मम वासः । सर्वं विषयं निवेद्य स्वामिवर्याय मया पत्रं लिखितम् । अनुक्त्वा एव चलुवरायपत्तनं त्यक्तं यत् तदर्थं क्षमा अपि प्रार्थिता । वर्तमानस्थितिविषये सन्तोषं प्रकटय्य तेन उत्तरम् अपि लिखितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अल्पे एव काले शङ्करराव: मम आत्मीयः जातः । क्वचित् अहं तम् - 'अग्रज !' इति सम्बोधयामि स्म । विद्यया, बुद्ध्या, जीवन-विषयकस्थैर्यधैर्याभ्यां, लक्ष्यविषयकाचलश्रद्धया, कार्यनिष्ठया च विभूषितं तदीयं व्यक्तित्वम् उन्नततया भासते स्म । सः सर्वदा हसन्मुखः भवति स्म । आलस्यखेदादयः तस्मिन् लेशमात्रेण अपि न आसन् । तस्य वासस्थानं राष्ट्रियस्वयंसेवकसङ्घस्य कार्यालयं प्रति मया द्वित्रवारं गतम् आसीत् । सः सङ्घसम्बद्धानि बहूनि कार्याणि करोति स्म । सङ्घस्य पुस्तकभाण्डागारे स्थितानि सर्वाणि पुस्तकानि पठति स्म सः । सङ्घकार्यार्थं सः सर्वदा द्विचक्रिकया अटति स्म । कदा तस्य महाविद्यालयं प्रति गमनं, कदा वा पठनम् इति कोऽपि न जानाति स्म । तथापि तेन पठितानां पुस्तकानां सङ्ख्या तु आश्चर्यजनिका । तस्य स्मरणशक्तिः अपि असाधारणी एव ।

कदाचित् सः मां विश्वविद्यालयस्य ग्रन्थालयं प्रति नयति स्म । स्वनाम्ना मह्यं धर्म-संस्कृति-कलासम्बद्धानि पुस्तकानि दापयति स्म । पुस्तकदानात् पूर्वं तद्विषये विमर्शात्मकतया सारांशं वदति स्म । तेन आदौ एव या प्रस्तावना दीयते स्म तद्बलात् आंग्लभाषोपनिबद्धानां क्लिष्टविषयकाणाम् अपि ग्रन्थानां भूयांसं भागम् अहं सम्यक् अवगच्छामि स्म । ग्रन्थपठनानन्तरं तेन सह चर्चां करोमि स्म । क्वचित् आवयोः अभिप्रायभेदः भवति स्म । स्वाभिप्रायं मदुपरि आरोपयितुं कदापि न प्रयतते स्म सः । किन्तु एकं वचनं तु सः पुनः पुनः वदति स्म - "अद्यतनविद्याभ्यासक्रमस्य परिणामतः राष्ट्रस्य प्राचीनपरम्परायाः स्पष्टावगतिः एव न भवति अस्माकम् । विश्वविद्यालयतः पदवीं प्राप्य निर्गच्छतः संस्कृतिगन्धः अपि न भवति । एतस्याः लज्जास्पदपरिस्थितेः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कारणतः स्वाभिमानशून्यः कश्चन समाजः निर्मीयमाणः अस्ति । अल्पेन एव कालेन अस्मद्देशः सांस्कृतिकाधःपतनं यदि प्राप्नुयात् तर्हि न तत्र आश्चर्यम्'' इति ।

तस्य परिचयानन्तरं पञ्चषाः मासाः अतीताः। आवां प्रतिदिनम् अपि भोजनार्थं सहैव उपविशावः स्म । क्वचित्, यद्दिने तस्य कार्यान्तरविशेषः न भवति स्म तद्दिने रात्रिभोजनानन्तरं कञ्चित् विषयम् अधिकृत्य चर्चां कुर्वन्तौ मार्गपार्श्वे तिष्ठावः स्म । किन्तु सः कदापि स्वगृहविषये मातापित्रोः विषये वा मां किमपि न उक्तवान् आसीत् । अहम् अपि तं न पृष्टवान् आसम् ।

कश्चन भानुवासरः । मध्याह्नभोजनानन्तरम् अहं तेन सह तदीयं प्रकोष्ठं गतवान् । यस्मिन् सङ्घकार्यालये सः वसति स्म तत्र अष्ट प्रकोष्ठाः, एकं सभाभवनं च आसीत् । सभाभवने गुरूजी, हेडगेवार, शिवाजी, राणाप्रताप, गुरुगोविन्दसिंहः इत्यादीनां चित्राणि, कानिचन देवचित्राणि च आसन् । एकस्मिन् कोणे दण्डानां बन्धः आसीत् । एकस्मिन् प्रकोष्ठे पुस्तकसङ्ग्रहः आसीत् । तस्मिन् एव प्रकोष्ठे शङ्करः वसति स्म । अन्येषु प्रकोष्ठेषु सङ्घस्य स्वयंसेवकाः केचन छात्राः वसन्ति स्म । तेषां योगक्षेमव्यवस्थां शङ्करः पश्यति स्म ।

यदा आवां गतौ तदा तत्र कोऽपि न आसीत् । शङ्करस्य अपि कार्यान्तरं न आसीत् । आवां सभाभवने प्रसारितस्य कटस्य उपरि उपविश्य वार्तालापम् आरब्धवन्तौ । वार्तालापमध्ये अहं शङ्करं पृष्टवान् - ''शङ्कर ! भवतः जन्मस्थलं किम् ? एतद्विषये प्रष्टव्यम् इति बहुवारं मनसि विचारः आगतः । तथापि न पृष्टवान् आसम् अहम्'' इति।

''मम जन्मस्थलं मैसूरुनगरम् एव ।''

''असत्यम् एतत् ।''

''किमर्थं तथा भाव्यते भवता ?''

''मैसूरुनगरम् एव चेत् गृहं कुत्र ? गृहजनाः कुत्र ?''

''ते सर्वे एतस्मिन् एव नगरे वसन्ति । मम गृहे माता, पिता, अग्रजः च वसन्ति ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''एवं तर्हि भवता किमर्थं गृहे वासः न क्रियते ? अन्यग्रामीयः इव अस्माभिः सह किमर्थं भोजनं क्रियते ? अतः निश्चितं यत् भवतः जन्मस्थलं मैसूरुनगरं न इति ।''

सः क्षणकालस्य मौनस्य अनन्तरं माम् उक्तवान् - ''मम गृहं प्रति भवान् नेतव्यः इति बहुधा चिन्तयन् आसम् । किन्तु तदर्थं विरामः एव न लब्धः । अद्य विरामः अस्ति । मम गृहं गत्वा आगच्छाम, उत्तिष्ठतु ।''

''मास्तु'' - अहं सङ्कोचेन उक्तवान् । तथापि सः अनुरोधपूर्वकं हस्तं गृहीत्वा माम् उत्थापितवान् ।

उभौ अपि गजशालासमीपस्थं मार्गं प्राप्तवन्तौ । ततः लघुवीथिकायां प्रवेशः कृतः । अग्रे द्विधा विभक्तं मार्गम् अनुसृत्य गत्वा अपरा वीथिका प्रविष्टा । तत्रत्यम् एकं लघुगृहं प्राप्य द्वारशब्दं कुर्वन् उच्चस्वरेण उक्तवान् शङ्करः - ''अम्ब ! द्वारम् उद्घाटयतु ।''

पञ्चाशद्वर्षीया काचित् सुमङ्गली आगत्य द्वारम् उद्घाटितवती । 'एषा मम माता' इति उक्तवान् शङ्करः । ततः सः मातरम् उद्दिश्य - ''मया पूर्वम् उक्तम् आसीत् खलु - सत्यः इति कश्चन अस्ति इति ? सोऽयं सत्यः एषः एव'' इति उक्तवान् ।

मातुः ललाटे स्थितं विशालं तिलकं सुमङ्गलीत्वं भूषयति स्म । कपोलयोः हरिद्रालेपनं दृश्यते स्म । कर्णयोः नासिकायां च एकैकं सामान्यम् आभरणं दृश्यते स्म । एतानि विहाय अन्यत् आभरणं तस्याः शरीरे न आसीत् । प्राचीनकालोचितां विशालदशायुतां शाटिकां धृतवती आसीत् सा । शङ्करस्य इव एव मुखम् । वयःकारणतः केशाः पलिताः आसन् । मुखे वलयः दृश्यन्ते स्म ।

गृहं लघु । द्वाराणि अपि न उन्नतानि । हस्तः उन्नीतः चेत् छदिः प्राप्यते स्म । स्वागतप्रकोष्ठे वेष्ट्या आच्छाद्य कश्चित् सुप्तवान् आसीत् । ''पिता सुप्तवान् अस्ति'' इति उक्तवान् शङ्करः । ततः वामभागस्थं प्रकोष्ठं प्रति गत्वा आवाम् उपविष्टवन्तौ । प्रकोष्ठे एका वीणा आसीत् । कोणे एकं तम्बूरवाद्यं मुरजयुगलं च आसीत् । भित्तौ रचिते काष्ठमये कपाटिकाद्वये पुस्तकानि आसन् । अहं तेषां पुस्तकानां नामानि पठितवान् । आयुर्वेदः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नृत्यं, सङ्गीतम् इत्यादीन् विषयान् अधिकृत्य आसन् तानि । कानिचन संस्कृतपुस्तकानि अपि आसन् तत्र । एकस्याः कपाटिकायाः उपरि किङ्किणीमालाद्वयं दृश्यते स्म । मम मुखं दृष्ट्वा सः उक्तवान् - ''एतानि कस्य इति जिज्ञासा खलु भवतः ?''

''आम् ।''

''एतानि सर्वाणि मम अग्रजस्य । तेन अनधीता विद्या एव नास्ति प्रायः । वर्षद्वयम् इण्टर्मीडियेट्कक्ष्यां गत्वा अनुत्तीर्णः जातः सः । अत्रान्तरे वीणावादनं ज्ञातम् आसीत् तेन । शास्त्रीयसङ्गीतम् अपि ज्ञातम् आसीत् तेन । 'आयुर्वेदं पठामि' इति वदन् सः आयुर्वेदविद्यालयं प्रविष्टः । वर्षद्वयस्य अनन्तरं - ''तत्र आयुर्वेदः न पाठ्यते । आंग्लशास्त्रीयाः वैद्याः आंग्लशास्त्रम् एव यत्किञ्चित् पाठयन्ति ।'' इति वदन् तत् पठनम् अपि परित्यक्तवान् । मृदङ्गं वादयति सः । एतस्मिन् वर्षे वीणाविद्वत्परीक्षा स्वीक्रियते तेन । वर्षत्रयतः नृत्यकक्ष्यां प्रति गच्छन् अस्ति सः । अस्माकं गृहे भित्तौ स्थितम् उमामहेश्वरचित्रं तेनैव चित्रितम् । अस्माकं मार्गे 'आयुर्वेदवैद्यः' इत्येव प्रसिद्धः अस्ति सः । चरकसुश्रुतादीनां ग्रन्थाः तेन पठिताः । वैद्यभूषणस्य नारायण-पण्डितस्य सेवां कृत्वा मूलिकाप्रयोगकौशलं तेन सम्पादितम् । 'एतस्य हस्तगुणः उत्तमः अस्ति । दुश्शमनीयम् अपि रोगम् उपशमयति सः' इति अग्रहारस्थाः सर्वे वदन्ति । कानिचन दिनानि मल्लशालाम् अपि गतवान् आसीत् सः ।''

''किं वयः तस्य ?''

''प्रायः त्रिंशद्वर्षीयः सः ।'

''एतस्मिन् अल्पे एव वयसि कथं तेन एतत्सर्वम् अधीतम् ?''

''तस्य विलक्षणा दैत्यशक्तिः । यदि कोऽपि विषयः मनसि आगच्छति तर्हि सः निद्राम् एव न प्राप्नोति । सर्वदा कार्यैकचिन्तनं तस्य । बाल्ये संस्कृतविद्यालयम् अपि गतवान् आसीत् सः । मम पितुः संस्कृतज्ञानम् उत्तमम् अस्ति । पितुः सकाशात् वेदाध्ययनं कृतवान् अपि अस्ति अग्रजः । संस्कृतेन लीलया सम्भाषणं कर्तुं समर्थः । आंग्लभाषया अपि तथैव । तस्य आंग्लभाषणं श्रुत्वा महाविद्यालयीयाः छात्राः अपि लज्जाम् अनुभवेयुः ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''सः इदानीं कुत्र ? मया द्रष्टव्यः सः ।''

''अम्ब ! रामण्णः कुत्र ?'' - शङ्करः मातरं पृष्टवान् ।

''पाठार्थं गतः अस्ति सः । अचिरात् एव आगच्छेत्'' इति उक्तवती माता ।

''अस्माकं कुटुम्बस्य पोषकः सः एव । द्वित्राणि गृहाणि गत्वा वीणां पाठयति सः । ततः प्राप्तेन धनेन कुटुम्बस्य व्ययभारः निरुह्यते । औषधदाननिमित्तं सः कस्माचित् अपि धनं न स्वीकरोति । रोगोपशमनानन्तरं जनाः एव यत्किञ्चित् यच्छन्ति कदाचित् । मम एका अनुजा अस्ति । गतवर्षे तस्याः विवाहः जातः । नञ्जनगूडुनगरे अस्ति तस्याः पतिगृहम् । अग्रजः एव विवाहभारं निरूढवान् । विवाहनिमित्तं कृतस्य ऋणस्य प्रत्यर्पणम् अंशशः कुर्वन् अस्ति सः एव ।''

अत्रान्तरे शङ्करस्य माता प्रकोष्ठम् आगतवती । तस्याः हस्ते स्थालिका आसीत् । ''किञ्चित् अन्नम् अवशिष्टम् आसीत् । क्वथितान्नकवलं* दास्यामि । हस्तौ प्रसारयताम्'' इति उक्त्वा सा आवयोः हस्ते पर्यायेण क्वथितान्नकवलस्य स्थापनम् आरब्धवती ।

परिवेषयन्ती एव सा शङ्करं पृष्टवती - ''गतभानुवासरे किमर्थं न आगतं भवता ? अहं दीर्घकालं यावत् प्रतीक्षां कृतवती'' इति ।

तावता द्विचक्रिकाघण्टानादः श्रुतः । द्वारताडनशब्दोऽपि श्रुतः । शङ्करः उक्तवान् - ''रामण्णः आगतः ।''

माता गत्वा द्वारम् उद्घाटितवती । द्विचक्रिकाम् अन्तः स्थापयित्वा पादौ प्रक्षाल्य निमेषद्वयाभ्यन्तरे प्रकोष्ठम् आगतवान् रामण्णः । दूरतः दृष्टं चेत् तस्य, शङ्करस्य च कोऽपि भेदः न लक्ष्यते स्म । समानं मुखम् । समानः वर्णः । समानम् औन्नत्यम् । दन्तावली, कुटिलकेशत्वम् इत्यादिकम् अपि समानम् । किन्तु बलवत्त्वं तु अग्रजे एव आधिक्येन दृश्यते स्म । 'तेन कानिचन दिनानि मल्लशाला गता' इति उक्तं शङ्करस्य वचनं स्मृतं

---

* 'कै तुत्तु' इति कन्नडनाम । दध्यादिमिश्रितम् अन्नं कवलरूपेण सज्जीकृत्य माता पुत्रादीनां हस्ते स्थापयति । प्रीत्यतिशयं द्योतयति एषा क्रिया । बालाः एतादृशम् अन्नसेवनं सौभाग्याय मन्यन्ते । - *अनुवादकः*

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मया । शङ्करः अग्रजं परिचायितवान् । अग्रजः अपि अनुजः इव एव सरलः । अकृत्रिमः व्यवहारः । नास्ति वचने औपचारिकता। साक्षात् आगत्य मम पार्श्वे एव उपविश्य मम अध्ययनविषये वार्तालापं कुर्वन् - "भवान् बहु पठति इति शङ्करः बहुधा वदन् भवति" इति उक्तवान् ।

"तथा नास्ति । तदा तदा तु किञ्चित् पठामि ।"

"तथा पठनात् एव बहुत्वं सिद्ध्यति । अहम् इव सर्वत्रापि आसक्तः कुत्रापि अपरिणतः मा भवतु भवान् अपि । कुत्रापि एकत्र परिणतिः प्राप्तव्या ।"

"भवन्तौ अत्रैव उपविश्य वार्तालापं कुरुताम् । अहं मात्रा सह किञ्चित् जल्पनं कृत्वा आगच्छामि । सत्य ! मम अग्रजः जल्पने माम् अपि अतिशेते । श्रोत्रा शिरोवेदना प्राप्ता चेदपि कथनं तु न स्थगयति सः" इति उक्त्वा मातरं द्रष्टुं पाकशालां गतवान् शङ्करः ।

रामण्णेन सह वार्तालापसमये मया कोऽपि सङ्कोचः न अनुभूतः । तस्य पूर्णं नाम रामचन्द्रराव् इति । तस्य वचनं व्यवहारः च अकृत्रिमः । दीर्घकालात् सुपरिचितः इव मया सह वार्तालापं कृतवान् सः । अहं पृष्टवान् - "रामण्णवर्य ! भवान् प्रतिदिनं सङ्घस्थानं गच्छति किम् ?"

"वर्यादिपदैः व्यवहारः मास्तु । 'रामण्ण !' इत्येव सम्बोधयतु । अहं प्रतिदिनं सङ्घस्थानं न गच्छामि । बाल्ये तथा गच्छामि स्म । इदानीं तु तदर्थं समयः एव न भवति । शङ्करः मम स्वभावम् उक्तवान् स्यात् एव । आरब्धं कार्यं यशस्वितया समापयितुं न शक्नोमि अहम् । सा प्रवृत्तिः तु शङ्करे अस्ति ।"

अत्रान्तरे शङ्करः पाकशालातः उच्चस्वरेण उक्तवान् - "अग्रज ! शृणोतु । माता पुनरपि वदन्ती अस्ति - मया पाकं कर्तुं न शक्यते इति ।"

तदा रामण्णः हसन् - "एतस्मिन् एव वर्षे मम विवाहः प्रवर्तेत इति मातुः प्रबला इच्छा । अनिच्छन्तम् अपि मां बलात् नीत्वा कस्याश्चित् कन्यायाः कण्ठे मालां मद्द्वारा अर्पयितुं सन्नाहं कृतवती अस्ति सा" इति उक्तवान् ।

"भवता एव विवाहः स्वयं कुतो वा न अङ्गीकरणीयः ?" - अहं पृष्टवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''विवाहार्थं मम मनः सिद्धं नास्ति ।''

''किमर्थम् ?''

''मया वोढव्यः कर्तव्यभारः अनल्पः । वीणाविद्वत्परीक्षा अस्ति एतस्मिन् वर्षे । शङ्करस्य स्नातकोत्तराध्ययनार्थं व्यवस्था करणीया । मातापित्रोः योगक्षेमनिर्वहणं ममैव - यावत् अहं जीवामि तावत् ।.....''

अहं मध्ये पृष्टवान् - ''किं शङ्करः स्नातकोत्तरपदवीं प्राप्य उद्योगं प्राप्य ..... ?''

''सः भवन्तं किमपि न उक्तवान् इति मन्ये'' इति मध्ये एव उक्त्वा कथनम् अनुवर्तितवान् रामण्णः - ''राष्ट्रं, धर्मः, संस्कृतिः इत्यादीनां विषये सर्वैः सह वार्तालापं करोति सः । स्वविषये कदापि कमपि न वदति प्रायः । तथा कथनं न आवश्यकम् इति तस्य आशयः । प्रसङ्गवशात् अहं वदन् अस्मि । 'जीवने काचित् पदवी अपि भवतु' इति उद्देशेन सः पठति । 'भाविजीवनस्य निमित्तं ज्ञानसम्पादनम् अपि भवतु' इति तस्य अपरः उद्देशः । अध्ययनानन्तरं सः स्वजीवनं सङ्घकार्यार्थं पूर्णतः समर्पयिष्यति । अन्ये इव उद्योगः, विवाहः, कौटुम्बिकजीवनम् इत्यादिषु आत्मानं प्रवर्तयितुं सः इच्छति । जीवने विशालं कार्यक्षेत्रम् इच्छति सः । ध्येयसाकारताप्राप्त्यर्थं कार्यं कर्तुम् अवकाशम् इच्छति सः । अतः सः विवाहितः न भविष्यति । मातापितरौ अपि एतं विषयं जानीतः । शङ्करः इव अहम् अपि भवेयम् इति तयोः आतङ्कः । अतः एव मातुः निर्णयः - एतस्मिन् एव वर्षे मम विवाहः निर्वर्तनीयः इति ।''

''शङ्करस्य निर्णयः युक्तः इति भासते किम् ?''

''कुतो अयुक्तता ? सामान्यः जनः भवतु मम अनुजः अपि इति तु मम इच्छा नास्ति । विशाले क्षेत्रे तेन दृश्यमाने, महापुरुषत्वं साधनीयम् इति तेन चिन्त्यमाने, अहं किमर्थं विघ्नम् उत्पादयेयम् ? ससन्तोषम् अनुज्ञातवान् अस्मि । यदि सः उद्योगी भवेत् तर्हि माता-पित्रोः योगक्षेमनिर्वहणे मम साहाय्यम् अभविष्यत् इति तु सत्यम् । किन्तु एकाकितया तस्य भारस्य निर्वहणे असामर्थ्यं सर्वथा नास्ति मम । वंशः अविच्छिन्नतया अनुवर्तेत इति माता वदति । तदर्थम् अहम् अस्मि एव । अतः राष्ट्रकार्यार्थं वयं शङ्करं प्रेषयन्तः स्मः ।''

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सः कथनं पुनः अनुवर्तितवान् - "यदा सः बालः आसीत् तदा तम् अहम् एव सङ्घस्थानं प्रति नीतवान् आसम् । अल्पे एव काले अहं व्यवस्थितगमनं स्थगितवान् । किन्तु स तु तस्मिन् एव कार्ये विलीनः जातः । इण्टर्मीडियेट्पठनसमये सः कदाचित् माम् उक्तवान् - 'रामण्ण ! राष्ट्रकार्यार्थम् एव समग्रं जीवनं यापनीयम् इति मम इच्छा' इति । तस्य वचनं श्रवणरमणीयम् आसीत् । वयं धनिकाः तु न। तत्काले तु अस्मद्गृहस्य आर्थिकी स्थितिः नितरां शोचनीया आसीत् । निर्धनकुलीयः कथं राष्ट्रसेवां कर्तुं शक्नुयात् इति प्रश्नः मां बाधते स्म । इदानीम् अहम् अवगतवान् अस्मि - वास्तविकी राष्ट्रसेवा तु निर्धनकुलीयेन, धनिकत्वं त्यक्त्वा हृदयपूर्वकं निर्धनत्वम् अङ्गीकृतवता वा एव साध्या इति ।"

एतावता सायं पञ्चवादनं जातम् आसीत् । त्वरया प्रकोष्ठम् आगत्य शङ्करः उक्तवान् - "मम अग्रजस्य भाषणं समाप्तं खलु ? उत्तिष्ठतु, गच्छाव । मया सङ्घस्थानं प्रति गन्तव्यम्" इति ।

आवां ततः प्रस्थितवन्तौ । तस्य पिता विशेषोपन्यासस्य श्रवणार्थं संस्कृतमहाविद्यालयं गतवान् आसीत् । प्रस्थितं माम् उक्तवान् रामण्णः - "एतेन सहैव आगन्तव्यम् इति मत्वा एतस्य प्रतीक्षां मा करोतु । विरामे लब्धे अवश्यम् अत्र आगच्छतु । एषः तु अस्मद्गृहमात्रीयः न ।"

माता पाकशालातः एव उच्चस्वरेण उक्तवती - "शङ्कर ! अग्रिमे भानुवासरे आगच्छतु भोः ।"

आवां ततः निर्गतौ । शङ्करः कार्यालयं गत्वा समवस्त्रं धृत्वा सङ्घस्थानं प्रति प्रस्थितवान् । भानुवासरकारणतः पाठनरूपं नित्यकार्यं मम न आसीत् । अतः अहम् एकः एव कुक्करहळ्ळिकासारं प्रति प्रस्थितवान् विहारार्थम् ।

* * *

अद्यावधि शङ्करविषये मम आदराभिमानादयः आसन् । तस्य स्नेहं प्राप्य अहम् आत्मानं धन्यं भावयामि स्म । तस्य व्यक्तित्वस्य विषये पूज्यभावः अपि आसीत् । किन्तु रामण्णस्य वचनस्य श्रवणस्य अनन्तरम् अभासत यत् शङ्करः पर्वतोपमः इति । 'तं पूर्णतः अवगन्तुं ममैव सामर्थ्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नास्ति । मम विकासः अपर्याप्तः एतद्विषये । तस्य गृहस्य आर्थिकी स्थितिः नितरां दुर्बला । यदि सा उज्जीवनीया तर्हि स्नातकोत्तरपदवीं प्राप्नुवता एतेन एव शक्या । तथापि सः आत्मानं राष्ट्रकार्यार्थं समर्पयितुम् इच्छति । मम अनुजः राष्ट्रार्थं समर्पितः इति अग्रजः साभिमानं वदति ! महान्तम् अपि एतं निर्णयं शङ्करः मां न उक्तवान् एव । सङ्कल्पितस्य कथनं न इच्छति सः । क्रिया केवलम् उत्तरम् !'

तस्य आर्थिकी स्थितिः मया सम्यक् ज्ञायते स्म । युतकद्वयं वेष्टीद्वयं च तस्य सम्पत्तिः । सर्वदा कक्ष्यायां प्रथमः सः एव भवति स्म इत्यतः विद्यार्थिवेतनं तु प्राप्यते स्म । ततः सः वेष-पुस्तकादीनां व्ययं निर्वहति स्म । अहम् इव सः यदि गृहपाठं कुर्यात् तर्हि प्रतिमासं शतं रूप्यकाणि वा सम्पादयितुं शक्नुयात् एव । किन्तु सः तत् न इच्छति । विद्यालयीयेतरसमयं समग्रं सः सङ्घकार्यार्थं विनियुङ्क्ते । महाविद्यालयीयः विद्याभ्यासः अपि सङ्घार्थम् एव । स्वनिमित्तं किमपि न इच्छति, न करोति वा । तथापि महती तृप्तिः तस्मिन् । तस्य अपूर्वं चैतन्यं, त्यागमयजीवनं च पश्यामि चेत् भासते स्म यत् तस्मिन् अहं यम् आदरभावं प्रदर्शयन् अस्मि सः वस्तुतः अपर्याप्तः इति ।

तस्मिन् दिने रात्रौ आवां सहैव भोजनार्थम् उपविष्टवन्तौ । मौनेन भोजनं प्रचलति स्म । मनसि कोऽपि विचारः आगच्छति चेत् अहं मौनेन तिष्ठामि स्म । एतत् जानन् शङ्करः अपि मया सह वार्तालापं न कृतवान् । भोजनं समाप्य निर्गमनसमये तेन सह वार्तालापः करणीयः इति भावः मयि उत्पन्नः । मम मुखभावम् अभिजानन् सः सविनोदम् उक्तवान् - ''मुनिवर्यस्य मौनव्रतभङ्गकालः सन्निहितः इति भाति ।''

''अलं विनोदेन । शङ्कर ! अहं भवन्तं किञ्चित् प्रष्टुम् इच्छामि ।''

''प्रश्नविषयः ! मया वराटिकाः न आनीताः खलु ? अन्यच्च प्रश्नविषयं यः वदति तस्मै गुरुदक्षिणा दातव्या भवति अपि ।''

''शङ्कर ! अलं विनोदेन । मम प्रश्नस्य समुचितम् उत्तरं ददातु ।''

''कः प्रश्नः भवतः ?''

''भवान् आत्मानं राष्ट्रार्थं समर्पितवान् इति [illegible]ः माम् उक्तवान् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

भवता क्रियमाणं तु सङ्घकार्यम् । अग्रे अपि तदेव करिष्यति भवान् । सङ्घकार्यार्थम् आत्मसमर्पणं भवता यत् कृतं तत् भवतु नाम । किन्तु तदेव 'राष्ट्रकार्य'शब्देन किमर्थं निर्देष्टव्यम् ? भवतः दृष्ट्या राष्ट्र-सङ्घौ किम् अभिन्नौ ?''

शङ्करः प्रतिप्रश्नं कृतवान् - ''राष्ट्रं नाम किम् इति भवान् अवगतवान् अस्ति ?''

''मम अवगमनं कथमपि स्यात् नाम । मम प्रश्नस्य समुचितम् उत्तरं वदतु तावत् ।''

''मम दृष्ट्या राष्ट्रं नाम भौगोलिकव्याप्तिः न । द्वित्रदिनेषु सिध्यत् तत्त्वम् अपि न तत् । राष्ट्रस्य कश्चन इतिहासः स्यात् । काचित् उज्ज्वला परम्परा स्यात् । जीवन्ती संस्कृतिः स्यात् । जीवनमौल्येषु स्वत्वं स्यात् । एतैः सर्वैः समेतम् एव राष्ट्रं नाम ।''

''राष्ट्रसेवायाः सङ्घसेवायाः च कः सम्बन्धः भवद्दृष्ट्या ?''

सः गम्भीरस्वरेण उक्तवान् - ''राष्ट्रसेवाकार्यम् एकाकितया कर्तुं न शक्यते । राष्ट्रं सागरः इव । प्रबलायाः अपि व्यक्तेः शक्तिः अतिसामान्या । अतः कार्यार्थं संस्था आवश्यकी एव । मम पुरतः मार्गद्वयम् अस्ति । स्वकल्पनानुगुणं स्वसंस्थायाः उपस्थापनम्, अथवा अस्मत्कल्पना-साम्ययुक्तायाः कस्याश्चित् संस्थायाः सम्बन्धस्य स्वीकारः । प्रथमः विकल्पः न युक्तः । एकैकोऽपि जनः यदि स्वकल्पनानुगुणं संस्थाः स्थापयेत् तर्हि देशे सर्वत्र शिलीन्ध्राः इव संस्थाः एव भवेयुः ।''

''एवं तर्हि भवता यदर्थं कार्यं क्रियते सः सङ्घः पूर्णरूपेण किं भवतः ध्येयधारणानुगुणः अस्ति ?''

''तथा अस्ति इति वक्तुं न शक्यते । सर्वेषाम् आशयान् प्रतिबिम्बयन्ती संस्था लोके भवितुं न अर्हति । अतः विचारसाम्यं यत्र भवति तादृशीं संस्थां प्रविश्य अस्मदादर्शानुगुणं संस्थायाः कार्यक्रमेषु परिवर्तनम् आनेतुं यत्नः करणीयः ।''

''तदस्तु, किं राष्ट्र-सङ्घयोः अभेदः परिगण्यते भवता ?''

''सा सङ्कुचिता दृष्टिः सर्वथा नास्ति मम । सङ्घः भवति राष्ट्रकार्यार्थम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सङ्घः साधनम् । साधनं कदाचित् विलुप्तं भवेत् चेदपि नास्ति चिन्ता । इतोऽप्युत्तमं राष्ट्रकार्यं तु केनचित् क्रमेण प्रचलेत् एव ।''

''हिन्दवः सङ्घटिताः भवेयुः इति खलु भवतः सङ्घस्य उद्देशः ? अन्यमतीयान् द्वेषेण पश्यन्ति भवन्तः । एवं राष्ट्रभागभूतान् द्वेषेण पश्यन्तः भवन्तः कीदृशीं वा राष्ट्रसेवां कुर्युः ?''

''वयम् अन्यमतीयान् द्वेषेण पश्यामः इति भवता कथं गृहीतम् ? अन्यैः क्रियमाणस्य अपप्रचारस्य कारणतः एषः मिथ्याभावः भवति उत्पन्नः अस्ति । आ इतिहासकालात् एकं तु स्पष्टं यत् हिन्दवः सङ्घटनाभावकारणतः एव हानिं प्राप्तवन्तः इति । प्रत्यक्षतया परोक्षतया वा हिन्दुधर्मस्य यादृशं लुण्ठनं प्रवृत्तं तादृशम् अन्यस्य कस्यापि न प्रवृत्तम् । अनागरिकक्रमेण अस्माकं कियन्तः विग्रहाः नाशिताः ! अस्मत्मातृ-भगिन्यादीनां विषये कृतः घोरः अत्याचारः किम् अल्पः ? बलप्रयोगेण, आमिषदर्शनेन, अपप्रचारेण च कियन्तः हिन्दूधर्मीयाः अन्यमतीयैः स्वमतं प्रति नीताः इति किं भवान् जानाति ? एतत् अद्यापि अनुवर्तते । ..... ''

''किं हिन्दुसमाजे लोपः नास्ति ?''

''लोपाः सन्ति एव । अस्माकं न्यूनतायाः दुरुपयोगः स्वीकरणीयः इत्येषः वाणिज्यमनोभावः किमर्थम् अन्येषु भवेत् ? राष्ट्रजीवनं केवलं हिन्दूनाम् एव न इति कथनं मया कदापि न निराकृतम् । 'राजकीयस्य आर्थिकस्य वा आनुकूल्यस्य निमित्तं स्वीकृता शासनव्यवस्था एव राष्ट्रम्' इति चिन्तनं नितरां सङ्कुचितम् । समग्रदृष्ट्या द्रष्टव्यम् अस्माभिः । राष्ट्रम् एव मम माता । राष्ट्रम् एव मम मुक्तिहेतुः । मया पूज्यमानं दैवतं राष्ट्रम् एव । राष्ट्रदेवः अहम् । यदि अहं मृतः स्यां तर्हि गङ्गायां मम चिताभस्म विसर्जनीयम् इति मम इच्छा । किन्तु अन्येषां चिन्तनम् एतादृशं न । राष्ट्रभक्तिविषयः यदा प्रस्तूयते तदा ते देशनिष्ठां प्रदर्शयेयुः । किन्तु यदा धर्मनिष्ठाविषयः प्रस्तूयते तदा तेषां श्रद्धा मेक्कायां बेत्लेहेमे वा ! राष्ट्रनिष्ठा-धर्मनिष्ठयोः सङ्घर्षः देशे तदा तदा भवति एव । एतादृशे सङ्घर्षकाले तेषां निष्ठा कस्यां दिशि प्रवहति इति मया न पुनर्वक्तव्यम् । किन्तु हिन्दोः न तथा । तस्य देहली काशी च भारते एव अस्ति ।''

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

''भवतः एतं विचारम् अहम् अङ्गीकरोमि शङ्कर ! तथापि कश्चन प्रश्नः - मतं राजकीयं च परस्परं भिन्नं खलु ?''

''अवास्तविकम् असाध्यं शुष्कतर्कं भवान् अपि मा अनूच्चारयतु । राजकीयस्य पृष्ठतः यदि मतीयशक्तिः न स्यात् तर्हि देशविभजनं किमर्थम् अभविष्यत् ? भारतस्य राजकीयव्यवहारे क्रैस्तमतं किम् अल्पं हस्तक्षेपं करोति ? हिन्दुजनानां सङ्घटनं भवेत् । हिन्दुसमाजे प्रवृद्धाः लोपदोषादयः अपसारणीयाः । तदर्थं काचित् संस्था आवश्यकी एव । क्रिस्तजनान् पश्यतु - तन्मतीयानां सङ्घटनकार्यं कियत् सुव्यवस्थितम् अस्ति ! सुव्यवस्थितं राजकीयपक्षम् अपि अतिशेते तत् । मोहम्मदीयेषु एकता आ बहोः कालात् अस्ति । दुरदृष्टग्रस्तस्य हिन्दुसमाजस्य सङ्घटनकार्यं यदि न प्रवर्तेत तर्हि अचिरात् एव सः नामावशिष्टः भवेत् ।''

अन्तिमवचनानि वदतः शङ्करस्य ओष्ठौ कम्पेते स्म । सम्भाषणमग्नौ आवाम् अजानन्तौ एव मार्गपार्श्वे स्थितौ आस्व । सशब्दं गच्छत् भारवाहकं यानम् आवाम् इहप्रपञ्चम् आनयत् । शङ्करस्य वचनानि एव पौनःपुन्येन मनसि आकलयन् अहम् उक्तवान् - ''शङ्कर ! भवतः आशयः मया इतोऽपि सम्यक् अवगन्तव्यः अस्ति । एतद्विषयकान् कांश्चन ग्रन्थान् आनीय ददातु कृपया'' इति ।

''भवतु । श्वः भवान् मया सह विश्वविद्यालयीयं ग्रन्थालयं प्रति आगच्छतु'' इति उक्त्वा शङ्करः स्वकीयम् आवासभूतं कार्यालयं प्रति गतवान् । अहं मन्दगत्या प्रकोष्ठं प्रति प्रस्थितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तद्वर्षीयं मम अध्ययनं समाप्तम् आसीत् । नञ्जुण्डस्य अपि एस्.एस्.एल्.सि.परीक्षा समाप्तिं गता आसीत् । 'ग्रीष्मविरामकाले मैसूरुनगरे एव स्थित्वा भारतीयसंस्कृतिसम्बद्धाः केचन ग्रन्थाः पठनीयाः' इति मम सङ्कल्पः आसीत् । 'मया सह मम ग्रामम् आगत्य विरामदिनानि सुखेन यापयतु' इति सानुरोधं वदन् आसीत् नञ्जुण्डः । तस्य पिता अपि नञ्जुण्डाय पत्रं लिखितवान् आसीत् – 'आगमनसमये सत्यनारायणम् अपि आनयतु' इति । तत्रैव पठितुं शक्यते इति निश्चित्य अहं कानिचित् पुस्तकानि स्वीकृत्य नञ्जुण्डेन सह प्रस्थितवान् । शङ्करः नगरे न आसीत् । नागपुरे प्रचलिष्यतः सङ्घशिक्षावर्गस्य निमित्तं सप्ताहात् पूर्वम् एव गतः आसीत् सः ।

नञ्जुण्डस्य पिता नरसिंहय्यः मम बाल्यकालीनः गुरुः । तस्य बोधनं नितराम् अनुकरणयोग्यं भवति स्म । तस्य जन्मस्थलम् अरसीकेरे-उपमण्डलस्थं बिळिलकेरे । तत्र षड्-एकरपरिमिता कृषिभूमिः त्रिंशन्नारिकेलसस्यानि च आसन् तदीयानि । तस्य औद्योगिकजीवनस्य भूयान् भागः चलुवरायपत्तने एव यापितः आसीत् । मासात् पूर्वं तदीये ग्रामे नवविधः माध्यमिकविद्यालयः (न्यू टैप् मिडल् स्कूल्) आरब्धः आसीत् । तस्य मुख्योपाध्यायत्वेन नियुक्तः अस्ति सः । चिरकालानन्तरं स्वकीये ग्रामे एव उद्योगं कर्तुम् अवकाशं प्राप्य नितरां सन्तुष्टः आसीत् सः । कृष्यर्थम् अन्याधीनीकृतायां भूमौ इदानीं सः स्वयं कृषिम् अपि करोति – कर्मकरसाहाय्येन । इतः वर्षत्रयाभ्यन्तरे तस्य निवृत्तिः भविष्यति अपि ।

नञ्जुण्डः तदीयः ज्येष्ठपुत्रः । अन्ये त्रयः पुत्राः अपि सन्ति तस्य । स्त्रीसन्तानः तु नास्ति । 'इतोऽपि वर्षचतुष्टयं यावत् महाविद्यालये पठित्वा नञ्जुण्डः पदवीधरः भवेत्' इति तस्य अपेक्षा । यस्मिन् काले तेन निश्चिन्ततया दिनानि यापनीयानि, तस्मिन् काले तं महान् कासरोगः बाधते । वर्षात्

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

पूर्वं वैद्यः अभिज्ञातवान् अस्ति यत् एषः श्वासकासः (अस्तमा) इति । अरसीकेरेनगरीयात् सर्वकारीयचिकित्सालयतः सः औषधं स्वीकृत्य नियततया सेवते । तथापि अल्पा अपि शीतबाधा तस्य कासपीडां वर्धयति । अतः सः कुत्रापि न गच्छति । आहारे अपि विशेषपथ्यम् आचरति ।

यद्यपि प्रस्थानसमये मम विशेषोत्साहः न आसीत्, तथापि नञ्जुण्डस्य ग्रामस्य प्राप्तेः अनन्तरं मनः उल्लसितं जातम् । तस्य माता मां वात्सल्यधारया स्नापितवती । मम मातुः तस्याः च जन्मस्थलम् अभिन्नम् । प्रतिवेशिन्यौ आस्तां ते । आ बाल्यात् सहैव वासः आसीत् तयोः । मम ग्रामे अपि तयोः वासः अभिन्नभवने आसीत् । सखीपुत्रं मां दृष्ट्वा सा सखीदर्शनानन्दम् एव प्राप्तवती । 'सेनापते सत्य !' इत्येव मां सम्बोधितवती सा । मदीयानि बाल्यदिनानि सा स्मारितवती ।

''भवान् आ बाल्यात् दुश्चेष्टापरः आसीत् । न जाने, मम आर्यपुत्रात् भवता कति ताडनानि प्राप्तानि इति । इदानीं सा प्रवृत्तिः परित्यक्ता स्यात् खलु ? कालः एव विवेकं बोधयति'' इति माम् उक्त्वा स्वसखीं स्मरन्ती पुनः, ''भवान् शालायां प्रथमस्थानं प्राप्नोति इति नञ्जुण्डेन उक्तम् । पञ्चषाणि रजतपदकानि अपि भवता प्राप्तानि इति श्रुतम् । तानि यदि सा दृष्टवती स्यात् तर्हि न जाने, कियन्तं प्रमोदं प्राप्तवती स्यात् इति । किन्तु हतविधिः तां परलोकं प्रेषितवान् । सर्वं भवतः दौर्भाग्यस्य फलम्'' इति उक्त्वा द्वित्रान् अश्रुबिन्दून् पातितवती ।

अनन्तरं सा पुनरपि उक्तवती - ''अजागलस्तनौ इव भवान्, भवद्भगिनी च स्तः । स्मरसि खलु भगिनी काचित् अस्ति इति । मातामह्या सह सा वसति इति श्रूयते । द्वादशवर्षीया त्रयोदशवर्षीया वा स्यात् सा । भवान् नञ्जुण्डात् एकवर्षात् अवरः । मत्पुत्रस्य सीतारामस्य, भवदनुजायाः तस्याः च समानं वयः स्यात् । किं तस्याः नाम ? शकुन्तला इति खलु ?''

''आम्'' इति उक्तवान् अहम् ।

''एका एव भगिनी भवतः । भवतः पितुः उपस्थितिः अनुपस्थितितः न भिन्ना । भवता एव तस्यै काचित् व्यवस्था परिकल्पनीया'' इति बोधयन्ती

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सा तैलस्नानं कारितवती । पुत्रम् इव मां वात्सल्येन दृष्टवती सा ।

तस्मिन् ग्रामे मासं यावत् आसम् अहम् । प्रतिदिनं कासारे तरामि स्म । नञ्जुण्डः अपि मया सह तरणार्थम् आगच्छति स्म । किन्तु अहम् इव सुदूरं तरीतुं भीतिं प्राप्नोति स्म सः । यङ्कश्चित् विषयम् अधिकृत्य आवां जल्पनं कुर्वः स्म । बाल्यस्य तानि दिनानि पौनःपुन्येन स्मरामः स्म ।

ग्रीष्मविरामकाले अपि अनाथालये भोजनव्यवस्था तु अनुस्यूततया अनुवर्तते स्म । अतः मैसूरुनगरे भोजनविषये कोऽपि क्लेशः न आसीत् मम । अन्यच्च मया येषां बालानां पाठनं क्रियते स्म तेषाम् उत्तीर्णताविषये सन्देहलेशः अपि न आसीत् । अग्रिमवर्षे अपि मया एव पाठनं करणीयम् इति तेषां मातापितॄणाम् अनुरोधः आसीत् । 'दीर्घकालं यावत् विरामः अस्ति चेत् बालाः दुष्टप्रवृत्तिमन्तः भवेयुः' इति चिन्तयन्तः बालानां मातापितरः मां सूचितवन्तः आसन् यत् शीघ्रम् एव अग्रिमपाठस्य आरम्भः भवतु इति । अतः अहं मैसूरुनगरं प्रतिनिवृत्तः । नञ्जुण्डः ग्रामे एव स्थितवान् ।

मैसूरुनगरे मम विशेषकार्यं किमपि न आसीत् । विद्यालयः इतोऽपि न आरब्धः आसीत् । शङ्करः नागपुरतः प्रत्यागतः आसीत् । सङ्घकार्यस्य निमित्तं सः मङ्गलूरुनगरं गतः आसीत् । सङ्घकार्यालये विचारणात् ज्ञातं यत् सप्ताहानन्तरं सः प्रत्यागच्छेत् इति । तत्रत्यग्रन्थालयात् अपेक्षितानि पुस्तकानि स्वीकृत्य अहं पठनम् आरब्धवान् ।

* * *

सायं सप्तवादनसमयः । पाठं समाप्य अहं प्रकोष्ठं प्रति गच्छन् आसम् । मध्येमार्गं रामण्णः मया दूरात् दृष्टः । इतः पूर्वं पञ्चषवारम् अहं तेन मिलितवान् आसम् इत्यतः अहं सन्तोषेण नामग्रहणपूर्वकं तम् आहूतवान् दूरात् एव । सः उपदशमित्रैः सह कुत्रापि त्वरया गच्छन् आसीत् । मम स्वरं श्रुत्वा मत्समीपम् आगत्य - ''युक्ते समये भवान् मिलितः । आगच्छतु अस्माभिः सह'' इति उक्तवान् सः ।

ततः सः मित्राणि उद्दिश्य - ''सिद्दप्प ! भवान् शीघ्रं गत्वा श्रेष्ठिवर्य

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सर्वं निवेदयतु । द्विचक्रिकया गच्छतु । बसवेगौड ! भवान् छात्रावासं गत्वा केङ्गय्य-मल्लण्ण-शान्तप्पादीन् विषयं वदतु । सर्वैः पादोनाष्टवादनाभ्यन्तरे तत्र उपस्थातव्यम्'' इति उक्तवान् ।

तेन सह स्थितेषु एकैकः अपि एकैकत्र गतवान् । तेषां कार्यक्रमः कः इति मया न अवगतम् । 'कः विशेषः ?' इति मया पृष्टः रामण्णः अवदत् - ''रामशास्त्रिमार्गे किञ्चन गृहम् अस्ति । तत्र अमेरिकादेशीयः कश्चन क्रैस्तगुरुः दिनद्वयतः प्रचारं कुर्वन् अस्ति । 'मम देवस्य नाम उक्त्वा कोऽपि रोगी मया स्पृष्टः चेत् तदीयः रोगः तत्काले एव उपशाम्यति । अस्माकं देवः एव श्रेष्ठः । अन्ये देवाः निष्प्रयोजकाः । ये मोक्षम् इच्छन्ति ते क्रिस्तमतीयाः भवन्तु । भवतां कृष्णः चोरजारशिखामणिः । भवतां शिवः भस्मोद्धूलितदेहः' इत्येवमादिकं वदन् सः हिन्दूदेवान् भृशं निन्दति । 'विना शुल्कम् अस्वस्थाय एसुक्रिस्तः औषधं ददाति । अपुत्राः पुत्रयुक्ताः भवन्ति' इत्येवमादिकं वदन् सः जनान् प्रलोभयति । तेन प्रभावितः कश्चित् ह्यः क्रिस्तमतम् अवलम्बितवान् इति श्रूयते । अद्य अस्माभिः तत्र गत्वा कोलाहलं कृत्वा सः इतः दूरे प्रेषणीयः'' इति ।

रामण्णस्य वचनस्य श्रवणात् मयि अपि उत्साहः उत्पन्नः । अहम् अपि तेन सह प्रस्थितवान् । तदा सपादसप्तवादनसमयः । क्रैस्तप्रचारकस्य कार्यक्रमस्य आरम्भः अष्टवादने । अतः आवां तद्गृहस्य पुरतः स्थिते उपाहारमन्दिरे उपविष्टवन्तौ । पादोनाष्टवादनसमये रामण्णेन सूचिताः जनाः तत्र सम्मिलिताः । वयं सर्वे सम्भूय समालोच्य अग्रिमपदानि निश्चितवन्तः । 'अन्यैः इव सर्वैः गृहस्य अन्तः गत्वा उपवेष्टव्यम् । मध्ये मया उत्थाय युक्तियुक्ताः प्रश्नाः प्रष्टव्याः । यदि सः समुचितम् उत्तरं दातुं न शक्नोति तर्हि प्रबलैः वादैः तस्य खण्डनं करणीयम्' इति निश्चित्य वयं सर्वे गृहं प्रविष्टवन्तः । रामण्णादयः द्वित्राः बहिः एव स्थितवन्तः ।

तत् तु स्थानीयस्य कस्यचित् क्रैस्तमतीयस्य गृहम् । गृहस्य अन्तः द्विशताधिकजनानाम् उपवेशनयोग्यं विशालम् अङ्गणम् आसीत् । भित्तिषु क्रैस्तीयानि विविधचित्राणि दृश्यन्ते स्म । विविधैः वर्णमयैः विद्युद्दीपैः वर्णमयकागदैः च गृहस्य अन्तर्भागः अलङ्कृतः आसीत् । जनानाम् उपवेशनार्थं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वस्त्रकटः प्रसारितः आसीत् । प्रचारकस्य निमित्तं विशालं मञ्चं निर्माय तदुपरि रत्नकम्बलं प्रसार्य चत्वारः आसन्दाः स्थापिताः आसन् । मञ्चस्य पृष्ठतः भित्तौ वध्यस्थानचिह्नं बैबल्वाक्यानि च लिखितानि आसन् । तत्र सम्मिलितेषु अधिकांशजनाः हिन्दवः एव । तत्प्रदेशवासिन्यः क्रैस्तमहिलाः प्रतिवेशिनीः हिन्दुगृहिणीः आनीतवत्यः आसन् । अष्टवादनाभ्यन्तरे अङ्गणं जनैः पूर्णम् । हिन्दुमहिलानां सङ्ख्या तत्र अधिका । अग्रे केचन तरुणाः उपविष्टाः आसन् । ते च रेल्वेकार्यशालादिषु उद्योगिनः ।

अष्टवादने एकम् आधुनिकं सुन्दरं कार्यानं गृहस्य पुरतः आगत्य अतिष्ठत् । एकः अमेरिकीयः प्रचारकः, एका महिला च ततः अवतीर्णौ । कार्यानचालकः तत्प्रदेशवासी एव कश्चन क्रिस्तमतीयः । ते त्रयः अपि अन्तः गत्वा मञ्चम् आरूढवन्तः । अमेरिकीयौ दम्पती आसन्दे उपविष्टे । यानचालकः तथैव स्थितवान् ।

प्रचारकः प्रायः त्रिंशद्वर्षीयः । उन्नतं शरीरं तस्य । अमेरिकशैल्या वस्त्रं धृत्वा हस्तेन बैबल्ग्रन्थं गृहीतवान् आसीत् सः । तेन सह स्थिता महिला प्रायः अष्टाविंशतिवर्षीया । सा तस्य पत्नी । सिंहकट्याः तस्याः आकर्षकं रूपम् । ओष्ठरागेण ओष्ठे अलङ्कृतवती आसीत् सा । चलनचित्रनटी इव आजानु निचोलं धृतवती आसीत् अपि । केशान् कर्तयित्वा रमणीयतया प्रसाधितम् आसीत् । आकर्षकम् आसीत् तस्याः रूपम् । यानचालकः दृढकायः पुरुषः । पञ्चविंशतिवर्षीयः स्यात् सः । कृष्णवर्णीयः श्मश्रुलः च सः श्वेतवस्त्रं धृतवान् आसीत् ।

अस्मासु पश्यत्सु देशीयः क्रैस्तः कश्चन युवकः कार्यानतः पियानो-वाद्यं, कार्डियन्वाद्यं, पिटीलुवाद्यं, तालवाद्यं च आनीतवान् । प्रचारकः पिटीलुवाद्यं गृहीतवान् । तत्पत्नी कार्डियन्वाद्यं गृहीतवती । अन्यौ द्वौ युवकौ तालवाद्यं पियानोवाद्यं च गृहीतवन्तौ । ''वयं प्रार्थनां करवाम'' इति उक्तवान् यानचालकः ।

पाश्चात्यवाद्यवादनपूर्वकं ते एकम् आंग्लगीतं गीतवन्तः । तेषां गानम् उच्चस्वरेण आसीत् । अतः गानं श्रुत्वा मार्गे गन्तारः अपि केचन अन्तः आगताः । गानकारणतः तत्र कश्चन भावनावेशः प्रसृतः आसीत् । गीतस्य

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अन्ते यानचालकः गाम्भीर्येण तिष्ठन् नेत्रे अर्धनिमीलिते कृत्वा आवेशयुक्तस्वरेण लघुभाषणं कृतवान् ।

''अयि बोः भान्धवाः ! अहं झन्मना क्रैस्थमतीयः न । हिन्दुधर्मानुयायिनोः माथाफित्रोः पुत्रः सन् अहम् एतस्मिन् बूलोके झन्म प्राप्तवान् । अष्ठमे वयसि अहं कुष्ठरोघग्रस्थः झातः । माथाफितरौ देशे लभ्यमानाः सर्वविधछिखित्साम् अपि खारितवन्तः । सर्वे धन्वन्थरयः अपि मम रोघस्य निवारणे असमर्ताः झाताः । एवं धश वर्षाणि घतानि । अन्ते सुदैववशात् कस्चन क्रैस्तमहात्मा मम घृहम् आगत्य मां दृष्ट्वा उक्थवान् - 'औषधं विनैव एतस्य रोघं निवारयिस्यामि' इति । 'एखमात्रस्य पुत्रस्य एतष्य रोगनिवारणं यदि ख्रियते टर्हि मम सकलैस्वर्यम् अपि धाश्यामि' इति मम पिता उक्तवान् । किन्तु शः क्रैस्तमहात्मा किम् ऐश्वर्यम् इच्छति ? न । शर्वथा न । विना धनम् एव शः विना औषधं केवळजळलेपणेन मम रोघं दिनत्रयाभ्यन्तरे निवारितवान् ।.......''

अन्तिमपङ्क्तौ उपविष्ठः वृद्धाः नेत्रे उन्मील्य आश्चर्यचकिततया तं पश्यन्त्यः भक्त्या शृण्वत्यः आसन् । सः स्वस्य उभौ अपि हस्तौ उन्नीय कथनम् अनुवर्तितवान् -

''..... थदा अहम् अष्टाधशवर्षीयः । शत्यं कुत्र इति मया ज्ञातं थदा । अतः अहं निर्णीथवान् - 'शत्यधर्मः एव अवलम्बणीयः इति । मम माथाफितरौ अपि शत्यधर्शनं प्राप्थवन्तौ आस्थाम् । अतः वयं शर्वे ख्रैस्थमतीयाः जाताः । पापिणः वयं पापनिवारणार्थं खिमपि कुर्याम एव खळु ? अथः अहं फवित्रान् झेरुशलेम्-बेत्लेहेम्प्रभृतीन् प्रदेशान् फ्रति गतवान् । शत्यनगरे बेटलेहेमे एथयोः धम्पत्योः परिछयः झातः मद्भाग्यवशात् । देशप्रेम्णा फ्रेरितः अहम् एतौ प्रार्तिथवान् - महात्माणः बवन्थः अस्मद्धेशम् आगचेयुः इति । तदनुगुणम् एथौ अत्र आगथौ । थृतीयं दिनम् एथत् । अश्माकं शौभाग्यम् अध्य । इधानीम् एसः महोदयः फवित्रोपदेसं करिस्यति ......''

महापुरुषः इव व्यवहरन् तरुणः यदा कथनं स्थगितवान् तदा सः प्रचारकः उत्थाय भाषणम् आरब्धवान् । तस्य भाषणम् आंग्लभाषायाम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीत् । तथापि तस्य भाषा अस्मदादिभिः अवगन्तुं योग्या आसीत् । यानचालकः मध्ये उक्तवान् - ''एथस्य महाथ्मनः भासणम् आंग्लभासया अस्ति । धुराधृष्ठमये अश्माकं देसे महिळाः विध्याब्यासस्य अभावश्य खारणतः अप्रगथाः शन्ति । थाशां प्रगथ्यर्थं फ्रयत्नकरणम् अश्माकं शर्वेशां खर्तव्यम् । थाः अपि महाथ्मनः भासणम् अवगच्छन्तु इति उद्धेसेन अहं स्थानीयभासया तदासयं विवृणोमि ......''

आवेशयुक्तध्वनिना अभिनयपूर्वकं सः प्रचारकः अर्धघण्टां यावत् भाषणं कृतवान् । मध्ये मध्ये सः स्थगयति स्म । यानचालकः तस्य अनुवादं करोति स्म । तस्य अनुवादश्रवणात् एव अस्माभिः ज्ञातम् - एषः आंग्लभाषाम् आधिक्येन न जानाति इति । प्रचारकः भाषणावसरे हिन्दूदेवान् हिन्दुधर्मं च व्यङ्ग्योक्त्या निन्दति स्म । भाषणसमाप्तेः अनन्तरं यानचालकः सभाम् उद्दिश्य उक्तवान् - ''भवत्सु कश्यापि कोऽपि रोघः अस्थि चेत् वदन्तु । एसः महाथ्मा थं दूरीकरिस्यति........ ।''

सभायाम् उपविष्टः कश्चन चत्वारिंशद्वर्षीयः गृहस्थः उत्थाय गत्वा वेदिकाम् आरुह्य - ''मम महती हृदयवेदना अस्ति । तत्रभवता महात्मना एतस्य उपशमनं करणीयम्'' इति प्रार्थितवान् ।

सः अमेरिकीयजनः स्वस्य दक्षिणहस्तं तस्य गृहस्थस्य उरोभागे स्थापितवान् । निर्निमेषदृष्ट्या तं पश्यन् अव्यक्तस्वरेण मन्त्रोच्चारणं कृतवान् । ततः आंग्लभाषया तं गृहस्थं पृष्टवान् - ''किं रोगः उपशान्तः ?''

यानचालकः तस्य अनुवादं कृतवान् । तदा रोगी - ''मम वेदना सर्वथा अपगता महात्मन् ! अहं स्वस्थः अस्मि इदानीम्'' इति ससन्तोषम् उक्तवान् ।

एतत् श्रुतवतां सभास्थानां मध्ये परस्परसम्भाषणम् आरब्धम् । एका मुग्धा वृद्धा उत्थाय करौ योजयित्वा तं प्रचारकं नमस्कृतवती । तदा यानचालकः उक्तवान् - ''इधानीं ज्ञाथं कलु - शत्यं कुत्र अशित इथि ? एथं शत्यधर्मं यः कोऽपि फ्रवेष्टुम् अर्हति । दयाळुः एसः महाथ्मा आशक्थेभ्यः फवित्रं पुस्तकं ददाति । किन्थु नास्ति अत्र भलात्कारः । .....''

सभा निश्शब्दा जाता । द्वारसमीपे रामण्णस्य मुखं मया दृष्टम् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सः नेत्रसङ्केतं कृतवान् । अहम् उत्थाय वेदिकासमीपं गतवान् । मां पश्यन् पृष्टवान् यानचालकः - ''का समस्या भवतः ?''

तस्मै उत्तरम् अदत्त्वा अहं प्रचारकस्य पुरतः स्थित्वा आंग्लभाषया उक्तवान् - ''मम महती उदरवेदना । कृपया ताम् उपशमयतु .....''

सः सूचितवान् - ''युतकम् उन्नयतु....'' । अहं तथैव कृतवान् । सः मम उदरस्य उपरि स्वदक्षिणहस्तं संस्थाप्य - ''मम नेत्रे पश्यतु'' इति मां सूचितवान् । अहं तस्य दृष्टौ मम दृष्टिं योजितवान् । तत्र वश्यविद्या(हिप्नांटिसम्)सङ्केतः लक्षितः मया । निमेषद्वयानन्तरं सः मां पृष्टवान् - ''भवतः वेदना अपगता । एवं ननु ?'' इति ।

''न'' - अहम् उक्तवान् ।

पुनः निमेषद्वयं यावत् मम मुखं तीक्ष्णदृष्ट्या दृष्ट्वा विजयप्राप्तिसूचकस्वरेण - ''इदानीं वेदना किञ्चित् वा अपगता स्यात् एव । वेदनायाः अर्धभागः पादभागः वा उपशान्तः अस्ति । एवं ननु ?'' इति पृष्टवान् ।

तदा अहम् उक्तवान् - ''मम उदरवेदना एव नास्ति...''

''एवं तर्हि किमर्थम् असत्यम् उक्तं भवता मत्पुरतः ?'' इति क्रोधेन पृष्टवान् सः प्रचारकः ।

''उदरवेदना वास्तविकी उत अवास्तविकी इति ज्ञातुं महात्मनः भवतः सामर्थ्यं स्यात् एव खलु ?'' - अहम् उपहासमिश्रितस्वरेण पृष्टवान् ।

एतत् श्रुतवतः तस्य मुखं विच्छायं जातम् । रक्तवर्णीयं तदीयं मुखं श्वेतवर्णोपेतं जातम् । तथापि सः आत्मनः दौर्बल्यं कथमपि निग्रहीतुं प्रयतमानः आसीत् ।

''भवतः देशः कः ?'' - अहं पृष्टवान् ।

''आफ् कोर्स्, दि स्टेट्स्'' - सः उक्तवान् ।

''अमेरिकादेशे किं सर्वे क्रिस्तानुयायिनः ?''

''कांश्चन विमतान् विहाय प्रायः सर्वे तादृशाः एव ।''

''भवद्भिः गृहीतम् अर्थं मनसि निधाय न पृष्टं मया । येसुक्रिस्तस्य आशयस्य अनुगुणम् अहिंसातत्त्वं ये अनुसरन्ति ते एव वास्तविकतया क्रैस्ताः । किं तादृशाः सन्ति तत्र ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''असम्बद्धः प्रश्नः अयम्'' मतप्रचारकः क्रोधेन हूँकृतवान् ।

''असम्बद्धः प्रश्नः न अयम्'' इति आवेशेन उक्त्वा कथनम् अनुवर्तितवान् अहम् - ''आदौ भवद्देशीयान् वास्तविकक्रिस्तानुयायिनः क्रियताम् । नगराणां, मातृणां, बालानां, मुग्धजनानां च उपरि ये अण्वस्त्राणि क्षिपन्ति तान् आदौ क्रैस्ततत्त्वं बोधयन्तु । वर्णद्वेषकारणतः कृष्णवर्णीयेषु अमानवीयं व्यवहारं प्रदर्शयन्तं डा० मलानवर्यम् आदौ क्रैस्ततत्त्वं बोधयन्तु । हिन्दुधर्मविषये हिन्दुदेवानां च विषये भवता किं वा अधीतम् ? हिन्दुधर्मतत्त्वस्य अवगमनार्थं किं भवद्भिः प्रयत्नः कृतः ? एतदर्थं किं किमपि अध्ययनं कृतम् ? किमपि अकृत्वा व्यङ्ग्यभङ्ग्या निन्दनं क्रियते खलु भवता ? अहो धाष्ट्र्यम् ! भवतः वश्यविद्यातन्त्रं मया अज्ञातपूर्वं न । भवतः वञ्चनापूर्णव्यवहारस्य नास्ति अत्र अवकाशः । अतः अमेरिकां प्रति प्रतिनिवर्तनम् एव क्षेमकरम् । .....''

प्रचारकः मौनम् अवलम्बितवान् । अहं यानचालकम् उद्दिश्य - ''मया इदानीं यत् उक्तं तस्य अनुवादं सम्यक् कृत्वा सभायां स्थितान् सर्वान् श्रावयतु ।''

यानचालकः निर्वचनं स्थितवान् । तावता प्रचारकस्य पत्नी मत्समीपम् आगत्य मम स्कन्धे स्वहस्तं मृदुतया संस्थाप्य मधुरस्वरेण उक्तवती - ''मित्रवर ! वादार्थं नायं समयः, भूमिः वा । भवतः मनसि स्थितानां प्रश्नानां परिहारार्थम् अस्मद्वसतिम् आगच्छतु भवान् । विस्तरेण चर्चा करवाम । चर्चार्थं वयं सदा सिद्धाः । स्वागतं भवतः । इदानीं कृपया गच्छतु भवान् । प्रार्थनासमयः सन्निहितः अस्ति । .....''

तस्याः निवेदनं तृणीकृत्य अहं प्रादेशिकभाषया उच्चस्वरेण उक्तवान् - ''यावत् मम प्रश्नानाम् उत्तरं न प्राप्यते तावत् इतः न अपसरामि अहम् ।''

एतत् श्रुत्वा यानचालकः कोपेन - ''एतस्य वैधवेयस्य दुष्टस्य कारणतः पवित्रस्य क्रैस्तधर्मस्य, महात्मनः, एतस्याः सभायाः च अपमाननं जातम् अस्ति । धिक् एतम् ! दुष्टः अयं सभातः अपसारणीयः .....'' इति उच्चस्वरेण उक्तवान् ।

तदा सभायाः पुरतः स्थिताः रेल्वेकार्यागारजनाः तरुणाः उत्थितवन्तः ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

पञ्चषाः जनाः आगत्य माम् आवृत्य गृहीतवन्तः । मया यद्यपि सकृत् भयं प्राप्तं, तथापि 'मदीयाः अत्र सन्ति एव' इति चिन्तयता धैर्यं धृतम् । ते युवकाः मां बलात् ततः आकृष्टवन्तः । अहम् उरः विशालीकृत्य दृढतया स्थितवान् । कश्चित् मम पृष्ठास्थि बलात् निपीडितवान् । वेदनाम् असहमानः अहम् चीत्कारं कृतवान् । एतत् श्रुत्वा, बहिः स्थिताः अस्मदीयाः वेगेन धावन्तः आगतवन्तः । रामण्णः मत्समीपम् आगतवान् । तावता कश्चित् मां पृष्ठे मुष्ट्या प्रहृतवान् । शिरोभ्रमणं प्राप्य श्वासोच्छ्वासे क्लेशम् अनुभवन् अहं तत्रैव विसंज्ञः सन् पतितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदा अहं सचेतनः जातः तदा घटनास्थलात् अनतिदूरे स्थिते शिवयोगिस्वामिविद्यार्थिनिलये शयितः आसम् । रामण्णः मत्पार्श्वे उपविस्य वीजयन् आसीत् । मां परितः अनेके अपरिचिताः दृश्यन्ते स्म । मम नेत्रोन्मीलनं दृष्ट्वा रामण्णः - ''इदानीं चिन्ता अपगता । सर्वं सुस्थं जातम्'' इति उक्तवान् । कोऽपि पानार्थं काफीम् आनीय दत्तवान् ।

दशनिमेषाभ्यन्तरे अहम् उत्थाय उपवेष्टुं शक्तः जातः । सर्वैः निषिध्यमानः अपि अहम् उपविष्टवान् । पूर्वं प्रवृत्तं सर्वं मम स्मृतिपथे आसीत् । ''ततः किं प्रवृत्तम् ?'' इति अहं पृष्टवान् ।

''किम् अन्यत् प्रवर्तेत ? तौ ततः पलायितौ'' इति उक्तवान् कश्चित् । अपरः विस्तरेण घटनां विवृतवान् - ''भवन्तं यः प्रहृतवान् तं सभास्थाः अस्मदीयाः दृष्टवन्तः आसन् । अतः ते उत्थाय गत्वा तं गृहीत्वा ताडनस्य प्रतिफलं तं भोजितवन्तः । रेल्वेकार्यशालाजनाः कोलाहलसम्भावनया एव तत्र आनीताः आसन् तैः । सभायां स्थिताः महिलाः कोलाहलं दृष्ट्वा नितरां भीताः । अस्मदीयाः तु - 'अलं भीत्या' इति वदन्तः तासु धैर्यं पूरितवन्तः । अस्मदीयेषु पश्यत्सु, सः प्रचारकः पत्न्या सह कार्यानम् आरुह्य स्वयम् एव तत् चालयन् ततः पलायितवान् । यानचालकः पार्श्वस्थमार्गे पलायमानः अस्मदीयैः कथमपि दृष्टः । पश्चषाः धावन्तः गत्वा अवाच्यशब्दैः निन्दन्तं धावन्तं तं गृहीतवन्तः । स तु भीत्या तेषां पादान् गृह्णन् - 'क्षन्तव्यः अहम् । कृपया मुञ्चन्तु माम् । निर्धनोऽहं वराकोदरपूरणार्थम् एतम् अपराधं कृतवान् । कृपया क्षम्यताम् .....' इति याचितवान् ।

'बेत्लेहेमनगरं कदा गतं भवता ?' अस्मदीयाः पृष्टवन्तः ।

'मया बेत्लेहेमनगरं न दृष्टम्, न गतम् अन्यत् नगरं किमपि । मम जन्मस्थलं कोलारनगरम् । तत्र चालकवृत्त्या जीवामि । एतस्य अण्डर्सनस्य

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

चालकत्वम् अङ्गीकृत्य मया अत्र आगतम् । मैसूरु, बेङ्गलूरु, हुब्बळ्ळि इत्येतेषु त्रिषु नगरेषु तस्य भाषणकार्यक्रमाः निश्चिताः सन्ति । एतेषु त्रिषु स्थलेषु भाषणसाहाय्यं मया यत् क्रियते तदर्थं तेन शतरूप्यकदानम् अङ्गीकृतम् आसीत् । इतः परम् एतादृशं हीनकार्यं न करिष्यामि अहम् । मयि विश्वसन्तु । कृपया मुञ्चन्तु माम् । इतः परम् एतादृशं कार्यं कुर्वाणः यदि अहं भवद्भिः दृश्येत तर्हि मम प्राणान् अपहर्तुम् अर्हन्ति भवन्तः । एवं न करिष्यामि इति प्रतिजाने । कृपया मुञ्चन्तु माम्' इति सदैन्यं पादौ गृहीत्वा प्रार्थितं तेन । अतः तं त्यक्तवन्तः वयम् ।''

तदा मत्पुरतः स्थितः पञ्चाशद्वर्षीयः वृद्धः उक्तवान् – ''तावता सः उपारक्षकनिरीक्षकः (सब्-इन्स्पेक्टर्) आगत्य स्वदर्पं प्रदर्शयितुम् उद्युक्तः । वयं 'जातिभ्रष्टकाक !' इति वदन्तः तं भर्त्सितवन्तः ।''

''सः कथं जातिभ्रष्टतां गतः ?''

''सः जात्या ब्राह्मणः । स्नातकपदव्याः अनन्तरं सः ब्राह्मणत्वकारणात् एव उद्योगलाभात् वञ्चितः अभवत् । ततः तेन क्रिस्तमतम् अवलम्बितम् । तदीयं जन्मनाम 'राजय्यङ्गार्यः' इति । अधुनातनं नाम 'जोसेफ्' इति । क्रिस्तमतस्वीकरणकारणात् एव सः आवेदनपत्रप्रेषणसमनन्तरम् एव निरीक्षकप्रशिक्षणार्थम् अवकाशं प्राप्तवान् । कोऽपि तम् एतां घटनां सूचितवान् आसीत् इति भाति । समीपे कृष्णराजीये आरक्षकालये सत्यपि, दूरे मण्डिमोहल्लाप्रदेशे स्थिताय तस्मै दूरवाणी कृता आसीत् तैः । जातिबलात् पक्षपातं कुर्यात् इति तेषां चिन्तनं स्यात् । वयं तु तस्य आगमनम् उपेक्षया दृष्टवन्तः । अस्माकं सङ्ख्याबाहुल्यं दृष्ट्वा भीतः सः – 'कोऽपि कोलाहलं न कुर्यात्' इति निर्दिश्य ततः निर्गतवान् ।''

''सः मतप्रचारकः इतः परम् एतस्मिन् नगरे पदं स्थापयितुं धैर्यं न प्राप्नुयात्'' इति उक्तवान् अपरः ।

''किं तेन ? भण्डाः ते अत्र अपमाननं प्राप्तं चेत् अन्यत्र मुखम् उन्नमय्य निर्लज्जतया सञ्चरन्ति । इतः सः मण्ड्य-मद्दूरुप्रभृतीनि नगराणि गच्छन् बेङ्गलूरुनगरं प्राप्नुयात् । अत्र आगमनात् पूर्वम् अपि न जाने, कुत्र कतिवारम् एतादृशी 'नीराजनसेवा' प्राप्ता इति । तथापि स्ववृत्तिं तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न त्यजति सः'' इति उक्तवान् सः वृद्धः ।

''वयं जागरूकतया भवाम । अस्मन्नगरे कस्मिंश्चित् अपि उपनगरे एतादृशाः पदं यथा न स्थापयेयुः तथा पश्याम'' इति उक्तवान् कश्चित् ।

तदा अन्यः अवदत् - ''मम हृदयवेदना इति वदन् कश्चित् तत्र चिकित्सां प्राप्तवान् खलु ? सः अस्मन्नगरीयः । मण्ड्यनगरं तस्य जन्मस्थलम् । कस्यचित् कार्यस्य निमित्तम् अत्र आगतः आसीत् सः । स्वजातौ विश्वासम् उत्पादयितुं हृदयवेदनास्थितिम् अभिनीतवान् सः । एवं करणीयम् इति पूर्वम् एव ते एतादृशान् सूचितवन्तः भवन्ति ।''

तावता रात्रेः एकादशवादनम् अतीतम् आसीत् । अहं प्रकोष्ठं गत्वा सुप्तः । शयनसमनन्तरम् एव मया निद्रा न प्राप्ता । 'स्वमतस्य प्रचारार्थं एते विदेशीयप्रचारकाः कीदृशानि कुतन्त्राणि अनुसरन्ति' इति चिन्तनम् एव मम मनसि व्याप्तम् आसीत् । 'मम प्रश्नस्य समुचितम् उत्तरं न जानाति स्म सः मतप्रचारकः । महान्तम् अपि रोगं दैवीशक्त्या एव निवारयितुं समर्थस्य तस्य, मदुदरवेदनायाः अवास्तविकतां ज्ञातुं सामर्थ्यं न आसीत् । सर्वं कापट्यम् ! तस्य नेत्रयोः वश्वविद्यासङ्केताः आसन् । मनोवशीकरणविद्यायाः विषये मया पूर्वम् एव ज्ञातम् आसीत् इत्यतः मम मनः वशीकर्तुं न शक्तः सः ।'

प्रातः उत्थानसमये सप्तवादनम् अतीतम् आसीत् । रात्रौ भोजनं न कृतम् इति कारणतः बुभुक्षा मां बाधते स्म । उत्थाय मुखं प्रक्षाल्य उपाहारगृहं गत्वा उपाहारं सेवित्वा अहं प्रकोष्ठं प्रति आगतः । तावता कश्चन आरक्षकः मम प्रकोष्ठम् आगतः ।

''अये ! उपारक्षकनिरीक्षकः सूचितवान् अस्ति यत् भवान् आनेतव्यः इति । आगच्छतु तावत्'' - दर्पेण उक्तवान् सः ।

''कः उपारक्षकनिरीक्षकः तथा सूचितवान् ?''

''मण्डिमोहल्लीयः ।''

'एषा आज्ञा जोसेफाभिधानस्य राजय्यङ्गार्यस्य' इति मया अवगतम् । 'प्रातः एव का एषा पीडा' इति चिन्तयन् अहं गमनविषये सन्दिहानः स्थितवान् । तदा सः आरक्षकः - 'अये, उत्तिष्ठतु' इति सूचितवान् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

पादरक्षां धृत्वा अहं तम् अनुसृतवान् । उभौ अपि पादाभ्यां प्रस्थितवन्तौ । आवयोः मण्डिमोहल्ला-आरक्षकालयप्राप्तिसमये नववादनम् अतीतम् आसीत् । उपारक्षकनिरीक्षकः कार्यालये दृष्टः मया । उपस्थितं माम् 'उपविशतु' इत्यपि न उक्तवान् सः । दशनिमेषात्मकमौनस्य अनन्तरं सः दर्पेण - ''कः ग्रामः भोः भवतः ?'' इति अपृच्छत् ।

अहम् उत्तरं न दत्तवान् ।

''किं न श्रुतम् ?'' - दर्पेण एव पुनः पृष्टं तेन ।

''आरक्षकविभागीयस्यापि तत्रभवतः आदरपूर्वकः व्यवहारः एव शोभते'' - अहं शान्तस्वरेण उक्तवान् ।

सकृत् कासित्वा सः - ''ह्यः प्रवृत्तस्य कोलाहलस्य विषये भवान् दोषी इति आरोपः प्राप्तः अस्ति मया ।''

''तद्विषये अहं किमपि न जानामि ।''

''इतः परम् अहम् एतादृशीषु कोलाहलघटनासु भागं न ग्रहीष्यामि इति प्रतिज्ञापत्रं लिखित्वा दातव्यं भवता ।''

मौनम् एव उत्तरम् आसीत् मम ।

''किमर्थं मौनम् ? भवान् विद्यार्थी खलु ? अभिवृद्धिप्राप्तिविषयः चिन्तनीयः भवादृशैः, न तु दुष्टाशिष्टानां सहवासः । किं तादृशेन सहवासेन ? हुँ, प्रतिज्ञापत्रं लिखित्वा ददातु ।''

''भवताम् आरक्षकविभागस्य नियमानां विषये अहम् आधिक्येन किमपि न जानामि । अतः किमपि लिखित्वा न दास्यामि । भवान् अत्र मां किमपि वदेत् नाम । किं तेन मम ? अस्मत्तः श्रेष्ठा न्यायालयव्यवस्था काचित् जागर्ति लोके ।''

सः शिरः उन्नीय मां क्रोधेन पश्यन् पृष्टवान् - ''किं वयः भवतः ?''

मम मुखात् किमपि उत्तरं न निर्गतम् । अत्रान्तरे आरक्षकालयस्य पुरतः एकं कार्यानम् आगत्य अतिष्ठत् । प्रावारकम् उष्णीषं च धृतवान् कश्चन सम्मान्यः वृद्धः अन्तः आगतवान् । आरक्षकोपनिरीक्षकः आदरेण उत्थाय तं स्वागतीकृतवान् - ''आगच्छतु शान्तप्पश्रेष्ठिवर्य ! चिराद्दर्शनं तत्रभवतः ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गतदिने रात्रौ विद्यार्थिनिलये एषः एव ज्येष्ठः मया सह वार्तालापं कृतवान् आसीत् । साक्षात् अन्तः आगत्य आसने उपविश्य सः पृष्टवान् - ''अस्मदीयः एषः बालकः भवता आनायतः इति ज्ञातम् । का वार्ता इति ज्ञात्वा गन्तुम् अहम् अत्र आगतः ।''

''एषः भवदीयः किम् ?''

''आम् । अमेरिकीयः धर्मगुरुः यथा भवदीयः भवति तथैव एषोऽपि अस्मदीयः एव ।''

एतत् श्रुतवतः तस्य अधिकारिणः मुखं कान्तिहीनं जातम् । अहं स्थितः एव आसम् । द्वित्रनिमेषानन्तरं शान्तप्पश्रेष्ठिवर्यः अवदत् - ''निरीक्षकवर्य ! भवान् यः कोऽपि स्यात्, भवतः कार्यालयीयं नाम कीदृशम् अपि स्यात् । तथापि मम दृष्ट्या तु भवान् एळन्दूरु-केशवय्यङ्गार्यस्य पुत्रः राजय्यङ्गार्यः एव । ह्यस्तनघटना भवता ज्ञाता एव अस्ति । भवान् तत्र उपस्थितः आसीत् अपि । अद्य एषः बालकः किमर्थम् आनायितः भवता ? भीतिं जनयित्वा प्रेषणीयः इति उद्देशः किं भवतः ? एतदवसरे द्वित्राणि वचनानि वक्तुम् उत्सहते मम मनः ।''

''वदतु श्रीमन्''- विनयेन उक्तवान् सः ।

''भवान् किमर्थं स्थितः एव अस्ति ? उपविशतु तावत्'' इति माम् उक्त्वा मम उपवेशनानन्तरं शान्तप्पवर्यः उपनिरीक्षकम् उद्दिश्य कथनम् अनुवर्तितवान् -

''भवतः मम च विशेषपरिचयः न स्यात् कदाचित् । किन्तु भवतः पिता अहं च आत्मीयौ सुहृदौ । यदि एतस्मिन् जन्मनि भवान् पित्रा सह वार्तालापं कर्तुम् अनुकूलम् अवसरं प्राप्नुयात् तर्हि तं पृच्छतु एतद्विषये । सर्वं वदेत् सः । भवतः विद्याभ्यासार्थं परीक्षाशुल्कादिदानार्थं च अहो, तेन कियत् कष्टम् अनुभूतम् ! अनेकवारं मत्तः स्वीकृत्य भवते धनं दत्तवान् आसीत् सः । अगणितवारं मया धनं दत्तम् । किन्तु कदापि तत् न प्रतिस्वीकृतम् । किमर्थं तावता परिश्रमेण सः भवतः विद्याभ्यासव्यवस्थां कृतवान् ? वार्धक्ये मम पुत्रः साहाय्यं कुर्यात्, मरणकाले मुखे चरमोदकं स्थापयेत् इति उद्देशेन खलु ? किन्तु वराकः सः ब्राह्मणः इदानीं भवतः

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

सम्पादनस्य एकां वराटिकाम् अपि स्प्रष्टुं न इच्छति । मरणकाले भवता अन्तिमोदकं दीयेत चेदपि न सेवेत सः । सर्वकारीयाः जनाः भवतः ब्राह्मणत्वं दृष्ट्वा उद्योगदानं निराकृतवन्तः । भवान् क्रिस्तमतम् अवलम्बितवान् इत्यतः क्रिस्तमतीयाः अधिकारिणः भवते उद्योगं दापितवन्तः । एषः उद्योगः यदि लब्धः न स्यात् तर्हि किं भवान् सोपवासं मरणं प्राप्तवान् स्यात् ? इदानीं भवता उद्योगः प्राप्तः, किन्तु मातापित्रोः सहवासतः भवान् वञ्चितः जातः । निष्ठावतः ब्राह्मणस्य पुत्रः सन् भवान् अविवेकेन व्यवहृतवान् । सर्वं पूर्वजन्मकृतकर्मणः फलम् । .....''

''इदानीं गतस्य तस्य स्मरणेन किं प्रयोजनं श्रेष्ठिवर्य ?'' इति उक्तवान् उपनिरीक्षकः जोसेफ्वर्यः ।

''गतकथां स्मारयितुम् अहम् अपि न आगतः । आस्तां तावत् सा कथा । अस्मद्धर्मीयान् सर्वान् केनचित् क्रमेण क्रिस्तमतीयान् कर्तुं प्रयतमानानां कपटिनां पक्षस्य समर्थनं कुर्वन् अस्ति खलु भवान् ? किम् एतत् उचितम् ? किम् एतत् न्याय्यम् ? एवं करणीयम् इति किम् उद्योगदापयितारः विहितवन्तः ? किं तदर्थम् एव भवान् अस्मदीयान् एवम् आनाय्य भाययन् अस्ति ? एतादृशाः तरुणाः सन्ति इत्यतः अस्माकं धर्मः अद्यापि रक्षितः अस्ति । एकं तु भवता स्मर्तव्यं यत् भवान् हिन्दुधर्मीयात् हिन्दुधर्मीयायां मातरि जातः ।''

ततः श्रेष्ठिवर्यः मां दृष्ट्वा उत्तिष्ठन् - ''उत्तिष्ठतु वत्स ! गच्छाम । किम् अत्र कालहरणेन'' इति माम् उक्त्वा उपनिरीक्षकम् उद्दिश्य - ''श्रीमन् ! साधयामः तावत् । नमस्कारः'' इति उक्त्वा ततः प्रस्थितवान् ।

आवां बहिः आगतवन्तौ । उपनिरीक्षकः शिरः अवनमय्य उपविष्टः आसीत् । आवां कार्याने उपविष्टवन्तौ । श्रेष्ठिवर्यः चालकम् उद्दिश्य - ''केशवय्यङ्गार्यवर्यस्य गृहं प्रति गच्छतु'' इति उक्त्वा स्वस्य आगमनात् पूर्वम् आरक्षकस्थानके किं किं प्रवृत्तम् इति मां पृष्ट्वा ज्ञातवान् ।

''भवच्छात्रावासीयः कश्चन मद्गृहम् आगत्य उक्तवान् - भवन्तं कश्चन आरक्षकः नीतवान् इति । एतत् प्रायः एतस्य एव कृत्यं स्यात् इति विचार्य मया अत्र आगतम् । मम चिन्तनं युक्तम् एव आसीत्'' इति उक्तवान् श्रेष्ठिवर्यः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केशवय्यङ्गार्यवर्यस्य गृहं रमाविलासाग्रहारस्य वीथिकायाम् आसीत् । सामान्ये तस्मिन् गृहे दारिद्र्यचिह्नानि स्फुटं लक्ष्यन्ते स्म । श्रेष्ठिवर्यं दृष्ट्वा अय्यङ्गार्यवर्यः ससम्भ्रमम् उत्थाय काष्ठासनं प्रसार्य आवाम् उपवेशितवान् । अय्यङ्गार्यवर्यः श्रेष्ठिवर्यस्य समवयस्कः । मुखे वलयः दृश्यन्ते स्म । शिरसि स्थूला शिखा विराजते स्म । ''चिरात् आगमनं श्रेष्ठिवर्यस्य'' इति उक्त्वा अन्तः गत्वा स्वयं काफीम् आनीय दत्तवान् सः ।

''गृहिणी गृहे नास्ति । पुण्यस्नानार्थं श्रीरङ्गपत्तनं गतवती अस्ति सा । तया सह कनिष्ठपुत्रः गतः अस्ति । श्रेष्ठिवर्यस्य अत्र आगमनस्य कः उद्देशः ?''

ह्यस्तनघटनां सङ्क्षेपेण विवृत्य श्रेष्ठिवर्यः - ''एतं बालकं भाययितुं स्थानकं प्रति आनायितवान् आसीत् भवतः पुत्ररत्नम्'' इति अवदत् ।

''धिक् तम् ! तस्य नामप्रस्तावः अपि मास्तु मम पुरतः । न सः मम पुत्रः, न आवां तस्य मातापितरौ । अस्मद्दृष्ट्या बहोः कालात् पूर्वम् एव मृतः सः । स च विषयः यस्मिन् दिने स्मृतिपथम् आयाति तद्दिने कवलमात्रम् अपि अन्नं न रोचते । अस्मद्धर्मपत्नी तु दिने दिने तया एव व्यथया शरीरं क्लेशयति । सर्वं प्रारब्धकर्मणः फलम् ।''

प्रस्थानसमये माम् उद्दिश्य - ''वत्स ! तदा तदा अस्मद्गृहम् आगच्छन् भवतु भवान् । धर्मकुलाचारादिविषये अभिमानं वहन् भवान् एतावत् धैर्यं यत् प्रदर्शितवान् तत् नितरां प्रशंसार्हम् । भवान् एव अस्मत्पुत्रः, न तु सः जातिभ्रष्टः चाण्डालः'' इति अवदत् केशवय्यङ्गार्यः ।

ततः श्रेष्ठिवर्यः मां स्वगृहं प्रति अपि अनयत् । सयाजीरावमार्गस्य दक्षिणपार्श्वे अस्ति तदीयं विशालं गृहम् । आवयोः प्राप्तिसमये रामण्णः तत्र प्रतीक्षमाणः उपविष्टः आसीत् । आवां दृष्ट्वा - ''भवन्तम् एव प्रतीक्षमाणः आसं श्रेष्ठिवर्य !'' इति अवदत् सः ।

''कः विशेषः ?'' - श्रेष्ठिवर्यः अपृच्छत् ।

''सः क्रैस्तप्रचारकः तस्मिन् एव गृहे मतप्रचारकार्यम् अनुवर्तयिष्यति इति श्रूयते । ह्यः रात्रौ एव सपत्नीकः सः बेङ्गलूरुनगरं गत्वा आरक्षकायुक्तं सर्वं निवेदितवान् इति श्रुतम् । सः आयुक्तः अपि क्रिस्तमतीयः ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

आरक्षकरक्षणदानपुरस्सरं कार्यक्रमस्य कोऽपि विघ्नः यथा न भवेत् तथा व्यवस्था करणीया इति सः मैसूरुनगरीयम् आरक्षकमुख्यनिरीक्षकम् आदिष्टवान् अस्ति इत्यपि श्रूयते । अतः अद्य सः प्रचारकः तद्गृहे एव सभां करिष्यति इति वार्ता'' इति निवेदितवान् रामण्णः ।

पञ्चनिमेषान् यावत् मौनेन स्थित्वा किमपि निर्णीय - ''भवन्तौ अत्रैव तिष्ठताम् । एषोऽहम् अचिरात् प्रत्यागमिष्यामि'' इति उक्त्वा कार्यानम् आरुह्य कुत्रापि प्रस्थितवान् श्रेष्ठिवर्यः ।

प्रातः प्रवृत्तं सर्वं विस्तरेण रामण्णं निवेदितवान् अहम् । रामण्णमुखात् श्रेष्ठिवर्यस्य विषये मया ज्ञातं - 'शिवयोगिस्वामिनां स्मरणार्थं तन्नाम्ना छात्रावासं निर्मापितवान् एषः एव । नगरस्य अनेकासां धार्मिकसंस्थानां साहाय्यं कृतम् अस्ति तेन । आगर्भधनिकः सः धर्मपक्षपाती । स्वधर्मे अभिमानः श्रद्धा च तस्य अधिकः । द्वौ पुत्रौ, द्वे पुत्र्यौ च स्तः तस्य । सर्वेषां विवाहः निर्वर्तितः अस्ति । पुत्रौ वाणिज्यव्यवहारं निर्वहतः ।'

घण्टाभ्यन्तरे श्रेष्ठिवर्यः प्रत्यागतः । नितरां श्रान्तः आसीत् सः । पुरतः स्थिते सोफासने उपविश्य पञ्च निमेषान् यावत् विश्रान्तिसुखम् अनुभूय सः उक्तवान् - ''आरक्षकमुख्यनिरीक्षकस्य बसवराजस्य गृहं गतवान् आसम् । अस्मद्बन्धुगृहे जाता एव तस्य पत्नी । 'सः मतप्रचारकः मैसूरुनगरे सभां मतप्रचारं वा न कुर्यात् इति आज्ञां करोतु' इति मया सनिर्बन्धम् उक्तः सः । 'ज्येष्ठाधिकारिणाम् आदेशं विरुध्य मया कथम् आज्ञां कर्तुं शक्येत ?' इति व्याजः उक्तः तेन । 'सः मतप्रचारं यदि कुर्यात् तर्हि महान् कोलाहलः भवेत् । अत्रत्या इदानीन्तनस्थितिः गम्भीरा अस्ति इति ज्येष्ठाधिकारिणं दूरवाण्या निवेदयतु । मतप्रचारकः मैसूरुतः यथा निर्गच्छेत् तथा आदेशम् अपि करोतु । आयुक्तः यदि क्रैस्तमतपक्षपातितया व्यवहरन् भवदुपरि अधिकारबलम् आरोपयेत् तर्हि अपि अलं भयेन । यथोचितं काले करवाम । भवान् तु अधैर्यं मा धरतु । भवता हिन्दूधर्मीयं लिङ्गं धृतं, न तु क्रिस्तमतीयं वध्यचिह्नम् इति न विस्मर्तव्यं भवता' इति उक्तं मया । 'अस्तु, तथैव करिष्यामि' इति उक्तवान् अस्ति सः । तथापि अद्य सायं भवन्तः तत्प्रदेशे सञ्चरन्तः तद्गृहे अवधानं स्थापयन्तु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मतप्रचारसभा पुनः आरब्धा चेत् अविलम्बेन मां सूचयन्तु । अहं गृहे एव स्थास्यामि सायङ्काले । अन्यप्रदेशेषु अपि अवधानं भवतु भवताम्'' इति ।

अहं रामण्णः च श्रेष्ठिवर्यस्य गृहात् निर्गतौ । सायं सः प्रचारकः तत्र दृष्टिगोचरः न जातः । 'मैसूरुनगरं परित्यज्य बेङ्गलूरुनगरं गतः सः' इति वार्ता अस्माभिः प्राप्ता । तदा रामण्णः उक्तवान् - ''अत्रत्यं कर्तव्यं समाप्तम् । बेङ्गलूरुनगरे यत् करणीयं तत् तन्नगरीयाणां कर्तव्यम् । न अयम् एकाकी । एतादृशाः सहस्रशः मतप्रचारकाः विदेशात् आगच्छन्तः एव भवन्ति । तत्तद्देशीयाः सर्वकाराः एव एतादृशानां साहाय्यम् आचरन्ति । एतस्य पृष्ठभूमौ राजकीयहस्तः कार्यं करोति । अपरिमितं धनं साहाय्यरूपेण प्राप्नुवन्ति ते ।''

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

एतस्याः घटनायाः अनन्तरं मैसूरुनगरे मत्परिचितानां सङ्ख्या प्रवृद्धा । शान्तप्पश्रेष्ठी, शिवयोगिस्वामिविद्यार्थिनिलयस्य केचन छात्राः च यथा, तथैव केचन क्रैस्ताः अपि मम परिचयं प्राप्तवन्तः । अहं तान् न जानामि स्म चेदपि ते मां सम्यक् ज्ञातवन्तः आसन् । मम विद्यालयः, मम कक्ष्या, मम वैयक्तिकजीवनम् इत्यादयः तैः ज्ञाताः आसन् ।

ग्रीष्मविरामः समाप्तः । नञ्जुण्डः ग्रामतः प्रत्यागतः आसीत् । परीक्षायाम् उत्तीर्णः सः महाविद्यालयं प्रविष्टवान् । तस्य पितुः श्वासकासरोगः प्रवृद्धः आसीत् । प्रातः सायं च गृहात् बहिः सर्वथा न गन्तव्यम् इति वैद्येन सनिर्बन्धं सूचितम् आसीत् । अहम् एतस्मिन् वर्षे एस्.एस्.एल्.सि.परीक्षायाः अभ्यर्थी आसम् । शङ्करः स्नातकप्रतिष्ठा- (बि.ए.आनर्स्)परीक्षायाः अन्तिमे वर्षे आसीत् । सः मां वदति स्म - ''कक्ष्यां प्रति नियततया गच्छन् भवतु । परीक्षाविषये अधिकं मा चिन्तयतु । ज्ञातव्यान् विषयान् अधिकृत्य पुस्तकानि सदा पठन् भवतु ।''

परीक्षाविषये अहं कदापि न चिन्तयामि स्म । तस्मिन् अपि वर्षे मया तथैव आचरितम् । मम वैयक्तिकाध्ययने विशेषावधानं ददामि स्म । भारते स्वमतस्य प्रचारार्थं कैस्तमतीयैः अनुसृतान् अनुस्रियमाणान् च उपायान् कौशलानि च अधिकृत्य एषु दिनेषु अधिकम् अध्ययनं करोमि स्म ।

यस्मिन् अहं भोजनं करोमि स्म तस्मिन् अनाथालये ग्रामीणेन केनचित् दीयमानं तक्रं परिविश्यते स्म । गतेषु द्वित्रेषु दिनेषु भोजने तत् तक्रं न दृष्टम्, प्रत्युत घनं दधि परिविष्टम् । तत् यद्यपि घनं भवति स्म तथापि न तत्र रुचिः, न वा स्निग्धता । तस्य सेवनं बहुभ्यः न रोचते स्म अपि । भोजनसमये अहं शङ्करं पृष्टवान् - ''कीदृशं दधि एतत् ? एतस्मात् अपि पूर्वतनं तक्रम् एव वरम् आसीत्'' इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"एतत् अमेरिकीयैः भारतीयानां कृते निश्शुल्करूपेण दीयमानेन क्षीरचूर्णेन निर्मितम् । एतस्य पात्रं दृष्टं मया । तदुपरि एवम् एव लिखितम् अस्ति । मज्जांशस्नेहादिविरहितम् एतत् ।"

पञ्चदश दिनानि अतीतानि । तदेव दधि भवति स्म भोजने । एकदा वयं यदा भोजनरताः आस्म तदा विद्यार्थिनिलयस्य व्यवस्थापकः भोजनशालाम् आगतः । एकैकस्मै अपि विद्यार्थिने सः एकैकं बैबल्पुस्तकं दत्तवान् । वृद्धस्य तस्य श्रवणशक्तिः क्षीणा आसीत् । अतः कश्चन छात्रः उच्चस्वरेण पृष्टवान् - "किं श्रीमन् ! एतादृशं पुस्तकं दीयमानम् अस्ति खलु !" इति ।

"भवद्भ्यः सर्वेभ्यः दातव्यम् इति संसूच्य क्रिस्तालयस्य प्रमुखः एतानि निश्शुल्कतया दत्तवान् अस्ति भोः । परह्यः मया यदा तत्र गतं तदा एतानि दत्तानि तेन ।"

"भवता किमर्थं तत्र गतम् आसीत् ?"

"भवद्भ्यः घनं दधि व्यवस्थापयितुं क्षीरचूर्णस्य आनयनार्थं मया तत्र गतम् आसीत् ।"

"किम् एतत् क्रिस्तालयजनैः दीयते ? 'अमेरिकाजनैः साहाय्यरूपेण दीयमानम्' इति पात्रस्य उपरि लिखितं भवति खलु ?"

"दत्तं तु अमेरिकादेशीयैः एव । किन्तु भारते वितरणं प्रचलति क्रिस्तालयजनानां द्वारा । येनकेनचित् दत्तं वितीर्णं च स्यात् नाम । दधि तु घनम् अस्ति खलु ?"

"स्यात् घनं, किन्तु अरुचि । एतस्य सेवनात् उदरे वायुदोषः उत्पद्यते" इतिं उक्तवान् कश्चित् छात्रः । तत् तेन श्रुतं वा न वेति न ज्ञायते, स तु मौनेन ततः निर्गतवान् ।

एषः विषयः मयि चिन्तनतरङ्गान् उदपादयत् । 'स्नेहांशरहितं नाममात्रेण क्षीरचूर्णम् एतत् । एतादृशं ते भिक्षाम् इव भारताय यच्छन्ति । भारतसर्वकारः तत् कृतज्ञतापूर्वकं स्वीकरोति । सर्वकारीयाः महापुरुषाः एतस्य गुणस्तरं कथं वा जानीयुः ? स्वाभिमानशून्यता नायकेषु, जनेषु, सर्वकारे च महता प्रमाणेन अस्ति । यद्यपि एतत् अमरिकादेशीयैः दीयते, तथापि एतस्य

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

वितरणं क्रिस्तालयद्वारा प्रचलति । एतद्द्वारा क्रिस्तालयस्य गौरववर्धनार्थं यत्नः । क्षीरचूर्णदानानन्तरं सप्ताहद्वयाभ्यन्तरे एव बैबल्पुस्तकस्य वितरणम् ! स्वमतं प्रति जनान् आक्रष्टुं कियन्ति साधनानि उपयुज्यन्ते तैः ! कतिविधान् मार्गान् श्रयन्ति ते !!'

अनन्तरदिने अहं मम आशयं शङ्करं निवेदितवान् । द्वित्रदिनाभ्यन्तरे आवां छात्राणां मनस्सु एतं विचारं प्रतिबिम्बितवन्तौ । ततः वयं सर्वे सम्भूय व्यवस्थापकं दृष्ट्वा - ''एतत् दधि खादितुं वयं न इच्छामः । एतस्य सेवनात् बहवः उदरदोषग्रस्ताः सञ्जाताः । केचन मलबद्धतारोगपीडिताः अपि । अतः यथापूर्वं ग्रामीणेन दीयमानं तक्रम् एव व्यवस्थापनीयम्'' इति सानुरोधं निवेदितवन्तः ।

आदौ व्यवस्थापकः एतत् न पुरस्कृतवान् । किन्तु वयं सुदृढं स्वाशयं यदा प्रतिपादितवन्तः तदा सः सहमतिं प्रदर्शितवान् । वयं द्वितीयाम् अभ्यर्थनाम् उपस्थापितवन्तः - 'अवशिष्टानि क्षीरचूर्णपात्राणि तस्मै क्रिस्तालयप्रमुखाय एव प्रतिदातव्यानि' इति।

व्यवस्थापकः एतत् न अङ्गीकृतवान् ।

''अस्माभिः अनुपयुक्तस्य एतस्य स्थापनात् किं वा प्रयोजनम् ? प्रत्यर्पयाम तावत् ।''

''किं तेन ? उपाहारमन्दिरस्वामिने दद्मः । स तु सन्तोषेण एतानि क्रीणाति । क्रिस्तालयीयैः यत् दीयते तत् स्वीकरवाम । विक्रयणं च करवाम । ततः प्राप्तेन धनेन प्रतिदिनम् उत्तमं दधि क्रीणीयाम ।''

''तत् न शक्यते । इतः परं तैः दीयमाना भिक्षा न स्वीकरणीया । इदानीम् अस्मत्समीपे विद्यमानं क्षीरचूर्णं प्रत्यर्पणीयम् एव'' इति वयं सनिर्बन्धम् उक्तवन्तः । व्यवस्थापकः अनन्यगतिकतया एतत् अङ्गीकृतवान् ।

अनन्तरदिने क्षीरचूर्णबन्धान् बैबल्प्रतिकृतीः च एकत्रीकृत्य जटकायाने स्थापितवन्तः वयम् । चर्चास्पर्धायां पारितोषिकत्वेन प्राप्ता एका भगवद्गीता मत्समीपे आसीत् । सा अपि शकटे आरोपिता । ततः उभाभ्यां छात्राभ्यां सह अहं क्रिस्तालयप्रमुखस्य निवासं गतवान् । तत्समये सः स्वनिवासे न आसीत् । 'तेन बेङ्गलूरुनगरं प्रति गतम् । श्वः तस्य प्रत्यागमनम्'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति तत्रत्यः सेवकः अवदत् । वयं क्षीरबन्धान् बैबल्प्रतिकृतीः, भगवद्गीतां च सेवकाधीनं कृत्वा - ''प्रत्यागमनानन्तरं एतानि सर्वाणि तस्मै ददातु'' इति उक्तवन्तः ।

अहं तम् उद्दिश्य आंग्लभाषया एकं पत्रं लिखितवान् - ''क्षीरबन्धैः सह बैबल्ग्रन्थाः अपि सुरक्षिततया प्रत्यर्प्यमाणाः सन्ति । इतः परम् अस्मभ्यं क्षीरचूर्णदानस्य कष्टं भवता स्वीकरणीयं नास्ति । एतेन सह एका भगवद्गीता स्थापिता अस्ति अपि । यथावसरं सा पठनीया इति निवेदनम् ।

- अनाथालयीयाः विद्यार्थिनः''

अनन्तरं सेवकात् एव एकं पिहितपत्रं प्राप्य तदन्तः एतत् पत्रं संस्थाप्य तत् पिधाय - 'तस्य प्रत्यागमनस्य अनन्तरं तद्धस्ते एव दातव्यम् एतत्' इति उक्त्वा वयं सर्वे ततः प्रत्यागताः ।

एवम् एषा घटना समाप्तिं गता ।

तस्मिन् वर्षे नवरात्रोत्सवे अपि क्रैस्तगुरूणां प्रचारः, स्वमतं प्रति जनान् आक्रष्टुं प्रयत्नाः च प्रवृत्ताः । वयम् अपि कार्यक्रमस्थलम् एव कृत्वा तेषां मुखभङ्गं कृतवन्तः ।

* * *

तत् वर्षं कथम् अतीतम् इत्येव न ज्ञातम् । यथापूर्वचिन्तनम् एस्.एस्.एल्.सि.परीक्षायां मया प्रथमश्रेणी प्राप्ता । अग्रे किं करणीयम् इति तु मम निश्चयः आसीत् एव । सर्वकारीये प्रथमस्तरीये महाविद्यालये कलां मुख्यविषयत्वेन स्वीकृत्य पदवीपूर्वकक्ष्यायां मया प्रवेशः स्वीकृतः । शङ्करः स्नातकप्रतिष्ठाकक्ष्यायां प्रथमश्रेण्याम् उत्तीर्णः । पदकद्वयम् अपि प्राप्तं तेन । सः स्नातकोत्तरपदवीकक्ष्यां प्रवेष्टुं न इष्टवान् । 'मया अभिलषितं कार्यं कर्तुम् इदानीं प्राप्ता पदवी एव पर्याप्ता । अध्ययनार्थं चैतन्ययुक्तस्य वयसः एकस्य वर्षस्य पुनरपि व्ययीकरणम् अनुचितम्' इति सः निर्णीतवान् । चामराजनगरपरिसरे रा.स्व.सङ्घस्य कार्यं विशेषतः न प्रवृद्धम् आसीत् । अतः तत्र कार्यं विस्तारयितुं सः निर्गतवान् । तस्य सहवासात् वञ्चितः अहं कानिचन दिनानि निस्तेजस्कः आसम् । गमनात् पूर्वं सः

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

स्नातकोत्तरकक्ष्यीयस्य मित्रस्य परिचयं कारयित्वा गतवान् आसीत् । अतः तन्नाम्ना अहं विश्वविद्यालयीयग्रन्थालयात् पुस्तकानि प्राप्य पठामि स्म ।

नञ्जुण्डेन इण्टर्मीडियेट्परीक्षा सम्मुखीकरणीया आसीत् । आर्थिकक्लेशः तं बाधते स्म । तदीयस्य पितुः अस्वास्थ्यं नितरां प्रवृद्धम् आसीत् । अतः सः अधिकारिणः साहाय्येन निवृत्तिं प्राप्तवान् आसीत् ।

कदाचित् अहं नञ्जुण्डः च विद्यालयात् प्रत्यागतवन्तौ । प्रकोष्ठप्राप्त्यनुक्षणम् एव गृहजनाः एकां तन्त्रीवार्तां नञ्जुण्डाय आनीय दत्तवन्तः । 'पितुः अस्वास्थ्यं पराकाष्ठां गतम् अस्ति । अन्तिमदिनानि गणयन् अस्ति सः । अविलम्बेन प्रस्थातव्यं भवता' इति तत्र आसीत् । तन्त्रीवार्तां पठित्वा नञ्जुण्डः दिग्भ्रान्तः । शरीरं स्विन्नं जातं, नेत्रे च सजले । तस्य स्वभावः एव तथा - कष्टकाले महिला इव अश्रूणि स्रावयति सः । धैर्यम् अवलम्ब्य विवेकेन परिस्थितिं सम्मुखीकर्तुं न शक्नोति सः । मम हस्तौ गृहीत्वा उच्चैः रोदनम् आरब्धवान् सः । तं सान्त्वयन् अहम् उक्तवान् - ''नञ्जुण्ड, अलं रोदनेन । अस्वस्थानां सर्वेषां मरणं भवेत् एव इति न निश्चयः । एतावता सः स्वस्थः जातः स्यात् अपि । सायङ्कालीनेन एव रैल्यानेन आवाम् अरसीकेरे गच्छाव । ततः दशक्रोशदूरे अस्ति खलु बिळ्ळकेरेग्रामः ? पादाभ्यां तत्र गच्छाव । क्षणं प्रतीक्षताम् । कस्माचित् मित्रात् मार्गव्ययार्थं धनं प्राप्य एषोऽहम् आगच्छामि ।''

रात्रौ एकादशवादने आवाम् अरसीकेरेनगरं प्राप्तवन्तौ । कञ्चित् पृष्ट्वा मार्गं ज्ञात्वा बिळ्ळकेरेग्रामं प्रति पादाभ्यां प्रस्थितवन्तौ । नक्षत्रप्रकाशबलात् आवाम् अग्रे गतवन्तौ । आमार्गम् अहं नञ्जुण्डं धैर्यवचनानि वदन् एव आसम् । श्वासकासरोगविषये सः विविधान् प्रश्नान् करोति स्म । तद्विषये किञ्चिदपि अजानन् अपि अहं - 'न सः कश्चन महारोगः' इति वदन् तस्य स्वरूप-लक्षण-परिणामादीन् विवृणोमि स्म । ग्रामप्राप्तिसमये प्रायः द्विवादनं जातं स्यात् । गृहस्य पुरतः क्षीणः अग्निः ज्वलति स्म । नञ्जुण्डस्य माता गृहस्य पुरतः एव उपविश्य शिरः अवनमय्य रुदती आसीत् । पुत्रं दृष्ट्वा तम् आलिङ्ग्य सा विलपनम् आरब्धवती । अष्टवादनसमये प्राणपक्षी निर्गतः इति ज्ञातम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अनन्तरदिने अहम् एव नेतृत्वं वहन् सर्वाणि कार्याणि निरूढवान् । और्ध्वदैहिककर्मणां विषये अहं किमपि न जानामि स्म । तं ग्रामं प्रति नूतनतया कश्चन ब्राह्मणः अध्यापकः आगतः आसीत् । सः पार्श्वग्रामं गत्वा पुरोहितं शववाहकान् च आनीतवान् । ऋते मत्तः, तस्मिन् गृहे धैर्येण कार्यं निर्वोढुं समर्थः अन्यः कोऽपि न आसीत् । दहनसंस्कारं समाप्य प्रत्यागमनसमये मध्याह्नस्य त्रिवादनम् आसीत् ।

हिन्दुसमाजे अन्येषु अवसरेषु धनं न प्राप्येत चेदपि एतादृशे अवसरे कोऽपि धनं ददाति एव । तद्ग्रामीणः एव कश्चन धनिकः ऋणस्वीकृतिपत्रं लेखयित्वा त्रिशतं रूप्यकाणि दत्तवान् । अरसीकेरेनगरं गत्वा वस्तूनाम् आनयनं, पाकशालायां वस्तूनां व्यवस्थापनम् इत्यादीनि सर्वाणि कार्याणि अहम् एव कृतवान् । तस्य गृहस्य चालकशक्तिः एव स्थगिता इव भासते स्म । चदुर्दशे दिने मम गुरुः, नञ्जुण्डस्य पिता वैकुण्ठं प्रति प्रेषितः ।

नञ्जुण्डस्य विद्याभ्यासकथा समाप्ता आसीत् । अहम् एकः एव मैसूरुनगरं प्रति प्रस्थितः । मां लोकयानम् आरोपयितुं क्रोशचतुष्टयदूरे स्थितस्य मार्गस्य पर्यन्तम् आगतः नञ्जुण्डः माम् अवदत् - ''मित्र ! मम दैवं माम् अवञ्चयत् । भवान् तु पदवीधरः भवेत् एव । हिन्दुसमाजोद्धारकार्ये आधिक्येन आत्मानं मा प्रवर्तयतु । विद्याभ्यासस्य विषये अवधानं भवतु । मम सर्वाणि पुस्तकानि प्रकोष्ठे सन्ति । तेषाम् उपयोगं करोतु । पेटिका-शय्या-वस्त्रादीनि श्वः बसयानेन प्रेषयतु । अहं स्थानकम् आगत्य तानि प्राप्स्यामि ।''

मैसूरुनगरे नञ्जुण्डेन विरहितं जीवनम् असहनीयम् इव भासते स्म । सहैव वसतिः यदा आसीत् तदा आवयोः सम्भाषणम् आधिक्येन न भवति स्म । पठन-चिन्तनादिषु अन्यकार्येषु च अहं व्यापृतः भवामि स्म । तथापि मद्विषये परमात्मीयतां प्रदर्शयन् कश्चित् सुहृत् मया सह अस्ति इत्येषः भावः मम मनसि दृढतया तिष्ठन् काञ्चित् सन्तृप्तिं ददाति स्म । चर्चास्पर्धादिषु भागम् ऊढ्वा यदा अहं पारितोषिकाणि प्राप्नोमि स्म तदा तानि दृष्ट्वा सः प्रशंसाभावं प्रदर्शयति स्म, सन्तोषं प्रकटयति स्म, अभिमानं वहति स्म च । मम पठनं बौद्धिकाभिवृद्धिं च प्रोत्साहयति स्म । तस्य आचारनिष्ठा

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

स्पृश्यास्पृश्यचिन्तनं वा मह्यं न रोचते स्म चेदपि तदीयं निष्कल्मषं प्रेम सौहार्दभावः च मां वशीकरोति स्म । तस्मात् विरहिते प्रकोष्ठे वासः खेदातिशयं जनयति स्म ।

महाविद्यालये कक्ष्यासु मम समययापनक्रमे एषु दिनेषु परिवर्तनं जातम् आसीत् । बहूनाम् अध्यापकानां पाठनं निर्जीवम् इव प्रतिभाति स्म । कालयापनार्थम् अहम् अन्तिमासने उपविश्य मदभिलषितपुस्तकं पठामि स्म । मां कोऽपि अध्यापकः प्रश्नं न पृच्छति स्म । उत्तमरीत्या बोधनं कुर्वताम् अध्यापकानां कक्ष्यासु अपि मम एषा एव प्रवृत्तिः अनुवर्तते स्म ।

मम महाविद्यालयं प्रति नूतनतया कश्चन युवकः इतिहासबोधकत्वेन आगतः । तस्य नाम 'देवप्रसादः' इति । उन्नतः सुदृढः च आकारः तस्य । अष्टाविंशतिवर्षीयः स्यात् सः । सर्वदा समीकृतम् ऊरुकादिकं धृत्वा कान्त्या विलसन्तं पादकोषं (बूट्) धृत्वा गाम्भीर्येण कक्ष्याम् आगच्छति स्म सः । प्रतिदिनं तदीये वेषे परिवर्तनं दृश्यते स्म । कक्ष्यां प्रति आगमनात् पूर्वं द्वित्राः धूमवर्तिकाः तेन सेव्यन्ते स्म । कक्ष्याप्रवेशपर्यन्तम् अपि धूमवर्तिका तस्य हस्ते विलसति स्म । पाठसमाप्तेः अनन्तरं प्रकोष्ठात् निर्गमनसमनन्तरम् एव तदीयः हस्तः धूमवर्तिकाकोषं स्पृशति स्म । तस्य पाठम् अहं श्रद्धया न शृणोमि स्म । कदाचित् मया ज्ञातं यत् सः क्रिस्तमतीयः इति । 'कस्यचित् मतस्य स्यात् नाम सः । किं तेन मम' इति चिन्तयन् अहम् तद्विषये औदासीन्यं वहामि स्म ।

कदाचित् सः टिप्पणीं लेखयन् आसीत् । अहं तु कस्यापि बोधकस्य टिप्पणीं न लिखामि स्म । पाठ्यपुस्तकम् एव स्वयं पठित्वा विषयम् अवगच्छामि स्म । तस्मिन् अपि दिने अहम् अन्तिमासने उपविश्य पुस्तकपठने मग्नः आसम् । एतत् लक्षितवान् देवप्रसादवर्यः मां निर्दिशन् - ''भोः, अन्तिमासनस्य द्वितीयच्छात्र ! भवता किमर्थं टिप्पणी न लिख्यते ?'' इति पृष्टवान् ।

अहं किमपि उत्तरम् अयच्छन् मौनेन उत्थितवान् । माम् उपहसन् सः - ''महाज्ञानी प्रायः भवान् । भवादृशानां कृते टिप्पण्याः आवश्यकता न भवति खलु ?'' इति अपृच्छत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''तथा न श्रीमन् ! अहं पाठ्यपुस्तकानि एव साक्षात् पठामि ।''

सः मत्समीपम् आगतवान् । मया पठ्यमानं पुस्तकं हस्तेन स्वीकृतवान् । गङ्गाप्रसाद-उपाध्यायवर्येण १९४१ तमे वर्षे आंग्लभाषया लिखितं 'भारते क्रैस्तमतम्' इत्येतत् पुस्तकं तत् । मया पठ्यमानं पुटम् उद्घाट्य दृष्टं तेन । भारते क्रैस्तमतप्रसाराधिक्यस्य कारणानि गङ्गाप्रसादेन समीचीनतया विमर्शात्मकदृष्ट्या विवृतानि आसन् तत्र । सः लिखति स्म - ''क्रैस्तप्रचारकाः शासकवर्गीयस्य सम्बन्धस्य दुरुपयोगं स्वीकुर्वन्तः सन्ति । स्वमतीयानां सङ्ख्यावृद्ध्यर्थं ते बहुधा नीचमार्गान् अपि अवलम्बन्ते । इदानीम् अपि सा प्रवृत्तिः अनुवर्तमाना दृश्यते । दक्षिणभारते, उत्तरस्य पर्वतप्रदेशे च क्षामपीडितान् कृषिकान् आमिषप्रदर्शनेन स्वमतं प्रति ते आकर्षन्ति । ऋणगर्ते पतितं कृषिकं ते वदन्ति - 'क्रैस्तमतम् अवलम्बितं चेत् भवते धनं दीयते' इति । एतत् अङ्गीकृतवते कृषिकाय ते धनं यच्छन्ति अपि । कोऽपि कृषिकः भूस्वामिनः पीडया ग्रस्तः अस्ति चेत् 'क्रैस्तमतम् अवलम्बितं चेत् कृषिकपक्षम् अवलम्ब्य सङ्घर्षे साहाय्यं क्रियते' इति धर्मगुरुः वदति । हिन्दुः कोऽपि एतादृशस्य विरोधं करोति चेत् सः भाययति - 'भवन्तं सर्वकारद्वारा दण्डयिष्यामि' इति वदन् । यतः सर्वकारः तदनुकूलः अस्ति । .....''

द्वित्रनिमेषान् यावत् पुस्तकम् इतस्ततः परिवृत्य परिशील्य - ''कक्ष्यायाम् एतादृशम् एव पुस्तकं पठ्यते किं भवता ?'' इति अपृच्छत् सः ।

अहं मौनम् अवलम्बितवान् । सः पुस्तकं प्रत्यर्प्य स्वस्थानं गत्वा टिप्पणीदानकार्यम् अनुवर्तितवान् ।

तदनन्तरं सः कदापि मां कमपि प्रश्नं न पृष्टवान् । अहं तु तस्य कक्ष्यां नियततया गच्छामि स्म । उपस्थितिस्वीकारसमये उपस्थितिं ज्ञापयामि स्म ।

एकादशकक्ष्यायाः (जूनियर् इण्टर्मीडियेट्) मम विभागे आहत्य विंशत्यधिकशतं जनाः आसन् । तेषु दशमकक्ष्यायाम् एकवारं द्विवारं वा अनुत्तीर्णतां प्राप्य अन्ते कथञ्चित् उत्तीर्णाः जाताः एव बहवः । प्रथमश्रेणीं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राप्य उत्तीर्णः समग्रायां कक्ष्यायाम् अहम् एकः एव । अन्ये विद्यार्थिनः इव अहम् अपि विद्यार्थिवेतनप्राप्त्यर्थम् आवेदनपत्रं दत्तवान् आसम् । डिसेम्बर्मासे तस्य फलितांशः प्रकाशितः । मया विद्यार्थिवेतनं पूर्णतः अंशतो वा न प्राप्तम् आसीत् । मम एकः सुहृत् अवदत् - ''समग्रे विभागे प्रथमश्रेणीकः भवान् एकः एव । भवता विद्यार्थिवेतनं प्राप्येत एव । कुत्रापि प्रमादः जातः स्यात् । विद्यार्थिवेतनदानसमितेः सदस्यः अस्ति अस्मद्विद्यालयस्य प्राध्यापकः एव कश्चित् । विदेशे अध्ययनं समाप्य प्रत्यागतः सः । यद्यपि सः न ब्राह्मणः, तथापि जातिपक्षपाती न । तं भवान् पश्यतु । सः निश्चयेन विद्यार्थिवेतनं दापयेत् एव'' इति ।

तस्मिन् एव दिने सायम् अहं तस्य प्राध्यापकस्य गृहं गतवान् । मदीयां प्रथमश्रेण्यर्हताम् आर्थिककष्टं च तं विस्तरेण निवेद्य - 'द्वितीयावल्यां वा मम नाम योजितं यथा स्यात् तथा कृपा करणीया' इति प्रार्थितवान् ।

विदेशे अध्ययनं कृतवान् सः प्राध्यापकः विदेशीयशैल्या एव आंग्लभाषाम् उच्चारयन् - ''भवान् ब्राह्मणः । ब्राह्मणेषु विद्यावन्तः एव अधिकाः । किमर्थं विद्यार्थिवेतनं भवते ?'' इति अपृच्छत् ।

''ब्राह्मणेषु विद्यावन्तः अधिकाः चेत् मम किं प्रयोजनं सिद्धम् ? अहं तु निर्धनः निर्गतिकः च ।''

''तथापि भवते विद्यार्थिवेतनस्य आवश्यकता नास्ति ।''

विद्यावति तस्मिन् प्राध्यापके जातिभेदभावनाजनिता एतादृशी अन्धभावना स्यात् इति मया स्वप्ने अपि न कल्पितम् आसीत् । अतः अहम् - ''किमपि अजानते, चलनचित्रदर्शनादिना एव कालं यापयते, कक्ष्यां प्रति अनागच्छते धनिकपुत्राय अपि भवन्तः विद्यार्थिवेतनं यच्छन्ति । मादृशाय तु तस्य आवश्यकता नास्ति इति वदन्ति । विदेशं गत्वा आगतवतः भवतः दृष्टिः विशाला स्यात् इति मत्वा मया भवत्समीपम् आगतम् आसीत् । अस्थानम् आगतम् इति इदानीं मया ज्ञातम् । नमस्कारः । एषोऽहम् आगच्छामि'' इति उक्त्वा ततः बहिः आगतवान् ।

* * *

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मिन् एव दिने मम जीवनप्रवाहगतिम् एव परिवर्तितवती काचित् घटना प्रवृत्ता । सायं प्रभाचित्रमन्दिरसमीपे स्थिते आपणे अहं लेखनीं समीकारयन् आसम् । कार्यं समाप्य धनं दत्त्वा अहं मुखं परिवर्तितवान् । तदा मम पृष्ठतः स्थिता विंशतिवर्षीया तरुणी मया दृष्टा । सा वयनशलाकां क्रीणती स्थितवती आसीत् । तस्याः मुखं, नेत्रे, स्थितिभङ्गी इत्यादयः मां स्मारयन्ति स्म - एषा कुत्रापि दृष्टपूर्वा इति । परिचिता इव, सुपरिचिता इव, बहुवारं दृष्टा इव च भासते स्म सा । का एषा, कुत्र दृष्टा इति तु न स्मर्यते । तदेकदृष्ट्या दृष्टं चेत् एषा अन्यथा भावयेत् कदाचित् इति मत्वा अहं मम दृष्टिं परिवर्तयन् आसम् । तावता सा एव माम् अभिज्ञाय उक्तवती - ''सत्य ! किं भवान् मां न अभिज्ञातवान् ?''

झटिति अभिज्ञानं प्राप्तं मया । ''राचम्मा ! कथं भवती अत्र ?'' आश्चर्येण पृष्टवान् अहम् ।

''भवान् एतस्मिन् नगरे पठन् अस्ति इति मया कदाचित् श्रुतम् आसीत् । भवतः महाविद्यालयः कः इति मया कथं ज्ञायेत ? दैवानुग्रहेण भवान् एव अद्य मिलितः ! इदानीं स्मृतं स्यात् खलु - अहं का इति ?'' इति हसन्ती पृष्टवती राचम्मा ।

''भवती कथम् अत्र ?''

''मैसूरुनगरे एव मम वासः इदानीम्'' इति वदन्ती परिवृत्य मार्गपार्श्वे स्थित्वा धूमपाने निरतं प्रदर्शयन्ती सा उक्तवती - ''सः एव मम आर्यपुत्रः ।''

राचम्मया तथा कथ्यमानं श्रुत्वा सः मुखं परिवर्त्य दृष्टवान् । तस्य दर्शनात् मया लज्जा अनुभूता । एतत् जानन् सः मत्समीपम् आगत्य मम स्कन्धे हस्तं संस्थाप्य पत्नीम् उद्दिश्य - ''एषः मम प्राचीनसुहृत् । अयम् एव वा सः सत्यः, यंद्विषये च भवती सदा वदन्ती भवति स्म ?'' इति अपृच्छत् ।

मम लज्जा इतोऽपि प्रवृद्धा । राचम्मायाः पतिः न अन्यः, अपि तु अस्मद्विद्यालयस्य इतिहासबोधकः देवप्रसादः एव सः । सः अवदत् - ''पश्यतु, अयं मद्विषये कुपितः अस्ति । अतः एव मया सह सम्भाषणं न करोति । यदि एषः भवत्याः आत्मीयः इति पूर्वम् एव जानीयां तर्हि सम्भाषणं कृत्वा मैत्रीं सम्पादयेयम्'' इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वतनघटना तया अपि ज्ञायते स्म इति भाति ।

''इदानीम् अपि परस्परहस्तमेलनेन तत् कर्तुं शक्यम् । तेन सर्वं सम्यक् भविष्यति'' इति हसन्ती उक्तवती राचम्मा ।

देवप्रसादः मम हस्तं स्वयं गृहीतवान् मैत्रीपूर्वकम् । ततः पुनरपि मम स्कन्धे हस्तं संस्थाप्य - ''तत्सर्वं विस्मरतु सत्य !'' इति अवदत् ।

''कृपया अहं क्षन्तव्यः श्रीमन् !'' - क्षमां याचितवान् अहम् ।

''सत्य ! मम गृहं गच्छाम । महापुरुषः भवान् चिरात् लब्धः अस्ति'' - राचम्मा सानुरोधं सप्रेम च उक्तवती ।

अन्यस्मिन् अवसरे यदि सा लब्धा स्यात् तर्हि अहं तया सह गच्छेयं वा न वेति न ज्ञायते । अद्य तु प्राध्यापकस्य व्यवहारतः मनः खिन्नम् आसीत् । राचम्मायाः मेलनात् चिन्तारहितानि तानि बाल्यदिनानि स्मृतिपथम् आगतानि । तेन मनः प्रसन्नं जातम् ।

'अस्तु, गच्छाम' इति उक्त्वा ताभ्यां सह अहं प्रस्थितः । किञ्चिद्दूरं यदा गतं तदा देवप्रसादवर्यः - ''मम किञ्चित् कार्यान्तरम् अस्ति । तत् समाप्य अनन्तरकाले अहम् आगमिष्यामि । भवन्तौ अग्रे गच्छताम्'' इति उक्त्वा द्विचक्रिकाम् आरूढवान् ।

''तत्रभवत्याः विवाहः कदा अभवत् राचम्मवर्ये !'' - अहं पृष्टवान् ।

''किं रे ! किम् एतत् 'राचम्मवर्ये', 'तत्रभवती' इत्यादिकम् ? अध्यापकस्य पत्नी इत्यतः एतत् गौरवदानं वा ? पूर्वं मां ताडयितुं, पीडयितुं, रोदयितुं च भवान् शक्नोति स्म । तदा एते गौरवादयः कुत्र आसन् ? सा एव अस्मि अहम् इदानीम् अपि । न आवश्यकः आवयोः मध्ये शिष्टाचारव्यवहारः ।''

''भवती इदानीं प्राध्यापकस्य पत्नी । अतः ज्येष्ठत्वं किमपि आगतं स्यात् इति मत्वा आदरः प्रदर्शितः ।''

''ज्येष्ठत्वं न मयि आगतम्, अपि तु भवति एव । अतः एव मां दृष्ट्वा अपि अभिज्ञानं न प्राप्तं भवता ।''

मुख्यपत्रालयकार्यालयात् अनतिदूरे लघुमार्गपार्श्वे तस्याः गृहम् आसीत् । लघुपरिवारस्य वासार्थं योग्यं रमणीयं लघुगृहं तत् । गृहे वृद्धा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर्मकरी तस्याः प्रतीक्षां कुर्वती आसीत् । गृहप्रापितः पूर्वम् एव आवां बहून् विषयान् अधिकृत्य सम्भाषणं कृतवन्तौ । नरसापुरीयं विद्यार्थिजीवनं स्मृतवन्तौ । अध्यापकः स्वामिवर्यः अपि स्मृतः । गृहं प्राप्य अङ्गणस्थं वेत्रासन्दम् एकैकम् आकृष्य आवाम् उपविष्टवन्तौ । सुखेन उपविशन् अहं पृष्टवान् - ''देवप्रसादस्य परिणयः कथं जातः ?''

''मया पूर्वम् एव उक्तम् आसीत् खलु - मैसूरुनगरे मम बान्धावाः सन्ति इति । आर्यपुत्रः अपि मम दूरबन्धुः एव । अहं हासननगरे भगिन्याः गृहे वसन्ती विद्याभ्यासं कृतवती । गतवर्षे एषः हासननगरम् आगतः आसीत् । मम आवुत्तः एतस्य मित्रम् । तत्र मां दृष्ट्वा - 'अहम् एतां परिणेतुम् इच्छामि' इति असूचयत् । ततः विवाहः प्रवृत्तः ।''

''चतुरतरः एव सः ।''

''किं वर्णयानि तस्य चातुर्यम् ? प्रपञ्चम् एव अस्तव्यस्तीकर्तुम् अपि सामर्थ्यम् अस्ति तस्य ।''

आवयोः गृहप्राप्त्यनन्तरम् अर्धघण्टातः अपि अधिकः कालः अतीतः । 'एषोऽहम् आगच्छामि' इति उक्तवान् देवप्रसादवर्यः अधुनावधि न आगतः ।

''इदानीं न आगच्छेत् एव सः । विनोदस्थलीं (क्लब्) गतः सः पत्रक्रीडां क्रीडित्वा धूमवर्तिकाकोषद्वयं रिक्तीकृत्य एव प्रत्यागच्छति ।''

''तावता प्रमाणेन सः धूमपानं करोति इति भवती अपि जानाति एव ?''

''मुखगन्धः एव तत् ज्ञापयति । किन्तु गृहे तावता प्रमाणेन धूमपानं न क्रियते तेन ।''

''तन्नाम गृहस्वामिनीतः सः बिभेति इति सिद्धम् । बहु सामर्थ्यम् अस्ति भवत्याः । अभिनन्दनार्हा भवती ।''

''सः मत्तः बिभेति, उत सः माम् एव भाययति इति भवान् कथं जानीयात् ? न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् । अतः एव एवम् उपहासः । आस्तां सा कथा । नरसापुरतः आगमनानन्तरं भवतः जीवने किं किं प्रवृत्तम् ? विस्तरेण सर्वं वदतु तावत् ।''

''कथनयोग्यं विशेषतः किमपि नैव प्रवृत्तम् । तत्सर्वं कालान्तरे कदाचित् वदिष्यामि ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''उपविशतु तावत्'' इति उक्त्वा राचम्मा अन्तः गतवती । दशनिमेषाभ्यन्तरे काफीचषकद्वयं गृहीत्वा बहिः आगतवती च । एकं मम पुरतः संस्थाप्य - 'स्वीकरोतु तावत्' इति उक्तवती सा ।

अहं न स्वीकृतवान् । स्पृश्यास्पृश्यताविषये श्रद्धा न आसीत् मम । ब्राह्मणेतराणां गृहे बहुवारं भोजनं कृतम् आसीत् मया । हरिजनगृहे उपाहारादिकम् अपि सेवितम् आसीत् । तथापि क्रिस्तमतीयानां गृहे काफीपानीयस्यापि स्वीकारे मनः असम्मतिं जुगुप्सां च प्राप्नोति स्म । राचम्मया कृतं काफीदानं दृष्टवतः मम मुखं गम्भीरं जातम् । दृष्टिः तीक्ष्णा जाता । शिरः उन्नीय उग्रदृष्ट्या मया सा दृष्टा । तावता एव तस्याः मुखं म्लानतां गतम् आसीत् ।

''मया स च विषयः विस्मृतः एव आसीत् । अन्यच.... इदानीं भवान् महाविद्यालयस्य च्छात्रः अपि ।.....''

''तावता आचारः सर्वोऽपि त्यक्तव्यः इत्येव नास्ति खलु ? एतत् नीत्वा अन्तः स्थाप्यते उत..... ?''

मम ध्वनिः कठोरः आसीत् । तत् अभिज्ञातवती सा काफीपात्रम् अन्तः नीतवती । स्वयम् अपि न पीतवती सा । नारङ्गफलद्वयं गृहीत्वा तया बहिः आगतम् । तस्याः मुखं गम्भीरम् आसीत् । फलस्य त्वचम् अपनीय मम पुरतः संस्थाप्य - ''एतस्य खादने तु न स्यात् खलु आक्षेपः ?'' इति पृष्टवती सा ।

तस्याः मन इतोऽपि खेदयितुम् अनिच्छन् अहं फलं खादितवान् । द्वित्रनिमेषान् यावत् केनापि सम्भाषणं न कृतम् । वेत्रासन्दे उपविश्य आकाशं पश्यन्ती सा उक्तवती - 'आ परिचयात् भवतः विषये मम काऽपि विलक्षणा भीतिः । पूर्वं यथा कृतं तथा इदानीम् अपि भवान् मां ताडयेत् इति अहं भीता आसम् । किन्तु दैवेन अहं रक्षिता । यद्यपि भवत्तः भीतिः अस्ति मम, तथापि भवादृशः आत्मीयः अन्यः कोऽपि न प्राप्तः मया । अत्र आगमनानन्तरम् अपि न जाने, कतिवारम् आर्यपुत्रस्य पुरतः मया भवतः नाम्नः उल्लेखः कृतः इति । अस्तु तावत् । काफीदानप्रसङ्गेन असन्तुष्टः कुपितः वा भवान् मा भवतु इति प्रार्थये । सप्ताहे चतुर्वारं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा भवता मद्गृहं प्रति आगन्तव्यम् एव । अहं तु सा एव राचम्मा, या भवता नरसापुरे दृष्टा । यदि भवता न आगम्येत तर्हि न जाने मया किं क्रियेत इति ।''

हिन्दुतत्त्वशास्त्रं यथा वदति तथा एषः जन्मान्तरीयः सम्बन्धः इति अहं भावयामि । क्व राचम्मा ! क्व अहम् ! क्व च आवयोः परममैत्री ! सा मयि यावतीं प्रीतिं प्रदर्शयति स्म तावन्तम् एव स्नेहम् अहं तस्यां वहामि स्म । बहुवारं सा मया स्मृता आसीत् । वस्तुतः मया विश्वासः बहुषु एव दृष्टः । शङ्करस्य मम च आत्मीयः एव सम्बन्धः । स च तस्य विद्या-बुद्धि-धीरोदात्ततादीनां दर्शनात् प्रवृद्धः । तस्य व्यक्तित्वे काचित् प्रखरता आसीत् । तया एव अहम् आकृष्टः अभवम् । नञ्जुण्डः अपि मम आत्मीयः एव । मम प्रगतेः विषये सः विशेषास्थां प्रदर्शयति स्म । स्वभावेन मृदुः सः गुणेन नितरां सज्जनः । मां मैसूरुनगरं प्रति सः एव आनीतवान्, अग्रिमविद्याभ्यासार्थम् अवकाशं दर्शितवान् च । अतः तदीयः आत्मीयः सम्बन्धः कृतज्ञतासंवलितः अपि स्यात् कदाचित् । किन्तु राचम्मायाः आत्मीयता अन्यादृशी एव । विश्लेषणातीतः कश्चन अनुकम्पः, आत्मीयभावः, स्नेहः च आसीत् तत्र ।

एतत् किमपि तस्याः पुरतः अहं न उक्तवान् । पुनः अर्धघण्टां यावत् उपविश्य - ''अहं साधयामि तावत् । देवप्रसादवर्यः तु न आगतः । प्रकोष्ठप्राप्तौ विलम्बः स्यात् मम'' इति वदन् अहम् उत्थितः ।

''सः एतवच्छीघ्रं न आगच्छेत् । भवतः प्रकोष्ठः कुत्र ? आवां बहून् विषयान् अधिकृत्य वार्तालापं कृतवन्तौ । किन्तु भवतः भोजनादिव्यवस्थाविषये मया किमपि न पृष्टम् एव । वासः कुत्र ? भोजनं च कुत्र ?''

''वासः प्रकोष्ठे । अनुकूलकरः अस्ति प्रकोष्ठः । भोजनार्थम् अनाथालयं प्रति गच्छामि ।''

''एतावता एव रात्रेः नववादनम् अतीतम् । भवता अनाथालये अद्य भोजनं न प्राप्येत । अतः क्षणं प्रतीक्षताम्'' इति उक्त्वा अन्तः गत्वा एकं बन्धम् आनीय मम पुरतः स्थापयित्वा - ''कानिचन फलानि सन्ति अत्र । भोजनात् तु अद्य भवान् वञ्चितः । प्रकोष्ठं गत्वा एतानि वा खादतु'' इति उक्तवती राचम्मा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मार्गपर्यन्तं मम प्रेषणार्थम् आगत्य - ''अविस्मृत्य तदा तदा अत्र आगन्तव्यम् एव भवता । अन्यथा महाविद्यालयम् आगच्छतः आर्यपुत्रस्य द्वारा आरक्षककार्यम् अपि कारयिष्यामि'' इति उक्तवती ।

अननुभूतपूर्वेण आनन्देन अहं प्रकोष्ठं प्रति प्रस्थितवान् । मध्याह्ने प्राध्यापकस्य वचनानां श्रवणात् उत्पन्नः खेदः विस्मृतिपथं गतः आसीत् । बाल्यदिनानां स्मरणं मनः उल्लसितं करोति स्म । प्रकोष्ठं गतेन मया अन्या अपि सन्तोषवार्ता प्राप्ता । नञ्जुण्डः मह्यं पत्रं लिखितवान् आसीत् । पत्रे सः लिखितवान् आसीत् - ''ज्ञातपूर्वः कश्चन विद्याविभागीयः अधिकारी मह्यम् उद्योगं दापितवान् अस्ति । चलुवरायपत्तनात् अनतिदूरे स्थिते ग्रामे अहं माध्यमिकविद्यालयस्य अध्यापकः जातः अस्मि ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवप्रसादस्य जन्मस्थलं मैसूरुनगरम् एव । तदीयौ मातापितरौ तस्मिन् एव नगरे निवसतः । तस्य एकः अनुजः एका अनुजा च स्तः । पिता जान्तम्मय्यः वाहनसमीकरणागारस्य स्वामी । स्वगृहम् अस्ति तस्य । देवप्रसादः यत्र वसति तदपि तस्यैव । एतदतिरिच्य अन्यानि अपि चत्वारि गृहाणि सन्ति तदीयानि । सर्वाणि भाटकार्थं दत्तानि सन्ति । धनिकत्वकारणतः क्रिस्तसमाजे विशेषादरवान् अस्ति सः । तस्य स्वभावः विलक्षणः । मनः तुष्टम् अस्ति चेत् अयाचितम् अपि पुत्रेभ्यः आनीय ददाति स्म सः । मनसि रुष्टे सति तु सर्वैः संन्यासिभिः इव विरक्तजीवनं यापनीयम् इति कठोराज्ञा क्रियते स्म । पत्नीपुत्रादीनां विषये सुग्रीवाज्ञासदृशः व्यवहारः तस्य । क्षणे हासः, अपरक्षणे च रोषः । मत-धर्म-मन्दिरादिषु विशेषभक्तिः । तस्य कारणम् अपि आसीत् ।

यदा सः त्रिवर्षीयः आसीत् तदा कश्चन विलक्षणः रोगः तम् अबाधत । समग्रं शरीरं स्फीतं जातम् । तत्काले तदीयः पिता हिन्दुः एव आसीत् । अद्वितीयस्य पुत्रस्य चिकित्सार्थं तेन सर्वविधप्रयासाः कृताः । तस्य पत्नी न आसीत् । तथापि द्वितीयविवाहे तेन मतिः न कृता आसीत् । अन्ते कश्चन क्रिस्तमतगुरुः औषधदानेन तस्य बालस्य रोगं निवारितवान् । तदीयस्य पितुः मनः अपि तदभ्यन्तरे आकृष्टम् आसीत् क्रैस्तगुरुणा । पुनः किं, पितापुत्रौ क्रिस्तमतीयौ जातौ । जीवं रक्षितवतः धर्मगुरोः विषये जान्तम्मय्यवर्यस्य विशेषश्रद्धा । धर्मगुरोः प्रार्थनाबलात् एव रोगः अपगतः, न तु चिकित्साकारणतः इति अद्यापि भावयति तम्मय्यवर्यः ।

पितुः स्वभावः देवप्रसादाय न रोचते स्म । विवाहानन्तरं प्रबलाभियाचनापूर्वकं वासार्थं पृथक् गृहं प्राप्य एव पत्नी मातृगृहात् आनायिता तेन । सः सपत्नीकः तदा तदा पितुः गृहं गत्वा आगच्छति । पिता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तु विरलतया एव पुत्रस्य गृहं प्रति आगच्छति । देवप्रसादस्य माता तु परमसाध्वी । एतादृशेषु विषयेषु सर्वथा अनासक्ता सा । अनुजः अल्पवयस्कः । क्रिस्तीयविद्यालयं प्रति सः गच्छति विद्याभ्यासार्थम् । अनुजा क्रिस्तीय-महाविद्यालये एकादशकक्ष्यायां पठति ।

राचम्मायाः गृहं प्रति द्वित्रवारं गमनेन तत्कुटुम्बसम्बद्धाः बहवः विषयाः मया ज्ञाताः । 'तादृशस्य पितुः एतादृशः पुत्रः कथं जातः इति न जाने' इति वदन्ती राचम्मा आश्चर्यम् अनुभवति स्म । देवप्रसादस्य स्वभावः सरलः । धर्मश्रद्धा, क्वचित् या धर्मान्धतारूपं प्राप्नोति स्म सा, पुत्रे न आसीत् । भानुवासरे सः क्रिस्तालयं न गच्छति स्म । 'इच्छा अस्ति चेत् भवती गच्छतु' इति पत्नीं वदति स्म सः । पत्न्याः सहवासेन, महाविद्यालयपाठनेन, सप्ताहे द्विवारम् आंग्लचलनचित्रदर्शनेन, विनोदस्थाने क्रीडनेन, पुस्तकादिपठनेन, परिमितमित्राणां सहवासेन, निरन्तरधूमपानेन च तदीयानि दिनानि निश्चिन्ततया यापितानि भवन्ति स्म । कस्मिंश्चित् अपि विषये गभीरचिन्तनस्य अकरणं तस्य स्वभावः ।

यदा अहं तदीयं गृहं गच्छामि स्म तदा देवप्रसादः सहर्षं मां स्वागतीकरोति स्म । सस्नेहं मम हस्तं गृहीत्वा प्रकोष्ठे माम् उपवेश्य पत्नीम् आह्वयति स्म । कदापि काफीसेवनप्रस्तावम् अपि मम पुरतः न करोति स्म सः । क्वचित् फलानि आनीय ददाति स्म । तस्य परिचयस्य अनन्तरम् अहं तस्य कक्ष्यायां टिप्पणीस्वीकारम् आरब्धवान् । एतत् लक्षितवान् सः कदाचित् गृहे माम् उद्दिश्य - ''ये पाठ्यपुस्तकानि पठित्वा विषयम् अवगन्तुं न अर्हन्ति तेषां 'प्रतिभावतां' निमित्तं टिप्पणी लेख्यते । भवते आवश्यकानि पाठ्यपुस्तकानि ग्रन्थालयतः अहं दापयामि । तानि श्रद्धया पठतु भवान् । 'राचम्मायाः पत्या लेख्यते' इति उद्देशेन भवता टिप्पणी स्वीकरणीया नास्ति'' इति अवदत् ।

तस्य स्वभावः मह्यम् अरोचत । अहं प्रायः सप्तवादनसमये तदीयं गृहं गच्छामि स्म । प्रायः तत्समये सः विनोदस्थानं (क्लब्) गतवान् भवति स्म ।

कदाचित् चतुर्वादनसमये मनसि महती नीरसता उत्पन्ना । अतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पठनं स्थगयित्वा अहम् अटनार्थं निर्गतः प्रकोष्ठतः । अजानतः एव मम पादौ मां राचम्मागृहम् अनयताम् । राचम्मा समययापनार्थम् अद्वितीयसाधनत्वेन सदा कथापुस्तकानि पठति स्म । तस्मिन् अपि दिने सा वेत्रासन्दे उपविश्य कथापुस्तकपठने निमग्ना आसीत् । मम आगमनात् मन्दसाहं प्रकटयन्ती सा कथापुस्तकपठनं स्थगितवती । अहम् अपरस्मिन् वेत्रासने उपविशन् तां पृष्टवान् - ''भानुवासरे सायङ्काले अपि भवती गृहात् बहिः कुत्रापि न गच्छति किम् ?''

''कुत्र गच्छेयम् ? बहिः अटने आसक्तिः नास्ति मम ।''

''भवत्याः आर्यपुत्रः कुत्र ?''

''स तु चलनचित्रमन्दिरं गतः ।''

''भवतीं विना एव ..... ?''

''स तु सदा निमन्त्रयति । सः सदापि आंग्लचित्राणि एव पश्यति । किन्तु मम तत्र अनासक्तिः । धिक् तानि जुगुप्साजनकानि चित्राणि !''

अर्धघण्टां यावत् विभिन्नविषयान् अधिकृत्य आवयोः वार्तालापः प्रवृत्तः । ततः सा किमपि स्मृत्वा पृष्टवती - ''सत्य ! कमपि विषयं प्रष्टुम् इच्छामि । एषः विषयः प्रष्टव्यः इति बहोः कालतः चिन्तयन्ती आसम् । मम प्रश्नतः भवान् कुपितः न भवेत् खलु ?''

'' न । कामं पृच्छतु भवती ।''

''वस्तुतः अपि भवान् कोपं न प्राप्नुयात् खलु ?''

''निश्चयेन वदामि । अहं कोपं न करिष्यामि ।''

पठनार्थं गृहीतं पुस्तकम् उत्पीठिकायाः उपरि स्थापयन्ती सा पृष्टवती - ''क्रैस्तमतस्य विषये किमर्थं भवतः तावती असहना ?''

''मम असहना अस्ति इति केन उक्तम् ?''

''वक्ता कोऽपि स्यात् नाम । असहना अस्ति इति तु अवितथं खलु ?''

''असहना नास्ति मम ।''

''भवान् असत्यं वदन् अस्ति । अमेरिकीयमतप्रचारकस्य सभायां भवता कोलाहलः कृतः इति श्रुतम् । क्रैस्तमतविरुद्धतया लिखितानि पुस्तकानि भवान् बहुधा पठति इति श्रूयते ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''तदुभयं मया कृतम् इति तु सत्यम् । किन्तु तत् क्रैस्तमतद्वेषतः मया न कृतम् । हिन्दुधर्मविषयिका प्रीतिः मया तथा कारयति ।''

''उभयोः अपि कारणयोः अभेदः एव ।''

''न तथा । एकस्य मतस्य प्रीतिः अपरमतस्य द्वेषं समर्थयति इति न । तत्रापि हिन्दुधर्मप्रीतिः तादृशी सर्वथा न । 'मय्येव श्रद्धत्स्व । मत्तः एव मोक्षः, न अन्यथा । मोक्षदाता अहम् एकः एव' इति वदत् क्रैस्तमतं वस्तुतः परमतासहिष्णुतां बोधयति । 'केनचित् अपि मार्गेण आगतः अपि भवान् माम् एव प्राप्स्यति' इति वदन् हिन्दुधर्मः परमतासहिष्णुतां न जनयति ।''

द्वित्रनिमेषान् यावत् चिन्तयित्वा राचम्मा उक्तवती – ''पश्यतु सत्य ! अहं बहूनि कथापुस्तकानि पठामि । ततः मया हिन्दुसमाजस्य सामान्यकल्पना प्राप्ता अस्ति । हासने अध्ययनकाले बह्वीनां हिन्दुकन्यकानां सहवासः आसीत् मम । केषुचित् अंशेषु तत्र न्यूनता दृश्यते इत्येतत् सत्यम् एव चेदपि भवतां समाजे किञ्चन सौन्दर्यम् अस्ति । काचित् शुचिता जागर्ति ।''

''भवत्या युक्तम् उक्तं राचम्म ! हिन्दुधर्मे ऐक्यं न दृश्यते, न वा एकरूपता । बाह्यदर्शनेन सः बहुधा समीकृतं जीर्णवस्त्रमिव, शिथिलगृहम् इव वा भासते । किन्तु यः तस्य अन्तरङ्गदर्शनार्थं प्रयतते सः अपूर्वसौन्दर्यं पश्यति तत्र । हिन्दुधर्मः मतमात्रं न । संस्कृतिरूपः सः । जीवनक्रमविशेषस्य नाम 'हिन्दुः' इति । जीवचैतन्यं तत्र न विनष्टम् । अप्रशस्ताचारणां कारणतः सः मेघैः आच्छन्नः इव मलिनतया भासते ।''

''तथापि बहवः तस्मात् दूरं गच्छन्तः दृश्यन्ते ।''

''तस्य अन्तःसत्त्वं अजानन्तः क्रैस्तमतप्रचारकाः समग्रं भारतम् एव क्रस्तमतमयं कर्तुं प्रयतमानाः सन्ति । एकम् उदाहरणं पश्यतु । उत्तमहिन्दोः दृष्ट्या मांसाहारः वर्ज्यः । किन्तु उत्तमः हिन्दुः यदि क्रिस्तमतीयः भवति तर्हि सः गच्छता कालेन मांसाहारी भविष्यति । हिन्दुगुरुः शाकाहारमात्रसेवी । किन्तु क्रैस्तमतगुरुः, तत्रापि विदेशीयः मांसं विना न भुङ्क्ते । क्रैस्तमतं मांसाहारसेवनं न विधत्ते चेदपि न निषिध्यति अपि सः । एवं स्थिते तत्र अहिंसातत्त्वस्य किं महत्त्वम् अवशिष्टम् ? एतां परम्पराम्, अत्रत्यम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इतिहासं च सम्यक् अनवगच्छन् पश्चिमदेशीयः धर्मगुरुः समग्रं भारतम् एव क्रैस्तमतावलम्बि कर्तुं प्रयतते । .....''

मम कथनसमये राचम्मा नेत्रसङ्केतेन किमपि सूचितवती । तस्याः आशयः मया न अवगतः । अहं मम कथनम् अनुवर्तितवान् - ''समग्रः भारतदेशः क्रैस्तमतमयः जातः इत्येव चिन्तयतु, तदा किं वा अवशिष्येत ? अस्माकं वेदोपनिषदः, अस्माकं देवालयाः, विविधाः कलाः, सनातनी संस्कृतिः इत्यादयः सर्वे विलयं गच्छन्ति । अतः अयं सङ्घर्षः न द्वयोः धर्मयोः, अपि तु द्वयोः संस्कृत्योः । भारतीयसंस्कृतेः चैतन्यं हिन्दुधर्मावलम्बि । एतस्य धर्मस्य जीवनदी एव यदि शुष्का भविष्यति तर्हि अवशिष्यन्ते कलेवरसदृशांः अवशेषाः, न तु जीवन्ती संस्कृतिः । क्रैस्तमतं भारतं प्रति आगमनसमये स्वकीयं रूपलक्षणादिकं परित्यज्य तु न आगच्छति । पाश्चात्यसंस्कृतेः सर्वविधान् व्यवहारान् धरत् एव तत् भारतं प्रविष्टवत् अस्ति । एकम् उदाहरणं परिशीलयतु तावत् । .....''

''वयं पुनः कदाचित् वार्तालापं करवाम'' - इति उक्तवती राचम्मा ।

मयि चर्चावेशः उत्पन्नः आसीत् । अहम् उक्तवान् - ''क्रैस्तपुरुषाः पश्चिमीयपुरुषाणां जीवनक्रमं वेषभूषादिकं च अनुकुर्वन्ति । क्रैस्तमहिलाः अपि प्रायः, अपवादभूतान् काश्चन विहाय, सर्वाः पश्चिममहिलाम् एव अनुकुर्वन्ति । शाटिकां धृत्वा केषान् प्रसाध्य पुष्पं धृत्वा ललाटे तिलकं धरन्तीं हिन्दुमहिलां पश्यतु । आजानुमात्रलम्बिनिचोलं धृत्वा केशान् कर्तयित्वा रिक्तललाटम् अटन्तीं भारतजातां कृष्णवर्णीयां क्रैस्तबालिकाम् अपि पश्यतु । किं शोभते एतत् ? पश्चिमव्यवहारस्य अनुकरणं हिन्दुधर्मीयैः अपि क्रियते एव । तादृशम् अनुकरणं निरोद्धुं समर्था शक्तिः नाम धर्मः एव । एषा धर्मनदी एव शोष्यते चेत् क्रिस्तमतप्रचारकाणाम् इष्टं सिद्धम् इव । ततः भारतीयता का अवशिष्येत ?''

तावता पार्श्वप्रकोष्ठात् काचित् सप्तदशवर्षीया युवतिः अस्मत्समीपम् आगता । उन्नतः कायः, भारतीयः कृष्णः वर्णः च तस्याः । निचोलं धृत्वा केशान् कर्तयित्वा ओष्ठौ ओष्ठरागेण लिप्तवती आसीत् सा । उन्नतपृष्ठां श्वेतपादरक्षां चापि धृतवती आसीत् । साक्षात् आगत्य सा आवयोः पुरतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसन्दे उपविष्टवती । तस्याः आगमनात् राचम्मायाः मुखम् अप्रसन्नं जातम् । तथापि अप्रसन्नतां गोपयन्ती सा माम् उद्दिश्य - ''एषा भवतः अध्यापकस्य भगिनी, मम ननान्दा । लिल्ली इति एतस्याः नाम'' इति उक्त्वा तां पश्यन्ती उक्तवती - ''मया पूर्वम् उक्तम् आसीत् खलु, सः एव सत्यनारायणः एषः ।''

अहं तां नमस्कृतवान् । सा आंग्लभाषया उक्तवती - ''ग्ल्याड् टु मीट् टु यु'' इति ।

मया निमेषद्वयात् पूर्वं यादृशः वेषभूषः वर्णितः आसीत् तादृशम् एव धृतवती आसीत् सा । अहं प्रतिदिनम् इव तस्मिन् अपि दिने पादांशुकं 'जुब्बा' च धृतवान् आसम् । सा आंग्लमिश्रितशैल्या उक्तवती - ''भवतोः वार्तालापः कोऽपि प्रचलति स्म । मम आगमनात् तत्र विच्छित्तिः जाता इति मन्ये । वार्तालापः अनुवर्तताम् । अहं शृणोमि ।''

प्रकोष्ठे उपविश्य सा आवयोः सम्भाषणम् आद्यन्तं श्रुतवती आसीत् इति तु सुस्पष्टम् एव । वार्तालापमध्ये आगमनस्य आवश्यकता नास्ति चेदपि बुद्ध्या सा आगत्य उपविष्टवती आसीत् । एतत् जानन् अपि अहं मम कथनम् अनुवर्तयितुम् इष्टवान् । तदा राचम्मा विषयपरिवर्तनं कुर्वती - ''सत्य ! इदानीं तद्विषये वार्तालापः मास्तु । यदि शक्यं तर्हि तं विषयम् अधिकृत्य किमपि पुस्तकम् आनीय ददातु, पठिष्यामि । अद्य मम शरीरे तावान् उत्साहः न दृश्यते'' इति उक्तवती ।

अहं मौनम् अवलम्बितवान् । द्वित्रनिमेषान् यावत् तत्र मौनस्थितिः एव आसीत् । मौनं भञ्जयन् अहम् एव तां युवतिं पृष्टवान् - ''भवती कस्मिन् विद्यालये पठति ?''

''सिटि क्रिश्चियन् महाविद्यालये'' - आंग्लभाषया उक्तवती सा ।

''का कक्ष्या ?''

''इण्टर्मीडियेट्कक्ष्यायाः प्रथमवर्ष समाप्तम् ।''

''ऐच्छिकः विषयः ?''

''कला'' इति उक्त्वा सा उपहासमिश्रितेन स्वरेण पृष्टवती - ''भवान् अपि अपि कलाच्छात्रः इति मया श्रुतम् । आवयोः समाना कक्ष्या इत्यपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रूयते । तर्कशास्त्रस्य अवगमने मम क्लेशः । भवान् तर्कनिपुणः इति ज्ञातम् । किं भवान् मां तर्क पाठयेत् तदा तदा ?'' इति ।

अहम् अपि उपहासमिश्रितेण एव स्वरेण उक्तवान् - ''मम तर्कः न जाने, भवत्यै रोचते वा न वेति । कदाचित् भवतीतः एव मया तर्कः अवगन्तव्यः भवेत् अपि ।''

''थेंक्स्'' - यथापूर्वम् उपहासः आसीत् स्वरे ।

निमेषद्वयस्य अनन्तरं - 'भ्रातृजाये, साधयामि तावत्' इति उक्त्वा ततः निर्गतवती सा । राचम्मा - 'मरियम्मऽऽ' इति सेविकाम् आहूय तस्याः आगमनानन्तरं - ''सप्तवादनम् अतीतम् । पाकसन्नाहं करोतु भवती'' इति आदिश्य स्वयम् अन्तः गत्वा कदलीद्वयम् आनीय मह्यं दत्त्वा - ''खादतु एतत् । सा प्रकोष्ठे अस्ति इति अंशः मया विस्मृतः आसीत् । केशकर्तनं कृतवतीनां विषये भवान् यदा वदन् आसीत् तदा मया सा स्मृता । अहं नेत्रसङ्केतेन ज्ञापितवती । 'पुनः कदाचित् वार्तालापं करवाम' इति उक्तवती । तथापि भवता न अवगतम्'' इति उक्तवती ।

''तत् आस्तां नाम । सा भवत्याः पतिम् उक्त्वा तद्द्वारा तर्जनं कारयेत् किम् ?''

''तस्याः अग्रजः कस्यापि वचनं न अनुसरति । तस्याः वचनात् किञ्चिदपि भीतिः नास्ति मम । भीतिकारणतः तस्याः उल्लेखः मया न कृतः । भवान् यादृशीं वर्णितवान् ताम् अपि अतिशेते एषा । केशकर्तनं मास्तु इति एतस्याः अग्रजः पौनःपुन्येन वदति । तथापि एषा न अङ्गीकृतवती । द्विवारं तेन तस्यै शाटिका दत्ता । सा तत् अस्वीकुर्वती 'भवत्पत्न्यै ददातु ताम्' इति उक्त्वा प्रत्यर्पितवती । आंग्लमाध्यमशाला तस्याः । अतः प्रादेशिकभाषया सम्भाषणम् अवमानकरं मन्यते सा । प्राप्तवयस्का अपि सा जानुमात्रस्पर्शिनं निचोलं धृत्वा अटति यत् तत् मयि जुगुप्सां जनयति ।.....''

''सर्वम् आंग्लेयविद्यालयप्रभावात्.....''

''केशकर्तनं कृत्वा जानुमात्रस्पर्शिनिचोलं धरतु इति सा माम् अपि बहुधा बोधितवती आसीत् पूर्वम् । पुष्पधारणं ग्राम्यत्वद्योतकम् इति उपहसितवती अपि । इदानीं तु मत्तः किञ्चित् बिभेति ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''तदस्तु । भवत्याः व्यवहारस्य विषये आर्यपुत्रस्य कः अभिप्रायः ?''

''मया पूर्वम् एव उक्तम् आसीत् खलु – सः बहुषु विषयेषु निर्लिप्तः इति । व्यवहारः यः कोऽपि भवतु इति तस्य चिन्तनम् । तथापि भगिन्याः व्यवहारः तस्मै अपि न रोचते । मां सः वदति – 'ग्राम्यबालिका इत्यतः एव भवती परिणीता मया । अतः इदानीं भवती यथा अस्ति तथैव भवतु अग्रे अपि' इति ।''

'इतोऽपि विलम्बः यदि क्रियते तर्हि रात्रिभोजनं न लभ्येत' इति विचिन्त्य अहं ततः प्रस्थितः । मार्गे गच्छतः मम मनसि चिन्तनं प्रवर्तते स्म – 'राचम्मा यद्यपि क्रैस्तकुले जाता, तथापि तस्याः व्यवहारः हिन्दुमहिलायाः इव एव । तस्याः मनः अद्यापि न कलुषितम् । किन्तु इदानीम् आंग्लशालाः, महाविद्यालयाः, पाश्चात्याः धर्मगुरवः च राचम्मासदृशीः बालिकाः न निर्मान्ति, प्रत्युत सज्जीकुर्वन्ति लिल्लीसदृशीः । अहो विसङ्गतिः !''

अनाथालयं गत्वा भोजनं समाप्य अहं प्रकोष्ठम् आगतः । प्रकोष्ठे पतितम् एकं पत्रं दृष्टं मया । विद्यालयसङ्केताय आगतं पत्रं तत् । सङ्केतस्थानि अक्षराणि बालैः लिखितानि इव भासन्ते स्म । केनचित् मित्रेण तत् पत्रं मम प्रकोष्ठे पातितम् आसीत् । अहं तत् उद्घाट्य दृष्टवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पत्रस्य प्राथमिकवाक्यानां पठनात् मया किमपि न अवगतम् । समग्रतया पठित्वा अन्ते स्थितं 'शकुन्तलम्मा' इति नाम अपि यदा पठितं तदा मया अवगतं यत् एतत् मम भगिन्याः पत्रम् इति ।

मातुः मरणस्य अनन्तरं मया स्वग्रामं प्रति न गतम् एव आसीत् । पिता कुत्र अस्ति, सः जीवति वा न वा इत्यादिकं मया न ज्ञायते स्म । अबोधबालिका मम भगिनी मुग्धशैल्या लिखितवती आसीत् - 'पितामह्या सह अहं ग्रामे वसामि स्म । केभ्यश्चित् दिनेभ्यः पूर्वं सा दिवं गता । नागूरीयः मातुलः मां स्वग्रामं नीतवान् । गमनानन्तरं पक्षाभ्यन्तरे एव इदानीम् अहम् अत्र सेविकात्वं प्राप्तवती अस्मि । इदानीम् अहं पञ्चदशवर्षीया । आनयनसमये मातुलः वदति स्म - 'अहम् एतस्याः विवाहं निर्वर्तयिष्यामि' इति । इदानीं तु सा वार्ता अस्तं गता । अत्र सेविका इव व्यवहरणं, सर्वविधपीडानां सहनं च सर्वथा असाध्यम् । प्रतिकवलम् अश्रुमिश्रितं भवति एव । यदि भवान् मां न नयेत् तर्हि नदी कासारः वा मम शरणं भवेत् । सर्वथा अनाथायाः मम भवान् अग्रजः एकः एव अवलम्बनम्'' इति ।

मम काचित् भगिनी अस्ति इति अंशः एव मया विस्मृतप्रायः आसीत् । पठनं धनसम्पादनम् इत्यादिषु कार्येषु व्यग्रः अहं मातुः मरणं, अनुजायाः स्थितिं वा सर्वथा उपेक्षितवान् आसम् । भगिनी कीदृशं जीवनं यापितवती, कथं सा प्रवृद्धा इत्यादयः मया सर्वथा अज्ञाताः आसन् । तथापि नागूरीये मातुलगृहे सा कीदृशं 'सुखं' प्राप्नुवती स्यात् इति तु मया सम्यक् अवगतम् । 'धीरः पुमान् अहम् एव मातुलगृहे प्रतिदिनम् अश्रूणि स्रावयामि स्म । एवं स्थिते कोमलहृदया, अनाथा मम भगिनी क्रूरे परिसरे कीदृशं जीवनं यापयन्ती स्यात्' इति चिन्तयतः मम अन्तरङ्गे करुणारसः उद्गतः । 'ममापि काचित् भगिनी अस्ति' इति भावः मयि रोमाञ्चनम् अजनयत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'मद्विषये चिन्तनं कुर्वती काचित् मत्कुलीया जीवति' इत्यंशः मयि सन्तोषतरङ्गान् उदपादयत् । अनन्तरक्षणे एव नूतनस्य दायित्वस्य आपत्तिः अपि मनसि आगता । निराधारः, निरालम्बः, शाखायाः उपरि स्थित्वा समतोलनं प्राप्तुं प्रयतमानः अहम् अविवाहितायाः, अनन्यगतिकायाः, ब्राह्मणकन्यकायाः अग्रजत्वं प्राप्तवान् आसम् ।

कस्माचित् मित्रात् अल्पं धनं प्राप्य अहं चलुवरायपत्तनं प्रति प्रस्थितवान् । ततः अष्ट कि.मी.दूरे अस्ति नागूरु । तं ग्रामं गन्तुं लोकयानव्यवस्था न आसीत् । सर्वकारीयः मार्गः तु आसीत् । तेन मार्गेण अहं नागूरुं प्रति प्रस्थितवान् । गमनसमये पूर्वतनस्थितिः मम स्मृतिपथम् आगता । बाल्यस्य घटनाः चित्रवत् दृष्टाः । ग्रामः यथापूर्वम् एव आसीत् । आधुनिककालस्य कोऽपि विशेषपरिणामः तत्र न परिलक्ष्यते स्म । सायं चतुर्वादने मया मातुलगृहं प्राप्तम् । गृहस्य पुरतः अङ्गणे भगिनी सम्मार्जनं कुर्वती आसीत् । तया झटिति अहं न अभिज्ञातः । स्यूतमात्रहस्तं मां कश्चित् अपरिचितं भावयन्ती सा गृहस्य अन्तः गन्तुम् उद्युक्ता । अहम् एव ताम् उक्तवान् - 'शकुन्तले ! किम् अभिज्ञानं न प्राप्तम् ? एषोऽहं सत्यः ।''

सा सकृत् मम मुखं निर्निमेषं दृष्ट्वा किं वक्तव्यम् इति अजानती हस्तस्थां सम्मार्जनीं तत्रैव पातयित्वा स्तम्भस्य पृष्ठतः स्थित्वा सशब्दं रोदनम् आरब्धवती । प्राचीनां शाटिकां धृतवती आसीत् सा । तस्याः शरीरस्य औन्नत्यं, मुखस्य लक्षणं, नेत्रयोः मार्दवता, गमनस्य शैली इत्यादयः सर्वे दिवं गतां मम मातरम् एव स्मारयन्ति स्म । मातुः प्रतिरूपम् इव आसीत् सा । अहं तस्याः समीपं गत्वा हस्तं हस्तेन गृहीत्वा - ''भगिनि, अलं रोदनेन । एषोऽहम् आगतः अस्मि । इतः परम् अपि किमर्थं रोदनम् ?'' इति वदन् स्यूतस्थानि फलपुष्पादीनि तस्यै दत्तवान् ।

तावता पार्श्वद्वारेण मातुलानी आगतवती । दर्शनमात्रेण सा मां न अभिज्ञातवती इति मन्ये । अहं 'जुब्बा'युतकं पादांशुकं च धृत्वा पादयोः पञ्जाबीयां पादरक्षां धृतवान् आसम् । मुखे श्मश्रु स्फुटतया दृश्यते स्म । प्रसाधिताः केशाः शिरसि राजन्ते स्म । वामहस्ते धृता प्राचीनघटी चाकचक्येन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वस्थितिं ज्ञापयति स्म । उन्नतः गम्भीरः च आकारः आसीत् मम । मातुलानीम् अहम् एव स्वपरिचयम् उक्तवान् ।

"अहो सत्य ! अतीवोन्नतः जातः अस्ति भवान्" इति वदन्ती मातुलानी कृत्रिमहासं प्रदर्शयन्ती वार्तालापं कृतवती । 'भोजनं करोतु' इति उक्तवती सा । 'भोजनं चलुवरायपत्तने एव कृतम्' इति मया उक्तम् । 'उपाहारं ददामि' इति उक्तवती सा । 'नास्ति बुभुक्षा मम' इति उक्तं मया । 'काफीं सज्जीकरोमि' इति तया उक्तम् । "काफीपानस्य अभ्यासः एव नास्ति मम" इति उक्तं मया ।

अङ्गणस्य स्वच्छतां समाप्य मम भगिनी क्षालनीयवस्त्राणां कण्डोलम् उन्नीय - 'अहम् अचिरात् एव प्रत्यागमिष्यामि' इति उक्त्वा ततः निर्गतवती ।

पञ्चनिमेषानन्तरम् अहं मातुलानीं पृष्टवान् - 'मातुलः कुत्र ?'

'सः पार्श्वग्रामं गतः अस्ति । प्रत्यागमनसमयः एषः ।'

"ग्रामसञ्चारं कृत्वा आगच्छामि" इति उक्त्वा अहं गृहात् प्रस्थितः ।

भगिनी कासारमार्गे गच्छन्ती आसीत् । कासारः क्रोशमिते दूरे अस्ति । अन्याः महिलाः वस्त्रक्षालनार्थं यत्र न आगच्छेयुः तत्र भगिनीं नीतवान् अहम् । 'सर्वं वदतु तावत्' इति ताम् उक्तवान् च । किन्तु सा किमपि न उक्तवती । किञ्चित् यदा वक्तुम् उद्युक्तं तदा रोदनम् उद्गतम् । आञ्चलेन मुखं पिधाय रोदनं कृतवती सा ।

अर्धघण्टानन्तरं सा उक्तवती - "विलम्बः जातः । गच्छाम तावत् । अन्यथा मातुलानी तर्जयेत् ।"

"अलं तर्जनचिन्तया । श्वः भवती मया सह मैसूरुनगरम् आगमिष्यति । एवं स्थिते तर्जनभीतिः किमर्थम् ? विलम्बः भवतु नाम ।"

"किं सत्यम् एव एतत् ?"

"सत्यम् इति भवत्याः नाम्ना शपे ।"

तस्याः रोदनं स्थगितम् । अधैर्यम् अपगतम् । मम पार्श्वे उपविश्य धैर्येण सा उक्तवती - "मातुः मरणस्य अनन्तरं पिता गृहस्य पात्रेषु एकैकं तदा तदा विक्रीणानः ग्रामं ग्रामम् अटति स्म । तदा पितामही तं तर्जयित्वा - 'एतत् अहं न सहे । गृहं प्रति आगमनम् एव मास्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतः' इति उक्तवती । कदाचित् गृहात् द्वित्राणि आभरणानि स्वीकृत्य निर्गतः पिता पुनः कदापि न प्रत्यागतः । अल्पस्य क्षेत्रस्य आयेन आवयोः जीवनं कथमपि प्रचलति स्म । अहं प्राथमिकशालायां पठामि स्म । अत्रान्तरे सप्ततिवर्षीया पितामही दिवं गता । एतां वार्तां श्रुत्वा मम उद्धारार्थं मातुलः आगतः । मातुः कर्णाभरणं, नासाभरणं, वलयद्वयं च आसीत् गृहे । मातामही नागाभरणं सेवन्तिकाभरणं च जागरूकतया रक्षितवती आसीत् । एतानि सर्वाणि आभरणानि स्वीकृत्य, गृहपात्राणि शकटे आरोप्य मां स्वगृहम् आनीतवान् सः । इदानीम् अस्माकं गृहम् आयुर्वेदचिकित्सालयीयायै अनुवैद्यायै भाटकरूपेण दत्तम् अस्ति मातुलेन । ततः प्रतिमासं रूप्यकद्वयं प्राप्यते भाटकरूपेण । वार्षिकदेयमूल्यं निश्चित्य कृषिक्षेत्रं ग्रामप्रमुखाधीनं कृतवान् अस्ति मातुलः । मासात् पूर्वं तत्र गत्वा धान्यानि आनीतानि तेन । अत्र आगमनानन्तरं द्वित्राणि दिनानि मम विवाहस्य प्रस्तावः प्रचलति स्म गृहे । किन्तु इदानीं तस्य नामापि न श्रूयते । मातुलान्याः पीडा तु मानवमात्रेण सोढुम् अशक्या ।....."

सर्वं निवेद्य सा पुनः उक्तवती - "भगिनीं नयामि इति यदि भवान् वदेत् तर्हि सन्तोषेण मां प्रेषयेतां मातुलानी-मातुलौ । धान्यं तु तौ एव खादतां नाम । किन्तु पात्राणि आभरणानि च इतः नेतव्यानि एव । तानि न जानीमः एव इति वदेतां तौ । उच्चध्वनिना पृष्टं चेत् सर्वाणि दीयन्ते एव" इति ।

अहं कोषात् लेखनीं कागदं च स्वीकृत्य तया सूचितानां पात्राणाम् आभरणानां च नामानि लिखितवान् । बुद्धिमती शकुन्तला लघुपात्रस्यापि नाम सम्यक् स्मरति स्म । 'एतेषु कति मातुलान्याः मातृगृहं प्रति गतानि स्युः इति तु अहं न जानामि' इति उक्तवती सा ।

"तदस्तु । ग्रामे अध्यापकः नञ्जुण्डवर्यः पूर्वम् आसीत् खलु ? सः इदानीं कुत्र अस्ति इति ज्ञायते वा भवत्या ?"

"सः इदानीम् अरकलगूडुसमीपस्थे कस्मिंश्चित् ग्रामे अध्यापकः । तस्य जन्मस्थलम् एतत् एव खलु ? ग्रीष्मविरामकारणतः ग्रामम् आगतः अस्ति सः । ह्यः रात्रौ मया सः ग्रामे दृष्टः । तस्य माता वस्त्रप्रक्षालनसमये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कासारतीरे मिलिता आसीत् । तस्याः द्वारा मम कष्टवार्ता श्रुत्वा नञ्जुण्डवर्यः एव मातृद्वारा वार्ता प्रेषितवान् यत् अग्रजाय पत्रं लिखतु इति । तस्य गृहे एव उपविश्य मया भवते पत्रं लिखितम् । सङ्केतः अपि तेनैव सूचितः । पत्रम् अपि तेनैव दत्तम् ।''

कासारतः आवयोः प्रत्यागमनसमये ग्रामे दीपाः ज्वालिताः आसन् । गृहपर्यन्तम् आगत्य शकुन्तलां गृहं प्रापय्य प्रतिगत्य अहं नञ्जुण्डवर्यस्य गृहं गतवान्, यश्च नागूरतः निर्गमने मम साहाय्यं कृतवान् आसीत् ।

नमस्कृतवतः मम अभिज्ञानं झटिति न प्राप्तं नञ्जुण्डवर्येण । मया स्वपरिचयः निवेदितः । ततः कुशलवार्तालापः संवृत्तः । ग्रामं परित्यज्य गतः अहम् इदानीं महाविद्यालये पठामि यत् तदर्थं महान्तम् आनन्दं प्रकटितवान् नञ्जुण्डवर्यः । ततः अहम् आगमनकारणं निवेदितवान् ।

सर्वं श्रुत्वा किञ्चित् विचिन्त्य सः उक्तवान् – ''भवतः मातुलः महाधूर्तः । उपायेन कार्यं साधनीयम् इदानीम् । 'स्वग्रामतः आगच्छन् अस्मि । ग्रामप्रमुखेण एव पात्राणाम् आभरणानां च आवली दत्ता अस्ति । एतदनुगुणं सर्वं ददातु' इति भवता वक्तव्यम् । तस्य एतस्य च ग्रामप्रमुखयोः महती मैत्री अस्ति । 'अस्मद्ग्रामप्रमुखः उक्तवान् अस्ति यत् एतद्ग्रामप्रमुखः सूचितः चेत् तेन सर्वं दाप्यते इति' इति भवान् वदतु । एतद्ग्रामप्रमुखात् बिभेति भवतः मातुलः केनचित् कारणेन । यतः चौर्यारोपव्यवहारः इदानीम् अपि ग्रामप्रमुखाधीनः अस्ति । एषः उपायः अपि न फलति चेत् भवान् पुनः मत्समीपम् आगच्छतु । अहम् एतद्ग्रामप्रमुखम् उक्त्वा सर्वं साधयिष्यामि ।''

'श्वः प्रातः आवयोः इतः निर्गमनं भवेत् । चलुवरायपत्तनं प्रति गन्तुं भाटकशकटव्यवस्था करणीया भवेत् भवता' इति निवेद्य अहं मातुलगृहं प्रति आगतः ।

तावता मातुलः गृहे उपस्थितः आसीत् । मम गमनसमये शकुन्तलया उत्तमा शाटिका धृता आसीत् । रात्रौ मम निमित्तम् उत्तमः पाकः सज्जीकृतः । प्रातः अहं मातुलम् उद्दिश्य – 'भगिनीं नेतुम् आगतवान् अस्मि' इति उक्तवान् ।

तदा मातुलः महत् वात्सल्यं प्रदर्शयन् – ''तस्याः विवाहः मया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एव निर्वर्तनीयः इति सङ्कल्पितम् आसीत् । इदानीम् अग्रजः भवान् तां नेतुम् इच्छति चेत् अहं कथं वा 'मास्तु' इति वदेयम् ? भवतः इच्छानुगुणम् एव भवतु । भवान् तां नयतु ससन्तोषम्'' इति अवदत् ।

''तस्याः भाविजीवनस्य समग्रं दायित्वं मया एव निरुह्यते । एतानि पात्राणि आभरणानि च गृहे आसन् इति मद्ग्रामप्रमुखः सूचितवान् अस्ति । एतानि ददातु । सर्वाणि अहं मैसूरुनगरं प्रति नेष्यामि'' इति वदन् आवलीं मातुलस्य पुरतः गृहीतवान् अहम् ।

मातुलः सर्वं पठितवान् । मादृशान् सामान्यान् बहून् दृष्टवान् धूर्तः सः । ''एतानि पात्राणि को वा जानाति ? कलशद्वयं, द्वित्राः चषकाः, प्राचीनाः द्वित्राः स्थाल्यः च स्युः । एतानि कुत्र इति अहं तु सर्वथा न जानामि । मदीयस्य गृहस्य अन्नस्य एव भोक्तारः न सन्ति । एवं स्थिते अन्यगृहस्य उच्छिष्टस्य अपेक्षा किमर्थम् ?'' इति क्रोधेन उक्तवान् सः । ''भगिन्याः पुत्री अनाथा न भवेत् इति उद्देशेन मया एषा अत्र आनीता । किन्तु तस्य फलं किम् ? मदीयं गृहम् स्वयत्तीकर्तुम् इष्यते भवता ?'' इति दोषारोपणं कृतवान् सः ।

''मातुल ! भवतः कापट्यं मया अज्ञातं तु न । बाल्ये कानिचन दिनानि भवतः सकाशात् एव प्रशिक्षणं प्राप्तम् अस्ति मया । अतः भवतः आन्तरबाह्यव्यवहाराः सर्वे ज्ञायन्ते मया । अस्मद्ग्रामप्रमुखेण दत्ता आवली एषा । 'मातुलेन अन्याय्यव्यवहारः आचरितः चेत् भवद्ग्रामप्रमुखं वदतु' इति माम् उक्तवान् अस्ति सः । भवतः धूर्तता मत्पुरतः अकिञ्चित्करी । इदानीम् एव आरक्षकान् आनाय्य भवतः गृहस्य शोधनं कारयिष्यामि । एतावता एव भवान् एकं चौर्यारोपं सम्मुखीकुर्वन् अस्ति । यदि आरक्षकाः गृहे अन्वेषणं कुर्युः तर्हि भवता इतः पूर्वं चोरितानि अपि वस्तूनि तैः प्राप्येरन् ।''

मातुलः न सामान्यः । ''अये चण्डाल ! ह्यः रात्रौ मम गृहे भोजनं कृतवान् भवान् अद्य द्रोहचिन्तनं करोति ! यथामति क्रियताम् । सर्वसाक्षी देवः सर्वं जानाति । सत्यस्य एव जयः सदापि'' इति क्रोधेन उक्तवान् सः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''एवं तर्हि, शकुन्तले ! भवती गत्वा नञ्जुण्डवर्यं सूचयतु । मया पूर्वम् एव सूचितः अस्ति सः । आरक्षकं ग्रामप्रमुखं च आनयति सः । आरक्षकप्रमुखः एतावता मया सूचितः अस्ति एव । तेषाम् आगमनपर्यन्तम् एषः पलायनं यथा न कुर्यात् तथा अहम् एतं ग्रहीष्यामि'' इति वदन् मातुलस्य हस्तं सुदृढं गृहीतवान् अहम् ।

एतस्मात् मातुले मृदुता आगता । सः पत्नीम् उद्दिश्य – ''अये, न जाने, कीदृशाः दोषारोपाः सम्मुखीकरणीयाः इति । सर्वं पूर्वजन्मनः कर्मणः फलम् । आस्तां तावत् । एषः यद्यत् वदति तत्सर्वम्, तत् अस्मद्गृहस्य एव चेदपि, आनीय बहिः क्षिपतु । दुष्टस्य एतस्य पीडा निवृत्ता भवतु'' इति उच्चस्वरेण उक्तवान् ।

मातुलानी अट्टम् आरूढवती । मया सूचितानि पात्राणि एकैकशः अधः आगतानि । नासाभरणं प्राप्तम् । कर्णाभरणं प्राप्तम् । नागाभरणं सेवान्तिकाभरणं चापि प्राप्तम् । 'सुवर्णवलयद्वयं तु कुलदेवतानाम्ना शपे, अहं सर्वथा न जानामि' इति सशपथम् उक्तवती मातुलानी । एकस्य पित्तलकलशस्य जलपात्रस्य चापि सा एव गतिः जाता । अन्यानि सर्वाणि प्राप्तानि ।

अत्रान्तरे सहजतया आगतवान् इव व्यवहरन् नञ्जुण्डवर्यः तत्र आगतवान् । पात्राणां राशिं दृष्ट्वा सः एकं शकटम् आनीतवान् । गृहात् गोणीः आनाय्य तासु पात्राणि तेनैव पूरितानि । गोण्यः शकटे आरोपिताः । 'गच्छाम तावत्' इति अहं भगिनीम् उक्तवान् । सा मातुलं मातुलानीं च नमस्कृतवती । निर्गमनसमये हरिद्राकुङ्कुमं दातव्यम् इत्यपि मातुंलानी विस्मृतवती आसीत् इति भाति । तया किमपि न कृतं, न उक्तं वा । ततः आवां प्रस्थितवन्तौ । नञ्जुण्डवर्यः आवां तथैव प्रेषयितुं न सिद्धः । सः आवां स्वगृहं नीतवान् । मध्याह्ने पायसभोजनं तेन सज्जीकारितम् । नञ्जुण्डवर्यस्य पत्नी शकुन्तलायै चोलवस्त्रं, नारिकेलफलं, हरिद्राकुङ्कुमं च दत्तवती । क्रोशदूरम् अनुसृत्य आगत्य आवां प्रेषितवान् नञ्जुण्डवर्यः ।

चलुवरायपत्तनप्राप्तिसमये सायङ्कालीनः षड्वादनसमयः अतीतः आसीत् । मैसूरुनगरं प्रति गन्तुं तदा यानं न आसीत् । तत्र परिचितः अपि कोऽपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न आसीत् । अतः धर्मशालां प्रति शकटं नीतं मया । कस्मिंश्चित् प्रकोष्ठे वस्तूनि स्थापितानि । शकटचालकाय शुल्कधनं दत्त्वा मया कोषः परिशीलितः । तत्र द्वादश रूप्यकाणि अवशिष्टानि आसन् । आवेशवशात् मया पदानि अग्रे स्थापितानि आसन् । किन्तु इदानीम् आवेशः अपगतः आसीत् । वस्तुस्थितिः मम पुरतः दृश्यते स्म । मैसूरुनगरे मम विद्यार्थिजीवनं प्रचलति स्म । अनाथालये मम भोजनं प्रचलति स्म । गृहपाठात् प्राप्तेन धनेन अन्यव्ययाः कथञ्चित् निरूढाः भवन्ति सम । 'इदानीं मम उपरि नूतनं दायित्वम् आपतितम् अस्ति । अनूढा विवाहयोग्या भगिनी मया सह अस्ति । तस्याः अग्रजः, माता, पिता, सर्वस्वं च अहम् एव । तस्याः विवाहः निर्वर्तनीयः । तावत् योगक्षेमभारः वोढव्यः । अहं तु निराधारः विद्यार्थी । डयमानस्य पक्षिणः पादयोः महान् शिलाखण्डः बद्धः आसीत् इव .....'

वस्तुस्थितिः मयि दिग्भ्रान्तिं जनयति स्म । तथापि अधीरता मम स्वभावः न आसीत् इत्यतः धैर्यच्युतः न जातः अहम् । शकुन्तलया सह गत्वा भोजनालये भोजनं कृतं मया । ततः आवां शयनं कृतवन्तौ । मातुलगृहीयात् नरकावासात् मोक्षः प्राप्तः आसीत् इत्यतः शकुन्तलायाः मनः प्रहृष्टम् आसीत् । अकस्मात् आपतितस्य भारस्य निर्वहणे मार्गम् अन्विष्यतः मम विषये विशेषचिन्तां प्राप्तवती आसीत् सा । प्रायः महिलाः सूक्ष्ममतयः भवन्ति । निद्राम् अप्राप्नुवती सा कष्टपरिस्थितेः सम्मुखीकरणविषये वार्तालापम् आरब्धवती ।

''एतत् कष्टं न महत् । सर्वं लीलया निर्वक्ष्यामि अहम् । भवती चिन्तां मा करोतु'' इति वदन् तस्यां धैर्यं पूरितवान् अहम् ।

मम शकुन्तलायाः च सहजीवनम् एव न आसीत् । सहैव न क्रीडितम् आवाभ्याम् । प्रीत्या जल्पनं वार्तालापः वा न कृतः कदापि । 'भगिनी काचित् अस्ति' इत्यंशः अपि विस्मृतप्रायः आसीत् मया । 'अहं तु भवन्तं सर्वदा स्मरामि स्म । मम सर्वस्वं भवान् एव इति सदा अहं चिन्तयामि स्म' इति उक्तवती सा । एकदिनाभ्यन्तरे एव आवयोः भ्रातृत्वं स्नेहः च प्रवृद्धः ।

'मातुलगृहवासः दैवात् समाप्तः कथञ्चित्' इति उक्त्वा सुदीर्घं निःश्वसितवती शकुन्तला ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"तं विषयं पुनः कदापि मा चिन्तयतु ।"

एतावता रात्रेः एकादशवादनम् अतीतम् आसीत् । अत्रान्तरे आवयोः आवासभूतस्य प्रकोष्ठस्य द्वारस्य ताडनशब्दः श्रुतः । "कः ?" - पृष्टवान् अहम् । "अहम्" इति उत्तरं प्राप्तम् । एषः नञ्जुण्डस्य एव स्वरः इति अभिज्ञाय सम्भ्रमेण द्वारम् उद्घाटितं मया ।

नञ्जुण्डस्य प्रवेशस्य अनन्तरं शकुन्तला कोणे उपविष्टवती । शय्यायाम् उपविशन् नञ्जुण्डः - "वेतनप्राप्त्यर्थं नगरम् आगतः आसम् । वेतनम् अद्य न प्राप्तम् । समययापनार्थं चलनचित्रमन्दिरं गतं मया । तत्र चन्नाचार्यनामकः मिलितः । सः भवन्तं जानाति । तेन उक्तं यत् सायं भवान् कयाचित् बालिकया सह धर्मशालां प्रति गच्छन् दृष्टः इति । अहं चलनचित्रदर्शनं परित्यज्य आगतः । अत्र रक्षकसेवकः प्रकोष्ठं दर्शितवान्" इति उक्तवान् ।

'भवती प्रकोष्ठे शयनं करोतु' इति भगिनीं सन्दिश्य अहं नञ्जुण्डश्च बहिः आगत्य सुप्तवन्तौ । मनसि स्थितं भारं प्रकाशयितुं मया उत्तमः अवसरः प्राप्तः आसीत् । प्रवृत्तं सर्वं नञ्जुण्डं विस्तरेण निवेदितवान् अहम् । उषसि चतुर्वादनसमये मया अल्पा तन्द्रा प्राप्ता इव ।

तावता नञ्जुण्डः 'मम तु एवं भाति' इति वदन् मम तन्द्राम् अपनीतवान् । "मैसूरुनगरं प्रति भगिन्याः नयनं सर्वथा अव्यावहारिकम् । कष्टेन सा नीयेत चेदपि अग्रे भवतः अध्ययनं कुण्ठितं भवेत् । भवता कथञ्चित् पदवी प्राप्तव्या एव । अतः सा मम गृहे वसतु । मम गृहे काऽपि बालिका नास्ति । मैसूरुनगरे वसन् भवान् भगिन्याः विवाहार्थं प्रयत्नं करोतु । अहम् अपि यथाशक्ति साहाय्यं करिष्यामि ।"

तस्य सूचना उत्तमा आसीत् । तथापि तस्य अङ्गीकारे मम सन्देहः ।

"अलं सन्देहेन । भवतः भगिनीं मम माता पुत्रीवत् द्रक्ष्यति । अतः निश्चिन्ततया मम कथनानुगुणं भवान् करोतु ।"

प्रातः पञ्चवादनं यदा जातं तदा आवाम् उत्थितवन्तौ । नञ्जुण्डः स्नानार्थं कासारसमीपं गतः । द्वारम् उद्घाट्य यदा अहं प्रकोष्ठस्य अन्तः आगतः तदा शकुन्तला उक्तवती - "भवान् तथैव करोतु । अहं रङ्गाम्बागृहे वासं करिष्यामि ।"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"कथम् एतत् ! भवती सर्वं कथं जानाति ?"

"रात्रौ मया अपि निद्रा न कृता । भवतोः सम्भाषणम् अप्रयत्नेन श्रूयते स्म । भवान् नञ्जुण्डः च आत्मीयौ सुहृदौ इति अहं जानामि स्म । अन्यच्च तस्य मातरं रङ्गाम्बाम् अहं सम्यक् स्मरामि । अस्माकं गृहस्य पार्श्वे एव खलु वसन्ति स्म ते ? अस्माकं माता रङ्गाम्बा च आत्मीये सख्यौ । रङ्गाम्बायाः मातृगृहम् अपि नागूरुग्रामे एव अस्ति । उत्तमा सा ।....."

मया किमपि न उक्तम् । मम मौनं ज्ञात्वा सा पुनरपि उक्तवती - "भवान् निश्चिन्ततया मैसूरुनगरे तिष्ठन् विद्याभ्यासं करोतु । अहं रङ्गाम्बागृहे स्थास्यामि ।" ततः निमेषद्वयानन्तरं सा क्षीणस्वरेण उक्तवती - "अग्रे किं करणीयम् इति भवान् जानाति एव ।"

एकादशवादने नञ्जुण्डेन वेतनं प्राप्तम् । तस्मात् पञ्चविंशतिं रूप्यकाणि स्वीकृत्य मया शकुन्तलायै शाटिकाद्वयं क्रीतम् । बस्यानम् आरुह्य प्रस्थिताः वयम् । यानात् अवतीर्य समीपग्रामतः भाटकशकटं प्राप्य तस्मिन् वस्तूनि आरोप्य यावत् अस्माभिः बिळिलकेरेग्रामः प्राप्तः तावता सूर्यास्तसमयः आसन्नः आसीत् ।

मातृविहीनां शकुन्तलां मातृगृहम् आगतवतीं पुत्रीम् इव ससन्तोषं स्वागतीकृतवती रङ्गाम्बा । गमनसमनन्तरम् एव तया स्नानार्थं सर्वं सज्जीकृतम् । ततः भोजनं परिविष्टम् । "मातुः प्रतिरूपम् इव एव अस्ति भवती । भवतीं दृष्ट्वा मृता भवत्याः माता जीवं प्राप्य स्थिता वा इति सन्देहः प्राप्तः मया" इति उक्तवती सा ।

"भवती मां स्मरति खलु वत्से ! तदा भवती अल्पवयस्का आसीत् । लघुवेणीका विकीर्णकेशा सञ्चरति स्म भवती । इदानीं तु उन्नता ! बालिकाः एव तथा । प्राप्ते वयसि उन्नततया वर्धन्ते ताः" इति वदन्त्या तया प्राचीनानि दिनानि स्मृतानि ।

"भवत्याः मातुः मरणानन्तरं सप्त वर्षाणि अतीतानि । तस्याः मरणकाले भवती प्रायः अष्टवर्षीया स्यात् । मातुः मुखं सम्यक् स्मर्यते खलु भवत्या ? सकृत् दर्पणं पश्यतु तावत् । तस्याः एव प्रतिरूपं भवती । यदि इदानीं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सा स्यात् तर्हि न जाने कियन्तं सन्तोषम् अनुभूतवती स्यात् इति'' इति वदन्ती अश्रूणि स्रावितवती सा । अनन्तरदिने उषसि एव शकुन्तलया तैलाभ्यञ्जनं कारितवती अपि ।

ममापि विरामः आसीत् । ''मैसूरुं गत्वा किं वा करिष्यति भवान् ? ग्रामे अत्र ममापि नीरसता । अतः विरामसमाप्तिपर्यन्तं भवान् अत्रैव वसतु'' इति सानुरोधम् उक्तवान् नञ्जुण्डः । अहम् अष्ट दिनानि सुखेन यापितवान् तत्र । ग्रीष्मकाले अपि ग्रामस्य सरोवरं जलेन पूर्णम् एव आसीत् । प्रतिदिनम् अहं तत्र तरणं करोमि स्म ।

कदाचित् रङ्गाम्बा - ''ग्रामे भवदीयं कृषिक्षेत्रं किञ्चित् अस्ति खलु ? भवान् तु अग्रे ग्रामम् आगत्य कृषिं न कुर्यात् । अतः तस्य विक्रयणं वरम् । तेन शकुन्तलायाः विवाहः विना क्लेशं निर्वर्तेत । भवतः अध्ययनस्य अपि किञ्चित् आनुकूल्यं भवेत् कदाचित्'' इति सूचितवती ।

एषः अंशः मम मनसि कदापि न स्फुरितः आसीत् । कृषिभूमेः विक्रयणं विना मार्गान्तरं किमपि न दृश्यते स्म । अविक्रीतां तां रक्षित्वा अहं किमपि साधयितुम् अपि न शक्नोमि स्म ।

''भवान् एकाकी मा गच्छतु । ग्रामस्य व्यवहाराः भवता न ज्ञायन्ते । नञ्जुण्डम् अपि आत्मना सह नयतु । भूमिः इदानीम् एव विक्रेतव्या नास्ति अपि । 'विक्रयणं करिष्यते' इति वार्तां प्रसार्य आगच्छतु इदानीम् । विवाहनिश्चयानन्तरं विक्रयणं कर्तुं शक्यते ।''

द्वित्रदिनानन्तरम् अहं नञ्जुण्डेन सह मम जन्मस्थलभूतं ग्रामं गतवान् । ततः एव मम मैसूरुं प्रति गमनम् । प्रस्थितं मां नमस्कृत्य शकुन्तला - ''भवान् मद्विषये किञ्चिदपि मा चिन्तयतु । अहम् अत्र सुखेन स्थास्यामि'' इति उक्तवती ।

ग्रामप्रमुखस्य साहाय्येन एव मदीया भूमिः विक्रेतव्या आसीत् । तस्याः भूमेः मूल्यं चतुस्सहस्ररूप्यकात्मकं स्यात् । तथापि 'भवतः पिता जीवति वा न वा इति अद्यापि न ज्ञायते । भवतः एकस्य वचनम् अवलम्ब्य कथं क्रेतुं शक्यते ?' इत्येतं व्यवहारक्लेशांशम् उत्थाप्य पादोन-द्विसहस्ररूप्यकमूल्येन तां क्रीतवान् ग्रामप्रमुखः । 'विवाहनिश्चयानन्तरम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आगत्य क्रयपत्रं सज्जीकृत्य दीयते' इति उक्तं मया । मम असहायकतायाः पूर्णः लाभः प्राप्तः आसीत् तेन ।

अनन्तरदिने मैसूरुयाने उपविष्टं माम् उक्तवान् नञ्जुण्डः - ''योग्यः वरः कोऽपि दृष्टः चेत् मां सूचयन्तु इति परिचितान् सर्वान् वदतु । मम परिचितान् अहम् अपि सूचयिष्यामि । दैवेच्छा यथा तथा भवतु । भवान् भगिनीविवाहविषये आधिक्येन चिन्तयन् अध्ययनस्य तु उपेक्षां मा करोतु ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मैसूरुनगरं प्रति आगमनस्य अनन्तरं शकुन्तलायाः विवाहस्य चिन्ता एव मां निरन्तरम् अबाधत । विवाहार्थं धनव्यवस्था तु कथञ्चित् कृता आसीत् । किन्तु वरान्वेषणं कथम् ? के प्रष्टव्याः ? विवाहप्रस्तावम् उपस्थापयितुः अपि काचित् वयोयोग्यता भवेत् । मादृशः बालकः एतं विषयम् उपस्थापयति चेत् को वा आदरं प्रकटयेत् तत्र ? केऽपि वरपक्षीयाः यदि कन्यां द्रष्टुम् इच्छेयुः तर्हि किं शकुन्तला एव वरगृहं प्रति नेतव्या, उत यत्र शकुन्तला वसति तत् स्थलं प्रति एव वरपक्षीयाः नेतव्याः ? एतदर्थं यत् धनम् आवश्यकं तत् कथं व्यवस्थापनीयम् ? कृषिभूमेः विक्रयणात् विना धनं न प्राप्यते । विवाहनिश्चयात् पूर्वम् एव भूमेः विक्रयणं मनः न अङ्गीकरोति । एवं बहुविधैः विकल्पैः मनः चिन्ताग्रस्तं भवति स्म ।

मया एषु दिनेषु सामण्णः न दृष्टः आसीत् । 'स तु बहून् जानाति । तस्य मित्रेषु एव केचन विवाहासक्ताः अपि स्युः कदाचित् । तं यदि मम कष्टं वदेयं तर्हि सः किमपि साहाय्यं कुर्यात् एव' इति विचिन्त्य अहं तदीयं गृहं गतवान् कदाचित् मध्याह्नकाले । रामण्णः गृहे न आसीत् । तदीया माता उक्तवती - ''शङ्करः आगतः अस्ति । आपणं प्रति प्रेषितः अस्ति मया । एतावता आगच्छेत् ।''

शङ्करस्य दर्शनानन्तरम् एकं वर्षम् अतीतम् आसीत् । तदभ्यन्तरे सः कदाचित् मैसूरुनगरम् आगतः सन् अपि गृहम् अपि अगत्वा, माम् अपि अदृष्ट्वा प्रतिगतः आसीत् । तदीया आगमनवार्ता तस्य पत्रात् एव अनन्तरकाले ज्ञाता आसीत् । इदानीम् अनिरीक्षिततया तस्य मेलनस्य सम्भावनां ज्ञातवतः मम मनः प्रमुदितं जातम् । अहं रामण्णस्य प्रकोष्ठस्य अन्तः गत्वा उपविष्टवान् । प्रकोष्ठे कश्चन विलक्षणः गन्धः व्याप्तः आसीत् । कोणे मूलानि, वृक्षत्वचः, शुष्कपर्णानि, कन्दाः च कण्डोले स्थापिताः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यन्ते स्म । वीणा अवगुण्ठनवती भूत्वा छदौ आन्दोलिका इव उत्तोलिता दृश्यते स्म । मुरजादीनि वाद्यानि प्रकोष्ठात् अदृश्यतां गतानि आसन् । इदानीं स च प्रकोष्ठः कस्यचित् वैद्यस्य इव भासते स्म ।

पञ्चनिमेषाभ्यन्तरे शङ्करः प्रत्यागतः । मातुः मुखात् प्रकोष्ठे मम उपस्थितिं ज्ञात्वा सः प्रकोष्ठं प्रविश्य मम हस्तौ प्रीत्या गृहीत्वा निपीडितवान् । बहूनां दिनानाम् अनन्तरं मेलनं जायमानम् अस्ति इत्यतः किं वक्तव्यम् इति मया न ज्ञातम् ।

पञ्चानां निमेषाणाम् अनन्तरं शङ्करः एव उक्तवान् - ''एषः प्रकोष्ठः दृष्टः खलु भवता ? इदानीम् अत्र नास्ति सङ्गीतासक्तः, प्रत्युतः वैद्यः अस्ति । मम अग्रजस्य स्वभावः भवता ज्ञायते एव । गृहीतम् एकम् अपि कार्यं सः पूर्णं न करोति । तेन अज्ञाता विद्या प्रायः नास्ति । किन्तु कस्याञ्चित् अपि परिणतिः नास्ति तस्य ।''

''स तु तस्य स्वभावः । स्वभावो दुरतिक्रमः ।''

आरब्धस्य कार्यस्य सर्वथा अपरित्यागः एव शङ्करस्य स्वभावः आसीत् । शङ्करः परीक्षादृष्ट्या दृष्टः मया । मुखवर्णः कृष्णतां गतः आसीत् । कण्ठसमीपे उरस्स्थानि अस्थीनि स्फुटतया दृश्यन्ते स्म । धृतस्य युतकस्य दक्षिणबाहौ छेदः दृश्यते स्म । सामान्येन सीवनयन्त्रेण यत् समीकृतं तदपि स्फुटं दृश्यते स्म । मैसूरुतः निर्गतः सः, न ज्ञायते, कति ग्रामान् प्रति पादाभ्याम् एव गतवान् इति । तस्य मुखे मन्दहासः तु यथापूर्वं विलसति स्म । नेत्रयोः तेजः पूर्वस्मात् अपि प्रखरतरं दृश्यते स्म । आत्मविश्वासः मुखे स्पष्टं दृश्यते स्म ।

''शङ्कर ! मैसूरुपरित्यागानन्तरं प्रायः वर्षात्मकः कालः अतीतः स्यात् खलु ? तस्मिन् अवधौ किं किं कृतं भवता ?''

''विशेषकार्यं किमपि न साधितम् । करणीयं कार्यम् अधीयानः अस्मि ।''

''तत् तु भवतः विनयवचनम् । वर्षात्मकः कालः कथं यापितः भवता ? केषु केषु ग्रामेषु कार्यं कृतम् ? तत् वा वदतु ।''

''मम सङ्घस्य शाखाः मैसूरुजनपदस्य दक्षिणभागे आधिक्येन न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसन् । येषु ग्रामेषु शाखाः न सन्ति तान् ग्रामान् गत्वा शाखायाः आरम्भं करोमि स्म । तत्रत्यान् युवकान् सङ्घटय्य तेषु राष्ट्रियभावनां जागरय्य जनसङ्घटनं कृतं मया । अहम् आधिक्येन विद्यार्थिभिः मिलामि स्म । क्रीडादिषु व्यवहारेषु तैः सह सम्मिलन् तेषां हृदयं जयामि स्म । अग्रजः इव प्रेम्णा व्यवहरन् मार्गदर्शनं करोमि स्म । भारतीये इतिहासे नक्षत्राणि इव विराजमानानां राष्ट्रवीराणां कथाः तेषां पुरतः उपवर्णयामि स्म । राणाप्रतापः, गुरुगोविन्दसिंहः, शिवाजी, विद्यारण्यः, विवेकानन्दः इत्यादीनां जीवनचित्राणि वर्धमानानां तरुणानां मनस्सु उल्लिखामि स्म ।''

''आदौ क्रीडादीनां द्वारा बालान् तरुणान् च आकृष्य सायङ्काले तान् मेलयामि स्म । गच्छता कालेन तेषां मनस्सु हिन्दुधर्मस्य विषये श्रद्धा, ऐक्यभावः च यथा उत्पद्येत तथा करोमि स्म । वर्षात्मके काले मया अष्टसु ग्रामेषु सङ्घकार्यं प्रबलीकृतम् अस्ति । मया आरब्धासु शाखासु प्रतिदिनं त्रिशताधिकाः तरुणाः सम्मिलन्ति । केषुचित् ग्रामेषु ज्येष्ठाः प्रमुखत्वं निर्वहन्ति । विद्यावन्तः केचन सङ्घस्य नियम-अनुशासन-तत्त्वादीनां विषये विशेषशिक्षणं प्राप्तवन्तः सन्ति । इदानीं मम उपस्थितिं विना अपि ताः शाखाः स्वयम् अनुवर्तमानाः भवितुम् अर्हन्ति ।''

अहम् उक्तवान् - ''भवता उक्तेन प्रमाणेन यदि सङ्घकार्यं वर्धेत, यदि च भवदुक्तक्रमेण हिन्दुसमाजस्य सङ्घटनं प्रवर्तेत, तर्हि अचिरात् एव अस्माकं समाजः पूर्णतया नवचैतन्यं प्राप्नुयात् ।''

''आम् । तत् तु 'तथा प्रवर्तते चेत्' एव । औदासीन्यं, जडता, स्वार्थभावना इत्यादयः विषमयशक्तयः समाजभवनम् एव कम्पयन्त्यः सन्ति । समाजे स्वाभिमानस्य जागरणम्, ऐक्यभावनायाः उत्पादनं वा न सुलभसाध्यम् । एतत्कार्यार्थम् लक्षशः जनाः यदि स्वजीवितसमर्पणं कुर्युः तर्हि एव एतत् सिद्ध्येत् । अतः तादृशानां जनानां निर्माणम् आदौ स्यात् । तदनन्तरम् एव परिवर्तनसम्भावनायाः चिन्तनम् ! एतत् कार्यं कदा सफलतां यास्यति इति तु भगवान् एव जानाति !'' इति वदन् छदिस्थां वीणां पश्यन् दीर्घं निःश्वसितवान् शङ्करः ।

''किमर्थं शङ्कर ! भवतः वचने अपि एतादृशी निराशा ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''निराशया एतत् वदन् नास्मि अहम् । यदा अहं विद्यार्थी आसं तदा हिन्दुसमाजस्य सङ्घटनकार्यं दिवास्वप्नचित्रम् इव आसीत् । तस्मिन् सुन्दरे चित्रे अहम् ऊहामात्रेण अल्पकालेन अल्पश्रमेण अपेक्षितं परिष्कारं लीलया करोमि स्म । असाध्यं सर्वम् अपि तत्र साधयामि स्म । इदानीम् अनुभवं प्राप्तवान् अस्मि । मम मार्गः कण्टकशिलाखण्डादिभिः आकीर्णः इति अवगतम् अस्ति मया । प्रतिक्षणं प्रतिपदम् अस्माकम् उत्साहं कुण्ठयितुं विरोधिशक्तयः अवकाशं प्रतीक्षमाणाः तिष्ठन्ति ।''

''पूर्वम् अहं मैसूरुतः गतः खलु ? इतः गतः अहम् एकं ग्रामं गतवान् । षट्सहस्राधिकाः जनाः वसन्ति तत्र । एका प्रौढशाला अपि तत्र अस्ति । बन्धुः परिचितः वा तत्र कोऽपि न आसीत् । मम हस्ते धनम् अपि न आसीत् ।.....''

''किं भवतः सङ्घः व्ययार्थं धनं न ददाति ?''

''धनं दत्त्वा प्रचारकान् प्रेषयितुं समर्था राजकीयसंस्था न अस्माकम् । ग्रामस्य सीमाभागे स्थिते देवालये मया वासः कृतः । देवस्थानस्य पृष्ठतः स्थितं क्रीडाङ्गणं प्रति बालाः क्रीडितुम् आगच्छन्ति स्म । अहं तेषां परिचयं प्राप्तवान् । तत्त्वं किमपि अबोधयन् काश्चन नूतनक्रीडाः तान् बोधितवान् । द्वित्रेषु दिनेषु तेषां बालानां मैत्री सम्पादिता मया । चतुर्थे दिने ते एव विषयान् पृष्टवन्तः । ते यथा अवगच्छेयुः तथा राष्ट्रविचारं मम आगमनोद्देशं च अहं निरूपितवान् । तेषु चतुर्षु अपि दिनेषु अहं पञ्चाणकमूल्यकम् अन्नं दिने एकवारम् एव खादन् कालं यापयामि स्म । पञ्चमे दिने क्रीडाङ्गणं प्रति कोऽपि बालकः न आगतः एव । अहं प्रतीक्षमाणः उपविष्टवान् आसम् । रात्रौ ग्रामदेवस्थाने पूजा अस्ति इति मां कश्चित् अवदत् । अहं तत् देवस्थानं गतवान् ।

ग्रामजनाः विविधान् दोषान् मयि आरोपितवन्तः । 'अन्यग्रामतः आगत्य अस्माकं बालान् नाशयन् अस्ति अयम्' इति अवदत् कश्चित् । 'अलसः व्यर्थकालयापी दुष्टः' इति अपरः उक्तवान् । एकैकः अपि विभिन्नप्रकारेण माम् अनिन्दत् । सङ्घटनकार्यार्थं गतस्य स्वागतीकरणक्रमः अयम् ! प्रतिवचनं वक्तुम् अपि तत्र मया अवकाशः न प्राप्तः । ग्रामसभायाः अध्यक्षः 'अयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुष्टः अस्मद्ग्रामं कथम् आगतः ?' इति अपृच्छत् । नीराजनानन्तरं प्रसादम् अपि अस्वीकृत्य अहं सीमास्थं देवस्थानं प्रति गतवान् । तत्र पश्यामि - मम वस्त्राणि न दृश्यन्ते ! मम वस्त्राणि बहूनि न आसन् । एका वेष्टी, एकं युतकम्, एकं स्नानवस्त्रम्, एकम् आच्छादकं च आसीत् मम । तानि अपि अदृश्यतां गतानि आसन् । शिलाफलके एव शयनं कृतं मया । रात्रौ निद्रा न प्राप्ता । मम उत्साहः शुष्कः जातः आसीत् । गृहं, मातापितरौ, मित्राणि, विद्यालयः च मया स्मृताः । प्रथमश्रेणीं प्राप्तवान् अहं स्नातकोत्तरकक्ष्याम् अपि उत्तीर्य उत्तमवेतनदायकस्य उद्योगस्य अन्वेषणं यदि अकरिष्यं तर्हि प्रायः मातापितरौ सन्तोषितवान् स्याम् ! मया अपि सुखं प्राप्तं स्यात् । राष्ट्रसेवा, समाजसङ्घटनम् इत्यादीनि मनसि स्थापयित्वा आगतेन मया एतस्मिन् ग्रामे कीदृशं पारितोषिकं प्राप्तम् ! निराशाक्षणाः मां धैर्यच्युतं कर्तुम् अवकाशं प्रतीक्षमाणाः आसन् ।''

''भवता किं वा कृतम् ?''

''न मया प्रतिगतम् । अनन्तरदिने प्रातः कासारे स्नात्वा देवं नमस्कृत्य अहं ग्रामसभाध्यक्षस्य गृहं गतवान् । 'अयं दुष्टः अस्मद्ग्रामं कथम् आगतः ?' इति पृष्टवान् अध्यक्षः गृहे एव आसीत् । उपस्थितस्य मम दर्शनात् सः दिग्भ्रान्तः जातः । स्वपरिचयम् उक्त्वा अहम् 'कार्यरहितः अलसः निरुद्योगी वा न अहम् । स्वेच्छाचारी निर्गतिकः वापि न अहम् । स्नातकप्रतिष्ठापरीक्षायाम् उत्तीर्णता प्राप्ता अस्ति मया । प्रथमश्रेणी सुवर्णपदकद्वयं चापि प्राप्तम् अस्ति । यदि उद्योगार्थं प्रयत्नं कुर्यां तर्हि भवद्ग्रामस्य प्रौढशालायाः मुख्याध्यापकः भवेयम् । मम आगमनस्य उद्देशः अन्यः एव अस्ति' इति उक्त्वा मम आगमनस्य उद्देशं विशदीकृतवान् । राष्ट्रियसमस्यां विवृत्य राष्ट्रियदृष्ट्या सा कथं द्रष्टव्या इति विवृतवान् । तस्मिन् विश्वासम् उत्पादयितुं कांश्चन वेदमन्त्रान् उक्तवान् ।''

''अध्यक्षः समाहितः किम् ?''

''अंशतः समाहितः । तस्य केचन सन्देहाः अपगताः । 'एतत्सर्वम् अहं किं जानामि ? सङ्घजनाः नाम दुष्टाः । तेषां सहवासेन भवतां पुत्राः नष्टाः भविष्यन्ति । अमेरिकीयाः अण्वस्त्रं पातयित्वा अस्मद्देशम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपहरिष्यन्ति । सर्वकारीयाः भवत्पुत्रान् भवतः सर्वान् च कारागारे स्थापयित्वा कठोरं दण्डयिष्यन्ति इति अस्मद्ग्रामस्य कांग्रेस्कार्यदर्शी उक्तवान् । तदर्थं वयं तथा व्यवहृतवन्तः । आस्तां तावत्, तद्विषये अधिकं खेदं मा करोतु कृपया' इति अध्यक्षः अवदत् । चोरितानि मम वस्त्राणि अपि प्राप्तानि । प्रौढशालीयाः आर्.एस्.डि.बालकाः एव तानि चोरितवन्तः आसन् इति अनन्तरकाले ज्ञातम् । अध्यक्षस्य पुत्रः, तस्य षट् सुहृदः च क्रीडाङ्गणम् आगताः । इदानीं तत्र शाखा उत्तमरीत्या प्रचलति । ज्येष्ठाः अपि शाखाकार्येषु आसक्तिं प्रदर्शयन्तः दृश्यन्ते ।''

''भवान् तत्र भोजनादिनिमित्तं किं करोति ?''

''मया तदा एव उक्तं खलु - उपाहारमन्दिरं गत्वा भोजनं करोतु इति वक्तुम् अर्हा धनवती संस्था अस्माकं न इति ? अस्माकं तु सेवकसङ्घः । यदि शाखाकार्यं कस्मिंश्चित् ग्रामे दृढं भवति तर्हि मादृशैः शताधिकैः अपि स्वयंसेवकैः भोजनार्थं चिन्ता करणीया न भवति । 'अतिथिदेवो भव' इति बोधयति अस्माकं धर्मः । अतिथये अदत्त्वा कोऽपि अत्र न भुङ्क्ते । मध्याह्नकालः प्राप्तः चेत्, भवान् जानाति वा, कियन्तः जनाः 'मम गृहम् आगच्छतु', 'मम गृहं गच्छाम' इति सानुरोधं वदन्ति इति ? यत्र गच्छामः तत्र सर्वत्र प्रेम्णा भोजनं परिवेषयन्त्यः मातरः भगिन्यः च भवन्ति । कदाचित् भोजनं न प्राप्येत चेदपि कार्यकर्त्रा तद्विषये विशेषचिन्ता करणीया नास्ति ।.....''

अनिरीक्षिततया शङ्करस्य मेलनात् मम विशेषसन्तोषः जातः आसीत् । जीवनसमस्यासम्मुखीकरणप्रसङ्गे ज्येष्ठाः स्मर्तव्याः इति श्रूयते । शङ्करः तु मत्तः अपि शतगुणितं श्रेष्ठः इत्यत्र नास्त्येव विप्रतिपत्तिः । तस्य मम च बहुषु विषयेषु अभिप्रायभेदः अस्ति । सङ्घस्य कानिचन तत्त्वानि अहं न अङ्गीकरोमि । कदाचित् शङ्करः एव उक्तवान् आसीत् - ''लोके तादृशी संस्था नास्ति, या सर्वेषाम् अपि कल्पनायाः अनुगुणा भवेत् । अहं यस्य सङ्घस्य निमित्तं कार्यं करोमि तस्यापि सर्वे अंशाः मम सम्मताः न । तथापि तत्र कार्यं करोमि । अभिप्रायभेदकारणतः तूष्णीं स्थितिः न शोभते । यदि शक्यते तर्हि संस्थायां परिवर्तनम् आनेतव्यम् । अथवा संस्था एव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्मान् यथा परिष्कुर्यात् तथा अवकाशः कल्पनीयः । अस्माकं कृते तु अविरतक्रिया आवश्यकी । तात्त्विकभिन्नाभिप्रायम् एव प्रमुखीकृत्य व्यर्थचर्चया कालहरणम् अनुचितम् ।''

क्रियाशीलताविषये शङ्करस्य व्यक्तित्वे अदम्या शक्तिः दृश्यते स्म । तदीयं वैयक्तिकम् अस्तित्वम् एव नास्ति इति भाति स्म । महत् कष्टम् आपततु, कठोराः अनुभवाः वा प्राप्ताः भवन्तु, स तु धैर्येण अग्रे सरति स्म एव । तस्य एषा क्रियाशक्तिः मह्यं नितरां रोचते स्म । मया सम्मुखीक्रियमाणा भगिनीविवाहसमस्या तस्य पुरतः वक्तव्या इति सकृत् अभासत । पुनः चिन्तनम् आगतम् - 'विशाले क्षेत्रे कार्यं कुर्वतः शङ्करस्य पुरतः एतस्याः समस्यायाः निवेदनं, तस्य साहाय्यस्य प्राप्तिः वा न उचितम् । एतत् कार्यं मया एव निर्वोढव्यम्' इति । तस्य मेलनात् मयि उत्साहः उत्पन्नः आसीत् ।

''इतोऽपि कति दिनानि भवान् तत्र स्थास्यति ?'' - मया सहजेन कुतूहलेन पृष्टम् ।

''इदानीं मया यत्र यत्र सङ्घशाखाः आरब्धाः तत्र सर्वत्र ताः स्वशक्त्या एव अनुवर्तमानाः सन्ति । शिवमोग्गाजनपदस्य समग्रस्य कार्यं मया निर्वोढव्यम् इति कर्णाटकस्य कार्यकर्तारः अपेक्षितवन्तः सन्ति । अतः अद्य सायङ्कालीन-यानेन शिवमोग्गानगरं गच्छन् अस्मि । इदानीं कः समयः ? पञ्चवादनम् अतीतं स्यात् खलु ?''

एतावता रामण्णस्य ध्वनिः श्रुतः । रामण्णः प्रकोष्ठं प्रविष्टवान् । तस्य हस्ते वस्त्रस्य कश्चन बन्धः आसीत् । अपरहस्ते कश्चन घटः अपि आसीत् । वस्त्रबन्धं शङ्कराय दत्तवान् सः । औषधमूलानां क्वथनार्थं घटः आनीतः स्यात् इति मया चिन्तितम् । ''शङ्कर ! विलम्बः जायमानः अस्ति । भवान् सिद्धः भवतु'' इति सः अवदत् ।

शङ्करः वस्त्रबन्धं स्वस्यूते स्थापितवान् । कुत्रापि गतः तदीयः पिता तावता आगतः । शङ्करः मातापितरौ नमस्कृतवान् । देवस्य समीपे स्थापितं तिलकं शङ्करस्य ललाटे स्थापितवन्तौ मातापितरौ । अग्रजम् अपि नमस्कृत्य शङ्करः ततः प्रस्थितवान् ।

पाकशालातः एकं खाद्यबन्धम् आनीय तस्य स्यूते स्थापयन्ती माता -

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''शिवमोग्गाप्रदेशः अरण्यमयः इति श्रूयते । व्याघ्रादयः क्रूरजन्तवः तत्र वसन्ति इत्यपि श्रूयते । सर्पबाधा अपि अधिका इति श्रुतम् । अतः अप्रमत्तः भवतु भवान्'' इति उक्तवती ।

''अस्तु अम्ब !'' इति वदन् शङ्करः गृहात् बहिः पदं स्थापितवान् । अहम् अपि तेन सह प्रस्थितः । रामण्णः आवाम् अनुसृतवान् ।

यानप्रस्थानस्य अर्धघण्टातः पूर्वम् एव वयं त्रयः रेल्वेस्थानकं प्राप्तवन्तः आस्म । स्थानके स्वयंसेवकानां समूहः एव उपस्थितः आसीत् । शङ्करः तेषां सर्वेषां सहचरः । यदा सः याने उपविष्टवान् तदा अहं तं पृष्टवान् - ''पुनः मैसूरुनगरं प्रति आगमनं कदा भवेत् ?''

''तत् तु अहम् एव न जानामि । एवम् एव आगमनं भवेत् कदाचित् ।''

यानप्रस्थानात् पूर्वं शङ्करः - ''अध्ययनप्रवृत्तिं मा परित्यजतु । पाठ्यपुस्तकानां पठनेन सहैव भारतीयसंस्कृत्यादीनां विषये अपि गभीराध्ययनं प्रचलतु । विश्वविद्यालयस्य ग्रन्थालयस्य पूर्णप्रयोजनं भवान् प्राप्नोतु । किन्तु अग्रे, बहून् विषयान् शिरसि वहन् निष्प्रयोजकतया गृहमात्रे तिष्ठन् शुष्कवेदान्ती तु मा भवतु । अस्माकं धर्मः सुरक्षितं यथा तिष्ठेत् तथा कर्तुं भवदीयम् एव मार्गम् अनुसरतु । तदर्थम् इदानीं न सुसमयः । सद्यः तु पठने एव मतिः भवतु'' इति उक्तवान् ।

यदा यानस्य प्रस्थानम् आरब्धं तदा सः हसन् - 'नमस्ते' इति उक्तवान् ।

रेल्वेस्थानकात् प्रत्यागमनसमये रामण्णेन सह अनेके सुहृदः आसन् इत्यतः अहं रामण्णस्य पुरतः कमपि विषयं न उपस्थापितवान् ।

* * *

एतदनन्तरं द्वित्रेषु दिनेषु महाविद्यालयः आरब्धः । प्रथमदिने कोऽपि पाठः न प्रचलति इति जानन् अहं विद्यालयं न गतवान् एव । अनन्तरदिने शुल्कदानार्थम् अहं यदा गतः तदा सेवकः कश्चन मत्समीपम् आगत्य - ''सत्यनारायणनामकः भवान् एव खलु ? देवप्रसादवर्यः भवन्तम् आह्वयति । सः अध्यापकप्रकोष्ठे अस्ति'' इति अवदत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मां दृष्ट्वा उत्थाय बहिः आगतः देवप्रसादवर्यः - ''पक्षं यावत् भवान् किमर्थं गृहं न आगतः ?'' इति पृष्टवान् ।

''नगरे न आसम् । पञ्चषेभ्यः दिनेभ्यः पूर्वम् एव अत्र आगतं मया ।''

''आगमनानन्तरम् अपि किमर्थं गृहं प्रति न आगतम् ?''

''कस्यापि पुस्तकस्य पठने व्यग्रः आसम् ।''

''किं तत् पुस्तकम् ? 'पश्चिमदेशेषु क्रैस्तमतस्य अधःपतनम्' इत्येतत् ?''

''तन्नामकं पुस्तकं किञ्चित् अस्ति ? अस्ति चेत् ददातु कृपया । मया पठनीयं तत् ।''

''विनोदार्थम् उक्तं मया । आस्तां तावत्, गृहं गच्छाम ।''

द्विचक्रिकां नुदन् सः प्रस्थितवान् । अहं तम् अनुसृतवान् । किञ्चिद्दूरं गमनानन्तरं सः धूमपानस्य आरम्भं कुर्वन् पृष्टवान् - ''गृहं प्रति अनागमनस्य कारणं किम् ?'' इति ।

''उक्तं खलु - नगरे न आसम् इति ।''

''तत् वास्तविकं कारणं न स्यात् । मम भगिन्याः कारणतः भवान् खिन्नः तु न स्यात् खलु ? तस्याः विषयं राची उक्तवती स्यात् । भवान् कुपितः स्यात् इति भीता अस्ति सा । भवत्तः नितरां भीता भवति सा । बाल्ये भवान् कदाचित् तां ताडितवान् अपि आसीत् इति श्रूयते !''

''आम् । भाविनि काले सा गुरुपत्नी भवेत् इति अहं न जानामि स्म ।''

''ज्ञातं चेत् अपि भवान् तु तूष्णीं न अस्थास्यत् । समयम् अन्विष्य किमपि कुर्यात् एव ।''

आवयोः गृहप्राप्तिसमये राचम्मा किमपि पुस्तकं पठन्ती उपविष्टवती आसीत् । मां दृष्ट्वा उत्थाय - ''किं नगरे एव अस्ति भवान् ?'' इति पृष्टवती ।

''अथ किम् ?'' इति वदन् अहम् आसन्दे उपविष्टवान् ।

'पितुः गृहं गत्वा आगमिष्यामि' इति उक्त्वा देवप्रसादः ततः निर्गतवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राचम्मा पुनः पृष्टवती - ''लिल्लीविषये भवान् खिन्नः इति भाति मम । अतः एव भवान् मम गृहं न आगतवान् । एवं ननु ?'' इति ।

अहं मैसूरुनगरे मम अनुपस्थितिं निवेद्य भगिनीवृत्तान्तं साद्यन्तं निवेदितवान् । एतेन राचम्मायाः एका चिन्ता अपगता । मम उपरि नूतनं दायित्वम् आपतितम् इत्यतः सा अपरां चिन्तां प्राप्तवती । मां सान्त्वयन्ती सा उक्तवती - ''तद्विषये अधिकतया मा चिन्तयतु । देवः दयालुः । सर्वं सिद्धं भविष्यति'' इति ।

विविधैः प्रश्नैः सा मम अनुजायाः विषयं ज्ञातवती । तस्याः नाम-वर्ण-मुखलक्षण-औन्नत्यादिकं विस्तरेण पृष्टवती सा । तावता देवप्रसादः प्रत्यागतः । तेन सह लिल्ली अपि आसीत् । पूर्णतः पाश्चात्यवेषं धृतवती आसीत् सा । नूतनतया कर्तितान् केशान् बहिर्मुखाग्रान् कर्तुं वलयेन बद्धवती आसीत् । चतुरङ्गुलोन्नतेन प्रपदेन युक्तां पादरक्षां धृत्वा खञ्जताम् अनुभवन्ती इव चलति स्म । शरीरवर्णस्य वेषस्य च किञ्चिदपि साम्यं न दृश्यते स्म । सर्कस्मध्ये जनानां तोषणार्थं स्थितः विदूषकः इव सा दृश्यते स्म । तां दृष्ट्वा हासं निरोद्धुम् अशक्नुवन् अहं हसितवान् । राचम्मा हासकारणं ज्ञातवती ।

लिल्ली अस्माकं पुरतः आसन्दे उपविष्टवती । राचम्मा काफी-आनयनार्थम् उत्थाय पाकशालां गतवती । देवप्रसादः तस्याः आसन्दे उपविशन् माम् उद्दिश्य - ''भवान् तर्कनिपुणः इति श्रूयते । महाविद्यालयम् अगतवत्याः मम पत्न्याः पुरतः भवतः तर्कपाण्डित्यप्रदर्शनं प्रचलति इत्यपि श्रूयते । मम भगिनी कांश्चन प्रश्नान् प्रष्टुम् इच्छति । किं भवान् उत्तरं दद्यात् ?'' इति पृष्टवान् आंग्लभाषया ।

''राचम्मायाः पुरतः एव पाण्डित्यप्रदर्शने मम सामर्थ्यम् । महाविद्यालये पठतां प्रश्नानाम् उत्तरं वक्तुं मम सामर्थ्यम् अस्ति वा न वा इति तु न ज्ञायते ।''

''मया प्रष्टव्याः प्रश्नाः के सन्ति ? न सन्ति एव'' इति वदन्ती लिल्ली मौग्ध्यं प्रकटयितुं प्रयत्नं कृतवती ।

''अये लीले, क्षम्यताम्, अये लिल्लि ! सत्यं वदतु भवती । पितुः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दर्शनार्थं गृहम् आगतः अहं प्रसङ्गवशात् एतस्य उपस्थितिं निवेदितवान् । तत् श्रुत्वा एव भवती मया अनिमन्त्र्यमाणा अपि माम् अनुसृतवती खलु ? 'पुनः यदा सः लभ्यते तदा चर्चां कृत्वा तदीयान् अभिप्रायान् खण्डयित्वा सः एव क्षमां यथा याचेत तथा करिष्यामि' इति चतुर्भ्यः दिनेभ्यः पूर्वं भवती एव खलु माम् उक्तवती आसीत् ?''

''मया तथा किमपि न उक्तम् एव । गृहे मम कार्यम् अस्ति । गुड् बै मिस्टर् !'' इति उक्त्वा गन्तुम् उद्यतां तां हस्ते गृहीत्वा आकृष्य उपवेशितवान् देवप्रसादः ।

अत्रान्तरे राचम्मा काफीम् आनीतवती । ते त्रयः तत् पीतवन्तः । यथापूर्वं मन्निमित्तं फलानि आगतानि । काफीं पीत्वा धूमपानम् आरब्धवान् देवप्रसादः मध्याह्ननिद्रार्थं प्रकोष्ठं गतवान् ।

गमनसमये - ''यदि आवां स्याव तर्हि कलहः उत्पद्येत । अतः आवां गच्छावः'' इति वदन् राचम्मां सूचितवान् - 'आगच्छतु' इति ।

बहिः स्वागतप्रकोष्ठे आवाम् उभावेव अवशिष्टौ । द्वित्रनिमेषानन्तरं लिल्ली पृष्टवती आंग्लभाषया - ''यदि भवतः क्लेशः न स्यात् तर्हि अहं किञ्चित् प्रष्टुम् इच्छामि ।''

''पृच्छतु तावत् ।''

''भवान् हिन्दुः । किमर्थं भवान् अस्मन्मतीयानां गृहे भोजनं पानीयसेवनं वा न करोति ? मम भ्रातृजायायाः भवतः च महती मैत्री अस्ति । इदानीं वयं त्रयः पानीयं पीतवन्तः । भवान् तु तत् न पीतवान् । आत्मीयः अपि भवान् अत्र पानीयं न पिबति इत्यतः किं मम भ्रातृजायायाः खेदः न भवेत् ?''

''न स्यात् इत्येव भाति मम । अतः एव मह्यं फलं दत्त्वा हसन्ती एव पानीयं सेवितवती सा । वस्तुतः अपि तस्याः मनसि खेदः अस्ति वा न वा इति ज्ञातुं ताम् एव पृच्छतु भवती ।''

''अस्तु नाम, तस्याः खेदः नास्ति इत्येव परिभावयाम । तथापि भवान् भेदभावम् आचरति इति तु सिद्धम् । यत्र सर्वसमभावः उपेक्ष्यते, स्पृश्यास्पृश्यभावः प्रोत्साह्यते तस्य धर्मस्य प्रभावतः भवान् एवं व्यवहरति । किम् एतत् न्याय्यम् ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''सनातनहिन्दुधर्मस्य अवगमनावसरे अन्यैः कृतस्य आहारस्य सेवनम् असेवनं वा प्रामुख्येन मा पश्यतु भवती । साम्प्रदायिकेषु हिन्दुकुटुम्बेषु पुत्रैः कृतम् एव माता न खादति । स्वयंपाकनियमस्य विस्तृतं रूपम् एव स्यात् एतत् । आहारसेवनादीनां विषये हिन्दुधर्मे नितरां गौणता परिकल्प्यते । परमतसहिष्णुता, अहिंसा, औदार्यम् इत्यादीनि तत्त्वानि यत्र मान्यानि स्युः तत्र कथं वा उच्चनीचभावस्य प्रोत्साहः स्यात् ? हिन्दुधर्मदृष्ट्या न कोऽपि नीचः अस्ति लोके । उपाहारमन्दिरयुगीयेन मानदण्डेन प्राचीनपरम्परायाः मौल्यमापनं मा करोतु भवती ।''

आलम्ब्य उपविष्टवती लिल्ली झटिति ऋजूभूय उपविशन्ती - ''वयम् इदानीम् उपाहारमन्दिरयुगे एव निवसन्तः स्मः इति न विस्मर्तव्यं भवता । कालानुगुणं धर्मस्य अपि परिवर्तनं भवेत् । प्राचीनतायाः आलिङ्गनम् एव हिन्दुधर्मस्य रक्तगतः स्वभावः । अतः एव सः धर्मः अप्रगतः अस्ति ।''

''न कोऽपि धर्मः प्राचीनतायाः परम्परायाः वा सम्बन्धं पूर्णतया च्छेत्तुं शक्नोति । कालानुगुणं धर्मः अपि यदि परिवर्तनं प्राप्नुयात् तर्हि कालमहिमा एव विजृम्भेत । यत्र प्रतिदिनम् अपि परिवर्तनं भवति तत्र किं वा अवशिष्येत ? कालानुगुणं मूलतत्त्वानुसारेण विविधाः आचाराः विविधैः ऋषिभिः अत्र उक्ताः एव । एषः स्वभावः यदि अत्र न स्यात् तर्हि अयं धर्मः पञ्चषसहस्राधिकवर्षेभ्यः अनुवर्तमानः न भवेत् । वस्तुतः तु प्राचीनतायाम् अन्धश्रद्धा हिन्दुधर्मे यावत् अस्ति ततोऽपि अधिका अस्ति क्रैस्तमते ।''

''कथं तत् ?''

''आधुनिकविज्ञानस्य उत्पत्तेः अनन्तरं स्थितः सहस्रवर्षात्मकः कालः वैचारिकदृष्ट्या अन्धकारयुगत्वेन मन्यते युरोपीयेतिहासे । तस्य युगस्य शिखां गृहीतवन्तः आसन् क्रैस्तमतीयमुख्याधिकारिणः । सत्यशोधनं कृतवते गेलिलियोवर्याय या हिंसा क्रैस्तमन्दिरेण दत्ता सा किम् अल्पा ? विकासवादं प्रतिपादितवतः डार्विनस्य तदनुयायिनां च विषये रोषशिलारसवर्षणम् एव कृतं क्रैस्तमन्दिरेण । क्रैस्तमतस्य दृढमुष्टितः मोक्षस्य प्राप्तेः अनन्तरम् एव पश्चिमदेशे आधुनिकविज्ञानस्य विकासः जातः । बैबलोक्ताम् अन्धश्रद्धां, क्रैस्तमतदुराचारं च विरुध्य एव खलु इङ्गरसोल-थामस्पेयिन्-प्रभृतयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वकीयां लेखनीं निर्दाक्षिण्यं प्रवर्तितवन्तः ? यस्मिन् काले जीवशास्त्रक्षेत्रे विशेषप्रगतिः दृश्यते तस्मिन् अपि विज्ञानकाले कुमारीगर्भतः येसुक्रिस्तस्य जननं जातम् इत्यत्र भवन्तः कथं विश्वसन्ति ? यदि शुद्धज्ञानदृष्ट्या दृश्येत तर्हि अन्धविश्वासाः बैबल्ग्रन्थे अपि असङ्ख्याः दृश्यन्ते ।''

लिल्ली क्षणकालं मौनेन स्थितवती । मम वचनस्य विरोधं न कृतवती सा । द्वित्रनिमेषानन्तरं सा - ''तथापि हिन्दुषु यावन्तः भेदभावाः सन्ति तावन्तः अन्यत्र न सन्ति । कियत्यः जातयः, कियन्ति मतानि, कियन्तः मार्गाः, कियन्तः गणाः च तत्र ! अस्माकं समाजे तु न तथा । देवपुत्राः वयं सर्वे समानाः । न कोऽपि भेदभावः अत्र !'' इति उक्तवती ।

''क्रैस्तमतीयाः भवन्तः एव देवपुत्राः । क्रैस्तेतरमतीयानां का वा गतिः ? ते अपि देवपुत्राः इति न परिगणयन्ति भवन्तः । 'मुक्तिं प्राप्तुं मम यथा तथैव प्रोटेस्टण्टस्यापि अधिकारः अस्ति' इति क्याथोलिकः न भावयति । 'येन केनचित् अपि मार्गेण आगताः सर्वे अन्ते एकम् एव लक्ष्यं प्राप्नुवन्ति' इत्येतस्मिन् तत्त्वे विश्वसन् हिन्दुधर्मः परधर्माणां सत्त्वम् अपि अवगच्छति । 'देवपुत्रस्य येसुक्रिस्तस्य द्वारा एव सद्गतिः प्राप्यते, नान्यथा' इति विश्वासः भवताम् । वर्णः अस्माकं धर्मस्य अङ्गत्वेन अस्ति । किन्तु ऐरोप्यदेशे सः द्वेषस्य मूलम् । कृष्णश्वेतभेदम् राजकीयक्षेत्रं प्रति आकृष्य श्वेतजनैः यथा अमानुषतया व्यवहृतं तथा प्रपञ्चे अन्यैः कैश्चित् अपि न अनुष्ठितम् । किम् एवं कृतवन्तः क्रैस्तजनाः न ?''

मयि कथनस्फूर्तिः उद्गता आसीत् । लिल्ली मम वचनम् आसक्त्या शृण्वती आसीत् । अहं कथनम् अनुवर्तितवान् - ''श्वेतवर्णीयः धर्मगुरुः कृष्णवर्णीयस्य क्रैस्तस्य गृहे किमर्थं विवाहं न अङ्गीकरोति ? लार्ड्पदवाच्य-सामान्ययोः, धनिक-निर्धनयोः, उद्यमपति-कर्मकरयोः च मध्ये महान् भेदः किं पाश्चात्यदेशे नास्ति ? समाजस्य विभिन्नवर्गाणां मध्ये निरन्तरयुद्धं, रक्तपातः च तत्र अनुस्यूततया प्रचलति अद्यापि । एतत् ये कुर्वन्ति ते सर्वे क्रिस्तमतीयाः एव । हिन्दुसमाजे धर्मस्य आधारेण या वर्णाश्रमव्यवस्था कृता सा समाजव्यवस्थायां व्यक्त्या अनुसरणीयानां कर्तव्यानां विभागमात्रं सूचयति स्म । हिन्दुसमाजे वर्णसङ्घर्षः यूरोपदेशेषु यथा प्रवृत्तः तथा कदापि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न प्रवृत्तः । अत्र तु काचित् सुव्यवस्थिता रचना आसीत् ।''

मम आवेशः किञ्चिदिव उपशान्तः । गतकालस्य सुन्दरं चित्रं वर्तमानकालस्य अवगमनात् मलिनीकृतम् इव अदृश्यत ।

''सत्यम्, इदानीं कालः परिवृत्तः अस्ति । प्राचीनकालस्य परिस्थितेः अनुगुणम् आसन् ताः व्यवस्थाः रचनाः च । अद्यतनस्य उद्यमप्रधानयुगस्य अनुगुणं तत्रापि परिवर्तनानि भवेयुः इति तु अङ्गीकरणीयम् एव । तत् तु तत्क्षेत्रीयैः शान्ततया सुविचिन्त्य करणीयं कार्यम् ।''

लिल्ली चिन्तनमग्ना इव परिदृश्यते स्म । दश निमेषान् यावत् तत्र मौनम् एव प्रसृतम् आसीत् । अत्रान्तरे राचम्मा बहिः आगतवती । ततः देवप्रसादः अपि बहिः आगत्य - ''किम् एतत् ! वृष्टेः अनन्तरम् इव स्तब्धता ! समाप्ता वा भवतोः चर्चा ?'' इति अपृच्छत् ।

''किं भवान् अपि तत्र भागं ग्रहीतुम् इच्छति ?'' - अहं हसन् पृष्टवान् ।

''नमो भवतां धर्म-मत-चर्चायै । भवतां धार्मिकी चर्चा मह्यं न आवश्यकी । कस्मिंश्चित् अपि धर्मे मम श्रद्धा नास्ति । मम धर्मः तु अन्यः एव । एतादृशेषु विषयेषु अहं सर्वथा अनासक्तः । लिल्लि ! किमर्थं मौनम् आस्थितम् ?''

लिल्ली अग्रजाय प्रत्युत्तरं किमपि न दत्तवती । सा माम् उद्दिश्य - ''पाश्चात्यलेखकैः द्वित्रैः क्रैस्तमतविरोधेन लेखनी प्रवर्तिता इति भवता उक्तं खलु ? तैः लिखितानां ग्रन्थानां नामादिकं किं भवान् सूचयितुं शक्नुयात् ?'' इति पृष्टवती ।

''अवश्यम् । कागदखण्डे लिखित्वा स्वीकरोतु । थामस् पेयिन्वर्येण लिखितं 'विचारयुगम्' (Age of Reason) इङ्गर्सोल्वर्येण लिखितं 'स्पष्टोक्तिप्रबन्ध'नामकं (Outspoken Essays) ग्रन्थं च आदौ पठतु । चानिङ्ग्वर्यस्य Unitarian Christianity इत्येषः ग्रन्थः अपि परिशीलनयोग्यः अस्ति । तदा क्रैस्तमतस्य 'एकदेवतत्त्वस्य' निस्सारता दुर्बलतर्कः च ज्ञायते । भवती विज्ञानाध्ययनं कृतवती अस्ति खलु ? अतः एते ग्रन्थाः भवत्यै अवश्यं रोचेरन् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मया उक्तानि नामानि कागदखण्डे लिखित्वा तम् अग्रजाय यच्छन्ती - ''भवतः विश्वविद्यालयीयात् ग्रन्थालयात् एतान् ग्रन्थान् श्वः अविस्मृत्य आनीय ददातु'' इति उक्तवती ।

विद्यालयाः आरब्धाः आसन् । ममापि अवश्यकरणीयानि कानिचन कार्याणि आसन् । अतः - 'सप्ताहाभ्यन्तरे आगन्तुं न शक्येत' इति राचम्मां संसूच्य अहं ततः निर्गतः ।

प्रस्थानसमये सा - ''अनुजायाः विवाहविषये अधिकं मा चिन्तयतु । सः तु कथञ्चित् प्रवर्तते एव । अध्ययनविषये अवधानं भवतु'' इति मां बोधितवती ।

प्रकोष्ठं प्रति प्रत्यागमनसमये मम मनसि लिल्ल्याः आचारव्यवहारादयः एव आवर्तन्ते स्म । 'तस्याः स्वभावः दुष्टः न प्रायः । किन्तु तस्याः आचारः, विचारः, वेषः, भूषा इत्यादयः सर्वे पाश्चात्याः । भारतीये कस्मिंश्चित् अपि विषये तस्याः श्रद्धा नास्ति । तस्य कारणम् अपि प्रायः अस्ति । तस्याः वर्धनं कान्वेण्ट्वातावरणे अभवत् । वर्धनशीलं मनः स्वप्रभावरज्वा बद्ध्वा अपेक्षितरीत्या परिवर्तयन्ति कान्वेण्टीयाः । हिन्दुदृष्टौ, हिन्दुधर्मे, हिन्दुतत्त्वे च तिरस्कारजननम् एव तेषाम् आद्यं कर्तव्यम् । ते भारतीयमौल्यानि कदापि योग्यरीत्या अवगन्तुं प्रयत्नं न कृतवन्तः । तेषां सुप्तं मनः तस्य अवगमने न उत्सहते अपि । क्रैस्तमतात् ऋते जगति स्थिताः अन्ये सर्वे धर्माः अनागरिकाः इत्येतं पूर्वाग्रहं मनसि निधाय एव ये प्रवर्तन्ते तेषाम्, अन्यमतानाम् अवगमनार्थम् अपेक्षिता बौद्धिकसहना कथं वा भवेत् ? एते क्रैस्तविद्यालयाः, क्रैस्तसंस्थाः च भारते सृजन्ति असङ्ख्याः लिल्लीसदृशीः युवतीः, तत्सदृशान् ततोऽप्यग्रे स्थितान् युवकान् च ।'

गते वर्षे यान् बालान् अहं पाठयामि स्म तेषां स्थानान्तरं प्रति गमनं विहितम् आसीत् सर्वकारेण । अतः अन्ये बालाः पाठ्यन्ते स्म मया । ते तु सायं मम प्रकोष्ठम् एव आगच्छन्ति स्म इत्यतः एतस्मिन् वर्षे मम समयः अवशिष्यते स्म । आयः अपि प्रवृद्धः आसीत् । अन्याः व्यवस्थाः तु गतवर्षे इव एतस्मिन् अपि वर्षे अनुवर्तमानाः आसन् ।

मम मनसि भगिन्याः विवाहस्य चिन्ता एव विशेषतः बाधते स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कदाचित् रामण्णं दृष्ट्वा विषयं निवेदितवान् आसम् । 'परिचितान् सर्वान् एतद्विषये विचारयिष्यामि । कन्यायाः जातकं ददातु' इति सूचितवान् आसीत् सः । शकुन्तलायाः जातकं मत्समीपे न आसीत् । वस्तुतः तत् कस्यचिदपि समीपे स्यात् वा न वा इत्यपि अहं न जानामि स्म ।

''अलं चिन्तया । कन्यायाः वयः वदतु । शुभलक्षणोपेतं प्रशस्तं जातकम् एव तदाधारेण सज्जीकारयिष्यामि । भवान् चिन्तां तु मा करोतु'' इति वदन् मयि धैर्यं पूरितवान् आसीत् रामण्णः ।

ततः पक्षानन्तरं भानुवासरे मध्याह्ने अहं राचम्मायाः गृहं गतवान् । देवप्रसादः नगरे न आसीत् । ब्याट्मिण्टन्क्रीडार्थं सः क्रीडाकेन्द्रस्य प्रतिनिधित्वेन तुमकूरुनगरं गतः आसीत् ।

राचम्मा पृष्टवती - ''सप्ताहानन्तरम् आगमिष्यामि इति उक्त्वा गतः भवान् पक्षानन्तरं मुखं दर्शयन् अस्ति । किं भवतः सप्ताहः अस्माकं पक्षस्य समानः ?''

उत्तरं किमपि अनुक्त्वा अहम् उपविष्टवान् । ''भोः महाशय ! भवतः सहवासः एव विलक्षणः । परिचयक्षेत्रम् आगतान् सर्वान् केनचित् क्रमेण भवान् पीडयति एव । भवतः कारणतः लिल्ली ज्वरग्रस्ता जाता आसीत्'' इति उक्तवती राचम्मा ।

''मम कारणतः ज्वरग्रस्तता ? मया किं वा कृतम् ?'' - कुतूहलेन पृष्टवान् अहम् ।

''भवता पुस्तकानि कानिचन सूचितानि आसन् खलु ? तानि आनाय्य पठितवती सा । ततः तया ज्वरः प्राप्तः । 'तानि मया सर्वथा न पठनीयानि आसन्' इति स्वप्नवचनानि वदति स्म सा रात्रौ इति श्रूयते ।''

''आश्चर्यकरम् एतत् ! तदस्तु, इदानीं सा कथम् अस्ति ?''

''इदानीं ज्वरः उपशान्तः अस्ति । एकत्र एव शयनं खेदकरम् इत्यतः सा अत्र आगता अस्ति । इदानीम् अन्तः प्रकोष्ठे शेते सा ।''

अत्रान्तरे लिल्ली एव प्रकोष्ठात् बहिः आगता । वस्तुतः अपि ज्वरग्रस्ता आसीत् सा इत्येतत् आकृतिदर्शनात् एव ज्ञायते स्म । निश्शक्तिः चलनसमये दृश्यते स्म । मम पार्श्वे स्थितस्य वेत्रासन्दस्य उपरि उपविष्टवती सा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''सत्य ! अस्माकं ग्रामात् पनसफलं प्रेषितम् अस्ति । भवान् पूर्वं कदाचित् यं वृक्षम् आरुह्य फलम् उत्पाटितवान् आसीत् तस्यैव वृक्षस्य तत् । भवतः उपस्थितौ एव तत् उद्घाटनीयम् इति विचिन्त्य भवतः आगमनं प्रतीक्षमाणा आसम् । श्वः आर्यपुत्रस्य आगमनस्य अनन्तरं भवते वार्ता प्रेषणीया इति चिन्तितवती आसम् । सौभाग्यवशात् भवान् इदानीम् उपस्थितः । क्षणकालम् उपविशतु तावत् । फलदलानि आनेष्यामि । लिल्लि, भवत्यै हार्लिक्स्पेयम् आनेष्यामि'' इति उक्त्वा सा अन्तः गतवती ।

''तानि पुस्तकानि पठितानि किम् ?'' - लिल्लीं पृष्टवान् अहम् ।

''आम् । पठितानि ।''

''ततः एव भवती ज्वरग्रस्ता आसीत् इति राचम्मा उक्तवती ।''

''आम् ।''

''तादृशं किम् आसीत् तेषु ?''

लिल्ली आसन्दस्य पृष्ठभागं सम्यक् अवलम्ब्य उपविष्टवती । ततः शक्तिहीनेन स्वरेण सा उक्तवती - ''न जाने, तेषु तादृशं किम् आसीत् इति । यद्दिने मया तानि पठितानि तस्मिन् दिने मम मनसि महान् कोलाहलः समुत्पन्नः आसीत् । मम विश्वासस्य मूलं केनापि निष्करुणं कम्पितम् इव । तस्मिन् दिने यत्र स्थितं, यत्र उपविष्टं, यत्र गतं, तत्र सर्वत्र अपि अनिच्छन्त्याः अपि मम मनसि तेषां लेखकानां विमर्शः एव आवर्तते स्म । बैबलग्रन्थेन निरूपितं सत्यं क्रैस्तगतीयं विश्वासं च कथं धर्मबाह्यदृष्ट्या पश्यन्ति ते !!''

''तेषां दृष्टेः तादृशं तैक्ष्ण्यं यत् दृश्यते तस्य कारणं क्रैस्तगुरवः एव । विज्ञानस्य अवरोधार्थं, सामाजिकं दुःश्शासनं कर्तुं च धर्मनाम्ना ते प्रयत्नं कृतवन्तः । विज्ञानिनः, स्वतन्त्रचिन्तनप्रवृत्तिकान् तत्त्वज्ञान् च दमयितुं, बौद्धिकसर्वाधिकारं प्रतिष्ठापयितुं च क्रैस्तमन्दिरैः प्रयासः कृतः । तस्य विरोधस्य निमित्तम् इङ्गर्सोल्प्रभृतिभिः प्रयासः कृतः । अन्धश्रद्धा कदाचित् वा अन्त्यं गच्छेत् एव खलु ?''

''एवं तर्हि पाश्चात्यदेशे स्थिताः सर्वे थामस्पेयिन्-इङ्गर्सोलसदृशाः एव ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''न तथा । तथापि क्रैस्तमतं तेषु देशेषु शक्तिहीनं जातम् अस्ति । प्रोटेस्टेण्ट्मतस्य उदयः एव क्रैस्तमन्दिराणाम् अधिकारस्य समापनार्थं जातः । तत्रापि अद्य विज्ञानयुगे पश्चिमदेशीयाः जनाः क्रैस्तमतस्य विशेषमहत्त्वं न चिन्तयन्ति एव । तत्र सर्वे क्रैस्ताः एव । तथापि तेषु केचन एव भानुवासरे क्रैस्तमन्दिरं गच्छन्ति । तदपि भानुवासरे जीवनशैल्यां किञ्चित् परिवर्तनं भवतु इति उद्देशेन ।''

''तत्रापि नूतनानि क्रैस्तमन्दिराणि प्रपिवर्षं निर्मीयन्ते । जनाः अपि एतदर्थं साहाय्यम् आचरन्ति । किमर्थम् एतत् ?''

''तेषां समीपे प्रभूतं धनम् अस्ति । अतः यच्छन्ति । किन्तु नित्यजीवने मतं कोऽपि कटाक्षेण अपि न पश्यति । कियन्तः जनाः क्रैस्तमन्दिरनियमानुगुणं विवाहिताः सन्तोऽपि तान् नियमान् पालयन्ति ? पश्चिमदेशानां जनसङ्ख्यायाः अर्धभागः यत्र वसति सः रशियादेशः सर्वमतानि अपि विरुध्य तिष्ठति । दीनदलितानां प्रथमः शत्रुः धर्ममन्दिरं, धर्मः नाम दरिद्राय दीयमानं मदोत्पादकं पेयम् इति साम्यवादिनः यत् वदन्ति तस्य मुख्यकारणं क्रैस्तमन्दिरम् एव । दीनदलितानां रक्तं चूषतां धनिकानां पक्षम् अवलम्ब्य क्रैस्तमन्दिरैः स्वस्य अधिकारस्य वर्धनार्थं प्रयासः कृतः । पाश्चात्यजनेषु यत् मद्यव्यसनम्, इन्द्रियसुखाभिलाषः च दृश्यते तं, राजकीयशक्तेः प्राप्त्यर्थं क्रियमाणान् अण्वस्त्रक्षेपणादिप्रयासान् च क्रैस्तमन्दिरं किमर्थं न अवरुणद्धि ? यदि क्रैस्तमतस्य तत्त्वं किञ्चित्प्रमाणेन वा स्थितं स्यात् तर्हि तत् किमर्थं वा तद्देशीयान् जनान् परिष्कर्तुं न प्रयतते ?''

लिल्ली आयासवशात् इव नेत्रे निमील्य उपविष्टवती आसीत् ।

''मम कथनं किं भवत्याः श्रान्त्यै भवति ?'' - अहं पृष्टवान् ।

''न । अनुवर्ततां कथनम् ।''

''पश्चिमदेशेषु स्वस्य प्रभावः कार्यं न करोति इत्यतः क्रैस्तमन्दिरेण स्वस्य अवधानं पूर्वदेशानां विषये केन्द्रीकृतम् अस्ति । पश्चिमदेशीयानां समीपे प्रभूतं धनम् अस्ति । अतः सर्वकार्यार्थम् अपि ते मुक्तहस्ततया धनं यच्छन्ति । तैः धनं दीयते यत् तत् तेषां धर्मश्रद्धां द्योतयति इति न । पूर्वदेशीयानां जनानां मनसि वा अस्माकम् अधिकारः प्रतिष्ठापनीयः

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

इति चिन्तयतां धर्मगुरूणां साहाय्यं कुर्वन्ति ते । सहस्राधिकवर्षाणि यावत् परमतानि निरन्तरं दूषयित्वा, परमतेषु स्थितान् कांश्चन लोपान् एव अवलम्ब्य स्वमतीयानां सङ्ख्यायाः वृद्ध्यर्थं प्रयतमानाः सन्ति क्रैस्तगुरवः । तैः सञ्चाल्यमानाः विद्यालयाः, महाविद्यालयाः, चिकित्सालयाः च एतस्य एव मतप्रचारस्य एकं साधनम् ।''

तावता राचम्मा पनसदलानि स्थालिकायां स्थापयित्वा तत्र आगतवती । हार्लिक्स्पेयं च आनीय लिल्ल्यै दत्तवती च । आवां पनसदलानि खादन्तौ बाल्यजीवनस्य दिनानि स्मृतवन्तौ । हार्लिक्स् पीत्वा लिल्ली पुनरपि नेत्रे निमील्य उपविष्टवती । तस्याः मनसि प्रचलत् विचारमथनं मुखे अभिव्यक्तं भवति स्म । राचम्मया सह अर्धघण्टां यावत् वार्तालापं कृत्वा अहं ततः प्रस्थितः ।

''अहं किञ्चित् वक्तुम् इच्छामि'' इति उक्तवती लिल्ली ।

''वदतु तावत् ।''

''इतः परं मया सह, मम पुरतः अन्येन केनचित् सह वा मतधर्मादिविषयान् अवलम्ब्य भवता वार्तालापः न करणीयः । अन्यच्च मम मेलनं भवता यावच्छक्यं निवारणीयम् । भवतः परिचयः मम दुरदृष्टवशात् जातः । मया एवं कथितम् इत्यतः अन्यथा न चिन्तनीयं भवता ।''

लिल्ल्याः वचनं श्रुत्वा राचम्मा मौनेन मम मुखं दृष्टवती । मया प्रतिवचनं किमपि न उक्तम् ।

''अस्तु । नमो भवत्यै'' इति उक्त्वा मन्दगत्या उत्थाय अहं ततः निर्गतः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रामण्णः द्वित्रान् वरान् प्रदर्शितवान् । कन्यां दर्शयितुं मया कश्चन वरः बिळ्ळकेरेग्रामं प्रति नीतः । वरेण कन्या दृष्टा । 'मम भगिनी अङ्गीकरिष्यति चेदेव अहम् एतां परिणेष्यामि' इति वरमहाशयः उक्तवान् । तस्य भगिनी, भगिनीपतिः, तयोः पुत्राः च मया ग्रामं प्रति नीताः । ततः मैसूरुनगरं प्रत्यागताः ते – 'कन्यायाः अध्ययनम् अपर्याप्तम् । अतः एषा मास्तु' इति उक्तवन्तः ।

''एषः अंशः पूर्वम् एव ज्ञातः आसीत् । तथापि इदानीं व्याजरूपेण एवम् उच्यते । महतः श्रमस्य दानात् पूर्वम् एव एषः अंशः चिन्तयितुं शक्यः आसीत्'' इति मया उक्तम् ।

''विवाहः न सुलभः । वरान्वेषणार्थम् एव बहवः सहस्रशः रूप्यकाणि व्ययीकुर्वन्ति । भवता कृतः व्ययः तु अत्यल्पः । तथापि आक्रोशः महान् !'' इति माम् एव तर्जितवन्तः ते ।

एतस्य व्ययस्य निर्वहणार्थं मया यथापूर्वं नञ्जुण्डतः पञ्चाशत् रूप्यकाणि ऋणरूपेण स्वीकृतानि आसन् ।

सङ्गीतविद्वत्परीक्षायाम् उत्तीर्णः अन्यः कश्चन वरः कन्याम् अङ्गीकृतवान् । किन्तु तेन अभियाचितानि सुवर्णहार-घटी-वेषभूषणादीनि कलश-स्थालिकादि-पात्राणि च दातुम् अशक्नुवन् अहं निराकृतिं प्रदर्शितवान् ।

एतत्सर्वं दृष्ट्वा रामण्णः उक्तवान् - ''एते नगरीयाः वराः एव एतादृशाः । अतः ग्रामीणवराणां विषये चिन्तनम् एव वरम्'' इति ।

तस्य कथनं युक्तम् अभासत मम मनसि । अग्रिमे ग्रीष्मविरामे मया एतद्विषये विशेषप्रयासः करणीयः इति निश्चित्य विवाहप्रयत्नं तात्कालिकतया स्थगितवान् अहम् । नञ्जुण्डः तु विविधेषु स्थलेषु वरान्वेषणप्रयत्नम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुवर्तयन् आसीत् । एवम् एव षट् मासाः अतीताः । मम इण्टरमीडियट्परीक्षा आसन्ना आसीत् । अतः विद्यालयविषये मम अवधानम् आधिक्येन जातम् । एतस्मिन् वर्षे विद्यार्थिवेतनार्थम् अभ्यर्थनापत्रं न प्रेषितम् आसीत् मया । गतवर्षे प्राध्यापकदर्शनात् प्राप्तस्य अनुभवस्य स्मृतिः मम मनसि स्फुटा एव आसीत् ।

एकस्मिन् भानुवासरे प्रातः स्नातकोत्तरकक्ष्यायां पठता मित्रेण सह मदपेक्षितानि पुस्तकानि आनेतुं विश्वविद्यालयस्य ग्रन्थालयं प्रति अहं गच्छन् आसम् । देवप्रसादः अपि तत्र आसीत् । तेन सह लिल्ली अपि आसीत् । गते मासात्मके अवधौ सा न दृष्टा आसीत् मया । राचम्मायाः गृहं प्रति तु अहं यथापूर्वं गच्छामि स्म । तत्र लिल्ल्याः मेलनं न भवति स्म । एकदा राचम्मायाः गृहस्य प्रवेशसमये ततः निर्गच्छन्ती सा दृष्टा आसीत् । अहं मुखं परिवर्त्य अन्यत्र पश्यन् अन्तः गतवान् आसम् ।

इदानीं ग्रन्थालये तां दृष्ट्वा अपि अदृष्टवान् इव देवप्रसादस्य दिशि मया दृष्टिः प्रसारिता । तदा सा एव पृष्टवती - ''किं मां दृष्ट्वा अपि अदृष्टम् इव मुखं परिवर्त्यते भवता ? किम् अपराद्धं मया ?''

लिल्ल्याः विषये मम कोपः न आसीत्, अपि तु औंदासीन्यम् आसीत् । अतः औदासीन्येन एव मया उत्तरं दत्तं - ''भवत्या इष्टे समये मया सम्भाषणं करणीयम्, अनिष्टे काले न । भवत्याः इष्टानिष्टकालः मया न अवगम्यते । अन्यच्च भवत्या सह वार्तालापार्थं मम विषयः अपि कोऽपि नास्ति ।''

''वार्तालापविषयः एव कोऽपि नास्ति ? आस्तां तावत् तत् । हिन्दुधर्मं संस्कृतिं च ज्ञातुं मह्यम् एकं पुस्तकम् आवश्यकम् । तादृशस्य पुस्तकस्य नाम वदतु । भवता उच्यमानान् महतो महीयसः तत्त्वविचारान् अहं पुस्तकपठनात् एव ज्ञास्यामि ।''

तस्याः वचने उपहासांशः किञ्चित् अस्ति इति मया अवगतम् । तथापि अहम् अजानन् इव व्यवहरन् सहजस्वरेण - ''एतद्विषये कमपि एकं ग्रन्थं सूचयितुम् अहम् असमर्थः । अन्यच्च हिन्दुधर्मः., हिन्दुतत्त्वानि, हिन्दुसंस्कृतिः इत्यादिभिः सर्वैः अपि विषयैः युक्तः कोऽपि ग्रन्थः अस्ति वा न वा इति मया न ज्ञायते अपि । तद्विषये मया एव सम्यक् अध्ययनं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न कृतम् । वस्तुतः अपि भवत्याः पठने आस्था अस्ति चेत् कानिचन पुस्तकानि पठनीयानि । अहं नामानि सूचयामि । एकैकशः तानि पठतु भवती । एवं बहूनां ग्रन्थानां पठनात् हिन्दुसंस्कृतेः स्पष्टपरिचयः कालान्तरे भविष्यति ।''

''अस्तु । त्रिचतुराणि नामानि वदतु इदानीम् ।''

अहं तत्रैव स्थिते कागदे आनन्दकुमारस्वामिनः राष्ट्रियध्येयसम्बद्धान् प्रबन्धान्, कला स्वदेशीयतत्त्वं च इति ग्रन्थं, शिवताण्डवग्रन्थस्य कांश्चन प्रबन्धान्, राधाकृष्णन्वर्यस्य हिन्दुजीवनदृष्टिं, सोदरीनिवेदितायाः भारतीयजीवनपरिधिं, म्याक्स्मूलर्-पाल्ब्रण्टन्प्रभृतीनां कांश्चन ग्रन्थान् च उल्लिखितवान् ।

पुस्तकावलीं दृष्ट्वा लिल्ली - ''एतेषु कांश्चन ग्रन्थान् पठिष्यामि । अभिरुचिः उत्पन्ना चेत् पठनम् अनुवर्तयिष्यामि । अग्रे अपि भवता मार्गदर्शनं क्रियेत खलु ?'' इति पृष्टवती ।

पाश्चात्यजीवनक्रमं गतानुगतिकतया अनुसरन्त्याः तस्याः स्वरे स्थितः उपहासांशः मया इदानीम् अपि लक्षितः । अतः अहम् उक्तवान् - ''अग्रे अपि पठनीयं चेत् सन्त्येव बहूनि पुस्तकानि । विविधाः लेखकाः अपि सन्ति । अज्ञातं विषयं प्रष्टुम् अर्हाः बहवः विद्वांसः अपि नगरे सन्ति । अतः समस्या तद्विषये नास्ति । समस्या तु अभिरुचिसम्बद्धा । भवत्यां दृश्यमाना अभिरुचिः वास्तविकी चेत् तावता अलम् ।''

पुस्तकं दापयितुम् आगतः सुहृत् माम् आह्वयन् आसीत् इत्यतः देवप्रसादं नमस्कारम् उक्त्वा अहं ततः निर्गतवान् ।

* * *

इतः दिनद्वयानन्तरं मया अनिरीक्षिततया एकं पत्रं प्राप्तम् । तत् नञ्जुण्डस्य मात्रा लेखितम् आसीत् । अक्षराणि बालकैः लिखितानि इव भासन्ते स्म । प्रायः तानि अक्षराणि नञ्जुण्डस्य अनुजस्य स्युः । पत्रस्य सारः एषः - ''एतस्मिन् वर्षे नञ्जुण्डस्य विवाहः निर्वर्तनीयः इत्यस्ति सङ्कल्पः । अज्ञातकुलगोत्रायाः कस्याश्चित् कन्यायाः आनयनात् अपि,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञातपूर्वायाः सख्याः पुत्र्याः शकुन्तलायाः स्नुषात्वेन स्वीकारः एव वरम् इति विचारः अस्ति । यदि भवतः अङ्गीकारः स्यात् तर्हि माघमासस्य अन्ते विवाहः निश्चेतुं शक्यः । अतः एतद्विषये वार्तालापार्थं सकृत् भवान् एव अत्र आगत्य गच्छति चेत् वरं स्यात्'' इति ।

रङ्गाम्बायाः अयं प्रस्तावः यावत् अनिरीक्षितं तावदेव सन्तेषदायकम् अपि आसीत् । 'नञ्जुण्डः मम आत्मीयः सुहृत् । मदीययोः सुखदुःखयोः हार्दः सहभागः भवति स्म तस्य सदापि । यदि सः एव शकुन्तलां परिणयेत् तर्हि सौहृदेन सह बान्धव्यम् अपि सम्मिलितं स्यात् । नञ्जुण्डः अनुरूपः वरः अपि । रङ्गाम्बा पत्रलेखनात् पूर्वं पुत्रस्य अभिप्रायम् एतद्विषये पृष्टवती स्यादेव । न जाने, शकुन्तला किम् अभिप्रैति इति । सा अपि एतद्विषये सुमुखी एव स्यात् । यदा अहं गमिष्यामि तदा तत् मया ज्ञायेत ।'

अनन्तरदिने एव अहं मैसूरुतः प्रस्थितः । आदौ चलुवरायपत्तने अवतीर्य नञ्जुण्डस्य उद्योगस्थलं गतः अहम् । पूर्वापेक्षया स्थूलः जातः आसीत् सः । मां सः सन्तोषेण स्वागतीकृतवान् । मातुः पत्रं तस्मै अहं दत्तवान् । पठनानन्तरं पृष्टं मया - ''किम् एषः प्रस्तावः अनुमतः भवतः ?'' इति ।

नञ्जुण्डः किमपि न उक्तवान्, केवलं मन्दहासं प्रकटितवान् । तस्य आशयः मया अवगतः । 'द्वित्राणां दिनानां विरामं स्वीकरोतु' इति तं संसूच्य तेन सह तस्मिन् एव दिने मया बिळलकेरेग्रामः प्राप्तः । रङ्गाम्बा तु सदा सत्कारप्रिया । इदानीं तु तया महता सन्तोषेण मम सत्कारः कृतः । ''नञ्जुण्डस्य त्रिभिः अनुजैः अग्रे पठित्वा जीवनमार्गः अन्वेष्टव्यः अस्ति । मम जीवनं न शाश्वतम् । अद्य, श्वः, भगवान् यदा सूचयति तदा वा अहम् ऊर्ध्वलोकं गच्छेयम् । तादृशं यदि भवेत् तर्हि तेषां भ्रातृजाया एव मातृत्वपात्रं निर्वहेत् । शकुन्तला तु एतदर्थं योग्या इति भाति । तस्याः गुणस्वभावादयः मह्यम् अरोचन्त । कष्टदुःखादीनां परिज्ञानं तस्याः अस्ति एव'' इति उक्तवती रङ्गाम्बा ।

मम स्नानार्थं जलं सज्जीकर्तुम् आगता शकुन्तला यदा स्नानगृहे एकाकिनी आसीत् तदा अहम् एतस्य विवाहप्रस्तावस्य विषये तस्याः अभिप्रायं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृष्टवान् । कन्यकाः प्रायः एतादृशेषु विषयेषु साक्षात् किमपि न वदन्ति । अनिच्छा अस्ति चेत् तु साक्षात् सूचयन्ति । इच्छायां सत्यां मौनम् अवलम्बन्ते । 'उत्तरं कथयतु' इति यदा मया पुनः पुनः पृष्टं तदा सा उक्तवती - 'भवान् यथा इच्छति तथा ।'

''एषः विवाहः मम प्रियः न । अतः किं निराकृतिं प्रदर्शयानि ?''

सा उत्तरं किमपि न उक्तवती ।

अहं पुनः उक्तवान् - ''स्नेहितस्य नञ्जुण्डस्य आवुत्तत्वेन स्वीकारः मह्यं न तथा रोचते । अतः एषः विवाहः मास्तु इति अहं चिन्तयामि । भवती अपि तदेव अनुमन्यते खलु ?''

निमेषद्वयानन्तरम् अहं पुनरपि उक्तवान् - ''विवाहः सम्मतः न इति रङ्गाम्बां वदिष्यामि । अन्यत्र वरान्वेषणार्थं प्रयत्नं करिष्यामि ।''

इदानीं शकुन्तला भीतिमिश्रितेन स्वरेण उक्तवती - ''स्नेहितः एव वरः भवति चेत् को दोषः ? किमर्थम् एवं चिन्त्यते भवता ?''

अहं हसन् उक्तवान् - ''भवत्याः मनसि किम् अस्ति इति इदानीम् अवगतं मया । रङ्गाम्बा यथा न जानीयात् तथा भवती नञ्जुण्डः च मिलित्वा पूर्वम् एव योजनां कृतवन्तौ इति मन्ये । एवं ननु ?''

'तथा किमपि नास्ति' इति वदन्ती कृत्रिमकोपं प्रदर्शितवती सा । तस्याः मुखं तु रागरञ्जितम् आसीत् ।

मम भगिन्याः गुणस्वभावादिकम् उत्तमम् इति रङ्गाम्बा एव अङ्गीकृतवती आसीत् । रूपेण, औन्नत्येन, गुणेन च योग्या एव आसीत् शकुन्तला । गृहकार्येषु अपि सुकुशला सा । मम मातुः मुखे इव तस्याः मुखे अपि सदा मन्दहासः विलसति स्म ।

ग्रामं गत्वा अहं क्षेत्रं विक्रीतवान् । पूर्वं यत् मूल्यं निश्चितम् आसीत् ततोऽपि शतं रूप्यकाणि न्यूनीकृत्य एव क्षेत्रं क्रीतवान् ग्रामप्रमुखः । मम आवश्यकतायाः दुर्लाभः प्राप्तः आसीत् तेन । पञ्चाशदधिक-षट्शताधिक-सहस्रं रूप्यकाणि (रू. १६५०-००) प्राप्य नञ्जुण्डेन सह अहं मैसूरुनगरं प्रत्यागतः । वस्त्रादीनि अन्यवस्तूनि च क्रेतुं यदि कोऽपि अनुभवी अस्माभिः सह स्यात् तर्हि वरं स्यात् इति विचिन्त्य आवां रामण्णस्य गृहं गतवन्तौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वार्ता श्रुत्वा नितरां सन्तुष्टः अभवत् रामण्णः । 'कियत् धनम् अस्ति ?' इति विचारितं तेन ।

किञ्चित्कालं विचिन्त्य सः - ''मम तु भाति यत् पश्चिमवाहिन्यां विवाहस्य निर्वर्तनं वरम् इति । उभयपक्षे अपि बहवः न निमन्त्रणीयाः । एषु दिनेषु विवाहे कोऽपि मतभेदः उत्पद्यते, ततः कलहश्च प्रवर्तते । असम्बद्धानां जनानां प्रवेशः एव एतस्य कारणम् । एषः विवाहः सुव्यवस्थितः अनुकरणयोग्यः च भवेत् । पश्चिमवाहिन्याः विवाहमण्डपे सर्वविधव्यवस्थाः उत्तमाः सन्ति'' इति उक्तवान् ।

तस्य सूचना सम्मता जाता । रामण्णस्य नेतृत्वे एव वधूवरयोः कृते क्रेतव्यानि सर्वाणि क्रीतानि । 'वधूनिमित्तं मया यत् क्रेतव्यं तत् हासने अहं क्रेष्यामि' इति उक्त्वा नञ्जुण्डः निर्गतः ।

रामण्णस्य पूर्वपरिचयः मम आसीत् एव । तथापि तस्य सामर्थ्यस्य पूर्णपरिचयः एतदवसरे एव जातः । तेन अविदितः अंशः, कार्यं वा न स्यात् एव इति इदानीम् अपि भाति मम । विवाहार्थम् आगच्छतां जनानां सङ्ख्याम् ऊहित्वा सः पाकार्थम् अपेक्षितानां वस्तूनां सविस्तरावलीं सज्जीकृतवान् । आ हरिद्राखण्डात् आसूत्रं तेन चिन्तितम् आसीत् । अहोरात्रं सः एतदेव चिन्तयति स्म, करोति स्म च । कदाचित् मम सन्देहः भवति स्म - 'विवाहः मम भगिन्याः उत तस्य भगिन्याः ?' इति । तस्य मातापितरौ एव कन्यादानं कर्तुं सिद्धौ जातौ । तस्य पितुः सुहृत् एव पौरोहित्यम् अङ्गीकृतवान् । रामण्णस्य द्वित्राः सुहृदः विवाहार्थं सर्वकार्याणि कर्तुं सन्नद्धाः जाताः । विवाहवस्तूनि सर्वाणि तद्गृहं प्रति आनीतानि । कानिचन तत्रैव सज्जीकृतानि च । अहं तु विवाहनिर्वर्तनविषये सर्वथा अनभिज्ञः आसम् । धनं रामण्णस्य हस्ते समर्प्य निश्चिन्ततया आसम् अहम् । किं कार्यं किमर्थं करणीयम् इत्येव अहं बहुधा न जानामि स्म ।

वधूपक्षतः अध्यापकः नञ्जुण्डवर्यः उपस्थितः आसीत् । स्वामिवर्यः कुत्र वसति इति अहं न जानामि स्म ।

रामण्णस्य मार्गदर्शनानुसारं विवाहः अनुकरणयोग्यत्वेन एवं प्रवृत्तः । परिशुद्धं कावेरीतीरं, विशालं हरिद्वर्णेन शोभमानं व्रीहिक्षेत्रं, प्रशान्तः प्राकृतिकः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant 2

परिसरः च शुभकार्यस्य शोभां वर्धयति स्म । 'लक्ष्मीनारायणस्वरूपाय वराय..........' इत्येवं पुरोहितः मन्त्रान् वदति स्म उच्चकण्ठेन स्पष्टस्वरैः । विवाहमण्डपात् बहिः वाद्यवादकाः मङ्गलवाद्यानि वादयन्तः आसन् । शोभमानां वेष्टीं धृत्वा उत्कृष्टम् उत्तरीयं च धृत्वा शिरसि च विवाहकिरीटं धृत्वा तिलकधारी सन् नञ्जुण्डः विवाहमण्डपे विराजते स्म । शकुन्तला आकाशवर्णीयां शाटिकां धृत्वा लज्जावनतमुखी सती स्थितवती आसीत् । तस्याः शिरसि अपि वधूयोग्यं विवाहकिरीटम् आसीत् । कपोलयोः हरिद्रा लेपिता आसीत् । ललाटे रक्तकुङ्कुमं शोभते स्म । वधूवरयोः मध्ये जवनिका इव पटः कश्चन आसीत् । शकुन्तला दक्षिणपादं तण्डुलपूर्णस्य वेत्रकण्डोलस्य उपरि स्थापितवती आसीत् ।

पुरोहिते उच्चस्वरेण वेदमन्त्रान् घोषयति सति वधूवरौ परस्परयोः शिरसि तिलान् जीरिकाः च पातितवन्तौ । अन्तःपटः अपसारितः । कन्यादानं प्रवृत्तम् । माङ्गल्यधारणम् अपि प्रवृत्तम् । वधूवरयोः उभयोः अपि मुखे विलक्षणा दैवीकान्तिः विलसति स्म । शकुन्तला लक्ष्मीः इव भासते स्म । तस्याः पार्श्वे नारायणः इव उपविष्टवान् आसीत् नञ्जुण्डः ।

विवाहसमाप्त्यनन्तरं पतिगृहं प्रस्थितवती शकुन्तला मां नमस्कृतवती । तस्याः नेत्रे सजले आस्ताम् । सा आर्द्रता वधूसहजा, उत सन्तोषप्रतीकभूता, उताहो गतानुभवस्मरणात् उत्पन्ना इति मया तु न अवगतम् । रामण्णं ज्येष्ठान् च वधूवरौ नमस्कृतवन्तौ ।

महोपकारं कृतवतः रामण्णस्य विषये अहम् अनृणी कथं भवेयम् ? विवाहव्यग्रताकारणतः परीक्षा मम स्मृतिपथं न आगता आसीत् । सर्वाणि कार्याणि समाप्य यदा मैसूरुनगरं प्रत्यागतं तदा परीक्षा स्मृता मया । दशदिनानाम् अनन्तरं परीक्षा । तथापि मम अधैर्यं न आसीत् । मनसः भारः अपगतः आसीत् । शकुन्तला सुयोग्यं स्थानं प्राप्तवती आसीत् । मित्रं नञ्जुण्डः एव तस्याः पाणिं गृहीतवान् आसीत् । अतः कृतकृत्यताभावेन मनः पूर्णम् आसीत् । उत्साहपूर्णेन मनसा अहम् अहोरात्रं पठितवान् । परीक्षा समाप्ता । उत्तीर्णताप्राप्तिविषये सन्देहलेशः अपि न आसीत् मम । परीक्षां समाप्य अहं नञ्जुण्डस्य गृहं गतवान् । दम्पती आनन्देन दिनानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यापयतः स्म । ग्रीष्मविरामे अत्रैव तिष्ठतु इति सर्वे सानुरोधम् उक्तवन्तः । तथापि सप्ताहं स्थित्वा अहं मैसूरुनगरं प्रत्यागतः ।

ग्रीष्मविरामः मासद्वयात्मकः आसीत् । विशेषकार्यं किमपि न आसीत् मम । विरामकारणतः पाठार्थं छात्राः न आगच्छन्ति स्म । मम भोजनं तु अनाथालये प्रचलति स्म । प्रकोष्ठभाटकार्थं, वस्त्रादिनिमित्तम्, अग्रिमवर्षे स्नातककक्ष्यायाः शुल्कं दातुं च धनम् आवश्यकम् एव आसीत् । अतः कोऽपि उद्योगः करणीयः इति मया निश्चितम् । सङ्कल्पमात्रेण उद्योगः न प्राप्यते खलु ? सप्ताहं यावत् मया मैसूरुनगरे सर्वत्र अटितम् । अन्ते सुशीला-गन्धवर्तिका-निर्माणागारे मया उद्योगः प्राप्तः । प्रातः अष्टवादनतः रात्रौ नववादनपर्यन्तं कार्यम् । गणनालेखनं, कर्मकराणां कार्यस्य परिशीलनं, द्विचक्रिकया रेल्वेस्थानकं गत्वा गन्धवर्तिकाबन्धानां प्रेषणं, वित्तकोषं प्रति गमनम् इत्यादीनि कार्याणि, विना विरामं करणीयानि भवन्ति स्म । तस्मिन् निर्माणागारे 'प्रबन्धक'(म्यानेजर्)पदं मम । अतः सर्वाणि कार्याणि मया करणीयानि एव भवन्ति स्म । तथापि मासिकं वेतनं त्रिंशत् रूप्यकाणि ! अनन्यगतिकतया एषः उद्योगः अङ्गीकृतः मया ।

निर्माणागारस्य सोमवासरे विरामः । तस्मिन्नपि दिने आगत्य कार्यं करणीयम्, अथवा मम पुत्राणां पाठनं करणीयम् इति निर्माणागारस्वामी अपेक्षते स्म । अहं तु तत् न अङ्गीकृतवान् आसम् ।

उद्योगप्राप्त्यनन्तरं चतुर्थे दिने सोमवासरे अहं राचम्मागृहं गतवान् । सार्धैकमासात् पूर्वं मया तत्र गतम् आसीत् । यदा मया गतं तदा देवप्रसादः यथापूर्वं विनोदकेन्द्रं गतवान् आसीत् ।

''अस्मद्गृहमार्गः विस्मृतः आसीत् किम् ?'' इति हसन्ती पृष्टवती राचम्मा । अहम् अनुजाविवाहप्रसङ्गम्, उद्योगान्वेषणप्रयासम्, उद्योगप्राप्तिं च तां विस्तरेण निवेदितवान् ।

'भगिन्याः विवाहः एवं निरायासं प्रवृत्तः' इति वार्तां श्रुत्वा राचम्मा सन्तृप्तिं प्रकटितवती । पाचिकां मरियम्माम् उद्दिश्य - 'सत्यनारायणवर्यः आगतः अस्ति इति लिल्लीं सूचयित्वा आगच्छतु' इति आदिष्टवती ।

''किमर्थं भगिनि, तस्याः सूचनम् ? मम विरामः एव विरलः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2

सन्तोषेण कालः यापनीयः इति उद्देशेन मम अत्र आगमनम् । यदि सा आगच्छेत् तर्हि विना कारणं वाग्वादः स्यात् । मनः कलुषितं भवेत् । किमर्थं तस्यै वार्ता प्रेषिता ?'' इति निराशामिश्रितस्वरेण अहं पृष्टवान् ।

''भवन्तं सा बहुधा स्मरति स्म । यदा भवान् उपस्थितः भवेत् तदा अवश्यं वार्ता प्रेषणीया इति सा सनिर्बन्धम् उक्त्वा गतवती अस्ति । भवतोः वार्तालापस्य श्रवणं मम प्रियं कार्यम् । श्रवणमधुरं तत् । तत् श्रुत्वा अहं तानि दिनानि स्मरामि, येषु भवान् चर्चास्पर्धावसरे चर्चया मां पराजितां करोति स्म ।''

आवयोः वार्तालापः अर्धघण्टां यावत् प्रवृत्तः । तावता लिल्ली तत्र आगतवती । अहं मन्दहासं प्रकटय्य - ''अपि कुशलम् ?'' इति पृष्टवान् ।

सा आसन्दे उपविशन्ती उक्तवती - ''मां दृष्ट्वा भवान् यथापूर्वं मुखं परिवर्तयेत् इति भीतिः आसीत् मम । अद्य मम सौभाग्यम् । तथा न कृतं भवता । पूर्वाभिभाषिता प्रदर्शिता ।''

लिल्ली प्रायः आंग्लभाषया एव वदति स्म । सा कन्नडं न जानाति इति न । तथापि सम्भाषणे प्रायः आंग्लभाषाम् एव अवलम्बते स्म । आंग्लो-इण्डियन्-जनानाम् उच्चारणम् अनुकरोति स्म सा । तस्याः अन्यभाषोच्चारणम् अपि तादृशम् एव भवति स्म ।

''मम मेलनम् एव दुरदृष्टकरम् इति भवती चिन्तितवती आसीत् । मम मुखस्य दर्शनात् दुरदृष्टता वर्धेत इति मम भीतिः आसीत् । अतः अहं तथा करोमि स्म'' इति उक्तं मया ।

''आस्तां तावत् । भवतः स्मरणशक्तिः तीक्ष्णा । कस्मिंश्चित् क्षणे अविचार्य उक्तम् अपि भवान् यथावत् स्मरति । महती दुराग्रहशीलता भवतः ।''

ततः सा आगमनोद्देशं विवृतवती - ''भवता सूचितानि पुस्तकानि पठितानि मया । तत्र उक्ताः बहवः अंशाः मया न अवगताः । केचन विषयाः तु अङ्गीकारायोग्याः इति भाति मम । आधुनिके अस्मिन् युगे तिष्ठन्तः अपि कीदृशान् कालबाह्यान् विचारान् उपस्थापयन्ति ते ग्रन्थकर्तारः ! क्वचित्तु तेषां विचारः अविचारितरमणीयः इति अवभासते ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''कस्मिन् अंशे एवं भासते ? एकम् उदाहरणं दीयताम् ।''

''भवता सूचितम् आनन्दकुमारस्वामिप्रणीतं पुस्तकद्वयम् एव परिशीलयाम । राष्ट्रियध्येयम् अधिकृत्य लिखितेषु प्रबन्धेषु सः हिन्दुकला, हिन्दुधर्मः, हिन्दुविद्याभ्यासक्रमः, हिन्दुसंस्कृतिः इत्यादीनां पुनरुत्थानम् एव प्रतिपादयति । पुस्तकस्य नाम तु राष्ट्रियं ध्येयम् इति । 'राष्ट्रिय'नाम्ना कालबाह्यविषयाणां शरणागतिः कथं वा युज्येत ? कुमारस्वामी श्रेष्ठः ग्रन्थकारः, आधुनिकयुगस्य प्रतिभाशाली चिन्तकः, महाज्ञानी इत्यादिकं भवन्मुखात् एव श्रुतम् आसीत् मया । ग्रन्थेषु दृश्यमानं तदीयं चिन्तनं तु .....''

''कुमारस्वामिवर्यः हिन्दुदृष्टेः प्रतिपादकः । पाश्चात्यपद्धतिः सर्वाणि वस्तूनि विश्लेषणात्मकया पश्यति । मानवजीवनं बहुधा विभज्य परिशीलनं तत्रत्यानां स्वभावः । सर्वस्यापि समष्टिदृष्ट्या दर्शनं हिन्दुचिन्तनस्य वैशिष्ट्यम् । राष्ट्रं नाम राजकीयानुकूल्यार्थम् अङ्गीकृता व्यवस्था न । राष्ट्रस्य काचित् परम्परा, काचित् संस्कृतिः, कश्चन इतिहासः च भवेत् एव । सर्वाणि अपि राष्ट्राणि कला-धर्म-साहित्य-जीवशैलीनां द्वारा स्वीयेनैव विशिष्टेन क्रमेण स्वचैतन्यम् अभिव्यञ्जयन्ति । कलादयः यदि परम्परां परित्यज्य अभिव्यक्ताः स्युः तर्हि ताः राष्ट्रियाः कथं स्युः ? राजकीयस्वातन्त्र्यं तु परम्परायाः अभिवृद्ध्यर्थम् अपेक्षितं स्थितिमात्रम् ।''

''गान्धिवर्यस्य अपि अयम् एव आशयः इति भाति ।''

''भाति इति किम्, अयम् एव आशयः तस्यापि । वस्तुतस्तु गान्धिवर्यस्य स्वदेशीयान्दोलनस्य आरम्भात् पूर्वम् एव कुमारस्वामिवर्यः 'स्वदेशीय'पदस्य अर्थं विवृतवान् आसीत् । किन्तु कुमारस्वामिवर्यस्य स्वदेशीयचिन्तनं गान्धिचिन्तनात् अधिकव्यापकम् इति भाति मम । यद्यपि गान्धिवर्यात् पूर्वम् एव कुमारस्वामिवर्यः स्वदेशीयविषये लिखति, तथापि तस्य जीवितं तु आधिक्येन पाश्चात्यदेशेषु यापितम् अभवत् । गान्धिवर्यः स्वदेशे एव जीवनं यापितवान् । अन्यच्च सः स्वचिन्तनं स्वकीयेन व्यवहारेण प्रदर्शितवान् । अतः तदीयः विचारः देशे विशेषतः ख्यातः जातः ।''

''तदस्तु, येषु क्रैस्तगुरूणां विषये कठोरः निर्दयः च विमर्शः कृतः दृश्यते ते अपि प्रबन्धाः अत्र राष्ट्रियप्रबन्धानां मध्ये दृश्यन्ते । अतः तदीया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राष्ट्रकल्पना परमतासहिष्णुताम् अवलम्बते इति भासते ।''

''कुमारस्वामिवर्यस्य अन्यग्रन्थानां पठनात् एतस्य आशयस्य परिष्कारं प्राप्नोतु भवती । क्रिस्तः कश्चन महात्मा इति हार्दभावेन अङ्गीकरोति सः । तम् एव आशयं निष्पक्षपातं लेखेषु प्रकाशयति अपि । किन्तु 'क्रिस्तः एकः एव महात्मा, नान्यः कोऽपि' इति क्रिस्तगुरवः यां सङ्कुचितदृष्टिं प्रकाशयन्ति तां खण्डयति सः । अत्र या अस्ति, या च भवेत्, तां परमोत्कृष्टां संस्कृतिं क्रैस्तगुरवः कथम् उन्मूलयन्तः सन्ति इति तु मया पूर्वम् एव उक्तम् आसीत् ।''

''भवता उच्यमानाः केचन विषयाः मया न अवगम्यन्ते एव । भवदीया विचारसरणिः एव विलक्षणा । तस्याः अङ्गीकारः क्वचित् मम अशक्यः भवति ।''

''तस्य कारणं किम् इति अहं जानामि । भारतीयसंस्कृतिम् अनुसरतां नेतृत्वे भवत्याः विद्याभ्यासः, जीवनक्रमः च यदि प्रवृत्तः स्यात् तर्हि भवती सर्वम् अवगन्तुम् अशक्ष्यत् । किन्तु भवती आंग्लसंस्कृतिप्रभावयुक्ते परिसरे प्रवृद्धा । तत्र राष्ट्रियसंस्कृतेः विषये, तन्नाम भारतीयसंस्कृतेः विषये अनादरः, तिरस्कारः च । अत्र भवत्याः न कोऽपि दोषः ।''

आवाम् एवम् एव दीर्घकालं यावत् वार्तालापं कृतवन्तौ । राचम्मा मौनेन सर्वं शृण्वती उपविष्टवती आसीत् ।

अहम् उक्तवान् - ''द्वित्राणां पुस्तकानां पठनतः कोऽपि विषयः पूर्णतः न अवगम्यते । एकैकशः बहवः ग्रन्थाः पठनीयाः । कुमारस्वामिविषये मया अन्यत् किञ्चित् वक्तव्यम् अस्ति । तस्य पिता श्रीलङ्कीयः । माता आंग्लकुलजाता । तस्य विद्याभ्यासः तु इंग्लेण्ड्देशे प्रवृत्तः ।''

''एवम् !'' सकुतूहलं पृष्टवती लिल्ली ।

''अथ किम् ?''

''एवं तर्हि तस्य सर्वाणि पुस्तकानि अहं पठिष्यामि ।''

''भवत्याः मनोभूमिका एतस्मात् एव स्फुटीकृता भवति । सः आंग्लमहिलायाः सुपुत्रः, इंग्लेण्ड्देशे तस्य अध्ययनं प्रवृत्तम् इति यदा ज्ञातं तत्क्षणे एव भवती तद्विषये आस्थां प्राप्तवती । पश्चिमात् आगतम् एव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवादृशानां कृते रोचते । तदपि भवतु, पाश्चात्यैः बहुभिः भारतीयधर्मसंस्कृत्योः विषये बहवः ग्रन्थाः लिखिताः सन्ति । तान् भवती पठतु । भवती पाश्चात्यसंस्कारं प्राप्य प्रवृद्धा चेत् अपि भवत्याः रक्ते तु हिन्दुत्वम् एव प्रवहति । मम शरीरे यत् रक्तं प्रवहति तस्य, भवत्याः रक्तस्य च आनुवंशिकतया न कोऽपि विशेषभेदः ।''

मम अन्तिमवाक्यं श्रुतवत्याः लिल्ल्याः मुखं विवर्णं जातम् । अग्रे सा किमपि न उक्तवती । तस्याः चित्तम् अन्तर्मुखं जातम् । दश निमेषान् यावत् मौनम् आसीत् तत्र । 'अहं गृहं गच्छामि' इति उक्त्वा ततः निर्गतवती सा ।

''विलक्षणा बालिका । एवं ननु ?'' इति उक्तवती राचम्मा ।

लिल्ल्याः मनसि यत् प्रवर्तमानम् आसीत् तत् स्थूलतया अवगतम् आसीत् मया । किन्तु राचम्मां तु किमपि न उक्तवान् अहम् । ततः प्रस्थानसमये राचम्मा उक्तवती – ''अन्यत्र कुत्रापि गृहपाठः लभ्येत वा इति पश्यतु । गन्धवर्तिकानिर्माणागारस्य कार्यं भवान् परित्यजतु । भवादृशैः विद्यार्थिभिः कर्तुं योग्यं कार्यं न तत् ।''

तया यथा उक्तं तथैव प्रवृत्तम् । त्यागविषयः निर्माणागारस्वामिना स्वयम् उपस्थापितः । मह्यं सः त्रिंशद् रूप्यकाणि ददाति स्म खलु प्रतिमासम् ? तदेव कार्यं पञ्चविंशत्या रूप्यकैः कर्तुं सिद्धः कोऽपि तेन प्राप्तः । एवम् आगतः जनः पूर्वं कुत्रापि गणनां लिखति स्म । विरसकारणतः तत्रत्यः स्वामी तम् उद्योगात् च्यावितवान् । विवाहितस्य तस्य त्रयः पुत्राः अपि आसन् । मासं यावत् उद्योगं विना स्थितम् आसीत् तेन । अतः अत्यल्पवेतनेन एतत् कार्यं कर्तुं सिद्धः आसीत् सः । तस्य दयनीयां दशां दृष्टवति मयि करुणा उत्पन्ना ।

मया यदा कोलाहलः कृतः तदा निर्माणागारस्वामी कृतस्य कार्यस्य कृते यथायोग्यं वेतनं दत्त्वा एकमासस्य वेतनम् आधिक्येन दत्तवान् । यतः तेन एव अहं च्यावितः आसं खलु ?

प्राप्तेन धनेन अहं ऋणानि प्रत्यर्पितवान् । अन्यत्र कुत्रापि उद्योगार्थं प्रयत्नः पुनः न कृतः मया ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्यासु सार्वजनिकसंस्थासु यथा तथैव सुब्बुकृष्णय्यीयस्य अनाथालयस्य कार्यनिर्वाहकमण्डल्याः अपि परिवर्तनं जातम् । अध्यक्षः, कार्यदर्शी, सदस्याः च परिवर्तिताः अभवन् । नूतनः यः कार्यदर्शी आगतः सः महादर्शवादी । मम शासनकाले अनाथालयस्य यशः उत्तुङ्गशिखरं प्राप्नुयात् इत्येतया महत्त्वाकाङ्क्षया एव सः संस्थायाः आवरणे पदं स्थापितवान् ।

तस्य नाम अनन्तरामय्यः इति । केचन छात्राः उपहासार्थं तम् 'अनाथरामय्य'नाम्ना निर्दिशन्ति स्म क्वचित् । अनन्तरामय्यः पितुः अद्वितीयः पुत्रः । अपारायाः सम्पत्तेः उत्तराधिकारी सः । अल्पे एव वयसि तदीयः पिता दिवं गतः आसीत् इत्यतः बालकः रामय्यः एव गृहस्वामी जातः । तत्काले सः गान्धिः, अरविन्दः, रामकृष्णः इत्यादीनां विचारधारायाः प्रभावं प्राप्तवान् । गान्धिवर्यस्य स्वयम्प्रेरितं दारिद्र्यम्, अरविन्दस्य अध्यात्मयोगं, रामकृष्णस्य भक्तिमार्गं च युगपत् एव अनुसर्तुं सः उद्युक्तः अभवत् । तस्य परिणामतः परम्परया अनुवृत्ताः दानादयः स्थगिताः अभवन् । गान्धिः इव अनन्तरामय्यः अपि स्वशिरसः मुण्डनं स्वयम् एव करोति स्म । कलायं खादित्वा अजाक्षीरं पिबति स्म । तेनैव सह इष्टानि अन्यानि खाद्यपेयादीनि अपि सेवते स्म ।

तपःकाले रामकृष्णपरमहंसेन यथा कृतं तथा तेन भूमौ शयनं कृतं क्वचित् । तदा पत्नीपुत्रादयः तेन सूचिताः - शय्यायां शयनं न करणीयम् इति । स्वयं क्वचित् जानुमात्रलम्बिनीं वेष्टीं धरन् सः पत्नीम् आज्ञापितवान् - प्राचीनशाटिकाः एव धरणीयाः इति । प्राप्तवयस्काभिः पुत्रीभिः अपि प्राचीनशाटिकया निर्मिताः निचोलाः एव धरणीयाः अभवन् । गीतायां प्रतिपादितं कर्ममार्गं श्रेष्ठं भावयन् सः पुत्रीणां द्वारा शाकादिकं वर्धयति स्म । तेषां विक्रयणं कृत्वा प्राप्तं धनं वित्तकोषे स्थापयति स्म च । एवं स्वयम्प्रेरितं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दारिद्र्यम् अनुसृतम् इत्यतः प्रभूतं धनं सञ्चितम् अभवत् । तेन गृहाणि क्रीत्वा भाटकार्थं दत्तानि । भाटकद्वारा प्राप्तेन धनेन नूतनानि गृहाणि क्रीतानि । पुनः तानि अपि भाटकरूपेण दत्तानि ।

अनन्तरामय्यः यदा कार्यदर्शी जातः तत्क्षणे एव प्राचीनस्य प्रबन्धकस्य निवृत्तिं घोषितवान् । अनाथालयस्य सर्वाणि व्यवस्थासूत्राणि स्वयम् एवं गृहीतानि तेन । ततः आदौ पाचकाः उद्योगात् च्याविकाः । छात्राः एव पर्यायेण प्रतिदिनं पाकं कुर्युः इति आज्ञा कृता । शाकानाम् आनयने न्यूनता कृता । ग्रामीणदध्नः क्रयणं निवारितम् । अमेरिकीयैः भिक्षारूपेण अनुगृहीतं क्षीरचूर्णम् एव क्रिस्तगुरुतः आनायितम् । सर्वाधिकारी इव व्यवहरति स्म सः । यः छात्रः विरोधस्वरम् उत्थापयति सः 'डिस्मिस्'- पारितोषिकं लभते स्म । विद्यार्थिनाम् आत्मगौरवात्मविश्वासादयः धूलिसाज्जाताः । 'अनाथाः अगतिकाः दीनाः भवन्तः' इति निन्दनं प्रतिदिनं श्रोतव्यं भवति स्म तैः । पादांशुकधरणं धनिकत्वं द्योतयति इति कार्यदर्शिनः अभिप्रायः । अतः केनापि पादांशुकं न धर्तव्यम् इति आज्ञा कृता तेन । केनापि तत् ध्रियेत वा इति परीक्षितुं सः महाविद्यालयपरिसरे अटित्वा निरीक्षते स्म ।

तस्य अधिकारावधेः आरम्भानन्तरं मासत्रयाभ्यन्तरे छात्रैः अवर्णनीयानि कष्टानि अनुभूतानि । केनापि शिरसि केशाः न धर्तव्याः, सर्वैः अपि स्वयं मुण्डनं करणीयम् इति आज्ञा आगता । 'वयम् अनाथाः, निर्गतिकाः । अस्मभ्यं धनं धान्यानि प्राचीनवस्त्राणि च कृपया यच्छन्तु भवन्तः' इत्येतत् फलकं गृहीत्वा भानुवासरे भिक्षायाचनं करणीयम् इत्यपि आज्ञा आगता ।

अनाथालयः एव अ[illegible]शरणम् आसीत् बहूनां छात्राणां कृते । अनाथालयः परित्यक्तव्यः चेत् विद्याभ्यासः एव परित्यक्तव्यः भवति स्म तैः । अतः एतत् तुगलकशासनं विरोद्धुम् अशक्नुवन्तः भीत्या मौनम् अवलम्बितवन्तः आसन् ते । स्वाभिमानस्य सर्वनाशः यदा आसन्नः तदा केचन छात्राः विरोधे मतिं कृतवन्तः । तैः सह अहम् अपि सम्मिलितः ।

विरोधं कृतवतां ततः निष्कासनं तु निश्चितम् एव आसीत् । अन्तिमप्रयत्नरूपेण वयम् अष्ट जनाः अनाथालयस्य स्थितिं विस्तरेण विवृत्य निर्वाहकमण्डली शीघ्रम् एव छात्राणां समस्यां परिहरेत् इति अभ्यर्थ्य च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकं पत्रं सज्जीकृत्य कार्यकारिसमित्याः अध्यक्षस्य सदस्यानां च अवधानम् आकृष्टवन्तः । बहवः प्रतिष्ठानिमित्तम् अनाथालयस्य सदस्याः जाताः आसन् । पुनः केचन 'अस्मदीयाय कस्मैचित् कदाचित् अत्र अवकाशं दापयितुं शक्येत' इति उद्देशेन सदस्याः जाताः आसन् । अतः अस्माकं प्रार्थना अकिञ्चित्करी जाता । एतत् ज्ञातवान् कार्यदर्शी सङ्कल्पितवान् यत् एते कठोरं दण्डनीयाः इति ।

एकदा सः भोजनसमये अनाथालयम् आगत्य अस्मान् अष्ट जनान् अपि अवाच्यैः शब्दैः निन्दितवान् । 'कृतघ्नाः, पापिनः, दृप्ताः, उद्धताः' इत्यादिभिः शब्दैः तेन निन्दनं कृतम् । आध्यात्मवादिनः तस्य मुखात् 'रण्डापुत्रादयः' पवित्रशब्दाः अपि लीलया निर्गताः बहवः । एतत् सोढुम् अशक्नुवन् अहम् उत्थाय - ''जिह्वानियन्त्रणं भवतु श्रीमन् ! एतादृशानि वचनानि भवतः योग्यतायाः अनुगुणानि न'' इति उक्तवान् ।

कार्यदर्शी उन्मत्तः शुनकः इव जातः । ''रण्डापुत्र ! वैधवेय ! भवतः सहवासात् एव सर्वे भ्रष्टाः जाताः । भवन्तम् .....'' इति कर्कशशब्दैः किमपि वक्तुम् उद्युक्तः अभवत् ।

तदा वयम् अष्ट जनाः अपि उत्थितवन्तः । श्रीकण्ठनामकः दृढकायः शीघ्रकोपी अविचारकारी प्रमादी छात्रः अग्रे गत्वा कार्यदर्शिने चपेटाः दत्तवान् । केचन अग्रे गत्वा कार्यदर्शिनः हस्तौ गृहीतवन्तः । श्रीकण्ठः तं मुष्ट्या द्वित्रवारं पृष्ठे प्रहृतवान् । एतस्मात् कार्यदर्शी मूर्च्छां प्राप्य पतितः । तत् दृष्ट्वा वयं भीताः । केचन अध्यक्षस्य गृहं गत्वा प्रवृत्तं निवेदितवन्तः । वयं शैत्योपचारेण कार्यदर्शिनं सचेतनं कृतवन्तः । तदभ्यन्तरे अध्यक्षस्य कार्यानम् अनाथालयस्य पुरतः आगत्य स्थितम् । केचन सदस्याः अपि आगताः । निर्वाहकमण्डल्या निर्णयः कृतः - 'एते अष्ट अपि छात्राः अनाथालयात् निष्कासनीयाः । आरक्षकाधीनाः करणीयाः च । उद्धतव्यवहारवन्तः एते विद्यालयात् अपि निष्कासिताः यथा स्युः तथा करणीयम्' इति ।

न्यायप्राप्त्यर्थम् अस्माभिः अनुसृतं शान्तिमार्गं वयं विवृतवन्तः । 'यदि निर्वाहकमण्डल्या अस्माकम् अभ्यर्थनाविषये पूर्वम् एव अवधानं दत्तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यात् तर्हि एवं न अभविष्यत् । अतः इदानीं प्रवृत्तस्य परोक्षकारणीभूताः सन्ति अध्यक्षसदस्यादयः एव' इति वयं प्रतिपादितवन्तः । तथापि तेषां मनःपरिवर्तनं न जातम् । अध्यक्षः कागदम् आनाय्य आरक्षकप्रमुखाय दातुं पत्रं सज्जीकृतवान् । मया अन्तिमास्त्रं प्रयुक्तम् - ''गौरवप्राप्त्यर्थं भवते एतादृशसंस्थानाम् अध्यक्षपदवी आवश्यकी । किन्तु छात्राणां समस्यानिवारणे अल्पा अपि आसक्तिः न दृश्यते । अन्यसंस्थासु इव अत्रापि बहवः लोपाः अव्यवहाराः च सन्ति एव । यदि भवन्तः अस्मान् आरक्षकाधीनान् कुर्वन्ति तर्हि वयम् अपि अनन्यगतिकाः सन्तः अनाथालयस्य अव्यवहारान् विस्तरेण पत्रिकासु लेखरूपेण प्रकाशयिष्यामः । परिस्थितिः कथञ्चित् विषमा अस्ति । अग्रे यत् भविष्यति तत् सोढुं सिद्धाः वयम्'' इति ।

अध्यक्षः निर्वचनः जातः । सदस्याः पुनः समालोचनं कृतवन्तः । आरक्षकप्रमुखाय दातुं सज्जीकृतं पत्रं छिन्नीकृतम् । कार्यदर्शी स्वयम्प्रेरणया त्यागपत्रं समर्पितवान् । 'अन्यस्य कार्यदर्शिनः नियुक्तिपर्यन्तम् अध्यक्षः एव व्यवस्थाभारं निर्वहेत् । पूर्वतनाः उदारनियमाः सर्वे तत्क्षणे एव व्यवहारपथम् आगच्छेयुः' इति निर्णीतम् । 'अष्टजनानां विषये कठोरदण्डनं न विधीयते । ते स्वयम्प्रेरणया एव अनाथालयं परित्यजेयुः' इत्यपि निर्णयः कृतः । अस्माकं सर्वविधप्रार्थनाः व्यर्थाः जाताः । निर्वाहकमण्डल्याः दृष्ट्या वयम् अष्ट जनाः दुष्टाः इव जाताः आस्म ।

अष्ट अपि वयं ततः बहिः आगताः । बहिष्कारं प्राप्तवताम् अस्माकम् अष्टजनानां कारणतः अन्ये सर्वे छात्राः मानवीयजीवनं यापयितुम् अवकाशं प्राप्तवन्तः आसन् । एषा एव तृप्तिः अस्माकम् । अनन्तरदिने बहवः छात्राः अस्मान् दृष्ट्वा खेदातिशयं प्रकटितवन्तः । सर्वे हार्दभावेन कृतज्ञतां समर्पितवन्तः । प्रौढशालीयाः केचन छात्राः तु अश्रूणि स्रावितवन्तः ।

वयम् अशरणाः आस्म । आश्रयदात्र्याः मातृसंस्थातः दूरं गताः आस्म ।

अत्रान्तरे परीक्षापरिणामः प्रकाशितः । मया द्वितीयश्रेणी प्राप्ता आसीत् । कोऽपि गृहपाठः न आसीत् मम । हस्ते धनम् अपि न आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विद्यालयीयशुल्कम् अपि न दत्तम् आसीत् मया । भोजनसमस्या तीव्रतया मां बाधते स्म । किङ्कर्तव्यतामूढः जातः आसम् । दिनद्वयं हतमतिना इव प्रकोष्ठे एव शयनं कृतम् । अनन्तरदिने मार्गे मार्गे अटित्वा उद्योगान्वेषणं कृतम् । सर्वत्र निराशा एव । प्रौढशालायाम् अध्ययनसमये चर्चास्पर्धासु भागं गृह्णता मया कानिचन रजतपदकानि प्राप्तानि आसन् । 'तेषां विक्रयणं कृत्वा प्राप्तेन धनेन शुल्कं पूरणीयम् । अग्रे शक्यं चेत् अध्ययनस्य अनुवर्तनम् । अन्यथा मार्गान्तरस्य अवलम्बनम्' इति निश्चित्य अहं प्रकोष्ठं गतः । सर्वाणि पदकानि स्वीकृत्य मया आभरणापणं प्रति गतम् । तानि दृष्ट्वा आपणिकः उक्तवान् - ''पारितोषिकत्वेन एव एतेषां मूल्यम् । एतानि कृत्रिमरजतमयानि । सर्वेषां विक्रयणतः अपि त्रिंशत् रूप्यकाणि न प्राप्येरन्'' इति ।

अनन्यगतिकतया यावत् प्राप्तं तावत् गृहीत्वा महाविद्यालयं गत्वा शुल्कं पूरितं मया । तदनन्तरं चत्वारि रूप्यकाणि अवशिष्टानि । दिनद्वयतः भोजनं न आसीत् मम । आकण्ठं भोक्तव्यम् इति उद्देशेन भोजनालयः गतः मया । किन्तु कवलद्वयभक्षणात् एव उदरे कश्चन तापः दृष्टः । अग्रे खादितुम् इच्छा न आसीत् । तथैव उत्थाय हस्तं प्रक्षाल्य आगतः अहम् । मार्गे श्रीकण्ठः मिलितः । अनाथालये तुगलक्राजाय चपेटारुचिं दर्शितवान् धीरः सः । स्थूलकायः धैर्यशीलश्च सः शीघ्रकोपी । कोपकाले आत्मना किं क्रियमाणम् अस्ति इत्येव न जानाति स्म सः । दिनत्रयतः तस्यापि भोजनं न आसीत् प्रायः । अहम् एव तम् आहूय वार्तालापं कृतवान् । भोजनार्थं तं भोजनालयं नीतवान् । मम इव एव आसीत् तस्यापि स्थितिः । कवलद्वयात् अधिकं सेवितुं न शक्तं तेनापि । ततः प्रस्थाय उभौ अपि मम प्रकोष्ठम् आगतवन्तौ । प्रकोष्ठस्वामी भाटकधनार्थं मम प्रतीक्षां कुर्वन् आसीत् । कथञ्चित् समाधाय सः प्रेषितः मया । ततः श्रीकण्ठः उक्तवान् - ''एकं चोद्यं प्रवृत्तम् ।''

''किं तत् ?''

''एतत् नगरं प्रति महाप्रस्थानाचार्याः भृङ्गगिरिमठाधीशाः श्री श्री श्री स्वामिपादाः आगताः सन्ति । अहं तेषां दर्शनार्थं गतः । पामरेण मया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कष्टेन तेषां दर्शनं प्राप्तम् । 'अहं निर्गतिकः अस्मि । वृद्धात् पितामहात् ऋते मम कोऽपि बन्धुः नास्ति' इति मया निवेदितम् । तस्य उत्तररूपेण स्वामिभिः यत् उक्तं तत् नितरां 'श्लाघास्पदम्' आसीत् ।''

''किम् उक्तं तैः ?''

''इदानीं धर्मः नश्यन् अस्ति । प्राचीनविद्यां वेदोपनिषदः च पठितुं कोऽपि न उत्सहते । भवान् आंग्लविद्यां पठति इत्यतः अस्माभिः साहाय्यं कर्तुं न शक्यते । संस्कृतं यदि पठ्येत तर्हि साहाय्यं करिष्यते इति तैः उक्तम् । उभयस्यापि अध्ययनं किं शक्यते इति मया पृष्टम् । अन्यत्र पठतां संस्कृतविद्यालये प्रवेशः न भवति इति उक्तं तैः ।''

''भवता किमर्थं तदेव न पठनीयम् ?''

''तस्यापि पठनस्य अनुभवः मम अस्ति सत्य ! बाल्ये शिखाधारी सन् अहं संस्कृतपाठशालां गच्छामि स्म । तत्र अर्थविवरणं न क्रियते । कण्ठस्थीकरणम् एव प्रमुखं कार्यं तत्र । अध्यापने कस्यापि शिक्षकस्य आसक्तिः न भवति । प्रश्नकरणस्वातन्त्र्यम् एव कस्यापि छात्रस्य न भवति । एतादृशे परिसरे तत्र कथं वा अध्येतुं शक्येत ? अध्ययनं वा तत्र कुत्र अस्ति ?''

'आधुनिकविचारान् विद्याभ्यासं च अस्माकं धर्मप्रमुखाः अस्पृश्यान् भावितवन्तः इत्यतः विद्यावतां धर्मे श्रद्धा न्यूना जायमाना अस्ति । विद्यावतां जनानां विषये मतम् अकिञ्चित्करं जातम् अस्ति । प्राचीनार्वाचीनयोः समन्वयः चिन्तनीयः मठाधिपतिभिः । अन्यथा हिन्दुधर्मः इतोऽपि अधिकशिथिलतां याति' इति विचारः मनसि आगतः । किन्तु एतादृशान् अंशान् चिन्तयितुं मम आसक्तिः न आसीत् तदा । उदरम्भरणम् एव समस्यायै जातम् आसीत् खलु ?

श्रीकण्ठः अवदत् - ''वयं त्रिचतुराः क्षीरकरण्डान् बैबलपुस्तकानि च याने आरोप्य क्रैस्तगुरवे प्रत्यर्प्य आगताः खलु ? तत्र दृष्टः सेवकः कदाचित् मिलितः । सः एव माम् अभिज्ञाय वार्तालापं कृतवान् । एतावत्पर्यन्तम् अपि मम मुखं सः कथं स्मरति स्म इति न ज्ञायते । तस्य सौजन्येन वशीकृतः अहं मम दुर्गतिं तं निवेदितवान् । सः एकं समस्यापरिहारमार्गं सूचितवान् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''कः मार्गः सः ?''

''अस्माकं क्रैस्तालयगुरुं दृष्ट्वा अस्मन्मतम् अवलम्बितम् चेत् निश्चयेन साहाय्यं करिष्यति सः । निश्शुल्कछात्रावासे प्रवेशं दापयिष्यति अपि । विद्यार्थिवेतनम् अपि दाप्येत । तेन भवतः पठनं निर्विघ्नं भवेत्' इति वदति सः ।''

''भवता किं वा उक्तम् ?''

''उत्तरं किमपि न उक्तम् । 'विचिन्त्य उत्तरं वदतु' इति सः एव मां सूचितवान् । भवान् वदतु, मया किमर्थं तत् मतं न अवलम्बनीयम् ?''

श्रीकण्ठस्य वचनस्य श्रवणात् मयि व्यथा उत्पन्ना । खेदः अपि जातः । ''अल्पस्य कष्टस्य निमित्तं स्वधर्मं विक्रीय किमर्थं परैः दीयमाना कृपाभिक्षा याचनीया ?'' इति प्रतिप्रश्नं कृतवान् अहम् ।

तदा श्रीकण्ठः अवदत् - ''भवतः धर्मेण मदर्थं किं वा कृतम् ? यस्य रक्षणं मठाधिपतयः एव न इच्छन्ति तस्य धर्मस्य रक्षणम् अस्माभिः किमर्थं चिन्तनीयम् ? धर्मरक्षणं बोध्यते खलु भवता ? तस्य धर्मस्य बलात् कवलमितम् अन्नं दापयतु, पश्याम ।''

मया किं वा वक्तुं शक्येत ? 'अलं प्रमादेन' इति एतावन्मात्रम् एव उक्तम् । सायङ्कालपर्यन्तं मम प्रकोष्ठे एव स्थितः आसीत् सः । प्रस्थानसमये अहं स्मारितवान् - ''अलम् अविचिन्तितकार्येण । कोपकाले छेदिता नासिका शान्तिकाले पुनः न प्राप्यते । स्मरतु एतत्'' इति । 'अहं पितामहं द्रष्टुं ग्रामं गच्छन् अस्मि' इति उक्त्वा प्रकोष्ठात् निर्गतः सः ।

मम इव श्रीकण्ठस्यापि मातापितरौ न स्तः । वृद्धः पितामहः कस्मिंश्चित् ग्रामदेवालये अर्चकत्वेन कार्यं कुर्वन् जीवनं यापयति स्म । दक्षिणारूपेण प्राप्तानि नाणकानि सङ्गृह्य पौत्राय तदा तदा किञ्चित् प्रेषयति स्म सः ।

* * *

सप्ताहः अतीतः । मम स्थितिः दिने दिने विषमतां याति स्म । द्वित्रेषु दिनेषु एकवारम् अपि भोजनं न लभ्यते स्म । मित्राणां सकाशात् यत्किञ्चित् ऋणं प्राप्तं चेत् यत्किमपि क्रीत्वा खादामि स्म । मम मित्राणि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि कीदृशानि ? अर्धरूप्यकात् अधिकं कस्यापि कोषे कथमपि न भवति स्म । तादृशाः 'कुबेरपुत्राः' कथं वा ऋणं दद्युः ? दिनेषु अतीतेषु मयि निश्शक्तिः दृष्टा । आदिनं शयनात् नीरसता वर्धते स्म । कुत्रापि अटितुं पादयोः शक्तिः न भवति स्म । 'एवम् एव दिनानि गतानि चेत् स्थितिः इतोऽपि विषमा भविष्यति । ततः पूर्वं किमपि प्रतिविधानं करणीयम्' इति चिन्तितं मया ।

अनन्तरदिने मित्रस्य प्रकोष्ठं गत्वा तदीयेन क्षौरसाधनेन मुखक्षौरं कृतं मया । यतः क्षुरपत्रं क्रेतुं मम समीपे धनं न आसीत् । फेनकस्य अभावतः अक्षालितानि वस्त्राणि मलिनानि जातानि आसन् । मित्रस्य एव शुभ्रवस्त्रं धृत्वा केशप्रसाधनं च कृत्वा शान्तप्पश्रेष्ठिवर्यस्य गृहं गतं मया । श्रेष्ठिवर्यः गृहे आसीत् । मम कष्टस्थितिं निवेद्य - 'भवतां छात्रावासे मम भोजनार्थं व्यवस्था करणीया' इति अहं प्रार्थितवान् । श्रेष्ठिवर्यः क्षणकालं चिन्तितवान् । मद्विषये तस्य विशेषाभिमानः आसीत् एव । तथापि ब्राह्मणच्छात्राय लिङ्गायतछात्रावासे प्रवेशदानसमये केनचित् अपि चिन्तनीयं भवति एव खलु ? 'वासः इदानीम् इव प्रकोष्ठे एव भवतु । द्विवारं भोजनालये भोजनं करोतु' इति उक्त्वा एकं पत्रं लिखित्वा दत्तवान् सः ।

तत् पत्रं स्वीकृत्य छात्रावासस्य पाचकाय दत्तं मया । सः भोजनं परिविष्टवान् । आतृप्ति भोजनं कृत्वा प्रकोष्ठं प्रत्यागतवान् अहम् । तस्मिन् दिने महाविद्यालयं प्रति मया न गतम् । भोजनात् श्रान्तिः लक्ष्यते स्म । भोजनचिन्ता तु परिहृता आसीत् । 'द्वित्रदिनाभ्यन्तरे कुत्रापि गृहपाठार्थम् अवसरः लब्धः चेत् धनसमस्या अपि परिहृता भवेत् । पठनं तु स्थगितं न भविष्यति । अग्रे अवश्यं पठनीयं मया' इति चिन्तयन् अहं शयनं कृतवान् । मनसा काचित् तृप्तिः प्राप्ता आसीत् ।

किन्तु एषा तृप्तिः सायङ्काले एव भग्ना । रात्रिभोजनार्थम् अहं यावत् विद्यार्थिनिलयं गतः तावता मम ब्राह्मणकुलजातत्वं तत्रत्यैः छात्रैः ज्ञातम् आसीत् । अतः ते 'भवान् अनन्तरपङ्क्तौ भोजनं करोतु' इति सूचितवन्तः । प्रथमपङ्क्तौ स्थलावकाशः न स्यात् इति विचिन्त्य अहं बहिः अङ्गणे उपविष्टवान् । द्वितीयपङ्क्तौ अहम् एकः एव आसम् । इतस्ततः सञ्चारव्याजेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकैकशः आगत्य छात्राः मम भोजनं पश्यन्तः आसन् । एकः अपरम् अवदत् - 'किं भोः, भोजनं प्राप्यते चेत् स्वजातिम् अपि विस्मरति भवान् !'

एतत् माम् एव उद्दिश्य उक्तम् इति मया झटिति अवगतम् । 'वयम् एव श्रेष्ठाः इति ब्राह्मणाः भावयन्ति । अस्मत्तः श्रेष्ठाः अन्ये न सन्ति इति लिङ्गायताः चिन्तयन्ति । अन्यजातीयात् वयम् एव श्रेष्ठाः इति उभयजातीयाः अपि अभिप्रयन्ति । ब्राह्मणेतराः ब्राह्मणैः सह उपविश्य भोजनं कर्तुम् इच्छन्ति । किन्तु ते एव हरिजनाय सहपङ्क्तिभोजनं दातुं न इच्छन्ति । एषा हिन्दुसमाजस्य स्थितिः । .....' एवं चिन्तयन् अहम् भोजनम् अनुवर्तयितुम् अनिच्छन् ततः उत्थाय आगतवान् ।

कष्टम् अपगतम् इति आदिनं चिन्तयन् आसम् । तत् चिन्तनं क्षणिकम् इति वदता कष्टेन पुनः आगतम् आसीत् । आगमनसमये अपरिमिताम् अविस्मरणीयाम् असह्यां वेदनाम् अपि आनीतवत् आसीत् तत् ।

मनसि विविधाः विकल्पाः उत्पद्यन्ते स्म । 'अहं यदि धनिकपुत्रः स्याम् .....', 'अदृष्टपत्रद्वारा पञ्चाशत्सहस्रं रूप्यकाणि यदि प्राप्तानि स्युः .....' इत्यादीनि चिन्तनानि मनसि उत्थाय विलयं यान्ति स्म । 'नञ्जुण्डाय पत्रं लिखानि किम् ?' इत्यपि चिन्तनं सकृत् आगतम् । 'सद्योविवाहितस्य तस्य व्ययाः अनल्पाः । यत्र कार्यं क्रियते तत्र पत्न्या सह वासार्थं गृहव्यवस्था करणीया । ग्रामं प्रति अपि धनं प्रेषणीयम् । अनुजानाम् अध्ययनव्यवस्था अपि तेनैव द्रष्टव्या । तदीयानि कष्टानि एव पर्वताकाराणि सन्ति । एवं स्थिते मदीयानाम् अपि कष्टानाम् आरोपः अन्याय्यः स्यात् । अन्यच्च औदार्यस्य लाभस्वीकारस्य अपि काचित् परिमितिः भवेत् । मम भगिनीं शकुन्तलां परिणयता तेन बहुधा उपकृतम् । मम जीवनं कथञ्चित् प्रचलेत् । यदि एतदवसरे शकुन्तलायाः विवाहः अपि प्रवृत्तः न स्यात् तर्हि का गतिः अभविष्यत् मम ?' इत्येवं चिन्तयन् अहं तं किमपि न सूचितवान् एव । दिनानि कानिचन पुनः गतानि ।

एवम् एव अपरः सप्ताहः अपि अतीतः । उपवासारम्भकाले उदरे तापमात्रं भवति स्म । इदानीं वमनशङ्का अपि आरब्धा । मौनेन स्थित्वा न किमपि प्रयोजनम् इति विचिन्त्य अहम् उपाहारगृहे वितारककार्यम् अन्वेष्टुम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उद्युक्तः अभवम् । अल्पवेतनेन अपि कार्यं करोमि इति उपाहारमन्दिरस्वामिनः उक्ताः । वेतनं न प्राप्येत चेदपि भोजनचिन्ता वा परिहृता भवेत् इति मम चिन्तनम् । किन्तु कोऽपि उपाहारमन्दिरस्वामी आशादायकम् उत्तरं न दत्तवान् । अनुभववत्सु एव निरुद्योगिषु सत्सु अननुभविने मह्यं ते कथं वा उद्योगं दद्युः ? विक्रयणयोग्यं वस्तु मत्समीपे किमपि स्यात् वा इति प्रतिदिनम् अपि अहम् अन्विष्यामि स्म । आत्मानम् एव विक्रेतुम् अपि अहं सिद्धः आसम् । किन्तु क्रेता कः ?

एकदा मध्याह्नकाले त्रिवादनसमये प्रकोष्ठे सुप्तवान् आसम् । द्वारताडनशब्दः श्रुतः । शयानः एव अहं पृष्टवान् - 'कः ?' आगन्ता द्वारम् उद्घाट्य अन्तः आगतः । अहं परिवृत्त्य दृष्टवान् । देवप्रसादः उपस्थितः अस्ति ! अहं झटिति उत्थाय उपविष्टः । देवप्रसादः मम पार्श्वे उपविश्य पृष्टवान् - ''मद्गृहं प्रति भवतः आगमनानन्तरं मासः अतीतः । किमर्थम् एवम् ?''

''कार्यान्तरव्यग्रः आसम् । समयः न प्राप्तः ।''

''सर्वं ज्ञातं मया । यत्र भवान् भोजनं करोति स्म तस्य अनाथालयस्य छात्रः तिरुनारायणः ह्यः मिलितः आसीत् । सः सर्वम् उक्तवान् । इदानीम् अहं महाराजमहाविद्यालये अध्यापकः अस्मि । उपस्थितिसञ्चिकायां भवतः नाम दृष्टम् । किन्तु कक्ष्यायां भवान् न आसीत् । ह्यः एव कथञ्चित् मया भवतः प्रकोष्ठः अन्विष्टः । किन्तु भवान् प्रकोष्ठे न आसीत् । गृहे राचिः चिन्ताक्रान्ता अस्ति । उत्तिष्ठतु, गच्छाम'' इति वदन् प्रतिवचनार्थम् अपि अवकाशम् अयच्छन् अनुरोधपूर्वकं मां सः उत्थापितवान् ।

मम निश्शक्तिः तेन ज्ञाता इति मन्ये । अतः अश्वशकटे माम् उपवेश्य द्विचक्रिकया अनुसृतवान् सः । गृहप्राप्त्यनन्तरं - 'महाविद्यालये मम किञ्चित् कार्यम् अस्ति' इति उक्त्वा द्विचक्रिकाम् आरुह्य सः ततः निर्गतवान् । 'एतादृश्यां परिस्थितौ मम उपस्थितिः सङ्कोचाय भवेत्' इति विचिन्त्य सः तथा कृतवान् स्यात् ।

राचम्मा मम पार्श्वे स्थिते आसन्दे उपविश्य मां तीक्ष्णदृष्ट्या दृष्टवती । मम मुखे श्मश्रु प्रवृद्धम् आसीत् । कपोलौ निश्शक्तिं निर्दिशतः स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धृतानि वस्त्राणि मलिनानि मृद्वर्णीयानि च आसन् । अहं आसन्दस्य पृष्ठभागम् अवलम्ब्य उपविष्टवान् । पञ्च निमेषान् यावत् मां निर्निमेषं दृष्ट्वा सा खेदातिशयमिश्रितेन स्वरेण पृष्टवती - ''राचम्मा दिवं गता अस्ति इति चिन्तितवान् वा भवान् ?'' इति ।

''किमर्थं तथा वदति भवती ?''

''किम् अन्यत् वदेयम् ? एतादृश्यां कष्टस्थितौ अपि अस्मत्तः दूरे तिष्ठतः भवतः मनः कियत् कठिनं स्यात् ? भवान् कुत्र, किं करोति इति ज्ञातुं मया कियान् प्रयासः करणीयः अभवत् इति किं भवान् जानाति ? पाषाणहृदयी भवान् ।''

अहं प्रत्युत्तरं किमपि न उक्तवान् । आर्द्रस्वरेण सा पुनः उक्तवती - ''पूर्वजन्मानि भवन्ति इति हिन्दवः भावयन्ति खलु ? पूर्वस्मिन् जन्मनि अग्रजात्वेन अनुजात्वेन वा तिष्ठन्ती अहं भवन्तं पीडितवती स्याम् । इदानीं तस्य प्रतीकारं साधयन् अस्ति भवान् ।''

एतावत् उक्त्वा सा अन्तः गतवती । नारङ्ग-सेव-कदलीफलादिभिः पूर्णया स्थालिकया सह बहिः आगत्य तां स्थालिकां मम पुरतः स्थापयित्वा मत्समीपे एव उपविश्य एकैकशः फलानां त्वचम् अपनीय मह्यं दत्तवती । अहं मौनेन सर्वं खादितवान् । पुनः अन्तः गत्वा क्षीरम् आनीय यच्छन्ती - ''अत्र जलं किञ्चिदपि न योजितम् । शर्करामात्रं योजितम् । एतत् पिबतु'' इति उक्तवती ।

अहं क्षीरं पीतवान् । ततः शरीरे शक्तिसञ्चारः जातः । चित्तग्लानिः किञ्चिदिव अपगता इव ।

''अनाथालये किं किं प्रवृत्तम् इति इदानीं विस्तरेण वदतु'' इति स्नेहातिशयपुरस्सरं उक्तवती सा ।

अहं सर्वम् आद्यन्तं विवृतवान् । सर्वं श्रुत्वा सा प्रकोष्ठं गत्वा एकं रूप्यककागदबन्धम् आनीय मह्यं यच्छन्ती - 'एतत् गृहाण' इति उक्तवती ।

अहं निराकृतवान् । सा अनुरोधं कृतवती । अन्ते बलात् तत् धनं कोषे स्थापयन्ती - ''भवान् एवम् एव धनं न स्वीकरोति इति अहं जानामि । एतत्प्रदेशे मत्परिचितम् एकं गृहम् अस्ति । तत्रत्ये उभे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकादशकक्ष्यायां पठतः । ते अपि तर्कशास्त्रम् एव पठतः । 'भवान् सम्यक् पाठयति' इति अहं तत्र उक्तवती अस्मि । तयोः बालिकयोः माता मम दूरबन्धुः अपि । धनिकगृहं तत् । भवान् सूचनीयः इति उद्देशेन आ सप्ताहात् अन्वेषणप्रयत्नं कुर्वती आसम् । तयोः पाठनं करोतु । प्रतिमासं पञ्चाशत् रूप्यकाणि दीयन्ते । यदा धनं प्राप्यते तदा एतत् प्रत्यर्पयितुम् अर्हति भवान् । एतत् इदानीं व्ययार्थं भवत्समीपे भवतु'' इति उक्तवती ।

प्रतिवचनं किं वक्तव्यम् इत्येव मया न ज्ञातम् । कृतज्ञताभारतः अहं मूकः । किञ्चित्कालानन्तरम् अहं यदा प्रस्थितः तदा राचम्मा – ''श्वः सायम् आगच्छतु । तद्गृहं नीत्वा परिचयं कारयिष्यामि'' इति सूचितवती ।

गृहात् निर्गत्य अहं मार्गं यदा आगतः तदा सा उच्चस्वरेण उक्तवती – ''बस्यानेन अश्वशकटेन वा प्रकोष्ठं गच्छतु, पादाभ्यां मास्तु'' इति ।

ततः अहं साक्षात् प्रकोष्ठं गतः । राचम्मा पञ्चाशत् रूप्यकाणि दत्तवती आसीत् । प्रकोष्ठस्वामिने आदौ भाटकधनं दत्तम् । ततः उपाहारमन्दिरं गत्वा भोजनं कृतम् । आगमनसमये फेनकम् आनीतम् । रात्रौ द्वादशवादनपर्यन्तं वस्त्रप्रक्षालनं कृतम् । आच्छादकात् ऋते अन्यानि सर्वाणि क्षालितानि मया । शयनसमनन्तरम् एव गाढनिद्रा प्राप्ता ।

अनन्तरदिने प्रातः केशकर्तनालयं गत्वा केशकर्तनं कारितम् । वस्त्राणां समीकरणं कारितम् । स्नात्वा वस्त्रं धृत्वा उपाहारमन्दिरे भोजनं कृत्वा स्नातककक्ष्याप्रकोष्ठः ऐदम्प्राथम्येन प्रविष्टः मया । प्रथमकालांशे देवप्रसादस्य एव पाठः आसीत् । सायं राचम्मया सह गत्वा पाठसमयं निश्चित्य – 'श्वः आरभ्य पाठं करिष्यामि' इति उक्त्वा अहं प्रत्यागतः ।

प्रतिदिनं प्रातः पाठः करणीयः भवति स्म । प्रातः उत्थाय स्नात्वा सप्तवादने पाठगृहं प्रति गच्छामि स्म । नववादनपर्यन्तं पाठः । पुनः प्रकोष्ठम् आगत्य उपाहारगृहे भोजनं समाप्य महाविद्यालयं प्रति धावनीयं भवति स्म । प्रतिदिनम् एवम् अटनं क्लेशाय भवति स्म । भोजनादिनिमित्तं यावत् आवश्यकं तावत् पाठतः प्राप्यते स्म । अग्रे पठन् अस्मि इत्येषः आनन्दः मनः तोषयति स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विंशतिदिनानाम् अनन्तरं राचम्मा उक्तवती - ''अत्रैव वसन्तः त्रयः बालाः प्रौढशालायां पठन्ति । प्रतिवेशिनः ते । तान् मेलयित्वा प्रतिदिनं पाठयतु । ततः त्रिंशद् रूप्यकाणि प्राप्यन्ते ।''

प्रतिदिनं प्रातः सायं च सुदूरं गमनागमनं क्लेशाय भवति स्म । तथापि आयसम्भावनां निराकर्तुं मनः न आसीत् । ''इदानीं भोजनादिनिमित्तं यावत् आवश्यकं तावत् सम्पाद्यमानम् अस्ति चेदपि वर्षान्त्ये शुल्कस्य दानार्थं वस्त्रादीनां निमित्तं च धनम् आवश्यकं भवति एव । अतः एतं प्रस्तावम् अङ्गीकरोतु'' इति सानुरोधम् उक्तवती राचम्मा । पाठनात् मया यत् धनं प्राप्यते स्म तस्य पृष्ठभूमिकायां राचम्मायाः प्रभावः महान् आसीत् ।

गमनागमनक्लेशपरिहारम् अपि सा एव सूचितवती - ''इदानीं यत्र वासः क्रियते तं प्रकोष्ठं परित्यज्य एतत्प्रदेशे एव अनुकूलकरः एकः भाटकप्रकोष्ठः प्राप्तव्यः । सायङ्कालीनपाठस्य छात्राः प्रकोष्ठम् एव आगच्छेयुः पाठार्थम् । प्रातःकाले बालिकयोः गृहं गत्वा पाठः करणीयः । महाविद्यालयं प्रति बस्यानेन गमनागमनं करणीयम्'' इति ।

तस्याः सूचना ग्राह्या जाता । सप्ताहाभ्यन्तरे मया दशरूप्यकभाटकेन नूतनः प्रकोष्ठः प्राप्तः । गृहस्य अट्टे आसीत् प्रकोष्ठः । वायुप्रकाशादयः सम्यक् प्राप्यन्ते स्म । प्रकोष्ठं प्रति गमनागमनार्थं गृहात् बहिः एव सोपानानि आसन् । अतः मम गमनागमनेन गृहस्वामिनः कोऽपि क्लेशः न भवति स्म । जलं तु अधस्तात् नेतव्यं भवति स्म । अन्यः सन्तोषकरः अंशः नाम मम प्रकोष्ठः राचम्मायाः गृहतः अनतिदूरे एव आसीत् ।

अहं यान् पाठयन् आसं ते सर्वे क्रैस्ताः एव । कदाचित् भासते स्म - 'क्रैस्तानां पाठनतः प्राप्तेन धनेन मया जीवनं करणीयं किम् ?' इति । पुनः चिन्तनं भवति स्म - 'पाठनम् अपि वाणिज्यम् इव । क्रेता यः कोऽपि भवतु नाम । योग्यस्य मूल्यस्य प्राप्तिः एव मुख्या । मयि अपरिमितं स्नेहं विश्वासं च या प्रदर्शयति सा राचम्मा किं न क्रैस्तकुलीया ?' इति ।

राचम्मायाः विषये जातिमतादिविषयाः कदापि मम मनसि न आगच्छन्ति स्म । तस्याः व्यक्तित्वं स्नेहः च मम मनसि अभिव्याप्तं भवति स्म सदापि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कदाचित् राचम्मया सह वार्तालापं कुर्वन् उपविष्टवान् आसम् । अर्धघण्टानन्तरं काचित् आगत्य आवयोः पार्श्वे स्थिते आसन्दे उपविष्टवती । वार्तालापमग्नः अहं 'सा का' इति न लक्षितवान् । राचम्मा तां सकृत् दृष्ट्वा मन्दहासं प्रकटितवती । आवयोः वार्तालापः अनुवर्तमानः आसीत् । तदा सा तृतीया एव उक्तवती – ''पुरतः उपविष्टवत्या अपि मया सह वार्तालापः न क्रियते किमर्थम् ? किम् अपराद्धं मया ?'' इति ।

अहं तस्याः दिशि दृष्टिं प्रसारितवान् । मया अत्याश्चर्यं प्राप्तम् । ''भवती ! अहो आश्चर्यम् !! काऽपि अपरिचिता महिला आगत्य उपविष्टवती इति चिन्तयन् अहम् अवधानम् एव न दत्तवान् । कथम् एतत् परिवर्तनम् ! कथम् एतस्य वेषस्य धारणम् ?'' – अहम् आश्चर्येण पृष्टवान् ।

लिल्ली भारतीयस्त्री इव शाटिकां धृतवती आसीत् । कर्तितान् एव केशान् द्विधा विभज्य सीमन्तं रचयित्वा केशप्रसाधनं कृतवती आसीत् । ''वेषः परिवृत्तः चेत् व्यक्तिः किं परिवर्तिता स्यात् ?'' इति पृष्टवती सा ।

''तथा तु नास्ति । किन्तु 'वेषः व्यक्तित्वस्य बाह्यावरणम् इव' इति पठितं स्मरामि अहम् । नाटकेषु यः राजपात्रं धरति सः अकिञ्चनोऽपि यावत् तं वेषं धरति तावत् विशिष्टेन दर्पेण व्यवहरति । सामान्याः अपि उत्तमान् वेषान् यदा धृतवन्तः भवन्ति तदा मार्गपार्श्वे विक्रीयमाणान् खाद्यपदार्थान् न खादन्ति । यदा वेषः धृतः भवति तदा तद्वेषानुगुणं व्यक्तित्वं तेषु दृश्यते इति श्रूयते ।''

''भवतः तर्कः विलक्षणः । वादं विना भवान् कदापि तूष्णीं न भवति एव । किम् अहम् एतं वेषं परित्यज्य पूर्वतनम् एव वेषं धरेयम् ?''

''हा हन्त ! तथा तु न कदापि करोतु कृपया । एषः वेषः भवत्यै

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युज्यते । पूर्वतनवेषः भवत्याः कुरूपं कल्पयति स्म । एषः वेषः तु भवतीं भूषयति । एतेन वेषेण भवत्याः सौन्दर्यं विराजते !''

मम वचनं श्रुत्वा लिल्ली किञ्चित् भीता इव । अहम् एव पुनः पृष्टवान् - ''मया सूचितानि पुस्तकानि पठितानि किम् ?''

''आम् । अग्रजेन सह ग्रन्थालयं गच्छामि । भवता सूचितानाम् अन्येषां च ग्रन्थकर्तृणां लेखाः पठ्यन्ते मया । विवेकानन्दस्य कानिचन पुस्तकानि अपि पठितानि । रामकृष्णाश्रमेण एव प्रकाशितः 'युगयात्री भारतीयसंस्कृतिः' (कल्चरल् हेरिटेज् आफ् इण्डिया) इत्येषः ग्रन्थः अपि पठितः । हिन्दुसंस्कृतेः विषये बहवः ग्रन्थान् लिखितवन्तः दृश्यन्ते । एतत् न जानामि स्म एव अहम् ।''

लिल्ल्याः आसक्तिः इदानीं कस्यां दिशि प्रवहन्ती अस्ति इति अवगतं मया । हिन्दुसंस्कृतिविषये बहून् अंशान् अवगतवती आसीत् सा । ऐदम्प्राथम्येन ज्ञायमानाः बहवः विषयाः तस्याम् आश्चर्यं जनयन्ति स्म । इदानीं सम्भाषणसमये तस्याः ध्वनिः उपहासमिश्रितः न भवति स्म । ज्ञातव्यम् इति कुतूहलं तस्यां विशेषतः दृश्यते स्म ।

तस्याः परीक्षायाः फलितांशः कीदृशः इति मया अद्यावधि न पृष्टम् आसीत् । अतः तद्विषये प्रश्नः कृतः मया ।

''एतद्विषये प्रश्नः करणीयः इति अद्य वा स्फुरितं किल । महत् इदं सौभाग्यम् । मत-धर्म-संस्कृत्यादिभ्यः ऋते प्रष्टव्यः अंशः अन्योऽपि भवति इति अद्य वा ज्ञातं खलु !'' इति हसन्ती उक्तवती सा ।

''स्नातककक्ष्यायां प्रवेशः स्वीकृतः किम् ?''

''आम् । तस्मिन् एव क्रिश्चियन्महाविद्यालये ।''

इदानीम् अहं समीपे वसामि स्म इत्यतः प्रायः प्रतिदिनम् अपि राचम्मायाः गृहं गच्छामि स्म । तत्र प्रायः प्रतिदिनम् अपि लिल्ल्याः मेलनं भवति स्म । कमपि एकं प्रश्नं सज्जीकृत्य एव आगच्छति स्म सा । कदाचित् सा पृष्टवती - ''हिन्दुमहिलाः किमर्थं तिलकं धरन्ति ?''

''तत् सौभाग्यस्य चिह्नम् ।''

''सौभाग्यस्य चिह्नं कुङ्कुमम् एव किमर्थं भवेत् ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''भवत्याः प्रश्नः विलक्षणः । समाजे काचित् परम्परा भवति । तत्र केनचित् कारणेन केचन आचाराः व्यवहारपथम् आयान्ति । यस्मिन् काले स च आचारः आरब्धः तस्मिन् काले तस्य विशेषमहत्त्वं भवति । पाश्चात्यविवाहावसरे अङ्गुलीयकस्य विनिमयः किमर्थं क्रियते इत्यस्य उत्तरं किं वा दातुं शक्येत ? कुङ्कुमधारणम् आदौ कथं व्यवहारे आगतम् इति अहं न जानामि । तस्य विशेषकारणं किमपि भवितुम् अपि अर्हति।''

''तदस्तु नाम, सुमङ्गली (पतिसहिता) एव कुङ्कुमं धरति । तस्य तात्पर्यं सिद्धं यतं सुमङ्गलीनां परमं दैवतं पतिः एव इति । स्त्रियाः स्वतन्त्रव्यक्तित्वम् एव नास्ति इति हिन्दवः चिन्तयन्ति । आधुनिकेऽपि एतस्मिन् युगे किम् एतत् युज्यते ?''

''स्वतन्त्रशब्दः विलक्षणमतिमतां हस्तं गतः सन् स्वकीयं वास्तविकम् अर्थं गमयन् नास्ति । विलक्षणः अर्थः व्यज्यते इदानीं तेन । हिन्दुधर्मस्य दृष्टिः अन्तिमस्वातन्त्र्यस्य मुक्तेः दिशि अस्ति, न तु व्यावहारिकस्वातन्त्र्यदिशि । महिलायाः पुरुषस्य वा एकाकितया 'स्वातन्त्र्येण' स्थितिः प्रकृतिविरुद्धा । यस्मै सर्वस्वम् अर्प्यते सः एव यदि न जीवति तर्हि किं वा सौभाग्यम् अवशिष्येत ? तदस्तु, कुमारस्वामिवर्यस्य 'शिवताण्डव'ग्रन्थः पठनीयः इति अहं सूचितवान् आसम् । तस्मिन् ग्रन्थे स्थितः 'भारतीयस्त्रियाः स्थानम्' इत्येषः प्रबन्धः भवत्या किं पठितः ?''

''पठितं स्मरामि ।''

''तावता न अलम् । पुनः पठनीयं तत् ।''

लिली दिनद्वयाभ्यन्तरे तं ग्रन्थम् आनाय्य पठितवती । ततः माम् उक्तवती सा - ''बहवः विषयाः चर्चामात्रेण न अवगम्यन्ते । चर्चया विषयस्य ग्रन्थिमयत्वं वर्धते, न तु काऽपि स्पष्टता प्राप्यते । अभिप्रायप्राप्तिः अन्या, विश्वासकरणम् अन्यत् । परह्यः मया हिन्दुस्त्रीणां स्वातन्त्र्यविषये प्रश्नः पृष्टः आसीत् खलु, तस्य उत्तरं कुमारस्वामिवर्यस्य प्रबन्धे दृष्टं मया । न केवलम् उत्तरं दृष्टं तत्र, तस्मिन् विश्वासः अपि उत्पन्नः । अपूर्वा लेखनीशक्तिः तस्य'' इति ।

एषु दिनेषु लिल्ल्याः केशाः दीर्घतां गताः आसन् । अतः सा वेणीं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रचयित्वा प्रतिदिनम् अपि पुष्पाणि धरति स्म । भ्रातृजायायै अपि पुष्पाणि आनीय ददाति स्म सा । कदाचित् लिल्ल्याः अनुपस्थितौ राचम्मा माम् उक्तवती - ''भवतः प्रभावतः सा सन्मार्गम् अनुसरन्ती अस्ति । आत्मनः स्थितिः इंग्लेण्ड्देशे नास्ति इत्येषा वस्तुस्थितिः तया अवगता अस्ति ।''

एवम् एव मम पदवीकक्ष्यायाः प्रथमं वर्षं समाप्तिं गच्छत् आसीत् । राचम्मायाः निर्देशस्य अनुगुणम् अहं महाविद्यालयं प्रति गमनागमनं कर्तुम् एकां प्राचीनां द्विचक्रिकां क्रीत्वा समीकारितवान् आसम् । जीवनं निर्बाधतया प्रचलति स्म । अध्ययनम् अपि निरातङ्कं प्रचलति स्म । अत्रान्तरे भगिनी गर्भवती अस्ति इति वार्ता मया प्राप्ता । ग्रीष्मविरामारम्भस्य पक्षस्य अनन्तरं वार्ता प्राप्ता यत् शकुन्तला पुत्रं प्रसूतवती अस्ति इति । 'नामकरणसमारम्भदिने अवश्यम् उपस्थातव्यम्' इति अनुरोधपूर्वकं पत्रं लिखितवान् आसीत् नञ्जुण्डः । राचम्मायाः प्रभावतः विरामदिनेषु अपि अनुवर्तमानं गृहपाठं त्यक्त्वा गन्तुम् अहं न अर्हामि स्म । तथापि सप्ताहं यावत् पाठं स्थगयित्वा मया भगिन्याः ग्रामः प्राप्तः ।

यदि अहं गृहस्थः स्यां तर्हि प्रसवार्थं शकुन्तला मया स्वगृहं प्रति नेतव्या स्यात् । इदानीं तु पतिगृहम् एव मातृगृहायते स्म । मातृगृहं स्मृतं यथा न भवेत् तथा वात्सल्यातिशयेन स्नुषां पश्यति स्म रङ्गाम्बा । गृहे पुत्रः जातः इत्यतः महोत्सववातावरणम् आसीत् । मया भागिनेयः प्राप्तः आसीत् । मम गमनतः शकुन्तलायाः आनन्दः द्विगुणीकृतः आसीत् ।

इहप्रपञ्चप्रज्ञा एव यस्य नास्ति, तादृशम् अबोधशिशुम् उद्दिश्य सा उक्तवती - ''वत्स ! पश्यतु तावत्, मातुलः उपस्थितः अस्ति । शीघ्रं विवाहितः भव इति मातुलं वदतु । तस्य पुत्री जायताम् । तां परिणेतुम् अर्हति भवान्'' इति ।

शयानस्य शिशोः ओष्ठे चलिते ।

''पश्यतु भ्रातः ! मम पुत्रः 'अस्तु' इति वदति । अग्रे भवतः पुत्री मत्पुत्राय एव दातव्या भवता । आवयोः सम्बन्धः आवयोः काले एव स्थगितः न भवेत् । एवं ननु ? भवान् तु महापुरुषः । महाविद्यालयाध्ययनं समाप्य भवान् उच्चोद्योगं प्राप्य महाजनः भवेत् । तदा किं मम पुत्राय भवता पुत्री दीयेत ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''भवितव्यस्य विषये इदानीम् एव चिन्तनं किमर्थम् ? अहं महाजनः यदि भवेयं तर्हि भवती अपि महाजनस्य भगिनी भविष्यति एव । भवत्याः पुत्ररत्नाय एव मत्पुत्रीं दास्यामि । तृप्ता खलु भवती ? किन्तु मम पुत्री एव भवेत् इति भवत्याः इच्छा । एवं खलु ?'' इति हसन् पृष्टवान् अहम् ।

''पुत्री भवतु पुत्रो वा । सम्बन्धः तु अनुवर्तेत एव इत्येव मम आशयः ।''

महिलानां स्वभावः एव तादृशः । भवितव्यस्य विषये अपि स्पष्टाश्वासनम् इच्छन्ति ताः । तत्रापि शकुन्तलायाः मातृगृहबन्धुः अहम् एकः एव । यद्यपि श्वश्रूः तां पुत्रीवत् पश्यति, तथापि मातृगृहवाञ्छा कथं वा विलुप्ता भवेत् ?

तद्ग्रामस्य सरोवरं ग्रीष्मकाले अपि जलेन पूर्णं तिष्ठति स्म । तत्र अहम् आतृप्ति तरणं कृतवान् । नञ्जुण्डः इदानीं पितृत्वं प्राप्तवान् अस्ति । सः अभिमानः तरणे तं बाधते स्म । अन्यच्च सरोवरे तरणं न करणीयम् इति पत्न्याः आज्ञा अपि आसीत् ! अतः सः तीरे एव उपविश्य मम तरणं पश्यति स्म । सप्ताहं यावत् अहोरात्रम् आवां बहून् विषयान् अधिकृत्य वार्तालापं कृतवन्तौ । 'स्नातकपदवीप्राप्त्यनन्तरं भवता अध्यापकवृत्तिः न अवलम्बनीया, उच्चोद्योगः कोऽपि प्राप्तव्यः' इति वदति स्म सः । पुनः कदाचित् सः सूचयति स्म - 'बि.एल्.परीक्षाम् उत्तीर्य न्यायवादिवृत्तिः आश्रयणीया' इति । 'ऐ.ए.एस्.-अधिकारी भवतु' इति पुनः कदाचित् कथयति स्म । 'धनाभावसमस्या भवति चेत् अविस्मृत्य मां सूचयतु । अहं यथाशक्ति साहाय्यं करिष्यामि' इति उक्तवान् सः । सप्ताहं यावत् तत्र वासेन तेषां यथा तथा ममापि विशेषसन्तोषः जातः । दैनन्दिनात् यान्त्रिकजीवनात् सप्ताहात्मकः विरामः प्राप्तः आसीत् ।

मैसूरुनगरं प्रति आगमनसमनन्तरम् एव अहं राचम्मायाः गृहं गतवान् । गृहं कीलितम् आसीत् । अनन्तरदिने मया पुनः गतम् । देवप्रसादः गृहे आसीत् । 'पिता आगत्य राचम्मां ग्रामं नीतवान् । मासानन्तरं तस्याः प्रत्यागमनम्' इति सूचितवान् सः । किञ्चित्कालं तेन सह सम्भाष्य अहं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकोष्ठं प्रत्यागतः । गृहपाठात् ऋते अन्यत् किमपि कार्यं न आसीत् मम । प्रौढशालाच्छात्राणां पाठनम् अपि प्रातः एव समापयामि स्म अहम् ।

कदाचित् मध्याह्ने चतुर्वादनसमये अहं प्रकोष्ठे पठन् शयितवान् आसम् । बहिः चैत्रमासीयः आतपः विजृम्भते स्म । तन्द्राकारणतः पुस्तकं पार्श्वे स्थापयित्वा नेत्रे निमीलितवान् आसम् । तावता द्वारताडनशब्दः श्रुतः । कोऽपि छात्रः स्यात् इति मत्वा अहम् 'आगच्छ' इति उच्चस्वरेण उक्तवान् । आगता तु लिल्ली । आतपे आगतम् इत्यतः मुखे स्वेदः दृश्यते स्म । अहं झटिति उत्थाय उपविशन् – ''अये भवती ! कोऽपि छात्रः इति मत्वा मया 'आगच्छ' इति मध्यमपुरुषः प्रयुक्तः । क्षम्यताम् । उपविशतु तावत्'' इति उक्तवान् ।

''मध्यमपुरुषप्रयोगे को दोषः ? तदर्थं क्षमायाचनं किमर्थम् ? भवान् मां युष्मच्छब्देन सम्बोधयति चेदेव शोभते'' इति वदन्ती लिल्ली आसन्दे उपविष्टवती । ततः सा पुनः उक्तवती – ''भगिनीगृहं गतः भवान् तत्रैव अस्तं गतः इव ! कतिदिनानि तत्र स्थीयते ! विद्यालयस्य विरामः । भ्रातृजाया अपि नगरे नास्ति । मम समयः एव न गच्छति स्म । कदा प्रत्यागतं भवता ? ह्यः सायम् अहम् अत्र आगता आसम् । तदा प्रकोष्ठः कीलितः आसीत् ।''

''यदि समयः न गच्छति तर्हि पुस्तकानि पठतु ।''

''पठनार्थं गुरुः आवश्यकः किल ? भवतः अनुपस्थितौ मम पठनं कथं प्रवर्तेत ?'' इति हसन्ती उक्तवती सा ।

''अहं भवत्याः गुरुः कदा जातः ? केन वा तथा उक्तम् ?''

''केन तथा वक्तव्यम् ? भवतः बोधनस्य कारणतः एव खलु अहं हिन्दुधर्मस्य विषये पठनम् आरब्धवती ? वस्तुतः तु पाठ्यपुस्तकेभ्यः ऋते अन्यत् किमपि न पठामि स्म अहम् । पठनाभिरुचिः मयि भवता एव उत्पादिता । पठनं नाम किम् इति भवत्तः एव ज्ञातं मया ।''

''किं तदर्थं पुस्तकानाम् अभावः आसीत् ?''

''अस्माकं गृहे अपि सन्ति बहूनि पुस्तकानि । तेषु महती प्रीतिः मम पितुः । किन्तु तानि सर्वाणि क्रैस्तमतसम्बन्धीनि एव । तेषां पठने कथं वा आसक्तिः भवेत् ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'कुत्रापि अटित्वा आगच्छाम' इति सूचितवती लिल्ली । 'मास्तु' इति उक्तं मया । प्रकोष्ठे एव उपविश्य आवां दीर्घकालं वार्तालापं कृतवन्तौ । मत-धर्म-संस्कृत्यादीनां विषये चर्चा कृता । विद्यालयादिविषये अपि वार्तालापः जातः । ततः आरभ्य लिल्ली प्रतिदिनम् अपि मम प्रकोष्ठम् आगच्छति स्म । गच्छता कालेन तस्याः स्वभावपरिचयः जातः । यथा मया पूर्वं चिन्तितम् आसीत् तथा सा गर्विष्ठा न । वर्धनानुकूले वयसि परिसरानुगुणं व्यवहारम् अनुसरन्ती सा आत्मानम् आंग्लसंस्कृत्यनुगुणं सज्जीकर्तुं प्रयत्नं करोति स्म । आंग्लसंस्कृत्यनुगुणाः आचारव्यवहाराः वेषभूषादयः च तस्याः भवन्ति स्म । यः देशानुगुणः न, तम् आचारव्यवहारम् अनुकर्तुं सा प्रयतते स्म ।

इदानीं तस्यां विशेषपरिवर्तनं दृश्यते स्म । भारतीयस्त्री इव सा शाटिकां धरति स्म । वेणीं रचयित्वा प्रतिदिनं पुष्पाणि धरति स्म सा । एषु दिनेषु वलयानां धारणम् अपि आरब्धवती आसीत् सा । ललाटे कुङ्कुमधारणमात्रं न करोति स्म । एतम् एकम् अंशं विहाय सा भारतीयनारी इव एव दृश्यते स्म । वेषे परिवर्तनं जातं चेदपि मनोभूमिका पूर्णतः परिवृत्ता आसीत् इति न । सा वदति स्म - ''मयि यत् परिवर्तनं दृश्यते तत् क्वचित् मय्येव भीतिं जनयति । एतस्य अर्थः कः ? नागरिकतातः अनागरिकतां प्रति, प्रगतितः विगतिं प्रति किं मम गमनं जायमानं नास्ति ? इति संशयः मयि उदेति । क्वचित् आतङ्कः अपि भवति'' इति ।

राचम्मायाः प्रत्यागमनात् किञ्चित्पूर्वं सायङ्काले लिल्ली मम प्रकोष्ठम् आगत्य - ''उत्तिष्ठतु, क्रैस्तबालिकाछात्रावासं प्रति गत्वा आगच्छाम'' इति उक्तवती ।

''मम किं कार्यं तत्र ? भवत्याः कार्यं यदि स्यात् तर्हि भवती गत्वा आगच्छतु ।''

''ममापि किमपि कार्यं नास्ति तत्र । भवता छात्रावासः सकृत् द्रष्टव्यः । ततः भवतः काऽपि हानिः तु नास्ति । बालिकाछात्रावासं प्रति गमने भवतः सङ्कोचः भवेत् कदाचित् । अद्य एकस्मिन् दिने तम् अपसार्य मया सह आगच्छतु कृपया । कारणम् अनन्तरं वदिष्यामि ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''दैनन्दिनवेषः मास्तु । अद्य एकस्मिन् दिने ऊरुकं धरतु'' इत्यपि सूचितवती सा । तदनुगुणम् अहं सिद्धः जातः । आवां ततः प्रस्थितवन्तौ । ''तत्र मम बह्व्यः सख्यः सन्ति । पूर्वं विद्यालयेतरसमयम् आधिक्येन तत्रैव यापयामि स्म अहम्'' इति उक्तवती सा ।

आवां यदा छात्रावासं प्राप्तवन्तौ तावता तत्र वसन्त्यः क्रैस्तसंन्यासिन्यः कुत्रापि प्रस्थिताः आसन् । समग्रशरीरम् आच्छादयत् कृष्णवर्णीयं वस्त्रं धृतवत्यः आसन् ताः । कृष्णवर्णवस्त्रस्य धारणतः औष्ण्यम् आधिक्येन ताः बाधते स्म । ततः तासां मुखे स्वेदधारा वहति स्म । तासु काश्चन लिल्लीं दृष्ट्वा मन्दहासं प्रदर्श्य अग्रे गतवत्यः । तासु काचित् लिल्ल्या सह मम उपस्थितिं दृष्ट्वा साकूतं हसितवती । ग्रीष्मविरामकारणतः छात्रावासीयाः बह्व्यः स्वग्रामं गतवत्यः आसन् । अतः तत्र बालिकानां वैरल्यं दृश्यते स्म । मां स्वागतप्रकोष्ठे उपवेश्य लिल्ली सोपानानि आरुह्य ऊर्ध्वभागं गतवती । दशनिमेषाभ्यन्तरे पञ्चषाभिः सखीभिः सह मत्समीपम् आगतवती च । मां प्रदर्श्य सा उक्तवती - ''मया उच्यते स्म खलु सत्यनारायणः इति कश्चित् अस्ति इति, सः अयम् एव'' इति ।

तासु एका नमस्कारं कृतवती । अन्याः - 'ग्ल्याड् टु मीट् यु' इति वदन्त्यः हस्तं प्रसारितवत्यः । अहं हस्तयोजनपूर्वकं सर्वाः नमस्कृतवान् । तासु तिस्रः आंग्लो-इण्डियन्-महिलाः इव वेषं धृतवत्यः आसन् । छत्रवर्णीयाः ताः । आजानुमात्रलम्बि निचोलं धृतवत्यः आसन् ताः । रक्तवर्णीये निचोले तत्र तत्र श्वेतपुष्पचित्राणि दृश्यन्ते स्म । निचोलः एव चोलाभिन्नतया कण्ठपर्यन्तं प्रसृतः आसीत् । कृष्णवर्णीये मुखे रक्तवर्णीयः ओष्ठरागः । एका केशान् कर्तितवती आसीत् । अपरा नाटकीयराजवेषधारी इव केशवेषं धृतवती आसीत् । अपरा केशैः पुरुषवदेव दृश्यते स्म । औन्नत्यं, स्थौल्यं, गमनरीतिः, अङ्गसौष्ठवं च तस्याः पुरुषाणाम् इव एव आसीत् । अन्याः तिस्रः शाटिकां धृतवत्यः आसन् । एकस्याः ललाटे तिलमात्रेण नीलतिलकं दृश्यते स्म । कुङ्कुमस्य अपभ्रंशः अयम् इति तर्कितं मया ।

सर्वाः आसन्दे उपविष्टवत्यः । लिल्ली उक्तवती - ''मम सख्यः सर्वसमर्थाः । एका कर्तितकेशा मीरानामधेया । पियानोवादने, आंग्लगीतगाने च पटुः एषा'' इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ततः पुरुषः इव दृश्यमानां दर्शयन्ती - ''एषा फ्रांक्लिन् । एतस्मिन् वर्षे विश्वविद्यालयीयां क्रीडास्पर्धां द्रष्टुं भवान् न गतः इति भाति । एतया सह स्पर्धितुं कोऽपि पुरुषः अपि न समर्थः । उत्कूर्दने दीर्घकूर्दने धावने चापि एषैव अद्वितीया'' इति उक्तवती ।

सा क्रीडापटुः मां पृष्टवती - ''भवान् कस्याञ्चित् अपि क्रीडायां भागं न वहति किम् ?''

तासां सर्वासां व्यवहारभाषा आंग्ला एव । उच्चस्वरेण ध्वनिना, ओष्ठजिह्वादीनां वक्रीकरणेन, मुखभावेन च ताः आंग्लजनान् एव अनुकर्तुं बुद्धिपूर्वकं प्रयतन्ते स्म ।

तस्यै लिल्ली एव उत्तरं दत्तवती - ''सः बुद्धिशक्तिक्रीडायां निपुणः । सर्वदा पठनम् एव तस्य क्रीडा'' इति ।

''ड्याम् दट् हेल् । ऐ डोण्ट् लैक् इट्'' इति सहावभावम् उक्तवती सा क्रीडापटुः ।

अन्ते नीलतिलकधारिणीं प्रदर्शयन्ती उक्तवती लिल्ली - ''एतस्याः नाम नागरत्ना इति । एषा अपवादरूपेण अत्र वसति । एषा तिलकं कथं धृतवती इति भवतः आश्चर्यं स्यात् कदाचित् । एषा हिन्दुकुले जाता । तथापि अत्र वसति । एवं ननु नागरत्ने ?'' इति ।

''मम पिता काफीवाटिकायाः स्वामी । योग्यः विद्याभ्यासः प्राप्तव्यः चेत् आंग्लमाध्यमपरिसरः एव स्यात् इति चिन्तयित्वा मां मम अनुजां च अत्र प्रवेशितवान् अस्ति सः । तस्य तु विशालमनोभावः । अनुजा विरामकारणतः गृहं गता अस्ति । गृहे वासः नीरसतां जनयति इत्यतः मया न गतम्'' इति उक्तवती नागरत्ना ।

एतादृशे वातावरणे प्रवृद्धायां नागरत्नायां, तस्याः अनुजायां च क्रैस्तमतस्य स्वीकरणार्थं यः मनोभावः आवश्यकः सः पर्याप्ततया प्रवृद्धः स्यात् इति चिन्तितं मया ।

अर्धघण्टां यावत् तत्र स्थित्वा आवां ततः निर्गतौ । मार्गे अहं पृष्टवान् - ''अत्र दर्शनयोग्यं किम् आसीत् ? माम् अनुरोधपूर्वकं किमर्थम् अत्र आनीतवती भवती ?'' इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''दर्शनयोग्यं किमपि न आसीत् एव अत्र ?''

''मया न अवगतम् ।''

''भवतः परिचयात् पूर्वम् अहं कथम् आसम् इति भवान् जानाति एव । एताभिः सह एतस्मिन् एव परिसरे अहं प्रवृद्धा । यदा भवतः परिचयस्य आरम्भः जातः तदा अहं भवता उक्तान् विचारान् अत्र वदामि स्म । तद्विषये चर्चां कुर्वत्यः वयम् उपहासं कुर्मः स्म । देशीयसंस्कृतिविषये एतस्मिन् परिसरे कीदृशम् अज्ञानम् अस्ति इति अद्य भवता ज्ञातं स्यात् । एतत्सर्वं भवान् प्रत्यक्षं पश्यतु इति उद्देशेन अहं भवन्तम् अत्र आनीतवती ।''

ततः लिल्ली स्वगृहं गतवती । अहं प्रकोष्ठं प्रत्यागतः ।

राचम्मा दिनद्वयानन्तरं प्रत्यागता । मासं यावत् सा मैसूरुनगरे न आसीत् यत् तेन मयि नीरसता उत्पन्ना आसीत् । लिल्ली प्रतिदिनं मम प्रकोष्ठम् आगच्छति स्म । यङ्कश्चित् विषयम् अवलम्ब्य आवां चर्चां कुर्वः स्म । राचम्मायां दृष्टा मार्दवता स्नेहः वा लिल्ल्यां मया न दृष्टः आसीत् । राचम्मायाः स्नेहः तु मन्दं प्रवहन्त्याः नद्याः जलम् इव । तस्याः स्नेहः अनुकम्पापूर्णः । आवयोः मध्ये बाल्यकालिकः इव निर्व्याजः स्नेहः स्थितः आसीत् । मम जीवनम् आ बाल्यात् सा दृष्टवती आसीत् । अतः एव मद्विषये विशेषानुभूतिः तस्याः । मद्धितम् एव चिन्तयन्ती सोदरी इव आसीत् सा । लिल्ली तु मम बुद्धिमत्तायाः विचारशक्तेः च आकर्षणात् मत्समीपम् आगता । आन्तरङ्गिकविषयाः आवाभ्यां परस्परं न ज्ञायन्ते स्म । मम बाल्यजीवनस्य कमपि विषयं सा न जानाति स्म । आवयोः मैत्री औपचारिकसीमामात्रे आसीत् ।

विरामसमाप्तेः अनन्तरं विद्यालयः आरब्धः । एतस्मिन् वर्षे मम जीवने कोऽपि क्लेशः न उपस्थितः । भगिन्याः विवाहः तु समाप्तः आसीत् । आर्थिकक्लेशः अपि कोऽपि न आसीत् विशेषतः । शरीरपुष्टिः एतस्मिन् वर्षे आधिक्येन जाता आसीत् । विद्यालयपाठविषये अहं कदापि विशेषचिन्तनं न करोमि स्म । एवम् एव नवरात्रविरामः अतीतः । डिसेम्बर्विरामः अपि अतीतः । परीक्षाः अपि आसन्नाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राचम्मा इदानीं गर्भवती आसीत् । अहं तदा तदा तस्यै फलानि नीत्वा ददामि स्म ।

* * *

एकदा भानुवासरे मध्याह्ने त्रिवादने लिल्ली मम प्रकोष्ठम् आगता । एषु दिनेषु प्रकोष्ठं न आगतवती आसीत् सा । तस्मिन् दिने आगमनसमनन्तरम् एव - ''इदानीम् एव त्रिवादनम् । अहं किञ्चित् प्रस्तौमि । भवता निराकृतिः न दर्शनीया । उत्तिष्ठतु, चलनचित्रार्थं गच्छाम'' इति त्वरां प्रदर्शयन्ती उक्तवती सा ।

तस्याः प्रस्तावः मयि आश्चर्यम् अजनयत् । अहम् असम्मतिं प्रदर्शितवान् ।

''भवता आगन्तव्यम् एव । किं मया सह गमने कोऽपि क्लेशः भवतः ?''

''न तथा । तथापि तत् मास्तु । चलनचित्रं द्रष्टव्यम् एव चेत् एकाकिनी गच्छतु भवती ।''

''एकाकिनी अहं न गच्छामि । भवता आगन्तव्यम् एव । अन्यथा .....''

''अन्यथा किं भविष्यति ?''

''भवतः स्नेहं त्यक्ष्यामि ।''

''यदि एतादृशकारणैः अपि सः त्यक्तुं योग्यः चेत् त्यक्तो भवतु नाम । भवत्याः विलम्बः भवेत् । शीघ्रं गच्छतु भवती ।''

लिल्ली उत्तरं किमपि न उक्तवती । महती निराशा प्राप्ता आसीत् तया । नितरां खिन्नायाः तस्याः मुखं कान्तिहीनं जातम् । सा उत्थाय मन्दगत्या सोपानानि अवतीर्णवती ।

एतत् दृष्टवतः मम मनः खिन्नम् । उत्थाय बहिः गत्वा अहं ताम् उच्चैः आहूतवान् । सा सकृत् स्थित्वा परिवृत्य मां दृष्ट्वा पुनः अग्रे गन्तुम् उद्युक्ता अभवत् ।

अहं पुनः आहूतवान् । सा न स्थितवती । अहम् उच्चैः उक्तवान् - ''लिल्लि ! सकृत् आगच्छतु अत्र । आगन्तव्यम् एव ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सा स्थित्वा निमेषद्वयं चिन्तयित्वा प्रत्यागत्य सोपानानि आरुह्य उपरि आगतवती ।

"मया अविचिन्त्य किमपि उक्तम् । तदर्थं क्षमां याचे । क्षणं तिष्ठतु । एषोऽहम् आगच्छामि । गच्छाम" इति अहम् उक्तवान् ।

सा खेदमिश्रितस्वरेण उक्तवती - "मास्तु । अनिच्छया आगमनं सर्वथा मास्तु । अहं गृहं गच्छामि ।"

किन्तु मया एतत् न अङ्गीकृतम् । तया चिन्तितं चित्रमन्दिरं प्रति एव गतम् । किन्तु तावता चित्रप्रदर्शनम् आरब्धम् आसीत् । एतावता चित्रदर्शनोत्साहः उभयोः अपि नष्टः आसीत् ।

लिल्ली उक्तवती - "इदानीम् अन्तः गमनं मास्तु । परीक्षार्थं पठनात् मनः नीरसताग्रस्तम् अस्ति । यदि भवता अन्यथा न चिन्त्येत तर्हि ललितमन्दिरं द्रष्टुं गच्छाव । पादाभ्यां गमनं मास्तु । द्विचक्रिकया गच्छाव ।"

"भवती ?"

"अहम् अपि द्विचक्रिकाचालनं जानामि । गृहे मम द्विचक्रिका अस्ति । शीघ्रं गत्वा ताम् आनेष्यामि । तावता भवान् प्रकोष्ठस्य पुरतः सिद्धः सन् तिष्ठतु" इति सूचितवती सा ।

योजना अङ्गीकृता अभवत् । यथानिश्चयम् आवां द्विचक्रिकया प्रस्थितवन्तौ । युवत्या सह द्विचक्रिकया गमनं मयि विलक्षणं भावं जनयति स्म । सङ्कोचवशात् अहं दूरं रक्षन् एव गच्छन् आसम् । लिल्ली पृष्ठतः आगच्छते कार्यानाय अग्रे गमनार्थं दक्षिणभागे अवकांशं कल्पयन्ती मत्समीपम् आगत्य - "भवतः स्वभावः एव विचित्रः । क्वचित् भवान् पूर्वापरम् अनालोच्य कशया ताडयन् इव कठोरवचनानि वदति । भवतः अयं कठिनस्वभावः कुतः आगतः ?" इति पृष्टवती ।

"मम स्वभावः कठिनः इति मिथ्याग्रहणं प्राप्तवती अस्ति भवती ।"

"भवतः स्वभावस्य कारणतः मया बहुवारं क्लेशः अनुभूतः । किन्तु तत् भवता न ज्ञायते । आ बाल्यात् भवतः जीवने कष्टप्रसङ्गाः एव अधिकाः इति मम भ्रातृजाया वदन्ती भवति ।"

"तथा सा चिन्तयति । वस्तुतः तु अहं सुखेन एव प्रवृद्धः ।"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मिन् दिने आवयोः सम्भाषणं वैयक्तिकविषयान् अधिकृत्य एव प्रवृत्तम् । ललितमन्दिरसमीपं यदा गतं तदा तस्य दर्शने उत्साहः न आसीत् । अतः ततः परिवृत्य वाममार्गेण किञ्चिद्दूरं गत्वा वृक्षबहुले प्रदेशे अनतिदूरे एव द्विचक्रिकां संस्थाप्य आवां वृक्षच्छायायाम् उपविष्टवन्तौ । न जाने वक्तव्यम् इति भावः मयि कथम् उदितः इति, अहं मदीयजीवनस्य बहून् अंशान् तद्दिने लिल्लीम् उक्तवान् । उभौ अपि आत्मीयभावेन सम्भाषणं कृतवन्तौ । मम जीवनगाथां सा अनन्यश्रद्धया श्रुतवती ।

''भवतः स्वभावे काठिन्यं कथम् आगतम् इति अहम् इदानीम् अवगन्तुं शक्नोमि । जीवनं सङ्घर्षबहुलं यदा भवति तदा काठिन्याश्रयं विना न अन्या गतिः । तथापि भवान् तादृशस्थितितः एतादृशीम् उन्नतिं प्राप्तवान् अस्ति यत् तत् तु आश्चर्यं जनयति ।''

''फ्रेञ्चदार्शनिकः बर्गसन्नामकः कश्चित् अस्ति । सः एलान्-विटाल्नामिकां शक्तिम् उदाहरति इति श्रूयते । सा जीवनस्य सुप्तचैतन्यायते । अतिघोरा परिस्थितिः उत्पन्ना चेदपि सा सुप्तशक्तिः चैतन्यहीना न भवति कदापि । क्वचित् रुग्णः सन् शय्याम् आश्रितः जनः आसन्नमरणः भवति । तावता तत् सुप्तचैतन्यं शक्तिप्रयोगं करोति । मृत्युः निवारितः भवति । एषः अंशः मया कस्मिंश्चित् पुस्तके पठितः ।''

''भवान् आशावादी ।''

''आम् । जीवनं कठिनं, मरणं सुलभम् इति केचन चिन्तयन्ति । किन्तु यथा चिन्त्यते - तथा सुलभं न मरणम् । जीवनशक्तिः न तथा दुर्बला । स्वकीयं चिन्तनं यदा परिशील्यते तदा मया एषः अंशः अवगम्यते ।''

''भवतः व्यक्तित्वं यदा चिन्त्यते तदा गौरवभावना उत्पद्यते । काचित् जीवनस्फूर्तिः प्राप्यते ।''

तस्याः अभिमानसूचकस्य वचनस्य श्रवणात् मयि आनन्दतरङ्गाः उदिताः ।

''अन्यस्मै स्फूर्तिं दातुं योग्यं व्यक्तित्वं नास्ति मम । वस्तुतः अहम् एव अन्यस्मात् स्फूर्तिं प्राप्तवान् । सः मम अग्रजायते'' इति उक्त्वा अहं शङ्करस्य व्यक्तित्वस्य स्थूलविवरणं ताम् उक्तवान् । ''स्वयम् उन्नतिप्राप्तिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महासिद्धिः न । आदर्शार्थं, लक्ष्यसिद्ध्यर्थं वा सर्वस्वं समर्प्य कार्यकरणम् एव श्रेष्ठव्यक्तित्वस्य लक्षणम् ।''

''भवता उच्यमानेन शङ्करेण अनुसृतः आदर्शमार्गः किं श्रेष्ठः ? तस्याः संस्थायाः विषये मया अपि बहुधा श्रुतम् अस्ति । तस्याः निमित्तं स्वजीवनस्य समर्पणं नाम आयुषः व्यर्थीकरणम् एव । अतः तादृशे कार्ये न किमपि वैशिष्ट्यम् ।''

''कस्यचित् विचारः ध्येयमार्गादयः वा अस्मभ्यं न रोचेरन् कदाचित् । कयोश्चित् अपि उभयोः संस्थयोः लक्ष्ये तादात्म्यरूपं साम्यं न भवेत् एव । अतः अनुस्रियमाणः आदर्शः कीदृशः इति तात्त्विकप्रश्नः वस्तुतः गौणः भवति । तन्निमित्तं सः आत्मानं कियता प्रमाणेन समर्पयति, कीदृशं सङ्घर्षं सम्मुखीकरोति इत्येतत् एव मुख्यं भवति । एतया पृष्ठभूमिकया अहं शङ्करं परमादरेण पश्यामि ।''

लिल्ली शिरः चालितवती ।

षड्वादनसमयः आसन्नः आसीत् । पश्चिमदिशि नारङ्गवर्णं प्राप्नुवन् सूर्यः अस्ताचलम् आरोहन् आसीत् । ततः प्रस्थातव्यम् इति विचारः आवयोः उभयोः अपि प्रियः न आसीत् ।

''इतः प्रस्थानम् एव मास्तु इति भाति खलु ?'' इति पृष्टवती लिल्ली ।

''अत्रैव उपविष्टं चेत् रात्रिभोजनं कोऽपि न ददाति खलु ? अतः उत्तिष्ठतु, गच्छाव'' इति वदन् अहम् उत्थितवान् ।

आवां द्विचक्रिकां नुदन्तौ मन्दं ततः प्रस्थितवन्तौ । मार्गे लिल्ली स्वगृहविषयान् कांश्चन उक्तवती - ''मम मातुः सौम्यस्वभावः । गृहव्यवहारे अपि सा अनासक्ता । गृहे पितुः एव परमप्राधान्यम् । सः बहुधा गृहे न भवति । तथापि गृहस्य समग्रः व्यवहारः तदधीनः एव भवति । तस्य स्वभावः किञ्चित् विलक्षणः । अतः अग्रजः विवाहानन्तरं गृहान्तरे एव वसति । गृहे मम अनुजः अपि अस्ति । मोटारग्यारेज्व्यवहारे क्रैस्तमन्दिरकार्ये च मम पितुः अपरिमिता श्रद्धा । देवे यावती श्रद्धा ततोऽपि अधिका श्रद्धा क्रिस्तगुरौ, क्रिस्तालये च । आ बाल्यात् अहं क्रिस्तालयं गतवती ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रैस्तगुरौ ममापि विशेषश्रद्धा एव आसीत् । एषु दिनेषु मया तस्य कार्यकलापाः अवगम्यमानाः सन्ति । मतीयात् अपि अधिकम् अवधानं राजकीये व्यवहारे ददाति सः । क्रैस्तजनबहुले प्रदेशे नगरसभासदस्यत्वेन चितः अस्ति सः । एतस्मिन् वर्षे नगरसभाध्यक्षपदवीं प्राप्नुयात् अपि सः । राज्यप्रजाप्रतिनिधिसभायाम् अपि परोक्षतया स्वप्रभावं प्रसारयितुं समर्थः अस्ति सः ।''

उन्मुखमार्गेण आवां गच्छन्तौ आस्व । श्रान्तिवशात् लिल्ली मन्दम् आगच्छन्ती आसीत् । अहं किञ्चित् स्थित्वा - ''भवती श्रान्ता इति भाति । ददातु, भवंत्याः द्विचक्रिकाम् अपि अहम् एव नोत्स्यामि'' इति उक्तवान् ।

''श्रान्तिः काऽपि नास्ति'' इति वदन्ती लिल्ली अग्रे गतवती । यदा तस्याः गृहं प्रति गमनार्थं मार्गः प्राप्तः तदा सा - ''श्वः सायं पञ्चवादने भवतः प्रकोष्ठम् आगमिष्यामि'' इति उक्त्वा ततः निर्गतवती ।

तस्मिन् दिने, अहम् अजानन् एव व्यक्तिगतविचारान् बहून् लिल्लीम् उक्तवान् आसम् । सा अपि तादृशान् अंशान् माम् उक्तवती आसीत् । इतः पूर्वम् आवां बहून् विषयान् अधिकृत्य बहुधा चर्चितवन्तौ आस्व । किन्तु सा चर्चा आसीत् सुहृदोः इव । अद्य आवयोः वार्तालापः तां सीमाम् अतिक्रम्य अग्रे गतः इव अभासत । ततः कश्चन अव्यक्तः आनन्दः अपि प्राप्तः । आत्मीयजनस्य प्राप्त्या काचित् तृप्तिः मनसि उत्पन्ना । तृप्तं मनः रात्रिभोजनं न ऐच्छत् । विना भोजनं मया शयनं कृतम् । सुखनिद्रा प्राप्ता मया ।

'सायं पञ्चवादने आगमिष्यामि' इति लिल्ली उक्तवती आसीत् । अहं पञ्चवादनात् पूर्वम् एव महाविद्यालयतः आगत्य प्रकोष्ठं प्राप्तवान् । तां प्रतीक्षमाणः उपविष्टवान् । पञ्चवादनम् अतीतम् । सा न आगता । वातायनात् बहिः दृष्टिः प्रसारिता । मार्गे कुत्रापि सा न दृष्टा । बहिः आगत्य तदागमनमार्गम् एव पश्यन् अहं सोपानमार्गे स्थितवान् । सा न आगता एव । महती निराशा प्राप्ता । षड्वादने पाठार्थं छात्राः आगताः । पाठने महान् क्लेशः अनुभूतः मया । पाठने मनः एव न प्रवर्तते स्म । लिल्ली इदानीम् आगच्छेत्,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किञ्चित्कालानन्तरम् आगच्छेत् इत्येवं वदति स्म मनः । रात्रिभोजनं समाप्य अहं प्रकोष्ठं प्रत्यागतः । पठनार्थं पुस्तकम् उद्घाटितम् । किन्तु मनः तत्र नं लग्नम् । मया बलात् पङ्क्तीनाम् उपरि दृष्टिः पातिता । किन्तु विषयः कोऽपि न अवगतः । पुस्तकं पार्श्वे स्थापयित्वा शय्यां प्रसार्य अहं निद्रां कर्तुम् उद्युक्तः । किन्तु न आलिङ्गति स्म निद्रा । 'आगमिष्यामि इति उक्तवती लिल्ली किमर्थं न आगता ?' - मध्यरात्रे अतीते अपि मम मनसि एषा एका एव चिन्ता । एतादृशं मानसिकसङ्घर्षम् अहम् इतः पूर्वम् कदापि न अनुभूतवान् आसम् । पठने अपि अनासक्तं मनः मम निग्रहशक्तिम् अपि उल्लङ्घ्य स्वेच्छया विहरति स्म यत् तत् मयि एव आश्चर्यं जनयति स्म ।

मया मम मनसः विश्लेषणम् आरब्धम् । लिल्ल्याः विषये एतावत्पर्यन्तम् अनुभूतः भावः मनसः कस्मिंश्चित् कोणे उदितः आसीत् । एतं भावं स्नेहपदेन निर्देष्टुं मनः न ऐच्छत् । गते एकस्मिन् एव दिने अहं मनसः विलक्षणधावनस्य वशं गतः आसम् । अद्य सायं तदेव प्रकटितं जातम् । इदानीम् अहं कुत्र गच्छन् अस्मि ? अद्यावधि मम जीवनवाहिनी येन मार्गेण गच्छन्ती आसीत् सा तं मार्गं परित्यज्य अज्ञातपात्रं निर्मान्ती अग्रे प्रवहन्ती अस्ति । एतस्य परिणामः कः स्यात् ? मयि आतङ्कः उत्पन्नः । विवेकः उदितः । मनः यथा प्रवहति तथैव गतं चेत् सर्वनाशः निश्चितः इति मया ज्ञातम् । उषसि मया निद्रा प्राप्ता ।

अनन्तरदिने सायं पाठं समाप्य अष्टवादनसमये अहं राचम्मायाः गृहं गतः ।

''अहम् एव वार्ताप्रेषणं चिन्तयन्ती आसम् । यदि इदानीं भवान् न आगच्छेत् तर्हि अहं मरियम्माम् अप्रेषयिष्यम् ।''

''कः विशेषः ?''

''श्वः अहं ग्रामं गच्छन्ती अस्मि । प्रथमप्रसूतिः मम । अतः मासत्रयात् पूर्वम् एव मां नेतुं योजनां कृतवन्तौ स्तः मातापितरौ ।''

''कदा प्रत्यागमनं भवेत् ?''

''तत् तु भवान् जानीयात् एव । पञ्चषाणां मासानाम् अनन्तरम् एव स्यात् प्रत्यागमनम् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किञ्चित्कालं वार्तालापं कृत्वा अहं ततः प्रस्थितः । गन्तुम् उद्यतं माम् उक्तवती राचम्मा - ''परीक्षा आसन्ना खलु ? सम्यक् पठनीयं भवता । कश्चन विषयः वक्तव्यः अस्ति मया । गमनात् पूर्वं वक्तव्यः एव सः । यदि भवान् अन्यथा न चिन्तयेत् तर्हि वदेयम् ।''

''वदतु निस्सङ्कोचम् ।''

''भवान् अन्यथा न चिन्तयिष्यति खलु ?''

''सर्वथा न ।''

''मम नाम्ना शप्यते ?''

''भवत्याः नाम्ना शपे । अन्यथा न चिन्तयामि एव । सधैर्यं वदतु भवती ।''

राचम्मा मन्दस्वरेण उक्तवती - ''मम अनुपस्थितौ भवतः लिल्ल्याः च परस्परमेलनं न भवेत् । सा भवतः प्रकोष्ठं प्रति न आगच्छेत् ।.....''

अहं मौनेन शृण्वन् आसम् । सा कथनम् अनुवर्तितवती - ''मया यत् उक्तं तद्विषये कोपं मा करोतु कृपया । एतद्विषये मम वचनम् अङ्गीकरोतु दयया । कांश्चन विषयान् पुरुषः भवान् यावत् जानाति, ततोऽपि अधिकं जानामि महिला अहम् । अवगतं खलु भवता ?''

अहं शिरः उन्नीय राचम्मायाः मुखं दृष्टवान् । तस्याः नेत्रे सुदृढम् अभिप्रायम् अभिव्यञ्जयतः स्म ।

''भवत्या उक्तं सम्यक् अवगतं मया'' इति उक्त्वा मन्दगत्या अहं ततः निर्गतः । तया यत् उक्तं तत् पूर्वदिने रात्रौ स्वचिन्तनशक्त्या अहं स्वयम् अवगतवान् आसम् ।

दिनद्वयस्य अनन्तरं कदाचित् सायङ्काले लिल्ली मम प्रकोष्ठम् आगतवती । आगमनसमनन्तरम् एव - ''तस्मिन् दिने सायं मया आगन्तुं न शक्तम् एव । काश्चन क्रैस्तसंन्यासिन्यः गृहम् आगतवत्यः आसन् । परह्यः अहम् आगतवती आसम् । तत्काले भवान् छात्रान् पाठयन् आसीत् ।''

''तत् आस्तां तावत्'' इति उक्त्वा पञ्च निमेषान् यावत् तया सह शिष्टाचारपालनार्थं वार्तालापं कृत्वा - ''परीक्षा आसन्ना एव खलु ?'' इति उक्तवान् अहम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''आम् । विंशतिदिनानाम् अनन्तरं भविष्यति एव वराकी परीक्षा ।''

''परीक्षार्थं भवत्या अपि पठनीयम् अस्ति एव । मया तु उत्तीर्णता प्राप्तव्या एव । यतः मम जीवनम् एव ताम् अवलम्बते । अतः कालं व्यर्थम् अकुर्वन्तौ आवां पठने मतिं करवाव ।''

मम वचने काठिन्यं, मया यावत् चिन्तितं ततोऽपि अधिकम् आसीत् । लिह्नी सकृत् मुखम् उन्नीय मां दृष्टवती । अनिरीक्षिततया मम मुखात् निर्गतस्य वचनस्य श्रवणात् उत्पन्ना वेदना तस्याः दृष्टौ प्रतिभासते स्म ।

अहं पुनः उक्तवान् - ''इतः परं यावच्छक्यम् आवयोः मेलनं न भवति चेदेव वरम् । मम वचनात् कृपया खिन्ना मा भवतु भवती ।''

लिह्नी भूमिम् एव पश्यन्ती दश निमेषान् मौनेन उपविष्टवती आसीत् । अनन्तरं शिरः उन्नीय आतङ्कमिश्रितस्वरेण पृष्टवती सा - ''मया कोऽपि अपराधः कृतः किम् ?''

''तथा किमपि नास्ति । अवास्तविकं किमपि कारणं विचिन्त्य खेदः न प्राप्तव्यः भवत्या । अस्तु तावत्, शुभरात्रिः ।''

सा प्रतिवचनं किमपि न उक्तवती । मन्दगत्या उत्थाय सोपानानि अवरुह्य ततः निर्गतवती सा ।

मया तस्यां रात्रौ दीर्घकालं यावत् उपविश्य पठितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'वराक्याः परीक्षायाः' चिन्ता मम कदापि न आसीत् । कक्ष्यायां यत् श्रुतं तदेव उत्तीर्णतार्थं पर्याप्तं भवति स्म । तदा तदा महाविद्यालयस्य ग्रन्थालयात् पाठ्यक्रमसम्बद्धान् ग्रन्थान् आनीय पठामि स्म अपि । 'भवान् निश्चयेन प्रथमश्रेणीं प्राप्स्यति' इति वदति स्म देवप्रसादः । तस्य वचने पूर्णविश्वासः न आसीत् मम । 'प्रथमश्रेणी तु प्राप्तव्या एव । यदि शक्यते तर्हि प्रथमस्थानम् अपि प्राप्तव्यम्' इति अहं निर्णयं कृतवान् । 'स्नातकपदवीप्राप्त्यनन्तरम् उद्योगः अन्वेष्टव्यः' इत्यपि चिन्तनम् आसीत् मम । कस्यापि प्रभावोत्पादकपरिचयः न आसीत् मम । अन्यच्च विद्यार्थिवेतनार्थं प्राध्यापकस्य मेलनात् प्राप्तः अनुभवः मम स्मृतिपथे इतोऽपि आसीत् । एतादृश्यां विषमस्थितौ उत्तीर्णता यदि न प्राप्येत तर्हि शोचनीयता स्यात् मम इति अहं जानामि स्म । उत्तमं स्थानं प्राप्तवान् अभ्यर्थी स्वप्रदेशे उपेक्षितः भवेत् चेदपि प्रदेशान्तरे पुरस्कृतः भविष्यति एव खलु ?

एतत्सर्वं विचिन्त्य अहोरात्रं पठनम् आरब्धं मया । रात्रौ द्वित्रघण्टाः यावत् निद्रा क्रियते स्म । भोजनादिसमयं विहाय अन्यसमयेषु सर्वदा मम हस्ते पुस्तकम् एव भवति स्म । निरन्तरं पठनं मम अपरिचितं तु न आसीत् । तथापि विना विश्रान्तिं पठनात् शरीरे श्रान्तिः परिलक्ष्यते स्म । मया सा उपेक्षिता । परीक्षा आरब्धा । त्रिषु दिनेषु मया सम्यक् एव उत्तरं लिखितम् । तृतीयविभागीयपरीक्षाः आरब्धाः । प्रथमे दिने उत्तमतया एव लिखितं मया । द्वितीये दिने परीक्षाकेन्द्रस्य प्राप्तितः पूर्वम् एव शरीरे विशेषश्रान्तिः लक्षिता । परीक्षारम्भानन्तरम् अर्धघण्टाभ्यन्तरे ज्वरः आरब्धः । काफीम् आनीय पीतम् । तथापि समीचीनतया उत्तरं लेखितुं न शक्तं मया । परीक्षाकेन्द्रात् निर्गत्य द्विचक्रिका आरूढा । प्रयासेन सोपानानि आरुह्य कथञ्चित् प्रकोष्ठं प्रविश्य कष्टेन शय्या प्रसारिता मया । ततः किं प्रवृत्तम् इति न ज्ञायते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आरात्रि महती ज्वरबाधा । प्रातः उत्थातुं प्रयत्नः कृतः । किन्तु न शक्तम् । गृहस्वामिगृहीयाः आहूताः । प्रतिवचनं किमपि न श्रुतम् । परीक्षा, तदर्थम् आवर्ष कृतः प्रयत्नः, प्रथमश्रेणी प्राप्तव्या इति प्रबलाकाङ्क्षा इत्यादयः सर्वे जले कृतः होमः इव व्यर्थतां गताः आसन् । उत्थातुम् एव अहं न शक्नोमि स्म । परीक्षाकेन्द्रं प्रति गमनं तु स्वप्ने अपि असम्भवम् आसीत् । पानीयम् आनीय दातुम् अपि कोऽपि न आसीत् । मध्ये मध्ये शरीरे शैत्यं दृश्यते स्म । सोढुम् अशक्या पिपासा अपि बाधते स्म । प्रकोष्ठे स्थितं शीतलजलम् एव पीतं मया । उत्थातुम् अशक्तः अहं शय्यायां निश्चेष्टतया पतितः । सायं कश्चन बालकः पाठार्थम् आगतः । अहं क्षीणध्वनिना मम स्थितिं तम् उक्तवान् । सः चतुर्दशवर्षीयः बालः । अधः गृहे कोऽपि स्यात् वा इति परिशीलितं तेन । तत् गृहं कीलितम् आसीत् । अतः सः बहिः गत्वा कस्माचित् वैद्यात् किमपि औषधम् आनीतवान् । मया तदेव सेवितम् ।

ज्वरस्य शीघ्रोपशमः, विलम्बेन उपशमः वा मम दृष्ट्या समानः आसीत् इदानीम् । परीक्षा धूलिसाज्जाता आसीत् । शीघ्रम् उपशमः प्राप्तव्यः इति इच्छा एव विनष्टा आसीत् । औषधं प्रयोजनकरं न भवति स्म । पाठस्य बालकः दिने त्रिचतुरवारं मम प्रकोष्ठम् आगच्छति स्म । पेटिकायां यावत् धनम् आसीत् तत्सर्वं तस्मै बालकाय दत्तम् आसीत् मया । ततः सः प्रतिदिनम् औषधम् आनयति स्म । गृहात् उष्णीकृतं क्षीरम् आनयति स्म । खाद्यापणतः सुपिष्टकम् (ब्रेड्) आनयति स्म । तेन दत्तं विना विरोधं खादामि स्म अहम् । क्षीरं पिबामि स्म । औषधम् अपि स्वीकरोमि स्म । स तु बालकः यथामति मम शुश्रूषां करोति स्म । मम अस्वास्थ्यम् एव विरलम् । इदानीं तु परीक्षाकाले एव अस्वास्थ्यं प्राप्तम् अस्ति । मम आशासौधं पातितम् अस्ति तेन । सर्वं विधिविलसितम् ! प्रवृत्तस्य विषये चिन्तनं कर्तुम् अपि अनिच्छन् अहं जडः इव शयनं करोमि स्म । एवम् एव दश दिनानि अतीतानि । तथापि मम सेवायां तस्य बालकस्य श्रद्धा न्यूना न जाता । यथाशक्ति गुरुसेवां करोति स्म सः ।

एकादशे दिने सायङ्काले सः बालकः औषधं क्षीरं च दत्त्वा प्रतिगतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीत् । तेनैव ज्वालितः दीपः प्रकोष्ठे प्रकाशं प्रसारयति स्म । ''ह्यः एव पदवीपरीक्षाः समाप्ताः'' इति सूचितवान् सः बालकः । अहं स्वस्थाने शय्यायां शयानः आसम् ।

केनापि क्रियमाणः सोपानारोहणशब्दः श्रुतः । ततः द्वारोद्घाटनशब्दः अपि श्रुतः । 'कः आगतः' इति द्रष्टुम् अहं दृष्टिं द्वारदिशि प्रसारितवान् । तत्र लिल्ली दृष्टा । तस्याः दर्शनात् मनसा काचित् निश्चिन्तता प्राप्ता ।

मम केशाः प्रसाधनाभावात् तैलाभावात् च नितराम् अस्तव्यस्ताः जाताः आसन् । क्षौराभावतः मुखे श्मश्रुरोमाणि बहुधा दृश्यन्ते स्म । आच्छादक-शय्यावस्त्रादयः क्षालनाभावतः उग्रं स्वेदगन्धं प्रसारयन्ति स्म । एतादृशीं स्थितिं प्राप्तवन्तं मां दृष्ट्वा लिल्ली भीता इव ।

''किमर्थम् एवं शयनम् ?'' - लिल्ली समीपम् आगत्य पृष्टवती ।

सम्भाषणं कर्तुं सामर्थ्यरहितः अहं क्षीणस्वरेण उक्तवान् - ''एवम् एव विश्रान्त्यर्थम् ।''

''परीक्षा ?''

मया शिरः चालितम् । लिल्ली स्तब्धा भूत्वा मम मञ्चस्य समीपे स्थितवती । किञ्चित्कालानन्तरं समीपस्थम् आसन्दम् आकृष्य उपविष्टवती । सप्ताहतः अहं तदा तदा अर्धमूर्च्छास्थितिं प्राप्नोमि स्म । तदा अपि सा स्थितिः प्राप्ता । यदा अहं सचेतनः जातः तदा दृढपत्रेण वीजयन्ती लिल्ली दृष्टा । वीजनकारणतः मयि अल्पा शक्तिः आगता ।

''मां द्रष्टुं त्वं वा आगता !''

तदा मया युष्मच्छब्दः प्रयुक्तः यत् तत् इदानीम् अपि स्मृतिपथे अस्ति । लिल्ली प्रतिवचनं किमपि न उक्तवती ।

''किमर्थं लिल्लि ! किमपि न वदसि ?''

लिल्ल्याः मौनम् एव उत्तरम् आसीत् । पुनः मया अर्धमूर्च्छावस्था प्राप्ता । यदा सचेतनत्वं प्राप्तं तदा पार्श्वे लिल्ली न आसीत् । 'पूर्वं मया कठोरवचनं यत् उक्तं तत् स्मृत्वा खेदेन सा गतवती स्यात् । मम स्वभावः एव विलक्षणः । पूर्वापरम् अनालोच्य मया अविवेकेन किमपि झटिति उच्यते । सर्वे किमर्थं वा तत् सहेरन् ?'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मया पुनः अर्धमूर्च्छा प्राप्ता । किञ्चित् विलम्बेन एव सचेतनता आगता । तावता लिल्ली तत्र उपस्थिता आसीत् । तस्याः एकस्मिन् हस्ते गुलिकाद्वयम् आसीत् । अपरहस्ते काफीचषकः आसीत् ।

''एतत् गुलिकाद्वयं मुखे निक्षिप्य काफीं पिबतु कृपया ।''

तदा दत्तं गुलिकाद्वयं मुखे स्थापयित्वा चषकं स्वीकृत्य मया सकृत् काफी पीतम् । तावता मम स्मृतिः स्पष्टा जाता । अहं चषकं कोपेन क्षिप्तवान् । भित्तौ घट्टनेन सः काचकमयः चषकः भग्नः । कोपवशात् मम हस्तः ध्वनिः च कम्पते स्म ।

''किम् एषः एव योग्यः समयः इति मत्वा स्वहस्तस्पृष्टं काफीं मां पाययितुम् उद्युक्ता भवती ? धिक् एतां वञ्चनाम् । अलम् एतया सेवया ।''

लिल्ली शिरः अवनमितवती । मयि पुनः निश्शक्तिः उत्पन्ना । अहं शय्यायां पतितः । आगता लिल्ली वीजनम् आरब्धवती । पुनः अर्धमूर्च्छा प्राप्ता मया । सचेतनताप्राप्तिकाले मम पार्श्वे कश्चन उपाहारमन्दिरस्य वितारकः स्थितः आसीत् । मम आच्छादकं यावत्, ततोऽपि अधिकमलिनम् आसीत् तदीयं वस्त्रम् ।

लिल्ली उक्तवती - ''वितारकः एव काफीम् आनीतवान् अस्ति । कृपया पिबतु । उत्तिष्ठतु तावत् ।''

अहं निराकृतिं दर्शितवान् । सा अनुरोधं कृतवती । मम काफीपानस्य अनन्तरं वितारकः निर्गतः । अहं शयितवान् । मयि अल्पा शक्तिः दृश्यते स्म । अहं मुखं परिवर्त्य दृष्टवान् । लिल्ली सम्मार्जनं कुर्वती आसीत् । सम्मार्जनं समाप्य सा उक्तवती - ''भवतः शय्यावस्त्राणि नितरां मलिनानि सन्ति । प्रकोष्ठे किम् अन्यवस्त्राणि सन्ति ?''

अहं दृष्ट्या पेटिकां दर्शितवान् । सा ततः शुभ्रां वेष्टीम् आनीय मां शय्यायाः कोणे शाययित्वा मलिनम् आस्तरणम् अपनीय वेष्टीं प्रसारितवती । आच्छादकम् अपि अपनीय वेष्टीद्वयं योजयित्वा मदुपरि प्रसारितवती । रात्रौ नववादनपर्यन्तम् अपि प्रकोष्ठे एव स्थित्वा - ''श्वः प्रातः आगमिष्यामि । भवान् रात्रौ सम्यक् निद्रां करोतु'' इति उक्त्वा ततः निर्गतवती ।

तया दत्तायाः गुलिकायाः प्रभावतः इति भाति - मया सम्यक् निद्रा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राप्ता । जागरणप्राप्तिसमये उषःकालः अतीतः आसीत् । यद्यपि ज्वरः न अपगतः आसीत्, तथापि शरीरे दौर्बल्यं न्यूनतया दृश्यते स्म । मनसः मालिन्यम् अपगतम् आसीत् । चित्ते कश्चन उत्साहः दृश्यते स्म । 'भूताविष्टेन इव मया यत् पठितं तस्यैव फलम् एतत् । यदि सामान्यपठनं कृतं स्यात् तर्हि अपि उत्तमः परिणामः प्राप्तः स्यात् एव । तथापि मया अविवेकः कृतः' इति चिन्तयन् अहम् अस्वास्थ्यारम्भात् अनन्तरं यद्यत् प्रवृत्तं तत्सर्वं स्मृतवान् । मम सेवां श्रद्धया यः छात्रः कृतवान् तद्विषये कृतज्ञताभावः उत्पन्नः । 'ह्यः रात्रौ लिल्ली आगत्य औषधं दत्तवती यत् ततः एव एषा उल्लाघता' इत्यंशः मनसि आगतः । 'मया कटुवचनं यत् उक्तं तस्य श्रवणस्य अनन्तरम् अपि सा मां द्रष्टुम् आगता आसीत् । वस्तुतः तस्याः स्वभावः प्रशंसार्हः ।' तया आनीतस्य काफीचषकस्य क्षेपणं वञ्चकत्वारोपणं च यदा स्मृतं तदा मनसि लज्जा उत्पन्ना ।

अन्यमतीयैः स्पृष्टं किमपि न सेवनीयम् इति मम व्रतं किमपि न आसीत् । हरिजनगृहेषु अपि आहारः सेवितः आसीत् मया । तथापि क्रिस्तीयजनैः स्पृष्टस्य सेवने काचित् जुगुप्सा ! तिरस्कारभावनातः उत्पन्ना सा । क्रैस्तगुरूणां दुराचारः, तैः कृता हिन्दुधर्मस्य समाजस्य च महती हानिः च मम स्मृतिपटले स्पष्टतया प्रतिफलिता आसीत् । अतः एव क्रिस्तमतीयानां विषये कश्चन तिरस्कारभावः । 'तिरस्कारभावे सत्यपि राचम्मा-लिल्लीप्रभृतीनां स्नेहः मया किमर्थं दूरीकरणीयः ? तेषां स्नेहं सेवां च स्वीकुर्वता मया तैः स्पृष्टः आहारः किमर्थं न सेव्यते ? ह्यः रात्रौ काफीचषकं क्षिपता मया लिल्ल्यां मनोव्यथा जनिता । तथापि सा न कोपं प्राप्तवती, न वा निर्गतवती, प्रत्युत मम सेवां कृतवती । तस्याः विषये मया कृतः व्यवहारः अमानवीयः ।'

प्रातः सप्तवादनतः पूर्वम् एव लिल्ली मम प्रकोष्ठम् आगता । ताम् अनुसरन् एकेन हस्तेन काफीचषकम्, अपरेण उष्णजलपात्रं च गृहीतवान् वितारकः अपि आगतः । लिल्ली माम् उत्थाप्य मम मुखं क्षालितवती । वितारकः तत्रैव स्थितः आसीत् । 'अहं किञ्चित्कालानन्तरं काफीं पास्यामि । भवान् गच्छतु' इति वितारकः आदिष्टः मया ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य निर्गमनानन्तरम् अहम् उक्तवान् - ''लिल्लि ! तं काफीचषकम् अत्र ददातु ।''

सा तूष्णीं स्थितवती । अहं तदेव वाक्यं पुनः उक्तवान् । सा मौनेन स्थितवती आसीत् । तस्याः मुखे आश्चर्यं दृश्यते स्म । सन्निवेशम् अवगन्तुं न शक्तवती आसीत् सा ।

''तृतीयवारं वदन् अस्मि । तं काफीचषकम् अत्र ददातु ।''

''तथा मास्तु ।''

''अहं विचिन्त्य एव वदन् अस्मि । मया यथा उक्तं तथा करोतु भवती ।''

''अलम् अविवेकेन । भवतः ज्वरः इतोऽपि न अपगतः । भावनावेगवशात् कृतस्य क्षणकालिकस्य कार्यस्य विषये आजीवनं पश्चात्तापः अनुभोक्तव्यः भवेत् । अतः तथा मास्तु । .....''

पार्श्वे स्थितायाः तस्याः दक्षिणहस्तं गृहीत्वा अहम् उक्तवान् - ''इदानीं वादस्य न अयं समयः । मया यथा उक्तं तथा आचरतु भवती ।''

लिल्ली काफीचषकम् उन्नीय दत्तवती । काफीसेवनात् शरीरे उत्साहः किञ्चित् प्रवृद्धः । लिल्ल्या समीचीनतया स्थापितम् उपधानम् अवलम्ब्य अहम् उपविष्टवान् । लिल्ली मञ्चस्य समीपे एव आसन्दं स्थापयित्वा उपविष्टवती ।

''ह्यः रात्रौ मया यत् कृतं तेन खिन्ना खलु भवती ?'' - अहं खेदेन तां पृष्टवान् ।

''मया उद्देशपूर्वकं तथा न कृतम् । भवतः ज्वरतापं दृष्ट्वा अहं दिग्भ्रान्ता । तत्कारणतः औचित्यविवेकः मम नष्टः । काफीम् आनीय दानम् उचितं वा न वा इति मया न चिन्तितम् एव । एतत्कारणतः भवान् यदि मयि अन्यथाभावं न प्राप्नुयात् तर्हि तावता अलम् ।''

''वस्तुतः दोषः मया कृतः, न तु भवत्या । निरर्थकम् ईर्ष्याभावं मनसि स्थापयित्वा पोषयता मया तथा कृतम् । रात्रौ तदर्थं महान् पश्चात्तापः अनुभूतः अपि मया । इदानीं मनः किञ्चित् आश्वस्तं जातम् अस्ति'' इति एतावत् उक्त्वा अहं मौनम् अवलम्बितवान् । निमेषद्वयाभ्यन्तरे एव मया रोदनशब्दः श्रुतः । मया मुखम् उन्नीय लिल्ली दृष्टा । सा अश्रूणि मार्जयन्ती आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सान्त्वनवचनं वक्तुम् उद्युक्तं माम् उद्दिश्य – "इदानीं किमपि मा वदतु कृपया । मया सर्वम् अवगतम् अस्ति । एतावता अपि भवान् ज्वरात् न मुक्तः । अधिकसम्भाषणं श्रान्त्यै भवति एव । अतः मौनेन शयनं करोतु भवान् । एषाऽहम् अचिरात् एव प्रत्यागमिष्यामि" इति उक्त्वा पूर्वदिने राशीकृतानि मलिनवस्त्राणि उन्नीय ततः निर्गतवती सा ।

अष्टवादनसमये सः बालकः आगतः, यश्च मम सेवां करोति स्म । प्रकोष्ठस्य स्वच्छतादिकं दृष्ट्वा सः आश्चर्यभावं प्राप्तवान् । मयि उत्पन्नाम् उल्लाघतां दृष्ट्वा सः सन्तुष्टः अपि । "मम बन्धुः कश्चन उपस्थितः अस्ति । अतः इतः परं भवता साहाय्यं करणीयं नास्ति । यदा मम स्वास्थ्यं सम्यक् भविष्यति तदा अहम् एव सूचयिष्यामि – कदा पाठार्थम् आगन्तव्यम् इति" इति उक्त्वा तम् अहं प्रेषितवान् ।

नववादनसमये लिल्ली प्रत्यागता । तया सह कश्चन वैद्यः अपि आसीत् । सः मां परीक्ष्य सूच्यौषधं दत्तवान् । "सायङ्कालतः गुलिकासेवनस्य आरम्भः भवतु" इति उक्त्वा गुलिकां दत्त्वा सः निर्गतवान् । लिल्ली यवागूम् अपि आनीतवती आसीत् । मया निराक्रियमाणे अपि सा सानुरोधं यवागूं पायितवती ।

उपधानम् आलम्ब्य उपविश्य अहम् उक्तवान् – "मिथ्याडम्बरवशं गताः वयं क्वचित् वास्तवांशम् एव न अवगच्छामः । वैचित्र्यं नाम आजीवनं मिथ्यात्वस्य सत्यत्वेन परिग्रहणं, सत्यस्य आमरणं निराकरणं च प्रचलति । एवं ननु ?"

लिल्ली मौनेन स्थितवती ।

अहं पृष्टवान् – "किं लिल्लि ! मया उक्तं न अवगम्यते किम् ?"

"मया किमपि न अवगम्यते । एतत् अनवगमनम् एव वरम् इति भाति मम ।"

"युक्तम् एतत् । भवत्याः हार्दं स्नेहम् उपेक्ष्य अहं सङ्कुचितभावनानीडे निलीनः आसम् । आवयोः परिचयानन्तरं, सुदीर्घकालानन्तरम् अद्य मया विवेकः प्राप्तः अस्ति ।"

"भवता महत् अनौचित्यम् आचरितम् इति मम न भाति । भवता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वं कदाचित् उक्तम् आसीत् - 'अन्यैः सज्जीकृतस्य आहारस्य सेवनात् एव स्नेहः प्रकटितः भवति इति न' इति । मया स्पृष्टं भवता न खाद्यते चेत् न मम खेदः । वर्षद्वयात् पूर्वं यदि भवान् तथा कृतवान् स्यात् तर्हि निश्चयेन तत् मम व्यक्तित्वस्य अवमानकरकृत्यं भावयेयम् । इदानीं मम दृष्टिः परिष्कृता अस्ति । भवदर्थम् अन्यद्वारा यवाग्वाः पानीयस्य च आनयनं मम किञ्चित् क्लेशाय अभविष्यत् । किन्तु तदर्थम् एव भवता जीवननियमः परिवर्तनीयः इति अपेक्षाकरणम् अनुचितम् एव स्यात् ।''

तस्याः मनः सहिष्णुत्वं च एवं वैशाल्यं प्राप्तवत् स्यात् इति मया तर्कितम् अपि न आसीत् । अहम् उक्तवान् - ''भवत्याः मनः एवं पक्वतां गतम् अस्ति इत्यतः एव स्यात् - मम चिन्तने अपि परिवर्तनम् आगतम् अस्ति । मनःशास्त्रदृष्ट्या पश्यामः चेत् भासते यत् यावत् भवत्याम् असहिष्णुता स्यात् तावत् मम मनसः उदारता न अभविष्यत् इति । भवती केनचित् मार्गेण गच्छन्ती आत्मानं परिवर्तयन्ती अस्ति । अहं मम चिन्तनं परिवर्तयन् अस्मि । उभयोः अपि दृष्ट्योः समागमः एव श्रेयसे ।''

''तत् आस्तां तावत् । परीक्षायाः का गतिः जाता ?''

अहं प्रवृत्तं समग्रम् आद्यन्तं विवृत्य - ''आगतः ज्वरः शीघ्रम् उपशान्तः प्रायः अभविष्यत् । किन्तु उपशान्तिः प्राप्तव्या इति भावः एव मम मनसि न आसीत् । मनसा शरीरस्य रक्षणं क्रियते इति श्रूयते । मया मनसः एव रक्षणं प्रतिगृहीतम् आसीत् । अतः एव एतावन्ति दिनानि सुप्तम् आसीत् मया । ह्यः रात्रौ भवत्याः आगमनस्य अनन्तरं 'ज्वरस्य उपशान्तिः भवेत्' इति भावः मयि उदितः । इतः परं सप्ताहाभ्यन्तरे यथापूर्वं स्वस्थः भविष्यामि । परीक्षायां भवत्या कथं लिखितम् ?'' इति पृष्टवान् ।

तदा लिल्ली औदासीन्येन उक्तवती - ''कथमपि लिखितं स्यात् मया । किं तद्विषये चिन्तनेन ?'' इति ।

''किमर्थं तथा उच्यते ?''

''अहम् अनुत्तीर्णा भवेयं चेदपि न कस्यापि चिन्ता स्यात् । उद्योगान्वेषणं तु मया करणीयं नास्ति । अतः उत्तीर्णतानुत्तीर्णते उभे अपि मम दृष्ट्या समाने एव ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''भवत्याः पिता एतावता एव वरान्वेषणार्थम् उद्युक्तः स्यात् । अतः पूर्वभावितया एव अभिनन्दनानि । भवती उत्तमा तरुणी । पतित्वेन योग्यस्य तरुणस्य दानेन भगवान् भवतीम् अनुगृह्णातु इति आशंसामि ।''

''अलम् आशंसनेन'' इति कोपेन उक्त्वा लिल्ली पृष्टवती - ''अग्रे किं करणीयम् इति चिन्तयति भवान् ?''

''इतः पूर्वं मया कदापि सप्टम्बर्परीक्षा न दृष्टा । एतदवसरे सा परीक्षा सम्मुखीकरणीया मया ।''

''अग्रजः वदति स्म - किमपि न पठितं चेदपि भवान् प्रथमश्रेणीं प्राप्नुयात् एव इति । इदानीं यत् प्रवृत्तं तत् तु दुरदृष्टवशात् एव जातम् । किं गतस्य विषये चिन्तनेन ? शीघ्रं स्वास्थ्यं प्राप्नोतु भवान् ।''

एकादशवादनपर्यन्तम् अपि आवां वार्तालापं कृतवन्तौ । देवप्रसादः नगरे न आसीत् । राचम्मा मातृगृहं गतवती आसीत् । लिल्ल्याः स्नेहपूर्णसेवया अहं सप्ताहाभ्यन्तरे स्वस्थः जातः ।

* * *

मम आयमूलं बन्धनहेतुः च यः बालिकानां पाठः आसीत् सः परीक्षासमाप्तिकारणतः स्थगितः आसीत् । किन्तु एतावता एव उत्तमतया पाठनं करोति इति मम ख्यातिः सर्वत्र प्रसृता आसीत् । अतः मया आर्थिकक्लेशः विशेषतया न अनुभूतः ।

मैसूरुं प्रति राचम्मायाः आगमनं तु षण्मासानन्तरं सम्भाव्यते स्म । ग्रीष्मविरामानन्तरं सप्टम्बर्परीक्षायाः शुल्कं दातव्यम् आसीत् । प्रतिदिनं कश्चन कालः गृहपाठार्थं याप्यते स्म । अवशिष्टे काले न किमपि कार्यम् । अतः विरामकालः अधिकः । प्रातः एव गृहपाठान् समापयामि स्म । प्रतिदिनम् अपि अपराह्णे लिल्ली मम प्रकोष्ठम् आगच्छति स्म । कञ्चन विषयम् अधिकृत्य आवयोः चर्चा प्रचलति स्म । क्वचित् जल्पनमात्रम् अपि प्रचलति स्म । एषु दिनेषु लिल्ल्यां कठोरता न दृश्यते स्म । व्यवहारे मार्दवता, नयविनयादयः च आधिक्येन दृश्यन्ते स्म । राचम्मायां दृश्यमानः अनुकम्पस्वभावः अपि प्रवृद्धः आसीत् तस्याम् । व्यवहार-वेष-भूषादयः सर्वे भारतीयाः एव भवन्ति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्म । आंग्लो-इण्डियन्जनान् अनुकुर्वती आंग्लभाषया यत् सम्भाष्यते स्म तत् परित्यज्य सा इदानीं शुद्धया प्रादेशिकभाषया वदति स्म । सम्भाषणसमये मया प्रयुज्यमानान् शब्दान् वाक्यप्रयोगान् च सा जागरूकतया परिशीलयति स्म । महता प्रयत्नेन शुद्धोच्चारणम् एव करोति स्म सा ।

कदाचित् सा उक्तवती - ''इतः परं मां लिल्लीनाम्ना मा निर्दिशतु । लीलानाम्ना एव निर्दिशतु'' इति ।

''किमर्थम् एतत् परिवर्तनम् ?'' - मया कुतूहलेन पृष्टम् ।

''न परिवर्तनम्, अपि तु पूर्वस्थितेः प्राप्तिः । लिल्ली इति नाम अस्माकं भाषायाः परिसरस्य वा अनुगुणं न ।''

''किन्तु भवत्यै तदेव नाम युज्यते ।''

तस्याः मुखं विवर्णं जातम् । ''मयि कः दोषः अस्ति ? । वदतु कृपया । परिष्कर्तुं प्रयत्नं करिष्यामि ।''

''नाम एतदेव भवतु इत्यस्य अपार्थः न कल्पनीयः भवत्या ।''

''भवतः उपहासोक्तिः अवगम्यते मया । अलं व्यर्थसमर्थनेन ।'' तस्मिन् दिने लिल्ल्याः सर्वेषु व्यवहारेषु कोपः दृश्यते स्म ।

मासाः क्रमेण गताः । परीक्षाकाले प्राप्तम् अस्वास्थ्यं ज्ञात्वा नञ्जुण्डः सानुकम्पं पत्रं लिखितवान् । 'मद्ग्रामम् आगच्छतु' इति सूचितवान् आसीत् सः । मया कुत्रापि न गतम् । परीक्षाम् असमाप्य कुत्रापि गन्तुम् इच्छा सर्वथा न आसीत् मम । ग्रीष्मविरामः अतीतः । लिल्ली पदवीपरीक्षायाम् उत्तीर्णा । 'राचम्मा पुत्रीं प्रसूतवती' इति वार्ता प्राप्ता । देवप्रसादः पुनः श्वशुरगृहं गत्वा आगतः । एवम् एव सप्टम्बर्परीक्षा अपि आसन्ना । लिल्ली स्वकीयानि सर्वाणि पुस्तकानि आनीय मह्यं दत्तवती । तस्याः प्रोत्साहः निरन्तरं प्रचलति स्म । एतदवसरे मया अधिकतया न पठितम् । परीक्षायाम् उत्तमतया एव उत्तराणि लिखितानि ।

परीक्षायाः अनन्तरदिने कार्यं किमपि न आसीत् मम । किमपि पुस्तकं पठितुम् अपि उत्साहः न आसीत् । समययापनं कथम् इति अजानन् शय्यायां शयितः आसम् । अपराह्णे त्रिवादने लिल्ली मम प्रकोष्ठम् आगता ।

''किमर्थम् एव शयितम् ?'' - पृष्टवती सा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''परीक्षा तु समाप्ता । समययापनं कथम् इति समस्या इदानीम् ।''

''किञ्चन चलनचित्रं द्रष्टुं गच्छाव'' इति सूचितवती सा । तत् मह्यं न अरोचत । ''पूर्वं द्विचक्रिकया गत्वा वृक्षसमूहयुक्ते प्रदेशे यत्र सञ्चारः कृतः तं प्रदेशं गच्छाव'' इति अहं सूचितवान् । सा अङ्गीकृतवती । आवां पादाभ्याम् एव प्रस्थितवन्तौ । मार्गे लिल्ली उक्तवती - ''भ्रातृजाया ग्रामतः पत्रं लिखितवती अस्ति । सप्ताहाभ्यन्तरे सा अत्र आगमिष्यति'' इति ।

राचम्मायाः दर्शनस्य अनन्तरं षट् मासाः अतीताः आसन् । अतः तस्याः आगमनवार्ता मम सन्तोषाय एव जाता ।

मिर्जामार्गम् अतिक्रम्य कासारम् अपि अतिक्रम्य आवां गतवन्तौ । उभौ अपि उल्लासपूर्णौ आस्व । परिसरः अपि आह्लादजनकः एव आसीत् । द्विचक्रिकया आगत्य पूर्वं यत्र उपविष्टम् आसीत् तत्रैव आवाम् उपविष्टवन्तौ । पूर्वं यदा आगतं तदा ग्रीष्मर्तुः आसीत् । क्षेत्राणि शुष्काणि दृश्यन्ते स्म । इदानीं तु आश्वयुजमासः । सर्वत्र हरितवर्णता । वृक्षाः अपि हरितपर्णैः शोभमानाः वितानाङ्गभूताः इव परस्परम् आलिङ्गितवन्तः दृश्यन्ते स्म । वृक्षाणाम् अधः अपि हरितवर्णीयतृणानां शय्या । नीलगम्भीरः आकाशः पृथिव्याः शोभां वर्धयति स्म ।

वृक्षशाखानां मध्ये दृश्यमानम् आकाशस्य अल्पभागं पश्यन् अहम् उत्तानमुखतया शयनं कृतवान् । किमपि गीतम् अस्पष्टस्वरेण गायन्ती मम पार्श्वे उपविष्टवती आसीत् लिल्ली । परीक्षाक्लेशस्य अपगमनात् मनः प्रसन्नम् आसीत् । पार्श्वे उपविष्टा लिल्ली अद्य अपूर्वसुन्दरी इव भासते स्म । अद्यावधि अहं तया सह बहुधा वार्तालापं कृतवान् आसम् । तां बहुवारं दृष्टवान् अपि आसम् । तथापि तस्याम् अद्य यत् सौन्दर्यं दृष्टं तत् इतः पूर्वं कदापि न दृष्टम् आसीत् । अहम् आकाशस्य दिशि दृष्टिं प्रसारितवान् । तथापि मनसि लिल्ली एव । मनसः स्वभावः एव तादृशः । यत् मनस्तः वयम् अपनेतुम् इच्छामः तदेव पौनःपुन्येन चिन्तयति मनः ।

गानं स्थगयित्वा लिल्ली आकाशम् एव पश्यन्ती पृष्टवती - ''किमर्थं मौनम् ? किं चिन्त्यमानम् अस्ति ?''

''तव विषये एव चिन्तनं प्रचलति ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अजानतः मम मुखात् निर्गतम् आसीत् एतत् वचनम् । झटिति विवेकं प्राप्य अहम् उक्तवान् - ''क्षम्यताम् । किमपि चिन्तयन् युष्मच्छब्देन भवतीं निर्दिष्टवान् अहम् ।''

''तत्र अनौचित्यं किमपि नास्ति इति मया पूर्वम् एव उक्तम् । भवान् मां तथा सम्बोधयति चेदेव शोभते । इतः परं तथैव व्यवहारः भवतु ।''

अहं शिरः उन्नीय तां दृष्टवान् । सा भूमिं पश्यन्ती आसीत् । पार्श्वे उपविष्टायाः तस्याः दक्षिणहस्तः सुदृढं गृहीतः मया । मम हस्तः कम्पते स्म । शरीरे रक्तसञ्चारस्य वेगः अनुभूयते स्म । कण्ठः शुष्कः इव भासते स्म । अहम् उद्वेगयुक्तेन कम्पमानेन स्वरेण उक्तवान् - ''लिल्लि !''

सा प्रतिवचनं किमपि न उक्तवती ।

''किमर्थं मौनम् ?''

सा उत्तरं किमपि न दत्तवती । अहं पृष्टवान् - ''लिल्लि ! भवती न किमपि वदति । अहं किं वक्तुम् इच्छामि इति अवगम्यते खलु भवत्या ?''

सा झटिति स्वहस्तं प्रतिस्वीकृतवती । निरोधप्रयत्नम् अतिक्रम्य तस्याः नेत्राभ्याम् अश्रूणि आगतानि । सा आञ्चलेन नेत्रे मार्जितवती ।

''किमर्थं रोदनम् ?'' इति पृच्छन् अहं तस्याः हस्तौ दृढतया गृहीतवान् । सा माम् अवलम्बितवती । मम अङ्के मुखं निवेश्य सशब्दं रुदितवती सा । किङ्कर्तव्यतामूढः अहं मौनम् आश्रितवान् । रोदनपूरस्य समाप्तेः अनन्तरम् अहं तां पृष्टवान् - ''किमर्थं रोदनम् ?''

''आनन्दाश्रु एतत् । अद्य भवान् मां युष्मच्छब्देन सम्बोधितवान् खलु ? तदर्थम् एतत् ?''

''तन्नाम ?''

''तन्नाम ? न किमपि'' इति वदन्ती सा शून्ये दृष्टिं स्थापितवती ।

किञ्चित्कालानन्तरं दीर्घं निश्श्वस्य सा पुनः उक्तवती - ''तन्नाम किम् इति यदि वदेयं तर्हि भवान् मां लज्जाविहीनां न भावयेत् खलु ?''

''न सर्वथा । वदतु कामम् ।''

''भवान् यदा अस्वस्थः आसीत् तदा अहं भवन्तं द्रष्टुम् आगता । तदा भवान् - 'मां द्रष्टुं त्वं वा आगता' इति वदन् मयि युष्मच्छब्दं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रयुक्तवान् आसीत् । तदा मया प्राप्तः सन्तोषः तावत् अवर्णनीयः । किन्तु अनन्तरकाले पुनः भवता शिष्टाचारः अवलम्बितः । ततः षट् मासाः अतीताः । इदानीं पुनः मयि भवतः कृपा दृश्यते ।''

''अद्य मयि स्थितः भावः तदा न आसीत् ।''

''आसीत् एव । किन्तु भवान् न जानाति स्म ।''

''एवं तर्हि अहं मम अन्तरङ्गं यावत् जानामि ततोऽपि अधिकं भवती एव जानाति ? तदस्तु, तत्काले भवत्यां कः भावः आसीत् ।''

लिह्ली दीर्घं निश्श्वस्य उक्तवती - ''सर्वम् अपि व्यक्ततया एव वक्तुं न शक्नोति महिला । स्नेहमात्रार्थं काऽपि महिला अन्यस्य अपरिचितस्य पुरुषस्य सेवां तावत्या श्रद्धया न करोति ।''

मम मनः वायुः इव भाररहितं सत् आकाशे डयमानं जातम्। अननुभूतपूर्वः कश्चन अपूर्वः आनन्दः मयि उद्गतः । हर्षः, सम्भ्रमः, अननुभूतपूर्वः आनन्दः च मयि युगपत् प्रवहन्ति स्म । तस्मिन् प्रवाहे मनः निमज्जति स्म । अदृष्टपूर्वस्य सुन्दरस्य, किन्तु अस्पष्टस्य भाविजीवनस्य दिशि मनः अधावत् । अहं लिह्लीं दृष्टवान् । तस्याः नेत्रयोः अपूर्वः मार्दवभावः दृश्यते स्म ।

''लिह्लि ! अहं भवतीं परिणेष्यामि ।''

सा पुनः रोदनम् आरब्धवती । तस्याः रोदनस्य आवेगः तावान् आसीत् यत् ताम् अहं सान्त्वयितुं न शक्तवान् । अहं तां हस्तद्वयेन अपि आकृष्य मम अङ्के शायितवान् । तस्याः अश्रूणि मार्जितानि मया । सर्वदा यत् भवति स्म तत् वस्तुस्थितिपरिज्ञानं मयि लुप्तम् आसीत् । अहं भावनावेशेन नीयमानः आसम् । तस्याः अश्रूणि निरन्तरं वहन्ति स्म ।

''अलं रोदनेन लिह्लि ! निश्चयेन अहं भवतीं परिणेष्यामि । मम नाम्ना शपे, आवाम् अभिन्नहृदयौ भवाव ।''

''अलं नाम्ना शपथेन । आवयोः विवाहः न भविष्यति ।''

''किमर्थम् ? किं भवती विवाहं न इच्छति ?''

सा उत्थाय उपविश्य मनसः समस्थितिं प्राप्य - ''इदानीम् आवयोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उभयोः अपि मनःस्थितिः सामान्यस्थितौ नास्ति । वास्तवस्थितिम् आदौ मनसि स्थापयाम । भवतः जातिः अन्या, मम जातिः अन्या । परस्परम् अपूरके मते आवयोः जन्म जातम् । मनसः अङ्गीकारमात्रं सर्वं न साधयति ।.....'' इति उक्तवती ।

''तथापि.....'' इति अर्धोक्त्या अहं मम कथनं स्थगितवान् । मम मनसः हर्षः विनष्टः । प्रकाशस्य नाशः अन्धकारस्य प्रसारः च जातः इव । लिल्ल्या उक्तः अंशः मया नैव चिन्तितः आसीत् । सा मनसा समीपे स्थिता अपि जन्मना दूरे स्थिता । मम बुद्धिः हतप्रभा जाता । मुखं म्लानं जातम् । अहं मूकः जातः ।

तदा लिल्ली उक्तवती - ''आवयोः परिचयः यः जातः सः एव दुरदृष्टस्य विषयः । पञ्जरयोः बद्धौ पक्षिणौ इव स्वः आवाम् । पञ्जरबन्धम् अपि अतिक्रम्य मनसी समीपम् आगते । यदि इतः पूर्वम् एव विवेकः प्राप्तः स्यात् तर्हि विषयस्य वर्धनम् एतावत्पर्यन्तं यथा न भवेत् तथा कर्तुं शक्यम् अभविष्यत् प्रायः ।''

अहं विमनस्कतया स्थितः आसम् । सा कथनम् अनुवर्तितवती - ''आवयोः परस्परमेलनं यथा न भवेत् तथा यावच्छक्यं प्रयत्नः वरम् इति पूर्वं कदाचित् भवान् उक्तवान् आसीत् निष्ठुरतया । तस्मिन् दिने मया भवद्विषये महान् कोपः प्राप्तः । तथापि भवतः कथनस्य आशयः तु अवगतः एव आसीत् । अतः भवता युक्तम् एव उक्तम् इति मत्वा मनस्समाधानं प्राप्तुं मया यत्नः कृतः । किन्तु मनः एतदर्थं सिद्धं न आसीत् । भवतः दर्शनं विना स्थितिः सर्वथा दुस्सहा आसीत् । कथञ्चित् परीक्षा सम्मुखीकृता मया । प्रतिदिनम् अपि भवत्प्रकोष्ठसमीपम् आगच्छामि स्म । उपरि आगन्तुं धैर्यम् अप्राप्य प्रतिगच्छामि स्म । परीक्षानन्तरदिने भवता कथं लिखितम् इति विचार्य वा गन्तव्यम् इति निश्चित्य अहम् उपरि आगता । भवान् अस्वस्थः आसीत् । सौभाग्यवशात् भवत्सेवाभाग्यं प्राप्तं मया । परन्तु तत् सौभाग्यम् एव दौर्भाग्याय । भवान् अस्वस्थः अभवत् यत् तत् निश्चयेन दौर्भाग्यवशात् जातम् । ततः न केवलं भवतः परीक्षा नष्टा, आवयोः स्नेहः अपि पुनः प्रवृद्धः । स्वास्थ्यप्राप्त्यनन्तरम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि भवान् कठोरतया - 'इतः परं भवती मम प्रकोष्ठं न आगच्छतु' इति यदि आदिशेत् तर्हि वरम् अभविष्यत् ।''

''मयि मानवीयता अपि न भवेत् इति किं भवती इच्छति ?''

''सा भवति अस्तीत्यतः एव एतत् एतावत्पर्यन्तं प्रवृद्धम् ।''

''परिणामः अप्रियः भविष्यति इति जानती अपि भवती किमर्थं मां द्रष्टुम् आगच्छति स्म ? भवती स्वयम्प्रेरणया दूरं गन्तुम् अशक्ष्यत् एव खलु ?''

''अहं शक्नोमि, स्वयम्प्रेरणया गन्तव्यम् इति अहम् अपि चिन्तयामि स्म । किन्तु तथा कर्तुं तु न शक्नोमि स्म ।''

अहं विमनस्कः सन् तृणानाम् उपरि शयनं कृतवान् । लिल्ली पुनः उक्तवती - ''भवत्कारणतः मया जीवने नूतना दृष्टिः प्राप्ता । हिन्दु-धर्म-संस्कृत्यादीनां विषये विशेषादरश्च मयि उत्पन्नः । किन्तु हिन्दुनामिकायां भावरूपकल्पनायां वस्तुरूपं प्राप्य स्थितः भवान् एकः एव दृश्यते स्म मया । भवदर्थम् अहं हिन्दुधर्मम् अधिकृत्य अध्ययनं करोमि स्म, उत हिन्दुधर्मविषये अध्ययनार्थं भवत्समीपम् आगच्छामि स्म इति तु मया स्पष्टतया न ज्ञायते । कदाचित् अहं चिन्तयामि स्म - 'ललाटे तिलकं, कपोले हरिद्रां च धृत्वा हिन्दुमहिला भूत्वा यदि अहं भवतः पत्नी भवेयम् .....' इति । भवदर्थं मम एव जातिविषयकः अभिमानः न्यूनः जातः, शून्यतां गतः । मातापितरौ अन्यविधान् आत्मीयान् चापि परित्यज्य आगन्तुं सिद्धा अस्मि । भवत्सान्निध्यं प्राप्तव्यम् इति उत्कटा इच्छा अस्ति मयि । किन्तु अहं हिन्दुः भवितुं न अर्हामि । यतः भवतः धर्मः मां न अङ्गीकरोति । भवत्पत्नीत्वप्राप्तिसौभाग्यं नास्ति मम ।''

पुनरपि अश्रुमार्जनं कृतवती सा ।

''पुनर्जन्मनि विश्वासः करणीयः इत्यंशः मया भवत्तः एव ज्ञातः । एतस्मिन् जन्मनि तु आवयोः सङ्गमः अशक्यः । यत्किञ्चित् धर्मकार्यं कुर्वती आयुः समापयिष्यामि । अग्रिमजन्मनि वा हिन्दुकुले जन्म प्राप्य भवता सह स्थास्यामि ।''

तया उच्यमानानि वचनानि मम कर्णयोः उपरि पतन्ति स्म । किन्तु मनः तु निश्चेष्टम् आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''एकं दिनं वा भवान् मम हस्तौ गृहीत्वा पतिः पत्नीं यथा वदति तथा मां सम्बोधितवान् खलु ? तावता तृप्ता अहम् । अहं किञ्चित् वक्तुम् इच्छामि । मया उक्तम् अङ्गीक्रियते इति भवता प्रतिज्ञा करणीया ।''

''भवत्या वक्तुम् इष्टं किं तत् ?''

''भवता आदौ प्रतिज्ञा करणीया - अङ्गीकरिष्यते एव इति ।''

''असाध्यं कार्यं प्रतिज्ञावचनमात्रेण साध्यं न भवति । साध्यं तु प्रतिज्ञां विना अपि सिद्ध्येत् एव । अतः किं तत् इति वदतु ।''

''भवता अहं विस्मर्तव्या । प्रयत्नेन भवता तत्तु कर्तुं शक्यते एव । अन्या योग्या हिन्दुकन्या भवता परिणेतव्या । कस्मिंश्चित् अमङ्गले मुहूर्ते मया भवतः जीवने प्रवेशः कृतः । किन्तु ततः भवतः जीवनं विनष्टं न भवेत् इति मम इच्छा ।''

अहं मौनेन स्थितवान् ।

लिल्ली पुनः किमपि वक्तुम् उद्युक्ता । 'तूष्णीं तिष्ठतु' इति हस्तसङ्केतेन सूचयित्वा अहम् उत्थाय उपविष्टवान् । मया मौनम् अपेक्षितम् आसीत् । मनः शान्तिम् इच्छति स्म, न तु सम्भाषणम् । कालपरिज्ञानं विलुप्तम् आसीत् । अनधकारच्छाया क्रमेण सर्वम् आक्रामन्ती आसीत् । वृक्षाणाम् अधः अपि अन्धकारः प्रसरन् आसीत् । ''गच्छाव किम् ?'' इति पृष्टवती लिल्ली ।

अहं मौनेन उत्थितवान् ।

''तथैव मुहूर्तं तिष्ठतु'' इति उक्त्वा लिल्ली, हिन्दुगृहिणी पतिं यथा, तथा मम पादौ स्पृष्ट्वा नमस्कृत्य हस्ताभ्यां नेत्रे स्पृष्टवती ।

मम मुखं गम्भीरम् आसीत् । मार्गे तया किमपि सम्भाषणं न कृतम् । अपरिचितौ मानवप्राणिनौ इव आवां त्रिक्रोशात्मके निर्जने मार्गे गच्छन्तौ आस्व । तया स्वगृहं प्रति यदा प्रस्थितं तदा अपि मया किमपि सम्भाषणं न कृतम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मदीयमनोदार्ढ्यविषये मम अपरिमितः विश्वासः आसीत् । स्वाभिमानः अपि मम दृढः एव आसीत् । स्वीकृतं कार्यम् अचलविश्वासेन साधयामि स्म एव । जीवनानुभवः अपि पर्याप्तमात्रेण आसीत् इत्यतः परिस्थितेः साध्यासाध्यतां विमृश्य तारतम्यपरिज्ञानं परिवर्धितवान् आसम् । लिल्लीतः मनसः विमुखीकरणं सर्वदृष्ट्या अपि अपरिहार्यम् आसीत् । अतः सा पूर्णतः विस्मर्तव्या एव इति मया निर्णयः कृतः । मनोनिग्रहशक्तेः परीक्षाकालः आसीत् अयम् । विवेकबन्धं भित्त्वा अनुरागधारा निर्गच्छन्ती आसीत् । तस्यां रात्रौ मया निद्रा न प्राप्ता । 'द्वित्राणि दिनानि एवं भवेत् । अनन्तरं सर्वं सुष्ठु भविष्यति' इति परिभावितं मया । किन्तु यथा यथा दिनानि अतीतानि तथा तथा मनसः अशक्तिः वर्धमाना जाता । परिष्कारचिह्नानि न लक्ष्यन्ते स्म । सप्ताहं यावत् एतस्मिन् स्थले न स्थीयते चेत् वरं स्यात् इति विचिन्त्य मया शकुन्तलायाः ग्रामं प्रति गतम् ।

शकुन्तला-नञ्जुण्डौ सार्धैकवर्षात् पूर्वं दृष्टौ आस्ताम् । 'सकृत् आगत्य गच्छतु' इति ताभ्यां सानुरोधं पत्रं लिखितं चेदपि मया न गतम् आसीत् । तौ इदानीं चलुवरायपत्तनमण्डलस्थे हुलिहळ्ळिग्रामे वसतः स्म । नञ्जुण्डस्य कश्चन अनुजः अपि ताभ्यां सह वसति स्म । अन्यौ अनुजौ मात्रा सह बिळ्ळकेरेग्रामे एव वसतः स्म । अनिरीक्षितरूपेण मम आगमनं दृष्ट्वा शकुन्तलानञ्जुण्डौ नितरां सन्तुष्टौ । शकुन्तला इदानीं सार्धैकवर्षीयस्य पुत्रस्य माता । मातृत्वगाम्भीर्यं दृश्यते स्म तस्याम् । अतिलज्जाशीलता इदानीं न दृश्यते स्म तस्याम् ।

यस्मिन् दिने मया गतं तद्दिने रात्रौ एव शकुन्तला विवाहविषयम् उपस्थापितवती । ''समीपग्रामवासिनः बहवः परिचिताः कन्यादानार्थं सिद्धाः सन्ति । विवाहं घटयतु इति आर्यपुत्रं सानुरोधं वदन्तः सन्ति । एतस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रामस्य भूस्वामिनः गृहे योग्या कन्या अस्ति । विवाहसम्बन्धेच्छया एव भूस्वामिपत्नी मयि महतीं मैत्रीं दर्शयति । सा कन्या आर्यपुत्रस्य शिष्या अपि । माध्यमिकशालायाम् उत्तीर्णा । बुद्धिमती गुणवती च । रूपेण सा काश्मीरीयाम् अपि अतिशेते'' इति उक्तवती सा । नञ्जुण्डः अपि एतस्य समर्थनं कृतवान् ।

गमनानन्तरं प्रथमे दिने सर्वेषां सहवासतः उत्साही एव आसम् । द्वितीये दिने मनोवेदना प्राबल्यं प्राप्तवती । तस्याः गोपनार्थं मया कृताः प्रयत्नाः सर्वे विफलाः जाताः । भोजने अपि इच्छा न भवति स्म । परीक्षायाम् अनुत्तीर्णता प्राप्ता आसीत् यत् तस्यैव फलम् एतत् इति तौ चिन्तितवन्तौ । ततः सान्त्वनवचनानि अपि तौ उक्तवन्तौ । विवाहः सम्पद्यते चेत् सर्वं सुष्ठु भविष्यति इति उक्तवान् नञ्जुण्डः । विहारव्याजेन प्रस्थाय तद्ग्रामस्य भूस्वामी नञ्जुण्डस्य गृहम् आगतः । कुशलवार्तालापाः प्रवृत्ताः । भूस्वामिनः आशायाः वर्धनम् अनुचितम् इति मत्वा अहम् उक्तवान् – ''सद्यःकाले विवाहविचारः मम मनसि नास्ति'' इति । ''विवाहपर्यन्तम् अपि सर्वे तरुणाः एवम् एव वदन्ति'' इति उक्तवती पाकशालास्था शकुन्तला । ''मम गृहे श्वः कश्चन उत्सवः अस्ति । भवन्तः सर्वे आगच्छन्तु'' इति सर्वान् निमन्त्रितवान् भूस्वामी । ''विवाहेच्छा तु मम नास्ति । अतः एतत्सर्वं न आवश्यकम्'' इति मया उक्तम् ।

''भोजनार्थं निमन्त्रणस्य विवाहस्य च न कोऽपि सम्बन्धः । आवयोः उभयोः अपि गृहयोः सम्बन्धः आत्मीयः अस्ति । मम ज्येष्ठा पुत्री मङ्गलगौरीपूजां करोति । अतः सर्वैः भोजनार्थम् आगन्तव्यम् एव'' इति सानुरोधम् उक्त्वा भूस्वामी निर्गतवान् ।

अनन्तरदिने अस्माभिः यदा गतं तदा विवाहयोग्यया कन्यया नूतनशाटिकां धारयित्वा ताम् इतस्ततः आटितवन्तः । म्लानं मम मनः एतया घटनया अधिकम्लानतां गतम् । एतत् ज्ञातवन्तः गृहजनाः मया सह अधिकवार्तालापं न कृतवन्तः ।

गृहं प्रति आगमनानन्तरं कन्यायाः रूपगुणादिकं प्रशंसन्ती शकुन्तला उक्तवती – ''विवाहसमये प्रभूतं दीयते तैः । भवतः महतीम् अपि अपेक्षां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न तिरस्कुर्वन्ति ते । आवश्यकं चेत् कन्याम् अस्मद्गृहम् एव आनाययामि । पुनरपि तां पश्यतु । गानयोग्यतां परिशीलयतु । भवतः अङ्गीकारः प्राप्तः चेत् विवाहः सम्पन्नः इव ।''

'सप्ताहं यावत् वा भगिनीगृहे स्थातव्यम्' इति निश्चित्य अहं तत्र गतवान् आसम् । किन्तु दिनत्रयाभ्यन्तरे एव तत्र वासः अप्रियः जातः । अन्तरङ्गस्य अशान्तिः प्रतिक्षणं मां बाधते स्म । रात्रौ निद्रा न आलिङ्गति स्म । मम स्थितिः नञ्जुण्डे चिन्ताम् अजनयत् । 'परीक्षाकारणमात्रेण एवं भवितुं न अर्हति' इति अवगतवान् सः । अतः कदाचित् वायुविहारार्थं मां ग्रामात् बहिः नीत्वा - 'चिन्ताकारणं वदतु' इति सानुरोधम् उक्तवान्, प्रार्थितवान्, अभियाचितवान् च । 'एषः मम बाल्यमित्रम् । मम हितम् एव सदा चिन्तयति सः । यदि एतं वदेयं तर्हि मनसः भारः किञ्चित् वा न्यूनः भवेत्' इति विचिन्त्य अहं लिल्लीपरिचयात् आरभ्य अद्यपर्यन्तं यद्यत् प्रवृत्तं तत्सर्वं विस्तरेण निवेदितवान् । सर्वं श्रुत्वा नञ्जुण्डः दीर्घं निश्वसितवान् ।

''भवतः मनस्स्थितिम् अहम् अवगच्छामि । 'शकुन्तला अस्मद्गृहस्य स्नुषा भवतु' इति आशयं प्रकटय्य अम्बा पत्रं लेखितवती आसीत् खलु ? ततः आरभ्य भवदङ्गीकारपर्यन्तं ममापि स्थितिः एवम् एव आसीत्'' इति उक्त्वा नञ्जुण्डः बहुधा मम सान्त्वनं कृतवान् ।

दिनद्वयम् अतीतम् । नञ्जुण्डः कदाचित् मां सञ्चारव्याजेन बहिः नीत्वा - ''मम कथनं विचित्रम् इव भासेत कदाचित् । तथापि हिताकाङ्क्षया वदामि । भवान् भूस्वामिनः पुत्रीं पुनः एकवारं पश्यतु । तादृशी अपूर्वरूपवती सर्वथा विरला । सा गुणवती अपि । विना विरोधं विवाहम् अङ्गीकरोतु भवान् । अष्टदिनाभ्यन्तरे अपि ते विवाहं निर्वर्तयितुं सिद्धाः । अतः इदानीं मैसूरुं प्रति भवतः गमनं मास्तु । विवाहानन्तरं दिनत्रयाभ्यन्तरे एव सा क्रिश्चियन्तरुणी मनोभित्तितः अपगता भविष्यति । पदवीपरीक्षा तु भवतः समाप्ता एव । भूस्वामी एव भवदुचितम् उद्योगं दापयिष्यति । अतः विवाहम् अङ्गीकरोतु भवान्'' इति बोधितवान् ।

''भवता उच्यमानं तर्कसम्मतं स्यात् नाम । किन्तु भावसम्मतं तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न । यदि मया अङ्गीकारः न दीयेत तर्हि भवान् शकुन्तलायाः ऋते किम् अन्यां पर्यणेष्यत् ?''

''किम् उत्तरं वक्तव्यम् इति अहं न जानामि । तथापि मया यथा उच्यते तथा करणम् एव समीचीनम् इति भाति । भवता उक्तस्य प्रसङ्गस्य, शकुन्तलाप्रसङ्गस्य च अस्ति महान् भेदः ।''

मम स्थितिं सः अवगच्छति स्म । तथापि मम साहाय्यकरणे असमर्थः आसीत् सः । पुनः दिनद्वयं स्थित्वा अहं मैसूरुं प्रति प्रत्यागतः । यदि अहम् इतोऽपि अधिकदिनानि तिष्ठेयं तर्हि गृहपाठस्य विघ्नः अभविष्यत् । प्रस्थानसमये शकुन्तला सम्प्रदायानुसारं मां नमस्कृतवती । तस्याः पुत्रः - मम भागिनेयः हस्तौ सञ्चाल्य पुनरागमनं प्रार्थितवान् । यानस्थानकपर्यन्तं मया सह आगतः नञ्जुण्डः प्रस्थानात् पूर्वं - ''मित्र ! मनःशान्तिं सम्पादयतु । भवान् सर्वं जानाति एव । मया वक्तव्यं न किमपि अवशिष्टम् । अग्रिमग्रीष्मविरामपर्यन्तम् अपि भवतः प्रतीक्षां कर्तुं सिद्धः अस्ति भूस्वामी'' इति उक्तवान् ।

मैसूरुनगरं प्रत्यागत्य सप्ताहं यावत् अपि अहं 'राचम्मा प्रत्यागता वा न वा' इत्यपि न विचारितवान् । कस्मिंश्चित् अपि विषये आसक्तिः न आसीत् मम । कस्यापि सहवासम् अपि मनः न इच्छति स्म । 'राचम्मायाः सम्पर्कः एव यदि न अभविष्यत् तर्हि वरम् अभविष्यत्' इत्यपि चिन्तितं मया । यां भावनां मनस्तः दूरे स्थापयितुम् अहम् इच्छामि स्म तस्याः शक्तिः अतिप्रबला आसीत् । अन्याः सर्वाः भावनाः मनस्तः अपसार्य सा एका एव समग्रम् आक्रम्य विराजते स्म । भोजने अपि इच्छा न भवति स्म मम । यान्त्रिकतया पाठं तु समाप्य वातायनानि पिधाय शयनं करोमि स्म आदिनम् । जीवने लक्ष्यं न आसीत् । वर्तमाने उद्देशः न आसीत् । भविष्ये विश्वासः न आसीत् ।

दिनद्वयानन्तरं कश्चन बालकः आगत्य मह्यम् एकां चिटिकां दत्तवान् । तत्र राचम्मा लिखितवती आसीत् - 'ग्रामात् आगतायाः मम पक्षः अतीतः । भवता अवश्यं गृहं प्रति आगन्तव्यम्' इति । बालकः प्रतिप्रेषितः मया । किन्तु तस्याः गृहं प्रति तु न गतम् । अनन्तरदिने सायं पञ्चवादने सा

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

एव मम प्रकोष्ठम् आगता । वातायनद्वारम् उद्घाट्य प्रकोष्ठस्य अन्तः सर्वत्र दृष्टिं प्रसारितवती सा । अक्षालितानि वस्त्राणि रज्जौ लम्बन्ते स्म । सम्मार्जनस्य अभावतः प्रकोष्ठे सर्वत्र अवकरः विकीर्णः आसीत् । प्रकाशस्य अकस्मात् दर्शनात् मम नेत्रे सङ्कुचिते जाते ।

''वार्ता प्रेषिता चेदपि किमर्थं न आगतं भवता ?'' - पृष्टवती राचम्मा ।

अहं मौनेन स्थितवान् आसम् ।

''मया सह गृहम् आगच्छतु आदौ । भवता सह अत्रैव वार्तालापं कुर्याम् । किन्तु शिशुं मरियम्माधीनं कृत्वा आगता अस्मि'' इति उक्त्वा आत्मना सह माम् अपि नीतवती सा ।

गृहं प्राप्य शिशुम् उन्नीतवती सा । स्त्रीशिशुः सः मातुः सादृश्यम् एव वहति स्म । सा मम पार्श्वे उपविश्य - ''तदर्थम् एवं चिन्ता क्रियते चेत् कथम् ? दर्पणे स्वमुखं सकृत् पश्यतु तावत् । मुखे पिशाचग्रस्तता दृश्यते । कपोलयोः दृश्यते शोकः । नेत्रयोः दृश्यते विषादः'' इति व्यथापुरस्सरम् उक्तवती ।

'विषयः एतया अपि ज्ञातः स्यात् वा ?' इति चिन्तयन् अहम् उक्तवान् - ''स्वास्थ्यं सम्यक् न आसीत् ।''

''अस्वास्थ्यं शरीरस्य उत मनसः इति जानामि अहम् । सप्ताहात् पूर्वं लिल्ली अत्र आगत्य सर्वम् उक्तवती अस्ति । एवं चिन्ताकरणं विवेकिनां लक्षणं न । कथञ्चित् मनस्समाधानं प्राप्तव्यम् ।''

अहं मौनेन आसम् । राचम्मा अन्तः गत्वा चत्वारि कदलीफलानि आनीय दत्तवती ।

''फलम् एव दातव्यम् इति नास्ति । भवत्या दत्तं खाद्यम् अपि अहं खादामि इदानीम्'' इति मया उक्तम् ।

''लिल्ली तदपि उक्तवती । भवतः मनसः विरोधितया किमर्थं किमपि करणीयम् ?''

''मनसः विरोधः नास्ति मम । सन्तोषेण खादिष्यामि ।''

''मया दीयमानं खाद्यं भवान् खादति चेत् सन्तोषः, न खादति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चेत् न भवति खेदः । सेवनासेवनम् आधारीकृत्य विश्वासनिर्णयं न करोमि अहम्'' इति उक्त्वा सा अन्तः गत्वा दध्यन्नं सचमसम् आनीय मह्यं दत्त्वा - ''भवान् भोजनम् एव न करोति इति मन्ये । एतत् खादतु'' इति उक्तवती ।

तत् अन्नं पूर्णतया खादितुम् अहं न शक्तः । अर्धभागं परित्यज्य मया जलं पीतम् । स्थालिकां नीत्वा अन्तः स्थापयित्वा आगत्य राचम्मा पृष्टवती - ''अहं किञ्चित् प्रस्तौमि । किं भवान् तत् अङ्गीकुर्यात् ?''

''किं तत् ?''

''भवदनुरूपा ब्राह्मणकन्या काचित् हासननगरे अस्ति । मम सख्याः अनुजा सा । तां परिणयतु भवान् । सप्ताहाभ्यन्तरे मनः सम्यक् भविष्यति ।''

''एतस्य प्रस्तावस्य श्रवणात् मनः उत्तप्तं भवति इति अहं जानामि । तथापि मनः निगृह्य विवाहितः भवतु भवान् । एकदिनाभ्यन्तरे भवतः मनः सन्तोषयितुं समर्था अस्ति सा कन्यका । अहं मम ग्रामतः अत्र आगमनतः पूर्वं हासनस्थं भगिनीगृहं गतवती आसम् । भगिन्याः गृहसमीपे एव अस्ति कन्यायाः गृहम् अपि । मम सख्याः भगिनी सा रूपेण अनुपमा । तादृशी रूपवती प्रायः मया अन्या न दृष्टा । गुणैः व्यवहारेण चापि सा अत्युत्तमा । एकादशकक्ष्यायाम् अनुत्तीर्णा सा । किन्तु सङ्गीतविशारदा । भवन्तं स्मृत्वा अहं कन्यायाः मातरं विवाहप्रस्तावम् उक्तवती अस्मि ।''

''अन्या कन्या निश्चिता अस्ति इति कन्यामात्रे पत्रं लिखतु भवती ।''

''किम् एतत् वचनं सत्य !''

''ते अन्यत्र वरान्वेषणं कुर्वन्तु नाम । भवत्याः वचने विश्वस्य तैः अग्रे कष्टम् अनुभोक्तव्यं न भवेत्'' इति उक्त्वा अहं ततः निर्गतवान् । यथापूर्वं प्रकोष्ठे शयनं कृतं मया ।

एवम् एव मासः अतीतः । जीवने काऽपि प्रगतिः न दृश्यते स्म । बालानां पाठने पूर्वतनः क्रमः, उत्साहः, स्फूर्तिः वा न भवति स्म । क्वचित् बालाः पाठितम् अनवगच्छन्तः पुनः पुनः प्रश्नं कुर्वन्ति स्म । पौनःपुन्येन विवरणं कृतं चेदपि न अवगच्छन्ति स्म ते । एतावता मम परीक्षापरिणामः उद्घोषितः अभवत् । अहं प्रथमश्रेणीं प्राप्तवान् आसम् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

मम अध्ययनं समाप्तम् आसीत् । तथापि कस्यचित् उद्योगस्य अन्वेषणे उत्साहः न आसीत् । 'उद्योगस्य का आवश्यकता ?' इति प्रश्नः मां बहुधा बाधते स्म । राचम्मायाः गृहं प्रति अपि व्यवस्थिततया न गच्छामि स्म । समययापनार्थं चित्रमन्दिरं गच्छामि स्म । ततः मनः आलोडितं कलुषितं च भवति स्म । तथापि तत्रैव कश्चन सन्तोषः दृश्यते स्म । चलनचित्रेषु कश्चन मादकगुणः भवति स्म ।

एषु दिनेषु मम शरीरशक्तिः क्षीणा जाता आसीत् । चलनचित्रं दृष्ट्वा रात्रौ प्रत्यागमनसमये पादौ नितरां शक्तिहीनौ भवतः स्म । शय्यापुटीकरणस्य अभ्यासः एव परित्यक्तः आसीत् । निद्राप्राप्तौ कोऽपि क्रमः न भवति स्म । जीवने किं वा अस्ति इत्येषः शून्यात्मकः प्रश्नः मनसि सदा आवर्तते स्म । उत्तरं किमपि न दृश्यते स्म ।

'एतद्विषये शङ्करस्य मार्गदर्शनं प्राप्नुयां वा' इति कश्चन विचारः मनसि आगतः पुनः पुनः । रामण्णस्य दर्शनेच्छा अपि भवति स्म तदा तदा । किन्तु तैः कीदृशः अभिप्रायः दीयेत इति अहं जानामि स्म । अतः तेषां पुरतः मदीयस्य दुर्बलस्थितेः आविष्करणं मनः न इच्छति स्म ।

* * *

कदाचित् राचम्मायाः गृहं गतवान् आसम् । तदा तत्र गृहं गच्छन्ती लिल्ली दृष्टा । एषु दिनेषु अहं तां न दृष्टवान् आसम् । सा शिरः अवनमय्य गच्छन्ती मार्गस्य अपरपार्श्वं प्राप्तवती । तया सह वार्तालापः करणीयः इति उत्कटेच्छा मयि उत्पन्ना । ''लिल्लि !'' इति उच्चैः सम्बोधितं मया ।

सा प्रतिवचनं न दत्तवती, प्रत्युत अग्रे प्रस्थितवती । अहं वेगेन तस्याः समीपं गत्वा - ''लिल्लि ! क्षणं तिष्ठतु । किं मम वचनं न श्रूयते ?'' इति पृष्टवान् ।

लिल्ली शिरः अवनमय्य स्थितवती । सा अहम् इव मलिनवस्त्रं न धृतवती आसीत् । पृष्ठभागदर्शनात् सा यथापूर्वं स्थिता इव एव भासते स्म । किन्तु समीपदर्शनात् तस्याः कृशता ज्ञाता । नेत्रे कान्तिहीने आस्ताम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुखं म्लानं सत् प्रेतच्छायां वहति स्म ।

''भवत्या सह किञ्चित् सम्भाषणीयम् अस्ति । अतः प्रकोष्ठम् आगच्छ ।''

''नैव । मया गृहं गन्तव्यम् ।''

मम कोपः उद्गतः । ''विना प्रतिवचनम् आगच्छसि उत मार्गे एव चर्चां कुर्वती स्थास्यसि ?'' - मया पृष्टम् ।

सा मौनेन माम् अनुसृतवती । मम प्रकोष्ठस्य दुर्गतिं दृष्ट्वा सा उक्तवती - ''भवता एवं न भवितव्यम् ।''

''तत् वक्तुं भवत्याः नास्ति अधिकारः । तूष्णीं तिष्ठ ।''

सा सम्मार्जनीं स्वीकृत्य सम्मार्जितवती । हस्तक्षालनार्थं यावत् आवश्यकं तावदपि जलं प्रकोष्ठे न आसीत् । सा रज्ज्वाः उपरि स्थितया प्राचीनवेष्ट्या हस्तौ मार्जयित्वा - ''भवतः सर्वाणि वस्त्राणि ददातु । रजकाय दास्यामि'' इति उक्तवती ।

अहं मूकः इव उपविष्टः आसम् । मनसि पुङ्खानुपुङ्खतया उत्पद्यमानाः विचाराः प्रवाहायन्ते स्म । प्रचण्डः विप्लवः प्रचलति स्म तत्र ।

''अत्र आगत्य उपविश'' - आदिष्टं मया ।

सा दूरे एव स्थितवती ।

''मम समीपम् आगच्छ'' - मया पुनः उक्तम् ।

सा समीपम् आगतवती । अहं तस्याः हस्तं दृढं गृहीत्वा - ''लिल्लि ! त्वां विना अहं न जीवामि'' इति अवदम् ।

''अहम् अपि तथैव । द्वित्रान् मासान् एवम् एव जीवेयम् । तावता भगवान् मां स्वपादमूलं नेष्यति ।''

तस्याः हस्ते अस्थिमात्रं दृश्यते स्म । कण्ठं परितः अस्थीनि उद्भूततया दृश्यन्ते स्म ।

''अहं भवतीं परिणेष्यामि । अहं क्रैस्तमतम् अङ्गीकरिष्यामि ।''

लिल्ली मुखम् उन्नीय दृष्टवती । तस्याः मुखे आश्चर्यम् अव्यक्तभीतिः च दृश्यते स्म । निमेषद्वयं मां निर्निमेषं दृष्ट्वा सा - ''तत् तु सर्वथा मास्तु । मन्निमित्तं भवता क्रैस्तमतावलम्बिना न भवितव्यम् । यदि भवान्

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तादृशः भवेत् तर्हि अपि अहं भवन्तं न परिणेष्यामि ।''

प्रकोष्ठस्य छदिः मदुपरि पतिता इव । शरीरं स्विन्नम् जातम् । मलिनं वस्त्रं शरीरेण लग्नम् इव । मनसि जुगुप्सा उत्पन्ना । उपविष्टः एव अहं किञ्चित् अग्रे सृत्वा - ''किं भवती मां परिणेतुं न सिद्धा ?'' इति उद्वेगेन पृष्टवान् ।

सा किमपि न उक्तवती । भूमिं पश्यन्ती स्थितवती ।

अत्रान्तरे मम जीवनस्य विविधाः घटनाः चित्रपटीयानि चित्राणि इव आगतानि । 'हिन्दुकुले साम्प्रदायिकगृहिण्याः पुत्रः सन् अहं जन्म प्राप्तवान् । पिता तु कर्तव्यहीनः आसीत् । मातुः मरणस्य अनन्तरं कुलतन्तुः छिन्नः इव । ततः मातुलस्य गृहे अनन्ता अश्रुधारा स्राविता । ततः उपनयनं विना भिक्षा याचिता इत्यतः निन्दावचनानां श्रवणम् । प्राध्यापकेन उक्तानि असहिष्णुतापूर्णानि कटुवचनानि । अनाथालयात् यदा निर्गतं तदा अन्नाद्यभावतः यापितानि कष्टमयानि दिनानि । लिङ्गायतछात्रावासे यदा आश्रयः प्राप्तः तदा परमतनिन्दास्वभावकारणतः प्राप्ता उपेक्षा । अहम् इव कष्टेन जीवनं यापयता श्रीकण्ठेन जगद्गुरूणां मुखारविन्दात् प्राप्तानि निराशामयानि उत्तराणि । पुनः अहरहः उदरपोषणार्थम् आश्रिता दयनीया दशा । ..... एवं कष्टेषु पौनःपुन्येन प्राप्तेषु, मद्धर्मीयः कोऽपि मम साहाय्यं न कृतवान् । एवं स्थिते मया किमर्थं वा मिथ्यात्मिकाम्, अप्रयोजिकां, शिथिलां कल्पनाम् अवलम्ब्य लिल्लीतः दूरे स्थातव्यम् ?'

मनसः अन्यस्मात् अज्ञातकोणतः अपरः विचारप्रवाहः उद्गतः । हिन्दुकुलस्य हिन्दुसंस्कृतेः च प्रतिरूपम् इव स्थितायाः मातुः स्मृतिः मनोरङ्गे आगता । शङ्करः, तेन सह कृता चर्चा, हिन्दुधर्मविषये कृतम् अध्ययनं, तस्य धर्मस्य उन्नत्यर्थं कृतपरिश्रमाणां विदुषां लेखाः च मनोमण्डले तेजोमयं प्रकाशम् अपातयन् । अतः पूर्वम् आगतः विचारः अपगतः ।

'एवं स्थिते अपि, अद्य हिन्दुसमाजस्य कीदृशी गतिः अस्ति ? तस्यैव समाजस्य अङ्गभूतेन मया अनुभूतानि कष्टानि अनल्पानि । धर्म-संस्कृत्यादीनाम् अमूर्तविषयाणां निमित्तम्, उपस्थितं सौभाग्यं किं पादेन अपसारयेयम् ? आन्तरङ्गिकौ राचम्मा-देवीप्रसादौ किं क्रिस्तमतीयौ न ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मदैकनिष्ठया मम सेवां कृतवतीं, मन्निमित्तं मृत्युमुखम् अपि आनन्देन प्रवेष्टुम् उद्यतां लिल्लीं धर्मकारणेन यदि परित्यजेयं तर्हि किं मया अनुचितं कृतं न भवेत् ? मन्निमित्तं स्वमतं परित्यक्तुं लिल्ली सन्नद्धा अस्ति । किन्तु मम धर्मः तां स्वीकर्तुं नैव सिद्धः । मां स्वागतीकर्तुं तस्याः मतं सन्नद्धम् अस्ति । वस्तुतः एषा मतकल्पना एव मिथ्या ।'

विरुद्धयोः विचारयोः हिंसात्मकः सङ्घर्षः मयि प्रचलति स्म ।

''किमर्थं लिल्लि, मौनम् आस्थितम् ? अन्तिमम् उत्तरम् उक्त्वा इतः निर्गन्तुम् अर्हसि ।''

मम ध्वनिः कोपयुक्तः कठोरः च आसीत् । लिल्ल्याः नेत्रान्ते अश्रुधारा स्थिता आसीत् । सा शिरः उन्नीय - ''भवन्तं विना अहं जीवितुं न शक्नोमि'' इति अवदत् ।

अहम् उपसृत्य तस्याः हस्तौ गृहीतवान् । सा मम उरसि शिरः संस्थाप्य अश्रुधारां प्रवाहितवती । एतावद्दिनपर्यन्तं यत् तुमुलं मम अन्तरङ्गे आसीत् तदिदानीं क्षालितम् अभवत् । मनसि विलक्षणशान्तिः उत्पन्ना।

मम तस्य निर्णयस्य अनन्तरं भूयान् कालः अतीतः अस्ति । तत्काले मया यत् कृतं तत् उचितं वा न वेति जिज्ञासा अद्यापि मयि प्रवर्तते । सर्वविधतया अपि सम्मतम् उत्तरम् अद्यावधि मया न प्राप्तम् । सः सकलपरिवेत्ता सर्वान्तर्यामी भगवान् एव एतस्य उचितानुचिततां निर्णयेत् ।

मम उरसि मुखं निधाय रुदती आसीत् लिल्ली । तस्याः अश्रुपातः उभयोः अपि मनसि शान्तिं जनयति स्म । दीर्घकालानन्तरं यदा रोदनस्य आवेगः स्थगितः तदा सा अश्रूणि मार्जयन्ती पृष्टवती - ''कीदृशः निर्णयः अवलम्बितः भवता !''

''इदानीं मनः सन्तृप्तम् अस्ति । एतद्विषये इदानीम्, अग्रे वा कदापि प्रश्नं मा करोतु भवती ।''

लिल्ली उत्थाय - ''क्षालितम् अन्यत् वस्त्रम् अस्ति चेत् तत् धृत्वा धृतं मलिनवस्त्रं मह्यं ददातु । सर्वाणि रजकाय दास्यामि ।''

''तत् तु शनैः कर्तुं योग्यम् । तत् कार्यम् इदानीम् अहम् एव कर्तुम् अपि शक्नोमि । भवती निश्चिन्ततया गृहं गच्छतु ।''

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

''श्वः मेलिष्यामः'' इति उक्त्वा सा निर्गतवती ।

म्लानं मम जीवनं पल्लवितं जातम् । शय्यावस्त्रादीनां मालिन्यम् ऐदम्प्राथम्येन दृष्टिगोचरं जातम् । सर्वाणि वस्त्राणि पिण्डीकृत्य नीत्वा रजकाय दत्त्वा - ''श्वः प्रातःकालाभ्यन्तरे एकं वस्त्रयुगलं प्रक्षाल्य ददातु'' इति सूचितम् । रात्रौ भोजनालयं गत्वा आतृप्ति भुक्तम् । प्रकोष्ठप्राप्तिसमनन्तरम् एव चिरनिरीक्षिता निद्रा मां दृढम् आलिङ्गितवती । प्रातः अष्टवादनपर्यन्तं मया निद्रा कृता । उत्थाय मुखक्षौरं समाप्य स्नात्वा रजकेन प्रेषितानि वस्त्राणि यावत् धृतानि, तावता लिल्ली तत्र उपस्थिता । तस्याः अपि मुखे उत्साहः दृश्यते स्म । रात्र्यभ्यन्तरे एव पुष्टकाया इव दृश्यते स्म सा । तस्याः हस्ते लघुस्यूतः आसीत् । तस्मिन् उपाहारमन्दिरीयाणि खाद्यानि आसन् । उपाहारसमाप्तेः अनन्तरम् अहं पृष्टवान् - ''गृहे विषयः उक्तः किम् ?'' इति ।

''नैव ।''

''किमर्थं न उक्तम् ?''

''गृहे विवाहविषयस्य कथनं किं तावत् सुकरम् ? महिला अहम् एव स्वयम् एतं प्रस्तावं कथं कुर्याम् ? वरपक्षीयाः एव वधूयाचनार्थम् आगच्छेयुः इति तु परम्परा'' इति मन्दहासपूर्वकम् उक्तवती लिल्ली । विवाहनिर्णयः गृहे कथम् उपस्थापनीयः इत्ययं विषयः आवाभ्यां चर्चितः ।

''भवान् आदौ मम भ्रातृजायां विषयं वदतु । सा मम अग्रजं वदिष्यति । अग्रजः पितरं विषयं वदतु'' इति सूचितवती लिल्ली ।

''अद्य सायम् अहं राचम्मायाः गृहं गमिष्यामि'' इति मया उक्तम् । एकादशवादनपर्यन्तं प्रकोष्ठे स्थित्वा वार्तालापं कृत्वा गृहं गतवती लिल्ली ।

सायं षड्वादनसमये मया यदा राचम्मायाः गृहं गतं तदा तस्याः पुत्री रुदती आसीत् । राचम्मायाः मुखं गम्भीरम् आसीत् । शिशुं समादधती सा मद्विषये अवधानं न दत्तवती एव । अल्पे एव काले शिशुना रोदनं स्थगितम् । पुत्रीं शाययितुं राचम्मा अन्तः गतवती । बहिः आगमनसमये अपि तस्याः मुखे गाम्भीर्यभावः एव दृश्यते स्म ।

'शिशुरोदनकारणमात्रेण एवं चिन्ता क्रियते चेत् कथम् ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सा झटिति किमपि न उक्तवती । पञ्चषनिमेषानन्तरं - ''शिशुः अनुक्तग्राही भवति चेत् कोऽपि चिन्तां न करोति । किन्तु ज्येष्ठः कश्चित् तादृशः यदि भवति तर्हि महत् दुःखम् अनुभूयते'' इति उक्तवती गाम्भीर्येण खेदेन च ।

''भवत्याः वचनस्य आशयः मया न अवगतः ।''

''मध्याह्ने लिल्ली अत्र आगतवती आसीत् । ततः सर्वं ज्ञातं मया । भवान् इदानीम् आगच्छेत् इत्यपि तयैव सूचितम् आसीत् ।''

विषयोपस्थापनक्लेशः अपगतः आसीत् इत्यतः अहं तृप्त्या निःश्वसितवान् ।

''विवेकी भवान् एवम् अनुक्तग्राहिताम् अवलम्बते चेत् कथम् ? लिल्ल्याः परिचयः कारितः यत् तदर्थम् आत्मा एव निन्दनीयः मया । भवता विवेकिना भवितव्यम् ।''

राचम्मा मम निर्णयस्य विरोधम् एवं कुर्यात् इति मया न ऊहितम् आसीत् अपि । मया उक्तम् - ''गते सार्धैकमासावधौ मम कीदृशी अवस्था आसीत् इति भवती जानाति एव ।''

स्नेहमयी मृदुहृदया राचम्मा कठोरा जाता आसीत् । उग्रा जाता आसीत् । घण्टां यावत् मया सह चर्चां कृतवती सा । आत्मनः अन्तः निहितः क्रोधः समग्रतया प्रकटितः तया । तथापि मम निर्णयः न परिवृत्तः । अत्रान्तरे देवप्रसादः प्रकोष्ठतः आगत्य आवयोः पार्श्वे उपविष्टवान् । तस्य आगमनतः राचम्मा मौनम् अवलम्बितवती । देवप्रसादः पृष्टवान् - ''मित्र ! सत्य ! लिल्लीं विना किं भवान् जीवितुं न शक्नुयात् ?''

''तं विषयं लिल्लीं पृच्छतु भवान् ।''

मध्ये राचम्मा - ''किं प्रश्नेन ? एषः विवाहः न प्रचलेत् । तस्याः निमित्तं भवता जातिभ्रष्टेन न भवितव्यम् । विवेकः भवदधीनः एव भवतु । भवज्जातीयाम् एव अनुरूपां कन्याम् अहम् अन्विष्यामि । एषः विवाहः सर्वथा मम सम्मतः न'' इति स्पष्टोक्त्या उक्तवती ।

''राचि ! किञ्चित् तूष्णीं तिष्ठ तावत् ।''

''नैव । एतस्य स्वभावं भवान् यावत् जानाति ततोऽप्यधिकम् अहं

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

जानामि । लिल्लीं परिणीय अपि एषः सुखेन स्थातुं न शक्नोति । अतः भवान् एव तूष्णीं तिष्ठतु ।''

''भवती इदानीं तूष्णीं तिष्ठतु, अन्यथा अन्तः गच्छतु'' इति आज्ञास्वरेण राचम्माम् उक्त्वा माम् उद्दिश्य देवप्रसादः आंग्लभाषया - ''अहं किमपि न जानामि स्म । एषु दिनेषु भवान् मया न दृष्टः अपि । लिल्ली अपि सम्यक् न परिलक्षिता आसीत् मया । ह्यः सा सम्यक् दृष्टा । शवस्थानं गन्तुं सन्नाहं कुर्वती इव अस्ति सा । झटिति मया कारणं न अवगतम् । अस्वास्थ्यादिकं तु न आसीत् तस्याः । ह्यः रात्रौ राची पृष्टा मया । तया अपि किमपि न उक्तम् । अद्य मध्याह्ने वस्तुस्थितिः ज्ञाता । तत् आस्तां तावत् । हिन्दु-क्रिश्चियन्मतभेदः किं भवता अङ्गीक्रियते ?''

''मम विश्वासः उध्वस्तः अस्ति ।''

''तथैव भवेत् । धर्मः कश्चन उन्मादजनकः विषयः । मादकवस्तु सः । महाविद्यालये पाठसमये अपि अहम् एतम् एव अंशं वदन् भवामि । मार्क्सवादे मम विश्वासः । मार्क्ससिद्धान्तः वदति - निर्धनानां वञ्चनार्थं धनिकपक्षीयैः निर्मितः पदार्थः सः इति । इदानीं सामाजिककारणमात्रेण भवता अपरिहार्यतया क्रैस्तमतम् अवलम्बनीयं भवेत् । किन्तु अहं वदामि - अग्रे क्रैस्तमन्दिरे धर्मे वा विश्वासं सर्वथा मा करोतु । ततः दूरे तिष्ठतु । एतेषु मन्दिरेषु परममालिन्यम् एव निहितम् अस्ति ।''

''अहो, अमृतायते वचनम् ! एतदेव श्रोतव्यं सर्वैः अपि'' इति मध्ये उक्तवती राचम्मा ।

''राचि ! मया पूर्वम् एव उक्तं खलु - तूष्णीं तिष्ठतु इति ? धर्मः एव मिथ्या । एवं स्थिते किं क्रैस्तमतावलम्बनेन, हिन्दुत्वपालनेन वा ? उभयम् अपि समानम् एव ।''

किमपि पुनः वक्तुम् उद्यतां राचम्मां निवार्य देवप्रसादः - ''इदानीं भवान् प्रकोष्ठं गच्छतु । लिल्लीं परिणेतुम् अर्हति भवान्'' इति मम सान्त्वनं कृतवान् ।

तावता राचम्मा उक्तवती - ''मतसम्बन्धः एव यदि न इष्यते तर्हि

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

एतौ पञ्जीकृत(रजिस्टर्ड्)विवाहम् अङ्गीकुरुताम् । लिल्ली तु एकविंशतिवर्षीया अस्ति एव । न्यायशास्त्रानुगुणं सा कमपि यदि परिणयेत् तर्हि कोऽपि आक्षेप्तुं नार्हति एव ।''

''भवत्या यथा सूचितं तथा पञ्जीकृतविवाहः एव अङ्गीक्रियेत चेदपि समस्या तु परिहृता न भवेत् । तौ न हिन्दवः स्वागतीकुर्युः, न वा क्रैस्तमतीयाः । अन्यसहकारं विना एतयोः जीवनं कथं प्रचलेत् ? समाजं धिक्कृत्य कोऽपि जीवितुं न अर्हति । अग्रे एतयोः पुत्रपौत्रादीनां का कथा स्यात् ? अयं च सामाजिकः विषयः । यावत् धर्मविषये अतिश्रद्धा, तदीयमदः च भवति तावत् बाह्यतः वा कस्यचित् विभागस्य मुद्रा प्राप्तव्या एव । यदि मातापितरौ विरुध्य कश्चित् परिणीयेत तर्हि अस्मत्पिता जामात्रे पुत्र्यै वा वराटिकामात्रम् अपि न दद्यात् । कथञ्चित् यदि तस्य मनः जीयेत तर्हि सर्वस्वम् अपि अर्पयेत् सः । सर्वं कृत्रिमम्, सर्वं नटनम् ।''

''किं जीवने धनम् एव सर्वस्वायते ?''

''तथा न स्यात् । तथापि प्राप्यमाणम् आनुकूल्यं विवेकिना किमर्थं त्यक्तव्यम् ? निरर्थकं कल्पनामात्ररम्यं धर्मम् अवलम्ब्य या व्यथा अनुभूयेत ततोऽपि उपायलभ्यस्य आनुकूल्यस्य ग्रहणम् एव वरम् । भवती सर्वदा गृहे एव तिष्ठति । धनसम्पादनक्लेशः अद्यावधि भवत्या न अनुभूतः । अतः आदर्शस्थितिं प्रतिपादयति भवती । सत्य ! एतया सह चर्चया न किमपि प्रयोजनम् । अतः भवान् इदानीं प्रकोष्ठं गच्छतु ।''

अहं प्रकोष्ठं गतवान् । देवप्रसादस्य वचनानि मम मनसि परिगुञ्जन्ति स्म । 'धर्मः उन्मादजनकः निरर्थकः पदार्थः' इति वदति सः । धर्मविषये मार्क्सवादस्य अभिप्रायः कः इति मया गभीराध्ययनं न कृतम् आसीत् । केचन लेखाः पठिताः आसन्, तावदेव । देवप्रसादस्य स्वरूपस्यापि पूर्णपरिचयः न आसीत् मम । हिन्दुधर्मस्य महत्त्वम् अधिकृत्य लिल्ल्या राचम्मया वा सह यदा आवेशपूर्णतया चर्चां करोमि स्म तदा क्वचित् देवप्रसादः प्रकोष्ठे स्थित्वा शृणोति स्म । किन्तु कदापि चर्चायां भागं न वहति स्म । धर्मविषये तस्य विशेषश्रद्धा नास्ति इति एतावन्मात्रम् एव अहं जानामि स्म । किन्तु एतावती जुगुप्सा तस्मिन् स्यात् इति

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

मया न ऊहितम् आसीत् अपि । तस्य आशयस्य श्रवणात् मया नूतना दृष्टिः प्राप्ता आसीत् । मम सुखदुःखयोः विषये यस्य आसक्तिः नास्ति तस्मात् धर्मतः मम को वा लाभः ?

* * *

लिल्ल्याः मत्पत्नीत्वप्राप्तिः निश्चिता आसीत् । अहं गृहस्थाश्रमद्वारे आसम् । भविष्यतः अस्पष्टतायाः अपगमतः काचित् स्पष्टता दृश्यते स्म । 'गार्हस्थ्यप्राप्त्यनन्तरं वासार्थं गृहम् आवश्यकम्, धनसम्पादनार्थं कश्चन उद्योगः अपि आवश्यकः । अतः झटिति उद्योगप्राप्तये यत्नः करणीयः । उद्योगावकाशान् ज्ञातुं प्रतिदिनं पत्रिका अवलोकनीया' इति मया निश्चितम् ।

अनन्तरदिने प्रातः उत्थानसमये मनः उल्लसितं जातम् आसीत् । 'अद्यापि अष्टवादने लिल्ली आगमिष्यति । तया सह उपाहारमन्दिरं गत्वा खाद्यानि खादनीयानि' इति निश्चित्य अहं स्नानं कृत्वा सन्नद्धः जातः । अष्टवादनम् अतीतं चेदपि लिल्ली न आगता । दशवादनं जातं चेदपि तस्याः मुखदर्शनं न जातम् । मध्याह्नः अपि अतीतः । सा न आगता । मया महती निराशा प्राप्ता । 'सायम् आगच्छेत्' इति मनसः सान्त्वनं कृतं मया । षड्वादनम् अतीतं चेदपि तस्याः दर्शनं न जातम् । 'राचम्मायाः गृहे तस्याः अनागमनकारणं ज्ञायेत इति मत्वा अहं राचम्मायाः गृहं प्रति प्रस्थितवान् ।

राचम्मायाः गृहं निश्शब्दम् आसीत् । राचम्मायाः मुखं गम्भीरम् एव आसीत् । मुखे आतङ्कः स्फुटं दृश्यते स्म । अहम् आसने उपविशन् - ''मद्विषयकः असन्तोषः इतोऽपि किं न अपगतः ?'' इति पृष्टवान् ।

''भवद्विषये असन्तोषेण मम किं वा प्रयोजनम् ? सर्वं ललाटलिखितस्य फलम् ।''

अहं मौनेन स्थितवान् । राचम्मा पुनः उक्तवती - ''ह्यः रात्रौ एव देवप्रसादः पितरं विवाहविषयम् उक्तवान् अस्ति । 'कस्मैचित् निर्धनाय अहं मम पुत्रीं दातुं न सिद्धः' इति कोपेन गर्जितवान् तदीयः पिता इति श्रूयते । 'भवतः पत्नी एव एतस्य सर्वस्य कारणम्' इति वदन् सः

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

माम् अपि निन्दितवान् इति ज्ञातम् । लिल्ली गृहात् बहिः यथा न गच्छेत् तथा तां प्रकोष्ठे संस्थाप्य, स च प्रकोष्ठः कीलितः अस्ति । लिल्ली आहारसेवनं जलपानं च परित्यक्तवती अस्ति । 'मम पुत्र्याः मनः दूषितवान् सः दुष्टः कः ? तं सम्यक् दण्डयिष्यामि' इति तस्याः पिता घोषितवान् इति श्रूयते । कोपवशात् सः भवतः प्रकोष्ठम् आगत्य कोलाहलं कुर्यात् अपि । तादृशः एव सः । अतः भवान् जागरूकतया तिष्ठतु'' इति ।

विकसत् मम मनः पुनः म्लानं जातम् । 'देवप्रसादः यथा वदति तथा लोके नास्ति मतव्यवस्था, प्रत्युत अस्ति धनमूलः वर्गभेदः ' इति मया चिन्तितम् । 'यत्किमपि भवेत् नाम, कदाचित् वा लिल्ली मदीया भविष्यति एव' इत्ययं विश्वासः मनसि दृढः आसीत् । ततः अहं प्रकोष्ठं प्रत्यागतः । लिल्ली अन्नादिसेवनं परित्यक्तवती अस्ति यत् तत् अन्तिमजयः आवयोः एव इत्येतं भावं दृढीकरोति स्म । लिल्ल्याः पिता मम प्रकोष्ठम् आगत्य कोपवचनानि यदि वदेत् तर्हि तत् सम्मुखीकर्तुं यत् मनःस्थैर्यम् अपेक्षितं स्यात् तत् मयि उत्पन्नम् आसीत् । लिल्ल्याः उपवासवार्ताश्रवणतः मह्यम् अपि आहारः न रोचते स्म । तथापि मनः तु प्रफुल्लितम् एव आसीत् ।

एवम् एव सप्ताहः अतीतः ।

अष्टमे दिने सायं पञ्चवादनसमये अहम् उद्योगप्राप्त्यर्थम् आवेदनपत्रं लिखन् प्रकोष्ठे उपविष्टः आसम् । तावता द्वारम् उद्घाट्य देवप्रसादः अन्तः आगतः । तम् अनुसरन् तदीयः पिता तम्मय्यः अपि अन्तः आगतः । तम्मय्यवर्यम् इतः पूर्वं द्वित्रवारं दृष्टवान् आसम् । तथापि तस्य प्रत्यक्षपरिचयः न आसीत् मम । सुदृढः उन्नतः कृष्णवर्णीयः पुरुषः सः अधिकपञ्चाशद्वर्षीयः इव दृश्यते स्म । उपनेत्रं धृतम् आसीत् तेन । प्राचीनशैलीयं युतकं धृत्वा प्रावारकम् (कोट्) अपि धृतवान् आसीत् सः । शिरसि केशाः न दृश्यन्ते स्म ।

तेन कोपवचनानि उच्येरन् इति सम्भाव्य उत्तरकथनार्थम् मनः सज्जीकुर्वन् आसम् । अन्तः आगतः देवप्रसादः पितुः परिचयम् उक्तवान् । शिष्टाचारम् अनुसरन् अहम् उत्थाय तम्मय्यवर्यस्य उपवेशनार्थम् आसन्दं

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

दर्शितवान् । देवप्रसादः मम पार्श्वे मञ्चे उपविष्टवान् । निमेषद्वयं केनापि किमपि न उक्तम् । मौनं भञ्जयन् तम्मय्यवर्यः एव पृष्टवान् - ''भवान् स्नातकपरीक्षायां प्रथमश्रेणीं प्राप्तवान् खलु ?'' इति ।

तस्य वचने विवाद-कोप-भावः न दृश्यते स्म, प्रत्युत आदरः आत्मीयता च दृश्यते स्म । मया आश्चर्यं प्राप्तम् । अहं विनयेन एव उत्तरं दत्तवान् । अग्रे कीदृशः वार्तालापः करणीयः इति अजानन् सः मौनम् अवलम्बितवान् । तदा देवप्रसादः पितरं पश्यन् - ''प्रथमश्रणीप्राप्तिमात्रम् एव न । महती बुद्धिमत्ता एतस्य । गुणवत्ता अपि असदृशी एव । आ बाल्यात् राची एतं सम्यक् जानाति । वर्षचतुष्टयतः एषः ममापि आत्मीयसुहृत् जातः अस्ति । यदि एतत्सर्वम् एतस्मिन् न स्यात् तर्हि अस्माकं लिल्ली एतं परिणेतुं कथं वा अङ्गीकारम् अदास्यत् ?'' इति उक्त्वा माम् उद्दिश्य - ''सत्यवर्य ! मम भगिनी भवते दातव्या, भवतोः विवाहः निर्वर्तनीयः इति अपेक्षां निधाय मम पिता अत्र उपस्थितः अस्ति । उदारमनसा भवता अयं प्रस्तावः अङ्गीकरणीयः। भवतः बन्धुत्वस्य प्राप्तिः अस्माकं सर्वेषां सन्तोषाय । बन्धुत्वं न निराकर्तव्यम् इति अस्माकं सर्वेषां सानुरोधप्रार्थना'' इति उक्तवान् ।

तम्मय्यवर्यः प्रतिवाक्यं सम्मतिं सूचयति स्म शिरसः चालनेन । किं प्रवर्तते इत्येव मया न अवगतम् । अप्रियप्रसङ्गः मया ऊहितः आसीत् । किन्तु एतौ तु, सौहार्दभावेन गौरवपुरस्सरं व्यवहरन्तौ पाणिग्रहणं प्रार्थयतः स्म । औपचारिकतया वा किं वक्तव्यम् इति मया न ज्ञातम् । तदा देवप्रसादः एव माम् उक्तवान् - ''उत्तिष्ठतु, सत्य, वस्त्रं धरतु । अस्मद्गृहं गच्छाम'' इति । वयं ततः प्रस्थिताः ।

तम्मय्यवर्यस्य वासः लघुगृहे । देवप्रसादस्य गृहे इव उत्पीठिका-आसन्द-आकाशवाणीप्रभृतयः न आसन् तत्र । अङ्गणस्य पार्श्वे प्रकोष्ठद्वयं दृश्यते स्म । तयोः पृष्ठतः पाकशाला । ततः बहिः उद्यानम् । गृहप्रवेशात् एव ज्ञायते स्म - एतस्य स्वामी धर्मे महतीं श्रद्धां वहति इति । स्वागतप्रकोष्ठस्य भित्तौ दर्पणस्य उपरि विशालं वध्यचिह्नं दृश्यते स्म। तत्पार्श्वे वध्यस्थानं गतस्य येसुक्रिस्तस्य महाकारकं चित्रम् । तस्यैव अपरपार्श्वे वध्यचिह्नं स्कन्धेन वहतः विरोधिभिः अनुस्रियमाणस्य क्रिस्तस्य अपरं चित्रम् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अपरत्र मेरीमाता । तस्याः पार्श्वे बालयेसुः । गृहस्य भित्तौ सर्वत्र चित्रद्वारा क्रिस्तपुराणं लिखितम् इव भासते स्म ।

तम्मय्यवर्यः दक्षिणभागस्थं प्रकोष्ठं प्रति मां नीतवान् । तत्र चत्वारः आसन्दाः आसन् । तेषां मध्ये चतुष्पादिका आसीत् । लिल्ली काफीं, फलानि, विस्किटानि च आनीय तदुपरि स्थापितवती । वयं सर्वे काफीं पीतवन्तः । लिल्ली अपि अस्माभिः सहैव उपविश्य काफीं पीतवती । औपचारिकवार्तालापमात्रं तत्र प्रवृत्तम् । परिसरः सौहार्दमयः आसीत् । अर्धघण्टानन्तरम् अहं देवप्रसादेन सह ततः प्रस्थितः । तम्मय्यवर्यः नमस्कारं कृतवान् । काचित् महिला, प्रायः लिल्ल्याः माता स्यात्, पाकशालाद्वारसमीपे स्थित्वा मां पश्यति स्म । दूरात् अपि तस्याः ललाटे धृता वध्यचिह्नरूपा चित्रावली स्फुटं दृश्यते स्म । सा सामान्यशाटिकां धृतवती आसीत् ।

प्रकोष्ठं प्रति प्रत्यागमनसमये सप्तवादनं जातम् आसीत् । ततः अर्धघण्टानन्तरं लिल्ली आगता । तस्याः मुखे सन्तोषः सन्तृप्तिः च दृश्यते स्म । अहं तस्याः हस्तं गृहीत्वा पृष्टवान् – ''तस्मै निर्धनाय मम पुत्रीं सर्वथा न दास्यामि इति भवत्याः पिता उक्तवान् आसीत् इति श्रुतम् । भवती कीलिते प्रकोष्ठे निर्बद्धा आसीत् इत्यपि ज्ञातम् आसीत् । इदानीम् अकस्मात् कथम् एवं प्रवृत्तम् ?'' इति ।

''जामात्रे यथोचितं गौरवं दातव्यं खलु ? भवद्विषये मम पितुः न केवलं गौरवं, किञ्चित् भयम् अपि अस्ति इति भाति ।''

''किमर्थं तथा ?''

''तदहं न जानामि । सर्वं मम अग्रजेन कृतम् । पितुः अनुपस्थितौ कदाचित् सः गृहम् आगत्य मातुः समाधानं कृतवान् । वातायनमुखेन माम् अपि धैर्यवचनानि उक्त्वा गतः । अनन्तरं तेन किं कृतम् इति न ज्ञायते । एकदिनाभ्यन्तरे एव पितरि अपूर्वं परिवर्तनं जातम् । कारागारात् मम विमुक्तिः जाता । मया उपवासः कृतः आसीत् यत् तदर्थं पित्रा महता वात्सल्येन सान्त्वनवचनानि उक्तानि । भवद्विषये तु वर्णनातीतः अभिमानः तस्य । अद्वितीयपुत्र्याः विवाहः महता वैभवेन चालनीयः इति सः गृहे वदन् आसीत् ।''

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

''भवत्याः अग्रजेन किं तन्त्रम् अनुष्ठितं स्यात् ?''

''मया सः एव पृष्टः । 'इष्टः पतिः प्राप्यमाणः अस्ति । तेन सह अटन्ती चलनचित्रादिकं पश्यन्ती आनन्देन दिनानि यापयतु भवती । किम् अस्थाने कुतूहलेन' इति उक्त्वा सः मम मुखपिधानं कृतवान् । महाभारतस्य कृष्णः एव सः ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकस्मिन् भानुवासरे प्रातःकाले अहं क्रैस्तमन्दिरे वेदिकायाः समीपे स्थितवान् आसम् । सभाङ्गणे नगरीयाः अनेके क्रैस्तबान्धवाः सम्मिलिताः आसन् । श्वेतयुतकं धृत्वा तदुपरि श्वेतम् आप्रपदीनं धृतवान् बोधकः तत्र सम्मिलितान् जनान् उद्दिश्य उक्तवान् - ''प्रभोः येसुक्रिस्तस्य कृपा, देवस्य प्रीतिः, पवित्रात्मनः आत्मीयता च भवद्भिः सह तिष्ठतु'' इति ।

सम्मिलिताः सर्वे एकस्वरेण 'अमेन्' इति उक्तवन्तः । बोधकः माम् अङ्गुल्या निर्दिशन् एकं पुस्तकं पश्यन् स्प्यानिष्शैल्या कथनम् अनुवर्तितवान् - ''अत्र स्थितः अयं जनः स्वकीयं पूर्वतनं मतं परित्यज्य क्रैस्तमतम् अवलम्बितुम् इच्छन् देवनाम्ना दीक्षास्नानं प्राप्तुम् अत्र उपस्थितः अस्ति। एतस्य संस्कारस्य विषये देववाक्यं यत् अस्ति तत् शृणुयाम - 'कश्चित् जलात् आत्मनः वा यदि न उत्पद्यते तर्हि सः देवराज्यं प्रवेष्टुं न अर्हति। दीक्षास्नाननामकः संस्कारः अस्माकं रक्षणार्थम् अभिज्ञानार्थं च प्रभुणा परिकल्पितः अस्ति ।...''

अनन्तरं सः वेदिकायाः पृष्ठभागे स्थितं वध्यचिह्नं, क्रिस्तचित्रं च पश्यन् - ''कृपामय हे देव ! दीक्षास्नानार्थम् आगतः अयं जनः पूर्वकाले क्रिस्तमतस्यं अनवलम्बी, इसायेलस्य अधिकारे भागस्य अग्राही, अब्राहमीयवाग्दानसम्बद्धे धर्मशास्त्रे अनन्तर्भूतः च आसीत् । इदानीं क्रैस्तमते विश्वासं प्राप्य क्रैस्तमतीयः सन् भवद्दयया समीपस्थः जातः अस्ति । ...'' इत्येवम् उक्तवान् । बोधकः यदा एतत्सर्वं वदति स्म तदा मम अन्तरङ्गं वदति स्म - ''प्रभो, एतेषां विश्वासं दृढीकरोतु । निरीक्षां वर्धयतु । प्रीतिं जनयतु'' इति ।

दीर्घकालस्थितितः मम पादौ वेदनायुक्तौ जातौ । अहं शिरः अवनमय्य स्थितः आसम् । बोधकः माम् अभिमुखीकृत्य निरन्तरं पठन् आसीत् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

तस्मिन् दिने क्रैस्तालयं प्रति लिल्ली, तस्याः मातापितरौ, अन्ये केचन च आगताः आसन् । देवप्रसादः न आगतः आसीत् । क्रिस्तालयस्य प्रवेशसमये एव लिल्ली माम् उक्तवती आसीत् - ''अद्य आधिक्येन जनानाम् उपस्थितिः दृश्यते । न जाने - कः विशेषः इति ।''

''प्रायः मम क्रैस्तमतावलम्बनप्रक्रियां द्रष्टुम् आगताः स्युः'' इति अहं ताम् उक्तवान् आसम् ।

पुस्तकपठनस्य, लघुभाषणस्य च अनन्तरं बोधकः माम् उक्तवान् - ''इदानीं मया ये प्रश्नाः पृच्छ्यन्ते तेषाम् उत्तरं देवस्य, सभायाः च पुरतः दातव्यं भवता । 'अहं पापी अस्मि । स्वक्रियया अहम् आत्मरक्षणं कर्तुं न शक्नोमि' इत्येतत् किं भवान् अङ्गीकरोति ? यदि अङ्गीक्रियते तर्हि 'अहम् अङ्गीकरोमि' इति वदतु'' इति ।

तस्य सूचनायाः अनुसारम् अहम् उक्तवान् - ''अङ्गीकरोमि ।''

''येसुक्रिस्तः भवन्तं पापात्, मरणात्, न्यायनिर्णयाच्च पृथक्कृत्य रक्षति इत्यत्र किं भवान् विश्वसिति ? यदि विश्वस्यते तर्हि - 'अहं विश्वसिमि' इति वदतु ।''

''अहं विश्वसिमि ।''

''दुष्टदेवं, तस्य सकलाः दुष्टक्रियाः, मिथ्यादेवानां विग्रहाणां च पूजां, मन्त्रतन्त्रादीनि, हृदयस्य व्यर्थकल्पनाः च किं भवान् परित्यजति ?''

''ताः अहं परित्यजामि ।''

एवं प्रश्नोत्तरप्रक्रिया प्रवृत्ता । तदनन्तरं बोधकः - ''इदानीं देवस्य, सभायाः च पुरतः स्वस्य विश्वासस्य निवेदनं करोतु'' इति सूचितवान् ।

विश्वासशपथस्य अनन्तरं सः मम दक्षिणहस्तं गृहीत्वा मां स्नानपात्रसमीपं नीतवान् । मम शिरसि तत् जलं सम्प्रोक्ष्य - ''पितुः पुत्रस्य पवित्रात्मनः नाम्ना भवतः दीक्षास्नानं कारयन् अस्मि । अमेन्'' इति उक्त्वा मम शिरसि दक्षिणहस्तं स्थापयित्वा सः उक्तवान् - ''अलं भीत्या । विश्वासः भवतु । भवतः विश्वासः नष्टः यथा न भवेत् तथा प्रार्थनाम् अहं करोमि । अहं भवन्तं रक्षिष्यामि । भवान् मदीयः । अमेन्''

तिष्ठतः मम उदरे विलक्षणबाधा दृश्यते स्म । नष्टचैतन्यः इव,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निर्वीर्यः जातः इव अहं मूकवेदनाम् अनुभवन् आसम् । इतोऽपि अग्रे बोधकः किं बोधितवान्, किं कारितवान् इति अहं न ज्ञातवान् । अन्तरङ्गे जायमानां पीडां निस्सहायकः पशुः इव अनुभवन् आसम् । गतजीवनस्य स्मृतिः मया निवार्यमाणा अपि मनसि आविर्भवति स्म । मम मतं परिवर्तितं जातम् । अहं क्रैस्तः जातः । मम नाम परिवर्तितम् । सत्यनारायणः झेवियर्सत्यदासः जातः ।

क्रिस्तालयस्य सर्वे विधयः सार्धदशवादने समाप्ताः । यदा ततः बहिः आगतं तदा बहवः आगत्य मम परिचयं प्राप्तवन्तः । मण्डलाधिकारी मिस्टर् दिस्तीन्, मिस्टर् क्रिस्टोफर् चन्नवीरप्पः, मिस्टर् वेलायुधम्, नगरीय-क्रिश्चियन्-महाविद्यालयस्य उपप्राध्यापकः, आंग्लो-इण्डियन्-महिला, लेडी हेरिङ्गटन्, क्रिस्तीयचिकित्सालयस्य वैद्या ग्रेस् पङ्कजम् इत्यादयः अनेके जनाः हस्तान्दोलनं कृत्वा परलोकीयस्य पितुः अनुग्रहः प्राप्तः यत् तदर्थं माम् अभिनन्दितवन्तः ।

ततः प्रतिनिवर्तनसमये मया सह लिल्ली, राचम्मा च आस्ताम् । लिल्याः मातापितरौ पृष्ठतः आगच्छन्तौ आस्ताम् । राचम्मायाः भोजननिमन्त्रणं निराकृत्य अहं प्रकोष्ठम् आगतः । लिल्ली माम् अनुसृतवती । मम उदरतापः न्यूनः न जातः आसीत् । प्रकोष्ठं प्रविष्टः अहं मञ्चे शयनं कृतवान् । लिल्ली मम शिरसः पार्श्वे उपविष्टवती ।

अहं प्रातः काफीमात्रं पीतवान् आसम् । उपाहाराभावतः उदरतापः उत्पन्नः इति न । यतः उपाहारं विनैव मया बहूनि दिनानि यापितानि आसन् एव । लिल्ली मम ललाटे हस्तं संस्थाप्य - ''किम् अस्वास्थ्यं बाधते ? प्रातःकालतः अपि भवान् यथापूर्वं नास्ति'' इति पृष्टवती ।

'मंञ्चे भवती सम्यक् उपविशतु' इति सा सूचिता मया । सा तथैव कृतवती । अहं तस्याः अङ्के शिरः संस्थाप्य नेत्रे निमील्य शयनं कृतवान् । ललाटे तिलकं, कपोले हरिद्रां च धृत्वा शनिवासरे रामपूजां कुर्वत्याः मातुः मुखं मम नेत्रयोः पुरतः दृश्यते स्म ।

''लिल्लि ! काचित् विलक्षणा अन्तरङ्गवेदना । अवर्णनीया वेदना । इतः पूर्वं कदापि एवं न जातम् । मातुलगृहे यदा अहं वसामि स्म तदा

Kirtikant Sharma Collection, Najafgarh

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gran

ग्रामे मम माता दिवं गता आसीत् । तां वार्ताम् अहं न जानामि स्म । तथापि तस्मिन् दिने एतादृशी एव अन्तरङ्गवेदना अनुभूता आसीत् मया । न जाने किं दुरदृष्टं मां प्रतीक्षते इति ।''

अनुजा शकुन्तला स्मृता मया ।

लिल्ली मम उरसि शिरः स्थापितवती । तस्याः नेत्रयोः अश्रु उद्गतम् ।

''लिल्लि ! किमर्थं रोदनम् ?'' - मया पृष्टम् ।

''एवम् एव ।... भवतः अन्तरङ्गवेदनायाः कारणं भवान् ज्ञातुं न शक्नोति । किन्तु अहं जानामि तत् ।''

तस्मिन् दिने मध्याह्ने भोजनार्थम् अपि लिल्ली गृहं न गतवती । अपराह्ने सा एव उपाहारमन्दिरं गत्वा खाद्यम् आनीतवती । तदेव आवां खादितवन्तौ । सायम् उदरतापः किञ्चिदिव उपशान्तः । रात्रौ लिल्ली गृहं गतवती । प्रातः पत्रालयद्वारा एकं पत्रं प्राप्तम् । आतङ्केन अहं पत्रम् उद्घाटितवान् । शकुन्तलया लिखितं तत् । ''गृहे सर्वे कुशलिनः । भूस्वामी पुनः पुनः विवाहप्रस्तावं कुर्वन् अस्ति । स्नातकपरिक्षायां प्रथमश्रेणीं प्राप्तवते भवते उत्तमम् उद्योगं दापयितुं सिद्धः अस्ति सः । भवता सकृत् अत्र अवश्यम् आगत्य गन्तव्यम्'' इति पत्रे लिखितवती आसीत् सा । शकुन्तलागृहस्य कुशलवार्ताज्ञानात् मनः निश्चिन्तं जातम् । विवाहप्रस्तावोपेतं तत् पत्रं पुनः पठितुम् उत्साहः न आसीत् मम । अतः तत् पत्रं पेटिकायां स्थापितम् ।

यद्यपि क्रैस्तसमाजः अखण्डः, तथापि तत्र विवाहादिषु विषयेषु विविधलघुसमुदायानाम् आचाराः पृथक् पृथक् भवन्ति । हिन्दुसमाजस्य एकैकसमुदायस्य अपि एकैकः आचारक्रमः भवति । हिन्दवः यदा क्रैस्तमतम् अवलम्बन्ते तदा पूर्वतनम् आचारपद्धतिं पूर्णतः न परित्यजन्ति । केषुचित् प्रदेशेषु अद्यापि ब्राह्मणक्रैस्ताः, लिङ्गायतक्रैस्ताः, वैश्यक्रैस्ताः इत्यादयः विविधगणाः दृश्यन्ते । उच्चजातितः आगताः अन्यजातीयानां सम्बन्धं न इच्छन्ति । एकस्य समुदायस्य आचारविचाराः अन्यसमुदायस्य आचारविचारेण साम्यं न भजन्ते ।

यदा अहं हिन्दुः आसं तदा शाकाहारी आसम् । क्रैस्तमतावलम्बनानन्तरम् अपि शाकाहारत्वम् एव मया रक्षितम् । दीक्षास्नानं कारितवान् बोधकः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मां कदाचित् स्वगृहं प्रति भोजनार्थं निमन्त्रितवान् । 'शाकाहारभोजनं चेदेव अहम् आगच्छामि' इति मया उक्तम् । ''क्रैस्तमतस्य स्वीकारानन्तरम् अपि शाकाहार-तदितराहारभेदस्य प्ररिपालनं, तत्रापि बोधकस्य गृहं प्रति गमनसमये एतादृशः एव आहारः भवेत् इति नियमकथनं च सर्वथा अनुचितम् । अक्रैस्तत्वं द्योतयति एतत्'' इति सः उक्तवान् । अहं तस्य महत्त्वम् अपरिपकल्पयन् मम प्रकोष्ठं गतवान् ।

जान्तम्मय्यसमुदायस्य परम्परायाः अनुगुणं मम विवाहः निश्चितः। तम्मय्यवर्यस्य लिल्ली एकमात्रपुत्री । धनिकत्वकारणतः क्रैस्तसमाजे तस्य विशेषगौरवम् आसीत् । मैसूरुनगरे तदीयानि पञ्च गृहाणि भाटकार्थं दत्तानि आसन् । तेषु एकं रिक्तीकारयित्वा मह्यं वासार्थं दत्तवान् सः। अहं प्रकोष्ठं परित्यज्य तत्र वासम् आरब्धवान् ।

एकमात्रपुत्र्याः विवाहः महता वैभवेन एव प्रचलेत् इति तम्मय्यवर्यस्य आशयः आसीत् । कदाचित् सः देवप्रसादेन सह मां वस्त्रापणं नीतवान्। लिल्ली अपि अस्माभिः सह आगतवती । यादृशं रोचते तादृशं 'सूट्'-वस्त्रं भवान् क्रीणातु इति मां सूचितवान् तम्मय्यवर्यः । अहम् अद्यावधि एतादृशं माहार्घवस्त्रोपेतम् आपणं न आगतवान् आसम् । अतः कीदृशं वस्त्रं क्रेतव्यम् इति मया न ज्ञातम् । अनुजाग्रजौ एवं मिलित्वा चतुर्विधानि 'सूट्'वस्त्राणि चितवन्तौ । देवप्रसादः एकां घटीं क्रीत्वा तस्याः सुवर्णशृङ्खलां कारयितुं सूचितवान् । द्विचक्रिका क्रीता । आकाशवाणी अपि क्रीता । अन्यस्मिन् कस्मिंश्चित् दिने वध्वाः निमित्तं वस्त्राभरणादीनां क्रयणार्थं देवप्रसादः मह्यं सहस्रं रूप्यकाणि दत्तवान् । अहं लिल्ली च विपणिं गतवन्तौ । लिल्ल्या इष्टानि वस्त्राभरणानि क्रीतानि । पुनः पञ्चशतं रूप्यकाणि मम कोषे संस्थाप्य देवप्रसादः उक्तवान् - ''अन्यव्ययार्थम् एतत् धनं भवत्समीपे भवतु'' इति ।

एषु दिनेषु अहम् आधिक्येन राचम्मायाः गृहे एव भोजनं करोमि स्म । वासः तु नूतने गृहे । तत् गृहम् उत्पीठिका-मञ्चादि-पीठोपकरणैः सुसज्जम् आसीत् । विवाहसम्बद्धाः विधयः आरब्धाः । कदाचित् पञ्च गृहिण्यः पञ्च स्थालिकाः गृहीत्वा मम गृहम् आगतवत्यः । स्थालिकासु कदलीफलानि,

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

नागवल्लीपर्णानि, पूगीफलं, मधुरखाद्यानि च आसन् । लिल्ल्याः निमित्तं क्रीतानि, वस्त्राभरणानि अपि तत्र आसन् । ताभिः सह षष्टिवर्षीयः कश्चन ज्येष्ठः अपि आसीत् । सः तम्मय्यस्य दूरबन्धुः । तस्य नाम मरियप्पः इति । राजस्वविभागे कार्यं कृत्वा निवृत्तः आसीत् सः । तस्य पुत्राः सर्वे सर्वकारीयम् उद्योगं प्राप्तवन्तः सन्ति । गृहम् आगतैः सह अहं कन्यागृहं गतवान् ।

कन्यायाः गृहस्य अङ्गणे एकं पीठं स्थापितम् आसीत् । तेषां सूचनानुसारं मया तत्र उपविष्टम् । साम्प्रदायिकतया कन्यायाः मातापितरौ अस्माभिः नीतानि वस्त्राभरणानि स्वीकृतवन्तौ । अल्पे एवं काले तासु एकां शाटिकां धृत्वा आभरणानि च परिधाय लिल्ली बहिः आगतवती । तस्याः हस्ते जलपात्रम् आसीत् । तत् मम पादयोः पार्श्वे स्थापयित्वा पादौ स्पृष्ट्वा सा नमस्कृतवती । तत्समये ज्येष्ठानां सूचनायाः अनुगुणम् आवां परस्परं दृष्टवन्तौ । ततः लिल्ली अन्तः गतवती ।

तत्र क्रियमाणाः आचाराः बहवः मया अज्ञातपूर्वाः । तैः यथा उक्तं तथा क्रियते स्म मया । प्रभावशालिनः तम्मय्यवर्यस्य जामातृत्वं प्राप्नुवन् आसम् इत्यतः सर्वे माम् आदरेण पश्यन्ति स्म । वयं सर्वे मदीयं गृहं प्रत्यागताः । विवाहदिनविषये सूचनाफलके पत्रं स्थापितम् ।

विवाहः यथा यथा आसन्नः तथा तथा मम गृहं प्रति लिल्ल्याः आगमनं विरलं जातम् । राचम्मा अपि तम्मय्यस्य गृहे एव वसति स्म । विवाहसन्नाहकारणतः सर्वेषाम् अविरतकार्याणि भवन्ति स्म । यदा मया गम्यते स्म तदा राचम्मायाः पाचिका मरियम्मा भक्त्या पीरवेषयति स्म । देवप्रसादः अपि विवाहसन्नाहार्थम् उत्साहेन अटन् आसीत् । कदाचित् रात्रौ आमन्त्रणपत्राणां राशिं पुरतः संस्थाप्य सङ्केतं लिखन् उपविष्टवान् आसीत् सः । मम आगमनं दृष्ट्वा मन्दहासं प्रकटयन् सः - ''कस्मै कस्मै पत्रं प्रेषणीयम् इत्येव न ज्ञायते क्वचित् । आत्मीयानां कृते दातुम् आह्वानपत्रं मुद्रापितं वा भवता ?'' इति पृष्टवान् ।

''एतावता अपि न'' इति उक्तवान् अहम् ।

राचम्मा गृहे न आसीत् । आवाम् उभौ भोजनार्थम् उपविष्टवन्तौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मरियम्मा परिविष्टवती । भोजनसमये एव मम मनः हतप्रभं जातम् । गृहं प्रति आगमनानन्तरं तु मनश्शान्तिः पूर्णतः नष्टा । विवाहामन्त्रणपत्रं कस्मै प्रेषयानि ? मित्रेभ्यः ? बान्धवेभ्यः ? आत्मीयबान्धवः तादृशः कोऽपि नास्ति मम । भगिनी आवुत्तः च स्तः । प्रेम्णा विद्यां बोधितवन्तौ स्वामिवर्यः नञ्जुण्डवर्यः चापि स्तः । भगिन्याः विवाहसमये निष्कामसेवां कृतवान् अस्ति रामण्णः । एतेषु कस्मै आह्वानपत्रस्य प्रेषणम् ? शङ्करः अपि स्मृतः । मनः नितरां खिन्नं जातम् ।

मध्यरात्रः अतीतः चेदपि मया निद्रा न प्राप्ता । 'विवाहः यद्यपि व्यक्तेः सुखाय एव भवति, तथापि समष्टिः यदा तं दृष्ट्वा सन्तोषम् अनुभवति तदा एव व्यक्तिः अपि सन्तुष्टा भवति । मम विवाहं दृष्ट्वा किं मम बन्धुमित्राणि सन्तोषम् अनुभवेयुः ? अन्यः कोऽपि न निमन्त्र्येत चेदपि सहोदरी आवुत्तः च अवश्यं निमन्त्रणीयौ । तौ दूरे स्थित्वा वा मम विवाहं पश्येताम्' इति मम मनसि चिन्तनं प्रवृत्तम् ।

झटिति उत्थाय नञ्जुण्डम् उद्दिश्य - ''भवता वा मद्विषये अन्यथाभावः न प्राप्तव्यः । मम मानसिकसङ्घर्षः कीदृशः आसीत् इति भवता ज्ञायते एव । गतं तु गतम् एव । मम जातिनाम परिवृत्तं चेदपि अहं तु भवतः मित्रं, भवान् च मम आवुत्तः । शकुन्तलया सह भवता अवश्यं विवाहदिने उपस्थातव्यम् । भवान् यदि न आगच्छेत् तर्हि मदीयः अन्यः को वा भवेत् विवाहदिने ?'' इति पत्रं लिखित्वा मध्यरात्रे एव गत्वा पत्रपेटिकायां स्थापयित्वा आगतवान् । आमन्त्रणपत्रस्य पृथङ्मुद्रणस्य आवश्यकता मया न दृष्टा ।

अनन्तरदिने प्रातः एव अहं लिल्लीं प्रति वार्तां प्रेषितवान् - 'शीघ्रम् आगत्य मां पश्यतु' इति । अर्धघण्टाभ्यन्तरे सा आगता । मां दृष्ट्वा आतङ्केन - ''किमर्थम् एवम् ? कुतः नेत्रे रक्ते स्तः ? रात्रौ निद्रा न कृता इति भाति । स्वास्थ्यं सम्यक् अस्ति खलु ?'' इति पृष्टवती ।

''किं प्रश्नेन ? आगच्छतु, अत्र उपविशतु ।''

सा मम पार्श्वे उपविश्य सान्त्वनस्वरेण - ''किमर्थम् एवम् ?'' इति पुनः पृष्टवती ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

''लिल्लि ! सुखेन जीवनं मम ललाटे लिखितं नास्ति इति भाति । भवती पार्श्वे तिष्ठेत् चेदेव मनः शान्ततया तिष्ठेत् । भवती तत् गृहं मा गच्छतु एव । अत्रैव वसतु ।''

''इतः परं दश एव दिनानि । ततः एकं दिनम् अपि भवता विरहिता न भविष्यामि । अद्य किमर्थम् एवम् ?''

''मातुः गर्भात् जातेषु सजीवं स्थितवन्तौ अहं भगिनी च । मम विवाहे सा अवश्यम् उपस्थिता भवेत् । तदर्थं ह्यः रात्रौ पत्रं लिखितम् । न जाने, सा आगच्छेत् वा न वा इति ।''

''भवान् एव गत्वा निमन्त्र्य आगच्छतु ।''

''तथा मास्तु । तत्र गमने मम किमपि अधैर्यम् । पत्रनिमन्त्रणं पुरस्कृत्य तौ आगच्छतः चेत् मम सन्तोषः । अन्यथा भगवतः इच्छा यथा अस्ति तथा भवतु ।''

लिल्ली किं वा वदेत् ? सा मौनम् अवलम्बितवती । गृहे बहुषु कार्येषु सत्सु अपि तद्दिनात् आरभ्य प्रातः सायं च सा मम पार्श्वे भवति स्म ।

* * *

विवाहदिने कागदमालाभिः क्रैस्तालयः अन्तर्बहिः च अलङ्कृतः आसीत् । बहिः द्वारे कदलीस्तम्भं बद्ध्वा तस्य पत्राणि वध्यचिह्नाकारेण बद्धवन्तः आसन् । प्राङ्गणं कार्यानादिभिः पूर्णम् आसीत् । सर्वत्र कोलाहलः । अपरिचिताः बहवः आगत्य स्वपरिचयम् उक्त्वा हस्तान्दोलनं कुर्वन्ति स्म । प्रायः सर्वे आंग्लभाषासम्भाषणशीलाः एव । सर्वकारीयोद्योगिनः, तन्त्रज्ञाः, प्राध्यापकाः, अध्यापकाः, कन्नडभाषिणः, मलयाळभाषिणः, अनुवैद्याः इत्यादयः बहवः तत्र । अहं तु कमपि न अभिजानामि स्म । सर्वे अदृष्टपूर्वाः एव । देवप्रसादः उत्साहेन सञ्चरन् व्यवस्थां परिशीलयन् आसीत् । सभाङ्गणस्य एकस्मिन् कोणे सम्मिलितानां महिलानां सत्कारादिव्यवस्थां राचम्मा अन्यभगिन्यः च निर्वहन्ति स्म । राचम्मायाः माता, पिता जोसेफ्गौडः च उपस्थितौ आस्ताम् । राचम्मा पित्रे मां प्रदर्श्य - ''अहं नरसापुरीये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माध्यमिकविद्यालये यदा पठन्ती आसं तदा अस्मद्गृहम् आगच्छति स्म खलु सत्यनामकः, सः अयम् एव । इदानीम् अस्माकं बन्धुः भवन् अस्ति'' इति उक्तवती । जोसेफ्गौडवर्यः हस्तौ योजयित्वा नमस्कृत्य - ''सन्तोषस्य अयं विषयः । सर्वं पितुः आशीर्वादस्य फलम्'' इति उक्तवान् ।

मम बन्धुः सुहृत् वा कोऽपि उपस्थितः न आसीत् । 'मम पत्रम् एतावता नञ्जुण्डः प्राप्तवान् स्यात् एव । यदि सः अत्र आगच्छेत् तर्हि अपि अत्रत्यपरिसरे सन्तोषं न अनुभवेत्' इति भावः मनसि आगतः । स्त्रीसमूहः दृष्टः चेत् सः हिन्दुसमाजीयः इव एव भासते स्म । काश्चन विहाय सर्वाः शाटिकां पुष्पं च धृतवत्यः आसन् । किन्तु कस्याश्चित् अपि ललाटे तिलकं न दृश्यते । तिलकरहितानां ललाटानां दर्शनात् एव परिसरस्य अनानुगुण्यं मां बाधते स्म । पुरुषाः सर्वे आंग्लवेषधारिणः । शकुन्तलायाः विवाहे इव वेष्टीभस्मधारिणः पुरुषाः, तिलक-मङ्गलवस्त्रधारिण्यः महिलाः वा तत्र न दृश्यन्ते स्म । वेदमन्त्रः, अग्निकर्म, आर्यसंस्कृतिः वा तत्र न दृश्यते स्म । ऋते राचम्मादेवप्रसादयोः, मदीयः कोऽपि तत्र न दृश्यते स्म । अपरिचितबहुलायां विपण्याम् इव एकाकिताम् अनुभवन् आसम् अहम् । निर्जनशिथिलगृहम् इव आसीत् मम मनः ।

सूट्वस्त्रं धृतवान् अहम् आदौ वेदिकाम् आरुह्य जानुभ्याम् उपविष्टवान् । अनन्तरं लिल्ली मम पार्श्वे उपविष्टवती । धर्मबोधकस्य आगमनस्य अनन्तरं सामूहिकप्रार्थना प्रवृत्ता । धर्मगुरुः आवाभ्यां प्रमाणवचनानि वाचितवान् । आवयोः हस्तौ योजितवान् । वध्यचिह्नयुक्तं मङ्गलसूत्रं लिल्ल्याः कण्ठे मया धारितम् । जनाः सर्वे पुनरपि आंग्लशैल्या प्रार्थनां कृतवन्तः । विवाहसञ्चिकायां मया लिल्ल्या च हस्ताक्षरं लिखितम् । झेवियर्सत्यदासः लिल्ली च दम्पती जातौ ।

क्रैस्तालये स्थिताः सर्वे उत्थितवन्तः । अहं, लिल्ली, तस्याः मातापितरौ, अन्ये केचन च क्रिस्तालयस्य मुख्यद्वारात् निर्गताः । सर्वे आवयोः उपरि हरिद्रामिश्रितान् अक्षतान् विकीर्णवन्तः । गमनसमये द्वारसमीपे स्यूतं गृहीत्वा स्थितः नञ्जुण्डः दृष्टः मया । क्षणकालं स्थित्वा ''शकुन्तला न आगता किम् ?'' इति मया पृष्टम् ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

नञ्जुण्डः झटिति किमपि न उक्तवान् । 'नञ्जुण्डं गृहम् आनयतु' इति समीपस्थं कञ्चित् उक्त्वा अहम् अग्रे गतः । क्रैस्तालयस्य द्वारसमीपे अलङ्कृतं कार्यानं स्थितम् आसीत् । शोभायात्रया आवां लिल्लीगृहं प्रति आनीतौ । गृहद्वारे हरिद्राजलेन नीराजनं कृतम् । अनिष्टनिवारणार्थं नारिकेलं भञ्जितम् । गृहस्य पुरतः प्राङ्गणे रचिते पटमण्डपे सुखासनं स्थापितम् आसीत् । आवां तत्र उपवेशितौ । तावता सर्वे क्रिस्तालयात् आगताः । ध्वनिवर्धकद्वयं उच्चस्वरेण चलनचित्रगीतानि प्रसारयति स्म । आमन्त्रिताः बहवः सम्मिलिताः । ततः बैबल्ग्रन्थस्य एकं गीतं सामूहिकरूपेण सर्वैः गीतम् । वधूवरयोः कृते दत्तानाम् उपायनानां राशिः एव सुखासनस्य पार्श्वे दृश्यते स्म । एतावता नञ्जुण्डः तत्र आगतः । सः मह्यं रजतचषकं लिल्ल्यै चोलवस्त्रं च दत्तवान् । तदा रात्रेः अष्टवादनम् आसीत् । ''अहं साधयामि तावत्'' इति उक्तवान् नञ्जुण्डः ।

वरे यः उत्साहः, आनन्दः, सम्भ्रमः च भवेत् सः मध्याह्नात् अपि मयि न आसीत् । मदीयं चेतनं हतप्रभम् आसीत् । नञ्जुण्डस्य वचनस्य श्रवणात् तु अहं छुरिकया विद्धः इव । अहं तस्य हस्तौ गृहीत्वा - ''भवता सह मया वार्तालापः करणीयः अस्ति । अचिरात् एव एतत्सर्वं समाप्तं भविष्यति'' इति उक्तवान् ।

''अस्तु, तिष्ठामि'' इति उक्त्वा सः ततः निर्गतः ।

उपायनस्वीकारसमारम्भस्य समाप्तेः अनन्तरं मया नञ्जुण्डः अन्विष्टः । पञ्चदशनिमेषाणाम् अनन्तरं सः तत्र उपस्थितः । तम् अहम् अन्तः प्रकोष्ठं नीतवान् । लिल्लीम् आहूय द्वारं पिधाय - ''एषः एव मम आवुत्तः नञ्जुण्डः'' इति परिचयं कारितवान् च ।

लिल्ली नञ्जुण्डं नमस्कृतवती । तम् आसन्दे उपवेश्य आवां तस्य पार्श्वे उपविष्टवन्तौ । नञ्जुण्डः मूकः इव मौनेन स्थितः आसीत् । मम मुखं तन्तुना सीवितम् आसीत् तत्र । असहनीयं मौनं निवारयन्ती लिल्ली एव पृष्टवती - ''एतस्य भगिनी किं न आगता ?''

''न । सा न आगता ।''

किमर्थम् इति प्रश्नस्य आवश्यकता एव न आसीत् । तावता नञ्जुण्डः एव तस्याः अनागमनस्य कारणम् उक्तवान् - ''अत्र आगमनार्थम् उभौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपि प्रस्थितवन्तौ । किन्तु तावता सा बहिष्ठा जाता । अतः तया न आगतम्'' इति ।

एतस्य वचनस्य सत्यासत्यता मया सुस्पष्टं ज्ञायते स्म । मम जिह्वा शक्तिहीना आसीत् ।

''सर्वे वयं मिलित्वा भोजनं करवाम'' इति लिल्ली यदा उक्तवती तदा नञ्जुण्डः - ''अहम् इदमिदानीं भोजनं समाप्य आगतः । भवन्तः मम भोजनविषये मा चिन्तयन्तु'' इति उक्तवान् । सः कुत्र भोजनं कृतवान् इति मया ज्ञातम् ।

बहिः भोजनकोलाहलः श्रूयते स्म । लिल्ली - 'एषाऽहम् इदानीम् आगता' इति उक्त्वा अन्तः गतवती ।

अहं नञ्जुण्डं पृष्टवान् - ''अत्र भवतः वासः कुत्र ? वस्तूनि च कुत्र ?'' इति ।

''यानात् अवतीर्य साक्षात् अत्रैव आगतं मया । अन्यत् किमपि न आनीतम्, एतस्मात् स्यूतात् ऋते ।''

''अस्तु तावत् । भवतः शयनार्थम् अन्यत्र व्यवस्थां कारयिष्यामि ।''

''मम विरामः नास्ति । रात्रौ दशवादने बेङ्गलूरुं प्रति एकं यानम् अस्ति । तत् आरुह्य मण्ड्यनगरं गमिष्यामि । तत्र मित्रगृहे स्थित्वा प्रातः लोकयानेन गृहं गमिष्यामि'' इति उक्तवान् सः ।

अहं मौनम् अवलम्बितवान् । तावता लिल्ली स्थालिकायां नारङ्गफलानि, कदलीफलानि, शर्करां च आनीतवती । नञ्जुण्डः एकं नारङ्गफलमात्रं स्वीकृत्य उत्थाय उक्तवान् - ''यानसमयः आसन्नः । अहं साधयामि ।''

अहं मौनेन स्थितवान् । निमेषद्वयानन्तरं सः - 'पुनः मिलाम' इति उक्त्वा ततः प्रस्थितः ।

अहम् उक्तवान् - ''लिल्लि ! आवुत्तं नमस्करोतु ।''

हिन्दुस्त्री इव सा पादौ स्पृष्ट्वा नञ्जुण्डं नमस्कृतवती । 'दीर्घसुमङ्गली भव' इति उक्त्वा नञ्जुण्डः शिरः अवनमय्य ततः निर्गतवान् ।

लिल्ल्याः मुखं कान्तिहीनं जातम् । ''सः किमर्थं निर्गतः ?'' इति मां पृष्टवती सा ।

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

अहं किं वा वदानि ?

विवाहार्थं भगिनी न आगता । आवुत्तः आगतः अपि अनागतः इव । अन्यः कोऽपि मदीयः न आगतः । एवं स्थिते अपि मम विवाहः महता वैभवेन सम्पन्नः । अनन्तरदिने सर्वेषां कृते मांसाहारभोजनं व्यवस्थापितम् । 'तम्मय्यः पुत्र्याः विवाहं वैभवेन कृतवान्' इति सर्वे श्लाघितवन्तः । अतिथयः सर्वे माम् अभिनन्दितवन्तः ।

विवाहानन्तरं चतुर्थे दिने तम्मय्यः आवां धर्मगुरोः (विषप्) समीपं नीतवान् । बैबल्ग्रन्थम्, अमेरिकीयं क्षीरचूर्णं च प्रत्यर्पयितुं पूर्वं कदाचित् मया तत्र गतम् आसीत् । इदानीं द्वितीयवारं गच्छन् आसम् । अद्यावधि मया बिषप्वर्यः न दृष्टः आसीत् । लिल्ली माम् उक्तवती आसीत् – ''सः हालेण्ड्देशीयः । आंग्लभाषया व्यवहारं करोति । स्थलीयक्रैस्तसमुदाये तस्य प्रभावः अत्यधिकः अस्ति । क्रिस्तालयस्य व्यवहारं, दि किङ्ग् क्रिश्चियन्महाविद्यालयस्य प्रमुखत्वं च निर्वहति सः । राजनीतिक्षेत्रे अपि तस्य प्रभावः अस्ति । अचिरात् एव सः नगरसभाध्यक्षः अपि भवेत् । नगरीयस्य प्रमुखराजकीयपक्षस्य उपरि अपि तदीयः विशेषप्रभावः अस्ति । लोकसभानिर्वाचनादिषु अभ्यर्थिनः तदीयम् आशयं पुरस्कृत्य एव व्यवहरन्ति । राजनैतिकक्षेत्रे सूक्ष्मदृष्टिः, राजकीयवायुः कां दिशाम् अनुसरति इति ज्ञानं च तस्य विशेषतः अस्ति ।''

बिषप्वर्यः अस्माकम् आगमनस्य निरीक्षायाम् आसीत् । तम्मय्यवर्यः भक्त्या आभूमि अवनम्य वध्यचिह्नसंज्ञां कुर्वन् नमस्कृतवान् । अहं लिल्ली च औपचारिकतया नमस्कृतवन्तौ । बिषप्वर्यः उन्नतः दृढकायः च । नारङ्गवर्णीया देहकान्तिः । मुखे अरुणच्छायामिश्रितं श्वेतश्मश्रु । शिरसः अर्धभागे खल्वाटता । श्वेतवर्णीयं दीर्घयुतकं धृतवान् आसीत् सः । प्रायः गौप्यविषयं कञ्चित्, स्वयम् उट्टङ्कयन् आसीत् ।

सुसज्जं भवनं बिषप्वर्यस्य । उद्यानस्य मध्ये स्थितं गृहं तत् । गृहस्य रचना युरोप्शैल्यनुगुणम् एव आसीत् । वयं यत्र उपविष्टवन्तः सः स्वागतप्रकोष्ठः । तत्र भित्तौ बैबल्वाक्यानि, वध्यचिह्नं, चित्राणि च आसन् । पुस्तककपाटिकाद्वयं, सोफासनत्रयं, त्रिपादिका चापि आसीत् । कोणे महाकारिका काचित् आकाशवाणी । किञ्चित् उद्घाटितात् द्वारात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पार्श्वप्रकोष्ठे स्थिता सुसज्ञा शय्या मञ्चश्च दृश्यते स्म । स्वागतप्रकोष्ठे भूमौ महार्घः वस्त्रकटः प्रसारितः आसीत् ।

बिषप्वर्यः मन्दहासपूर्वकं वार्तालापं कृतवान् । तस्य आंग्लोच्चारणस्य अवगमने मम किञ्चिदिव क्लेशः भवति स्म । ''भवान् एतस्य पुत्रीं परिणीतवान् इति श्रुतम् । महतः सन्तोषस्य विषयः । लिल्ली अस्मन्महाविद्यालयस्य विद्यार्थिनी । पिता भवन्तम् अनुग्रहीष्यति'' इति उक्त्वा सः पृष्टवान् - ''भवतः दीक्षास्नानं कदा समाप्तम् ?'' इति ।

''मासद्वयात् पूर्वम्'' इति उक्तवती लिल्ली ।

''अन्ततो वा भवान् पवित्रसत्यम् अङ्गीकृतवान् किल ! भवति उदितः प्रकाशः वर्धताम् । सत्यप्रकाशविषये अस्माभिः स्वार्थिभिः न भवितव्यम् । तं प्रकाशम् अन्ये अपि यथा प्राप्नुयुः तथा निरन्तरप्रयासः करणीयः । सर्वोऽपि क्रिस्तद्वारा देवराज्यं यथा प्रविशेत् तथा यत्नः करणीयः । ....''

आवेशपूर्णध्वनिना नीलनेत्राभ्यां भविष्यत्कालं पश्यन् सः वदन् आसीत् । तावता पाचकः बिस्कत्खाद्यं काफीं च आनीतवान् । तस्य सेवनस्य अनन्तरं बिषप्वर्यः पृष्टवान् - ''भवान् स्नातकपरीक्षायां प्रथमश्रेणीं प्राप्तवान् इति श्रुतम् । एवं ननु ?'' इति ।

''आम् ।''

''अग्रे किं करणीयम् इति भवतः चिन्तनम् ?''

''न किमपि निर्णीतम् । कोऽपि उद्योगः अन्वेष्टव्यः ।''

सहानुभूत्या चिन्तयन् सः अधरोष्ठं सकृत् दष्ट्वा - ''कामपि चिन्तां मा करोतु भवान् । प्रतिभाशाली भवान् सामान्यस्य विशेषप्रयोजनरहितस्य उद्योगस्य निमित्तं स्वप्रतिभां न व्ययीकुर्यात् । अध्ययनसमये भवान् वाग्मी आसीत् इति श्रुतम् । प्रभुः योग्यं मार्गं दर्शयिष्यति । अन्यच्च जान्तम्मय्यवर्यस्य अद्वितीयपुत्रीं परिणीतवान् भवान् कस्मिंश्चित् अपि विषये चिन्तां न कुर्यात् । कानिचन दिनानि सन्तोषेण याप्यताम् । तदा तदा अत्र आगच्छन् भवतु'' इति उक्तवान् ।

तम्मय्यवर्यस्य मुखे कृतज्ञता भक्तिः च व्यक्ततया दृश्यते स्म । वयं सर्वे तं पुनरपि नमस्कृत्य ततः निर्गताः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विवाहानन्तरं मम कौटुम्बिकजीवनम् आरब्धम् । नित्यजीवने काऽपि न्यूनता यथा न भवेत् तथा लिल्ल्याः पिता सर्वम् अपि व्यवस्थापितवान् आसीत् । विवाहात् पूर्वम् एव पीठोपकरणानि आगतानि आसन् । विवाहसमये आकाशवाणी-द्विचक्रिकादयः दत्ताः आसन् । राचम्मा मरियम्मां पाकसाहाय्यार्थं प्रेषितवती आसीत् । किन्तु मरियम्मायाः पाकः मह्यं न रोचते स्म । मम रुचिम् अवगत्य लिल्ली एव पाकार्थं निर्देशं ददाति स्म । लिल्ल्याः माता तदा तदा पुत्र्याः गृहम् आगच्छति स्म । किन्तु कदापि सा मया सह वार्तालापं न कृतवती एव । गृहे तिष्ठन्ती अपि अतिष्ठन्ती इव व्यवहरति स्म सा । पतितः नितरां भीता सा अतिविरलतया एव सम्भाषणं करोति स्म ।

मासः अतीतः चेदपि लिल्ली स्वरुच्यनुगुणं गृहस्य व्यवस्थापने अवधानं न दत्तवती आसीत् । दिनस्य समग्रः समयः अटनेन जल्पनेन वा यापितः भवति स्म । क्वचित् राचम्मायाः गृहे एव आवयोः भोजनं प्रचलति स्म ।

मार्चमासानन्तरं विद्यालय-महाविद्यालयानां विरामः आरब्धः । एकदा पितृगृहं गत्वा प्रत्यागता लिल्ली माम् उक्तवती – ''भवता उद्योगः प्राप्तः अस्ति । सप्ताहानन्तरं भवता कार्यार्थं गन्तव्यम्'' इति ।

मया पूर्वं केभ्यश्चित् स्थलेभ्यः आवेदनपत्राणि प्रेषितानि आसन् । 'काचित् संस्था मम पूर्वतनप्रकोष्ठसङ्केताय पत्रं प्रेषितवती स्यात् । तद्गृहजनाः लिल्ल्यै तत् पत्रं दत्तवन्तः स्युः' इति मया चिन्तितम् । किन्तु वस्तुस्थितिः अन्या एव आसीत् । क्रिस्तालयेन सञ्चाल्यमानायाः बेल्लिङ्गटन्-प्रौढशालायाः प्राचार्यत्वेन अहं नियुक्तः आसम् । यद्यपि सा प्रौढशाला, तथापि तस्याः मुख्याधिकारी तु 'प्राचार्य'पदेन एव निर्दिश्यते स्म । मया तदर्थम् आवेदनपत्रं न दत्तम् आसीत् । वस्तुतः तु एतस्य उद्योगस्य विषयः एव मया न

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञातः आसीत् । तथापि सः प्राप्तः आसीत् मया । तत्रापि मम मासिकं वेतनं त्रिशतं रूप्यकाणि ! एतत् श्रुत्वा मया आश्चर्यं प्रकटितम् ।

तदा लिल्ली उक्तवती - ''बिषप्वर्यस्य मम पितुः च आत्मीयः सम्बन्धः । बिषप्वर्येण एषः उद्योगः दत्तः । बिषप्वर्यस्य स्वभावः एव तथा । साहाय्येच्छा उत्पन्ना चेत् महत् साहाय्यं करोति । तथैव विरोधेच्छा उत्पन्ना चेत् महत् एव अनिष्टम् अपि करोति सः । अतः तेन सह जागरूकतया व्यवहरणीयम् । भवता स्नातकपरीक्षायां प्रथमश्रेणी प्राप्ता आसीत् खलु ? बिषप्वर्येण तस्य मान्यता दत्ता अस्ति ।''

तस्मिन् दिने सायं तम्मय्यवर्यः मां बिषप्निवासं नीतवान् । ब्रिषप्वर्यः मन्दहासपूर्वकम् आवां स्वागतीकृत्य तत्रैव मद्द्वारा एकम् आवेदनपत्रं लेखितवान् । 'एतत् समितिगोष्ठ्यां प्रस्तुत्य अनुमतिं प्राप्स्यामि । इतः सप्ताहाभ्यन्तरे, तन्नाम सप्तमे दिनाङ्के कार्यार्थम् आगन्तव्यम्' इति सः उक्तवान् । मम कार्यम् अपि सः विवृतवान् - ''वेलिङ्गटन्शालायाः एकः छात्रावासः अपि अस्ति । तस्य कश्चन व्यवस्थापकः (वार्डन्) अपि भवति । छात्रावासस्य परिवीक्षणम् अपि भवता कर्तव्यम् । समयः भवति चेदेव कक्ष्यासु पाठः कर्तुं शक्यः । पाठः न क्रियते चेत् अपि न काऽपि आपत्तिः । शालाव्यवस्थानिर्वहणकार्यम् एव आधिक्येन भवति । भवतः साहाय्यार्थं कश्चन मुख्याध्यापकसहायकः अपि भवति । आरम्भदिनेषु तस्य साहाय्येन निर्वहणव्यवस्था अवगन्तव्या । विशेषसमस्या अस्ति चेत् अहं प्रष्टव्यः ।''

''अन्यशालाः इव न अस्मदीया । अस्माकं शालायाः लक्ष्यम् अनुशासनं च उदात्तम् अस्ति । महोन्नतस्य लक्ष्यस्य साधनार्थम् अस्माभिः सर्वैः सम्भूय कार्यं करणीयम् । देवकार्यं ये कुर्वन्ति तान् देवः अनुगृह्णाति एव । भवदीयं कार्यं भवान् श्रद्धया करोतु । साहाय्यम् आनुकूल्यं च भगवान् कल्पयिष्यति'' इति तेन उपदिष्टम् । ततः तेन अहम् आशिषा अनुगृहीतः ।

जामाता अहम् आशिषा अनुगृहीतः यत् तदर्थं तम्मय्यवर्यः हस्तौ वध्यचिह्नाकारेण चालयित्वा भक्त्या तं नमस्कृतवान् ।

एप्रिल्मासस्य सप्तमे दिनाङ्के व्यवस्थापकसमितेः सदस्यानां समक्षं,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बिषप्वर्यस्य उपस्थितौ मया अधिकारसूत्रं गृहीतम् । मिषन्चिकित्सालयस्य वैद्यस्य डा॥ ह्यारिसस्य पत्नी, वस्त्रापणस्य स्वामी म्याथ्यस् मल्लिकार्जुनप्पः, क्रिश्चियन्सेण्टिनरिसङ्गस्य संस्थापकाध्यक्षः जयलिङ्गप्पकरवाडी, बर्मा शेल् संस्थायाः प्रतिनिधिः स्वामिशरणः च अस्माकं विद्यालयस्य गौरवसदस्याः । अधिकारस्वीकारदिने ते माम् अभिनन्दितवन्तः । वस्तुतः विद्यालयस्य समग्रः अधिकारः बिषप्वर्यस्य एव अधीनः भवति । इतः पूर्वं मम श्वशुरः अपि व्यवस्थापकसमितेः सदस्यः आसीत् । 'जामातरि प्राचार्यपदे तिष्ठति सति, मम सदस्यत्वं न युज्यते' इति विचिन्त्य सः त्यागपत्रं समर्पितवान् आसीत् ।

बिषप्निवासं प्रति प्रौढशालायाः मुख्योपाध्यायसहायकः (असिस्टण्ट् हेड्मास्टर्) थामसः अपि आगतः आसीत् । सः पञ्चाशदधिकवर्षवयस्कः । मलबारप्रदेशीयः सः एतं विद्यालयं विंशतिवर्षेभ्यः पूर्वम् आगतः । दीर्घसेवा कृता इत्यतः वेतने दशरूप्यकवृद्धिं कृत्वा मुख्योपाध्यायसहायकस्थाने सः स्थापितः अस्ति । सः अपि स्नातकपरीक्षायां प्रथमश्रेणीं प्राप्तवान् एव । इदानीं सः पञ्चदशाधिकशतं रूप्यकाणि वेतनरूपेण प्राप्नोति । कृष्णवर्णीयं सुदृढं शरीरं तस्य । तदीयं श्मश्रु हिट्लरीयम् अनुकरोति । शिरसः वामभागे सीमन्तः दृश्यते । सर्वदा सकच्छं वेष्टीं, रक्त-कृष्णवर्णीयं कण्ठवस्त्रं(टै), विवाहकाले सज्जीकारितं प्राचीनम् उलन्प्रावारकं च धरति सः । मैसूरुं प्रति आगमनानन्तरं बहूनि वर्षाणि अतीतानि चेदपि प्रादेशिकभाषां सः सम्यक् न जानाति । आंग्लेयानाम् उच्चारणम् अनुकर्तुं प्रयतते सः । तथापि तदीयम् आंग्लोच्चारणं मलयाळभाषाप्रभावतः कदापि उन्मुक्तं न आसीत् । कार्याज्ञां प्राप्य अहं यदा विद्यालयं गतः तदा थामसः एव मां कार्यालयं नीतवान् । ग्रीष्मविरामकालः चेदपि त्रयः लिपिकाराः स्वकार्ये निरताः आसन् । थामसः मया सह विनयेन व्यवहरति स्म । तस्य तिस्रः पुत्र्यः, एकः पुत्रः च । ज्येष्ठा पुत्री मिषन्चिकित्सालये अनुवैद्या अस्ति । अपरा दशमकक्ष्याम् उत्तीर्य उद्योगान्वेषणं कुर्वती अस्ति । तृतीया एतस्मिन् वर्षे स्नातककक्ष्यां गन्तुम् इच्छति । पुत्रः चतुर्भ्यः वर्षेभ्यः इण्टर्मीडियेट्कक्ष्यायाम् एव अस्ति । "भवतः कृपया निर्धनस्य वराकस्य मम कुटुम्बं सुखेन तिष्ठेत्" इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विलक्षणम् उच्चारणं कुर्वन् आंग्लभाषया उक्तवान् थामसः ।

षड्भ्यः वर्षेभ्यः अन्यः कश्चन प्राचार्यः आसीत् । किन्तु विद्यालयीयस्य धनस्य दुरुपयोगः कृतः इत्यतः सः स्थानात् च्यावितः । ततः आरभ्य स्थानापन्नत्वेन थामसः एव प्राचार्यकार्यं निर्वहन् आसीत् ।

विद्यालयं प्रति आगमनानन्तरं दिनाभ्यन्तरे एव थामसः माम् उद्दिश्य - ''पूर्वतनः प्राचार्य भवादृशः न आसीत् श्रीमन् । भवतः तु दर्शनात् एव ज्ञायते - भवान् गुणानां खनी इति । भवतः आधीन्ये कार्यं करोमि यत् तत् मम सौभाग्यम् । भवतः अधिकारावधौ अस्माकं शाला राज्यस्तरे एव प्राथम्यं प्राप्स्यति । देवस्य प्रकाशं सर्वेभ्यः छात्रेभ्यः दास्यति च'' इति उक्तवान् ।

अनन्तरदिने प्रातः एकादशवादने शालायाः सर्वे अध्यापकाः आगत्य मिलिताः । ब्राह्मण-लिङ्गायत-गौड-क्रैस्तजातीयाः सर्वे तत्र आसन् । सर्वे सूट्वस्त्रं धृतवन्तः आसन् । कन्नडपण्डितः वेङ्कटेशभट्टः एकः एव वेष्टीं धृत्वा राङ्कवम् उत्तरीयत्वेन धृतवान् आसीत् । ललाटे गन्धाक्षताः, भ्रुवोः मध्ये तिलकं च दृश्यते स्म । क्रैस्तपरिसरबहुले एतस्मिन् विद्यालये तिष्ठन् अपि पारम्परिकवेषं न परित्यक्तवान् आसीत् सः । सर्वेषाम् उपाध्यायानां मुखे दारिद्र्यच्छाया स्फुटं दृश्यते स्म । ऋते केभ्यश्चित् क्रैस्ताध्यपकेभ्यः, तेषु कोऽपि अशीत्यधिकरूप्यकाणि न प्राप्नोति स्म वेतनत्वेन । प्राचार्यं मां ते येन क्रमेण नमस्कृतवन्तः तं क्रमम् अन्यत्र कुत्रापि न दृष्टवान् आसम् । विनयेन, भयेन, भक्त्या, कृत्रिमहासेन च ते मां नमस्कृतवन्तः । थामसः नाम निर्दिश्य परिचयं यदा वदति स्म तदा एकैकोऽपि उत्थाय अतिविनयेन नमस्करोति स्म । अध्यापकगणे केचन हिन्दवः दृश्यन्ते स्म । किन्तु लिपिकारगणे सेवकगणे वा सर्वे क्रैस्तमतीयाः एव आसन् ।

ग्रीष्मविरामकारणतः अहम् एकघण्टामात्रं विद्यालयं गच्छामि स्म । प्रायः सर्वाणि कार्याणि थामसः एव निर्वहति स्म । सप्ताहे एकवारं बिषप्वर्यः मया दृश्यते स्म कर्तव्यत्वेन । यदा यदा मम गमनं भवति स्म तदा सर्वदा बिषप्वर्यः प्रभोः येसुस्वामिनः माहात्म्यं वर्णयति स्म । प्रभोः सत्यस्य प्रकाशस्य प्रसारः एव जगति सर्वोत्कृष्टं कार्यम् इति सः मां बोधयति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्म । वश्यवाचः तस्य वचनानां परिणामः मयि किञ्चिदिव भवति स्म । 'अङ्गीकृतं कार्यं निर्वञ्चनया मया करणीयम्' इति आत्मानं वदामि स्म अहम् । बिषप्वर्यः वदति स्म - ''देवस्य कार्यं भवादृशैः एव कर्तुं शक्यते । पवित्रग्रन्थाः श्रद्धया पठनीयाः भवता । किञ्चित्कालानन्तरं भवन्तं रोमनगरं प्रेषयिष्यामः । तत्रत्यानि पवित्रस्थलानि दृष्ट्वा भवान् प्रभोः प्रकाशम् आत्मनि आधिक्येन पूरयतु । आत्मना प्राप्तं प्रकाशं सहस्राधिकेभ्यः पापिभ्यः वितरतु'' इति ।

बिषप्वर्येण दत्तानि पुस्तकानि पत्रिकाः च गृहे विरामसमये पठामि स्म । किन्तु गृहे विरामसमयः विरलः आसीत् । गृहे लिल्ली मया सहैव भवति स्म । तस्याः उपस्थितौ जल्पनार्थं चर्चार्थं वा समयः व्ययितः भवति स्म । इदानीं मरियम्मां राचम्मागृहं प्रति प्रतिप्रेष्य लिल्ली स्वयं पाकं करोति स्म । कानिचन दिनानि महत्या श्रद्धया तया कृतः पाकः अपि मह्यं न अरोचत । अनन्तरकाले मम रुचिः परिवृत्ता, उत तस्याः पाककौशलम् अभिवृद्धम् इति न ज्ञायते, भोजनम् अरोचत ।

स्नातकपरीक्षायाम् उत्तीर्णाय काऽपि संस्था त्रिशतरूप्यकात्मकं वेतनं न ददाति । तथापि तावत् वेतनं मया प्राप्यते स्म । सुन्दरं स्वगृहम् आसीत् मम । अपेक्षितानि पीठोपकरणानि अपि गृहे आसन् । व्ययानन्तरम् अपि वेतनधनम् अवशिष्यते स्म । अनुकूला पत्नी गृहे आसीत् । एतदतिरिच्य किं वा आवश्यकं जीवने ? एतं प्रश्नम् एकदा अहं लिल्लीं यदा पृष्टवान् तदा सा - ''द्वित्राणि वर्षाणि अतीतानि भवन्तु, तदा वदिष्यामि'' इति उक्त्वा लज्जया शिरः अवनमितवती ।

''सद्यः मास्तु तत्'' इति मया उक्तम् ।

ग्रीष्मविरामानन्तरं कक्ष्याः आरब्धाः । छात्रावासार्थं नूतनच्छात्राणां स्वीकारस्य अवसरः प्राप्तः । तस्मिन् छात्रावासे प्रवेशः सर्वेभ्यः निश्शुल्कः न आसीत् । विविधग्रामेभ्यः आगताः क्रैस्तबालकाः तत्र वसन्ति स्म । मातापित्रोः आर्थिकानुकूल्यस्य अनुगुणं शुल्कं विधीयते स्म तत्र । षड् विद्यार्थिनः निश्शुल्कं वसन्ति स्म । त्रिरूप्यकदातारः केचन । दशरूप्यकदातारः पुनः केचन । अन्ये सर्वे पञ्चदशरूप्यकदातारः । ये

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निश्शुल्कं प्रवेशम् अपेक्षन्ते तैः स्वग्रामस्य क्रैस्तालयतः - 'एतदीयौ मातापितरौ निर्धनौ । क्रिस्तालयकार्ये तौ श्रद्धया भागं वहतः' इति पत्रम् आनेतव्यम् आसीत् । छात्रस्य पित्रा पोषकेण वा आनीतस्य पत्रस्य आधारेण एव शुल्के न्यूनता निर्णीयते स्म ।

छात्रावासस्य व्यवस्थानिर्वहणार्थं कश्चन व्यवस्थापकः आसीत् । तस्य नाम रोमेलः इति । सः छात्रावासस्य व्यवस्थापकः सन् कस्यचित् लघुक्रिस्तालयस्य बोधकः अपि आसीत् । उन्नतः दृढकायः कृष्णवर्णीयः सः योधः इव दृश्यते स्म । मुखे स्थूलं श्मश्रु विराजते स्म । यद्यपि सः अधिकपञ्चाशद्वर्षीयः, तथापि दन्तराहित्यं गोपयितुं सः कृत्रिमदन्तावलीं धृतवान् आसीत् । छात्रावासस्य पार्श्वे एव तस्य गृहम् । तस्य पत्नी सर्वकारीयचिकित्सालये अनुवैद्या अस्ति । तस्य उभौ पुत्रौ उभे पुत्र्यौ च । बिषप्वर्यस्य साहाय्येन ज्येष्ठपुत्रः रेल्वेविभागे उत्तमम् उद्योगं प्राप्तवान् अस्ति । इदानीं सः बेङ्गलूरुनगरे निवसति । द्वितीयपुत्राय अपि उद्योगः दाप्यते इति आश्वासनं दत्तम् अस्ति बिषप्वर्येण । ज्येष्ठा पुत्री मिषन्विद्यालये अध्यापिका । कनिष्ठा विंशतिवर्षीया । सा चामराजेन्द्रवृत्तिशिक्षणशालायां वेत्रवस्तुनिर्माणकार्यं पठन्ती अस्ति ।

प्रथमवारम् अहं यदा छात्रावासं द्रष्टुं गतः तदा रोमेलः मां स्वगृहम् अपि नीतवान् । तस्य पत्नी ऊनपञ्चाषद्वर्षीया । तस्याः मुखे अपि श्वेता कृत्रिमदन्तावली विराजते । केशानां श्वेतत्वं वर्णेन निवारयितुं तया प्रयत्नः कृतः आसीत् । दम्पती मां भयेन भक्त्या च स्वागतीकृतवन्तौ । रोमेलस्य पत्नी मोहकहासं प्रदर्शितवती । रोमेलस्य सम्भाषणे आंग्लजनानां प्रस्तावः एव आधिक्येन दृश्यते स्म ।

''बेङ्गलूरीयस्य मिषन्चिकित्ससालयस्य वैद्यः डा।। डफ् यदि एतत् नगरम् आगच्छति तर्हि सः मद्गृहम् आगच्छति एव । चिक्कमगलूरीयः काफीवाटिकास्वामी एल्लिस्वर्यः कदाचित् भानुवासरे, यत्र अहं बोधकः अस्मि तं क्रिस्तालयं प्रति आगतः आसीत् । अन्यच्च श्रीमन्, भवता लक्षितं स्यात् यत् भवतः विवाहदिने प्रार्थनासमये अहम् एव पियानोवादकः आसम् । अस्माकं विद्यालयस्य व्यवस्थापकसमितेः सदस्या ह्यारिस्वर्या कदाचित्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मम पियानोवादनकौशलं श्लाघितवती । एतस्मिन् नगरे आष्ट्रेलियादेशीयः विनाङ्गनामकः वैद्यः आसीत् कदाचित् । तस्य पत्नी एव मां पियानोवादनं पाठितवती । महापुरुषाणाम् आशीर्वादेन दैवकृपया च एवम् अस्मि ....." इति उक्त्वा धूमवर्तिकार्थं कोषे हस्तं स्थापितवान् रोमेलः । मम उपस्थितिं स्मृत्वा झटिति कोषात् हस्तं निष्कास्य कृत्रिमहासं प्रदर्शितवान् सः ।

"आ बाल्यात् आंग्लेयानां सहवासः आसीत् मम । वस्तुतः महापुरुषाः ते एव । तेषाम् अनुशासनम् अपि प्रशंसार्हम् एव । तेषां पुरतः वयं कुब्जाः । तेषां सर्वकारः क्व ? कृष्णवर्णीयानाम् अस्माकं सर्वकारः क्व ?"

रोमेलस्य पत्नी चतुरमतिः । पतिः इव आंग्लानाम् एव प्रशंसायां निरता न सा । अल्पसम्भाषणं कुर्वती मन्दहासेन एव अतिथीन् सन्तोषयति सा ।

रोमेलः आसन्दं मत्पार्श्वे आकृष्य रहस्यकथनशैल्या - "श्रीमन् ! भवान् ज्येष्ठः अधिकारी इत्यतः वदामि । षड्भ्यः वर्षेभ्यः विद्यालयव्यवहारः नितरां कलुषितः अस्ति । भवतः शासनावधौ देवः यथा तृप्तः भवेत् तथा व्यवहारः प्रचलेत्" इति उक्तवान् ।

"तन्नाम ?"

"भवतः आगमनात् पूर्वं स्थानापन्नप्राचार्यः आसीत् खलु थामसः, सः सर्वथा असमर्थः । थामसस्य मम च गाढा मैत्री अस्ति एव । किन्तु देवकार्यावसरे मैत्री गौणा भवति । पूर्वं शालारम्भसमये सर्वैः छात्रैः प्राङ्गणे स्थित्वा प्रार्थना क्रियते स्म । प्राचार्यः एव कानिचन बैबल्वाक्यानि बोधयति स्म । प्रार्थनाकाले यः अनुपस्थितः भवति तस्मै उपस्थितिः न दीयते स्म । चतुर्भ्यः वर्षेभ्यः पूर्वं केचन हिन्दुच्छात्राः - 'प्रार्थनागीतम् अन्यत् भवतु । बैबल्पठनम् अनिवार्यं न भवेत् । वयं 'जनगणमन'गीतं वदामः' इति वदन्तः कक्ष्याबहिष्कारं कृतवन्तः । तदा अयं मूर्खः थामसः भीतः सन् - 'क्रिश्चियनेतरजनाः ये न इच्छन्ति तैः प्रार्थनां प्रति आगन्तव्यं नास्ति' इति आज्ञां कृतवान् । एतादृशेन कार्येण किं देवः तुष्टः भवेत् ?"

"अग्रे किं प्रवृत्तम् ?"

"बिषप्पवर्येण एषः विषयः ज्ञातः । 'सकृत् प्रार्थनासमये अनुपस्थितिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अङ्गीकृता चेत् पुनः झटिति उपस्थितेः अनिवार्यताकल्पनं दुश्शकं, तथा कृतं चेत् छात्राः विरोधं कुर्युः' इति मत्वा तेन मौनम् आश्रितम् । किन्तु एतया घटनया थामसस्य असामर्थ्यं तेन ज्ञातम् । वस्तुतः तु थामसः मम आत्मीयः एव । तथापि विषयज्ञापनार्थं मया एतत्सर्वम् उक्तम् । बिषप्वर्यः एतं विषयम् इतः पूर्वम् एव भवन्तम् उक्तवान् स्यात् अपि .....''

''न उक्तं तेन ।''

''तर्हि अग्रे वदिष्यति सः । भवतः अधिकारावधौ वा प्रार्थनापद्धतिः अपरिहार्या भवेत् ।''

छात्रावासस्य आवासभोजनादिविषये मया प्रश्नः कृतः । ''सर्वैः प्रातः पञ्चवादने उत्थातव्यम् । प्रातर्विधेः अनन्तरं बैबल्पठनं प्रवर्तते । ततः अमेरिकीयेन क्षीरचूर्णेन निर्मितं चषकमितं क्षीरं सर्वेभ्यः दीयते । नववादने भोजनम् । सार्धैकवादने अल्पोपहारः । रात्रौ भोजनानन्तरं प्रार्थना प्रवर्तते ।''

''छात्राः अनुशासनं यथा पालयेयुः तथा विशेषावधानं दास्यामि अहम् । अहम् आंग्लेयानां सहवासेन प्रवृद्धः । अतः छात्राणां पिता इव अस्मि । मम पत्नी तेषां माता इव अस्ति ।''

सः एवं यदा कथितवान् तदा तदीया पत्नी मन्दहासेन मां दृष्टवती । ''श्रीमन्, मया परीक्षा कृता अस्ति । अमेरिकीयं क्षीरचूर्णीयं क्षीरं यावत् उत्कृष्टं भवति तावत् धेनुक्षीरम् अपि न भवति । अमेरिकीयैः निर्मितं खलु तत् ?''

ततः प्रस्थानसमये रोमेलपत्नी मार्गपर्यन्तम् आगता आसीत् । रोमेलः मद्गृहपर्यन्तम् आगतः आसीत् ।

रोमेलमेलनं यदा उक्तं तदा लिल्ली उक्तवती - ''तस्य छायामात्रम् अपि मह्यं न रोचते ।''

''किमर्थम् ?''

''यदा अहम् अल्पवयस्का आसं तदा सः क्रिस्तालयस्य बोधकः न आसीत् । कदाचित् अहं बाल्यसहजकुतूहलेन मुरजं स्पृष्टवती । सः झटिति आगत्य मम हस्तस्य उपरि बलात् ताडितवान् । तदा समीपस्थः कोऽपि उक्तवान् यत् एषा तम्मय्यवर्यस्य पुत्री इति । झटिति रोमेलः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माम् उन्नीय कृत्रिमप्रीतिं प्रदर्शयन् मम सान्त्वनं कृतवान् । सर्वोऽपि कपटव्यवहारः'' इति ।

''भवतीं सः ताडितवान् इत्यतः किं भवती एवं वदति ?''

''न हि । कपटता एव तस्य स्वभावः । पूर्वं सः हिन्दुः आसीत् । तस्य नाम रामय्यः इति । कथञ्चित् सः कस्यचित् युरोपीयस्य सेवकः जातः । ततः क्रिस्तमतावलम्बी जातः । क्रिस्तालये यत्किञ्चित् कार्यं कुर्वन् जीवति स्म सः । भवता अद्य दृष्टा अनुवैद्या तेन परिणीता । सा अपि पूर्वं हिन्दुः एव आसीत् । विवाहिता सा पतिमरणतः विधवा जाता । तस्याः ग्रामे तया चारित्र्यहीनतानिन्दा प्राप्ता । ततः तुमकूरुनगरं गत्वा सा अनुवैद्यावृत्तिम् अवलम्बितवती । कथञ्चित् तया मैसूरुं प्रति आगतम् । अत्र क्रिस्तमतम् अवलम्ब्य रोमेलं परिणीतवती सा । तौ दम्पती बुद्धिमन्तौ । बिषप्वर्यस्य प्रीतिः ताभ्यां सम्पादिता अस्ति । तयोः पुत्राः सर्वे उत्तमस्थितिं प्राप्तवन्तः सन्ति । अचिरात् एव अधिकारिणः प्रीतेः सम्पादने तौ चतुरौ ।''

अहं मौनेन आसम् ।

''पुनः भवता तयोः गृहं प्रति न गन्तव्यम्'' इति उक्तवती लिल्ली ।

''किमर्थम् ?''

''कारणं न प्रष्टव्यम् । एतद्विषये भवता मम वचनं पालनीयम् एव ।''

अहं प्रश्नार्थकदृष्ट्या लिल्ल्याः मुखं दृष्टवान् । मां निर्निमेषदृष्ट्या सकृत् दृष्ट्वा लज्जया शिरः अवनमय्य सा उक्तवती - ''पुरुषाणां विवेकः सर्वत्र न प्रसरति । केषुचित् विषयेषु तैः पत्नीवचनं विना विरोधं पालनीयम् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकस्मिन् दिने रात्रौ नववादने अहं गृहं प्राप्तवान् । तस्मिन् दिने शालायां काचित् अप्रिया घटना प्रवृत्ता । 'शालारम्भसमये सर्वे छात्राः बैबल्प्रार्थनां अपरिहार्यतया पठेयुः इति नियमः करणीयः' इति बिषप्वर्यः मां सूचितवान् । 'प्रार्थनातः पूर्वं यः छात्रः शालाप्राङ्गणे उपस्थितः न भवति तस्मै कक्ष्यायां प्रवेशः न दातव्यः, उपस्थितिः अपि अनुपस्थितित्वेन परिगणनीया' इति आदिष्टवान् आसीत् सः । एतदनुगुणम् एव अहं सर्वकक्ष्याः प्रति प्रकटनपत्रं प्रेषितवान् आसम् । तस्मिन् दिने बहवः छात्राः प्रार्थनासमये अनुपस्थिताः आसन् । द्वितीयघण्टावादनसमये अहं कार्यालये उपविष्टः आसम् । मुख्यद्वारसमीपे प्रचलन् कोलाहलः कश्चन मया श्रुतः । तावता सेवकः अपि आगत्य कोलाहलवार्तां निवेदितवान् । प्रार्थनासमये अनुपस्थितानां छात्राणां महान् गणः अन्तःप्रवेशार्थं प्रयत्नं करोति स्म । त्रयः सेवकाः तेषां प्रवेशस्य निवारणे उद्युक्ताः आसन् । अहं मुख्यद्वारसमीपं गतवान् । मां दृष्ट्वा छात्राः कोलाहलं स्थगितवन्तः । तेषां समीपं गत्वा अहं शान्तस्वरेण पृष्टवान् - ''किमर्थं कोलाहलः भवताम् ?'' इति ।

''वयं कक्ष्यां गन्तुम् इच्छामः । एते अस्मान् निवारयन्तः सन्ति'' इति कश्चित् विद्यार्थी उक्तवान् ।

''भवद्भिः शालायाः नियमः न पालितः । अतः प्रवेशः निराकृतः'' इति मया उक्तम् ।

''अन्यत्र कुत्रापि अविद्यमानः विलक्षणः नियमः भवताम् । बैबल्पठनं वयं न इच्छामः । वयं विद्याभ्यासार्थं विद्यालयम् आगच्छन्तः स्मः, न तु भवतां मतम् अङ्गीकर्तुम्'' इति पृष्ठतः स्थितः कश्चन छात्रः उच्चस्वरेण उक्तवान् ।

''यथाकथञ्चित् अपि विद्यालयस्य नियमः सर्वैः पालनीयः एव ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतत् श्रुतवतां छात्राणां कोलाहलः प्रवृद्धः ।

''बैबल् पठनीयम् इति किं सर्वकारीयनियमः अस्ति ?'' इति कश्चित् पृष्टवान् ।

अपरः कश्चित् - ''वयं विद्याभ्यासार्थं शुल्कं दत्तवन्तः, न तु मतप्रचारं श्रोतुम्'' इति उच्चस्वरेण उक्तवान् ।

''त्वं मुख्याध्यापकः, उत मतप्रचारकः ?'' इति अन्यः उपहासपूर्वकं पृष्टवान् ।

अत्रान्तरे केनचित् उद्धतबालकेन क्षिप्तः शिलाखण्डः सेवकस्य कस्यचित् स्कन्धे व्रणम् अकरोत् । 'परिस्थितिः विषमतां गच्छेत्' इति अवगच्छन् अहं सेवकान् सूचितवान् - 'मार्गात् अपसरन्तु' इति । सर्वे छात्राः विना शब्दं गत्वा कक्ष्यायाम् उपविष्टवन्तः । सर्वेषाम् उपस्थितिः अनुमन्तव्या इति मया सूचना प्रेषिता ।

तच्च वेतनवितरणदिनम् । कार्यालयकार्यम् अपि आधिक्येन आसीत् । अतः सार्धसप्तवादनपर्यन्तं मया कार्यालये एव स्थितम् । ततः प्रस्थानसमये कश्चन सेवकः आगत्य - ''बिषप्वर्यः भवन्तम् आह्वयति'' इति सूचितवान् । अहं द्विचक्रिकाम् आरुह्य बिषप्वर्यस्य वसतिं गतः । शालायां यद्यत् प्रवृत्तं तत्सर्वम् एतावता एव तेन ज्ञातम् आसीत् ।

''कक्ष्यां गन्तुं छात्रेभ्यः अनुमतिः न दातव्या आसीत्'' इति उक्तवान् बिषप्वर्यः ।

''तथा चेत् परिस्थितिः विषमा अभविष्यत् । मया निर्णयपरिवर्तनं यदि न क्रियेत तर्हि वातायनानां कवाटाः भग्नाः अभविष्यन् ।''

''तथापि अद्यतननिर्णयतः तेषां धैर्यं प्रवृद्धम् अस्ति । अग्रे अपि ते एवम् एव करिष्यन्ति । भवता आरक्षकाः निमन्त्रणीयाः आसन् ।''

''आरक्षकान् आनाय्य भयम् उत्पाद्य बैबल्पठने ते किमर्थं नियोजनीयाः ? केनचित् बालकेन उक्तं - 'वयं पाठश्रवणार्थं शुल्कं दद्मः, न तु बैबल्श्रवणार्थम्' इति ।''

''तत् तु तस्य औद्धत्यं द्योतयति । बलात्कारं भयं च विना क्वचित् अनागरिकाः नागरिकाः न भवन्ति । असंस्कृताः संस्कृताश्च न भवन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदास्तां तावत् । प्रतिरोधभावः छात्रेषु इदानीं सुदृढः अस्ति । अतः सद्यः वयं मौनम् अवलम्बाम । द्वित्राणां मासानाम् अनन्तरं पुनरपि नियमं व्यवहारे आनेतुं प्रयत्नं करवाम । तत्समये यथायोग्यं मार्गान् अवलम्ब्य छात्राः निग्रहणीयाः ।''

बिषप्गृहतः प्रत्यागमनसमये तदीयानि वचनानि एव मनसि गुञ्जन्ति स्म । 'बलात्कारं भयं च विना क्वचित् अनागरिकाः नागरिकाः न भवन्ति, असंस्कृताश्च संस्कृताः न भवन्ति' इति हि तस्य वचनम् ! अत्र तस्य मनसि स्थिताः नागरिकाः के, अनागरिकाः च के ? संस्कृत्यसंस्कृत्योः मानदण्डः कः ?'

गृहप्राप्तिसमये नववादनम् अतीतम् आसीत् । शयनप्रकोष्ठे एका पेटिका मया दृष्टा । 'एषा कुतः आगता ?' इति मया लिल्ली पृष्टा । ''मातृगृहतः एषा आगता । विवाहसमये प्राप्तानि उपायनानि अत्र सन्ति । एतस्य आनयनं मया विस्मृतम् आसीत् । मात्रा अद्य प्रेषितम् ।''

अहं नितरां श्रान्तः आसम् । मनः अपि क्लान्तम् आसीत् । किञ्चित् भुक्त्वा मया शयनं कृतम् । लिल्ली किमपि कार्यं कुर्वती आसीत् । 'शब्दं मा करोतु । शब्दतः मम निद्राभङ्गः भवति' इति उक्त्वा निद्राप्राप्त्यर्थं प्रयत्नः कृतः । अल्पे एव काले तन्द्रा प्राप्ता ।

तन्द्रासमये अपि मनसि विचारकोलाहलः प्रवर्तते स्म । संस्कृत्यसंस्कृतिविचारः मनः बाधते स्म । मध्ये द्वित्रवारं जागरणं जातम् । पुनः बलात् निद्रा प्राप्ता । कदाचित् पार्श्वे लिल्ल्या क्रियमाणः दीर्घश्वासोच्छ्वासः श्रुतः । पुनरपि जागरणं जातम् । ततः निद्रा न प्राप्ता । दीपं प्रज्वाल्य घटी दृष्टा । तदा द्वादशवादनसमयः आसीत् । लिल्ली तु गभीरनिद्रायां मग्ना आसीत् । समययापनार्थम् अहम् एकं पुस्तकं गृहीत्वा उपधानम् आलम्ब्य मञ्चे उपविश्य पठितुम् उद्युक्तः । पञ्चनिमेषाभ्यन्तरे एव उत्साहः क्षीणः जातः । बिषप्वर्यस्य वचनस्य प्रभावः न अपगतः आसीत् । खेदेन मया यदा शिरः उन्नीतं तदा भित्तौ स्वामिविवेकानन्दस्य चित्रं दृष्टम् । गम्भीरमुखमुद्रया काषायवस्त्रं धृत्वा काषायवर्णीयम् उष्णीषं च धृत्वा हस्तौ बद्ध्वा स्थितः अस्ति विवेकानन्दः । दृढचित्तताम् आन्तरङ्गिकं तेजः च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूचयतः स्म तदीये नेत्रे । तपोबलं, धैर्यवत्त्वं, धीमत्त्वं च वीरसंन्यासिनः तस्य स्थितिरीतिः एव अभिव्यञ्जयति स्म । 'निर्वीर्यता मास्तु । भवान् दुर्बलः न, अपि तु सबलः । वीरचैतन्यं भवति अस्ति । भगवदंशः अस्ति भवति । आत्मतत्त्वम् अवगत्य उत्तिष्ठ' इत्येतं सन्देशं ददाति स्म सः पटः ।

जीवद्रूपेण स्थितं तं पटम् एव निर्निमेषदृष्ट्या पश्यन् अहं शयितवान् आसम् । शरीरे स्वेदः उत्पन्नः । एतादृशम् एव एकं चित्रम् अहं रामणणस्य प्रकोष्ठे दृष्टवान् आसम् । अपरं स्वामिमहोदयस्य गृहे दृष्टम् आसीत् । अप्रयत्नेन एव तस्मै चित्राय मया नमस्कारः अर्पितः भक्त्या । विवेकानन्दविषयकाः भक्तिगौरवादयः मयि उत्पन्नाः । अल्पे एव वयसि झञ्झावातः इव देशे सर्वत्र सञ्चारं कृत्वा तेन यत् साधितं तत् तु अपूर्वम् । तस्य जीवने सर्वे मार्गाः समवेताः आसन् । ज्ञानं, योगः, कर्ममार्गः, जनसेवा, विश्वप्रेम इत्यादयः सर्वे गुणाः तस्मिन् मूर्तरूपतां गताः आसन् । तदीयं जीवनचरित्रं चित्रपटरूपेण मम स्मृतिपटले आगतम् । क्रैस्तमतप्रचारकाः हिन्दुधर्मं निन्दन्तः 'अन्धश्रद्धानाम् अनागरिकाचाराणां च आकरः अस्ति हिन्दुधर्मः' इति यदा वदन्तः आसन् तदा हिन्दुधर्मस्य वास्तविकं विवरणं जगतः पुरतः उपस्थापितवान् आसीत् विवेकानन्दः । देश-धर्म-संस्कृति-परम्पराणां विषये नवोत्साहः जनितः तेन । म्लानमुखस्य धर्मस्य पुनरुत्थानं कृतं तेन । पाश्चात्यदेशेषु अपि शिष्यगणं सम्पादितवतः तस्य शक्तिः अत्यपूर्वा । भक्त्या नमस्कारसमये एव द्वन्द्वभावना अपि उत्पन्ना मम मनसि ।

महात्मना बोधितं तत्त्वम् अनवगत्य अननुसृत्य च तस्य पूजनं जले कृतः होमः इव व्यर्थम् । स्वामिविवेकानन्दस्य जीवनम् एव तत्त्वस्य प्रतिरूपम् इव आसीत् । अहं पटं तु नमस्कृतवान् आसम् । किन्तु यस्मिन् धर्मे तेन नवचैतन्यम् उत्पादितं तं परित्यज्य अन्यमतम् अवलम्बितवान् आसम् । तेन उन्नीतायाः संस्कृतेः नाशनार्थम् उद्युक्तानां मतप्रचारकाणाम् अधीनः जातः अस्मि । दिने दिने विधेयता वर्धते । विवेकानन्दस्य तत्त्वानि क्व ? मया अनुसृतः मार्गः क्व ? बहोः कालतः मयि दृढतया स्थितानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रद्धाविश्वासानाम्, असहायकतया स्थितस्य मम परिस्थितेः च मध्ये सङ्घर्षः आरब्धः । दीपं निर्वाप्य आच्छाद्य अहं सुप्तः । अन्धकारे निमीलितयोः अपि मम नेत्रयोः पुरतः काषायवर्णा विवेकानन्दस्य मूर्तिः आगत्यं तिष्ठति स्म । तेजःपूर्णाभ्यां तदीयनेत्राभ्यां निस्सृतः प्रकाशः मां दहति स्म इव । 'भयात् बलात्काराच्च ऋते अनागरिकाः नागरिकाः न भवन्ति, असंस्कृताश्च संस्कृताः न भवन्ति' इत्येतत् बिषप्वचनं मां तुदति स्म । विवेकानन्दः यां संस्कृतिं परमोच्चां मन्यते स्म ताम् एव असंस्कृतिं मन्यमानः बिषप्वर्यः तस्याः धूलिसात्करणे उद्युक्तः अस्ति । आरात्रि मया निद्रा न प्राप्ता । पुनः पुनः पार्श्वपरिवर्तनं कुर्वन् अहं कालं यापितवान् । प्रातः काकरवश्रवणसमये अल्पा तन्द्रा मया प्राप्ता ।

सप्तवादनसमये लिल्ली काफीं सज्जीकृत्य माम् उत्थापयितुम् आगता । मम शिरसः पार्श्वे उपविश्य सा मम आच्छादकं मन्दम् अपसारितवती । मया नेत्रे उद्घाटिते । पुरतः तस्याः मुखं दृष्टम् । सुखनिद्राकारणतः तस्याः मुखे विशेषोत्साहः दृश्यते स्म । मुखं प्रक्षाल्य आगतवती आसीत् सा । किन्तु ललाटे रिक्तता । मम मनः किमपि चिन्तयत् आसीत् । अजानतः एव मम मुखात् निर्गतम् - ''प्रातः उत्थाय कुङ्कुमधारणे अपि किम् औदासीन्यं भवत्याः ?''

निद्रायाः अभावतः नेत्रे ज्वलतः स्म । मनसि प्रवर्तमानं पीडाजनकं विचारतुमुलं मुखे प्रतिफलितम् आसीत् । मां दृष्ट्वा लिल्ली भीता । मम ललाटे हस्तं स्थापयन्ती सा - ''भवान् स्वस्थः नास्ति इति भाति ! किं जातम् ?'' इति पृष्टवती ।

मया यत् उक्तं तस्य अनुचिततां तदा अवगच्छन् अहं मौनम् आश्रितवान् ।

लिल्ल्या महान् अनुरोधः कृतः । तथापि अहं किमपि अवदन् मौनेन आसम् । मनसि प्रचलन् विचारसङ्ग्रामः तु अनुवर्तमानः एव आसीत् । केनचित् सहापि सम्भाषणं न इच्छति स्म मनः । विद्यालये अपि मौनम् एव अवलम्बितम् आसीत् मया । गृहम् आगत्य मौनेन शयनं करोमि स्म । मौनावरणं धरता लिल्ली अपि दूरीकृता आसीत् मया । विवेकानन्दचित्रं पौनःपुन्येन अहं पश्यामि स्म । कदाचित् लिल्ली मूका इव मम पार्श्वे उपविष्टा आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''एतत् चित्रं कुत्र आसीत् ?'' इति सा मया पृष्टा ।

''विवाहोपायनपेटिकायाम् आसीत् एतत् । दिनत्रयात् पूर्वं सा पेटिका मात्रा अत्र प्रेषिता खलु ? एतत् चित्रं भवतः प्रियम् इति अहं जानामि स्म । कदाचित् एतस्य चित्रस्य विशेषतां वर्णयित्वा भवान् एव 'एतत् मम प्रियतमम्' इति उक्तवान् आसीत् । अतः एव एतत् भित्तौ स्थापितं मया ।''

गते दिनत्रये तया सह मया कृतं प्रथमसम्भाषणम् एतत् एव । एतस्मात् किञ्चित् धैर्यं प्राप्य सा अनुनयपूर्वकं पृष्टवती - ''किमर्थम् एवम् ? दिनत्रयतः गृहं श्मशानायते । कवलमात्रम् अपि न रोचते मह्यम् । भवतः मुखस्य गाम्भीर्यं सम्भाषणोत्साहं निवारयति । किमर्थं माम् अपि न वदति भवान् ?''

अन्तरङ्गसङ्घर्षं निवेदयितुम् अर्हा व्यक्तिः वस्तुतः लिल्ली एव । तथापि 'मम वेदनां निवेद्य सा किमर्थं खेदनीया ?' इति विचिन्त्य मया कथनसाहसं न कृतम् । लिल्ली पुनः पुनः अनुरोधं कृतवती । अनुनयेन प्रार्थितवती । एतेन मम निग्रहबन्धः छिन्नः । शालायां यद्यत् प्रवृत्तं, विवेकानन्दचित्रस्य दर्शनात् यत् चिन्तनं प्रवृत्तम् इत्यादिकं सर्वं विस्तरेण ताम् अहं निवेदितवान् ।

''विवेकानन्देन प्रतिपादिता संस्कृतिः दूरे तिष्ठतु नाम, अस्मिन् गृहे मत्संस्कृत्यननुगुणम् एव वातावरणं विजृम्भते । भित्तिषु वध्यचिह्नं गतस्य क्रिस्तस्य चित्रम् । कण्टकमयम् उष्णीषं धृत्वा रक्तं स्रावयन्तं, स्कन्धेन वध्यचिह्नं वहन्तं बलात् नुदतां पीडयतां जनानां चित्रम् ! एतेषु चित्रेषु दृश्यते क्रौर्यम् अनागरिकता च । एतत्सर्वं सोढवान् क्रिस्तः महात्मा इत्यत्र नास्ति सन्देहः । तथापि एतेषां चित्राणां दर्शनात् मनसि उत्पद्यते जुगुप्सा, न तु शान्तिः । अनागरिकः जनसमूहः इतिहासस्य कस्मिंश्चित् कालखण्डे कीदृशस्थितौ आसीत् इति निरूपयन्ति एतानि चित्राणि । प्रतिदिनं प्रातः एतादृशानि चित्राणि किमर्थं द्रष्टव्यानि ? पाश्चात्यपरम्परासंस्कारं प्राप्तवतां कृते एतानि चित्राणि रोचेरन् कदाचित्, न तु भारतीयस्य मम कृते । मम संस्कारः, चिन्तनं, मनोधर्मः च न एतदनुगुणः । प्रपञ्चं दुःखमयं ज्ञात्वा जुगुप्सया विरक्तिं प्राप्तवतः अस्मद्देशजस्य बुद्धस्य मुखे दृश्यते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परमशान्तिः, न तु वेदना । कैलासस्य अनन्तशान्तिं प्रदर्शयन् स्थितः शिवः, अपारवात्सल्यमय्यः लक्ष्मीसरस्वत्यादयः, चिरशान्तिरूपे समाधिस्थितौ लीनः गोमटेश्वरः इत्यादीनां मूर्तयः अस्मभ्यं रोचन्ते ।....."

मम कथनस्य परिणामः लिल्ल्यां कीदृशः भवेत् इत्यपि अचिन्तयन् अहं भावावेशवशात् मनसः अशान्तिं वचनैः प्रकाशयन् आसम् । लिल्ल्याः नेत्रे अश्रुपूर्णे जाते ।

"भवतः व्यथाम् अहम् अवगच्छामि । मत्कारणतः भवता एतादृशी मनोव्यथा प्राप्यमाणा अस्ति ।"

"मम व्यथायाः भवत्याः च कः सम्बन्धः लिल्लि ?"

"मां परिणेतुम् एव खलु भवता स्वकीयः धर्मः परित्यक्तव्यः अभवत् ?"

अहं प्रतिवचनं न उक्तवान् । लिल्ली सगद्गदं रुदितवती ।

"लिल्लि ! अलं रोदनेन । भवत्याः पुरतः सर्वम् उक्तम् इत्यतः मम मनः शान्तं जातम् । भवत्या रोदनं न करणीयम् । भवत्याः नेत्रतः बिन्दुमात्रम् अश्रु पतितं चेदपि अहं पापी भविष्यामि । अहं कदाचित् अविचिन्त्य किमपि किमपि वदामि । ततः खेदः न प्राप्तव्यः भवत्या" इति मया सान्त्वनं कृतम् ।

लिल्ल्याः सान्त्वनं यावत् जातं तावता मम मनसः क्लेशः अपि अपगतः आसीत् ।

अनन्तरदिने शालातः प्रत्यागमनाभ्यन्तरे गृहे एकं परिवर्तनं जातम् आसीत् । भित्तिस्थानि क्रिस्तमतीयचित्राणि न दृश्यन्ते स्म । तेषां स्थाने हिन्दुदेवदेवतानां चित्राणि दृश्यन्ते स्म । ताण्डवनृत्यकारी शिवः, गीताम् उपदिशन् कृष्णः, पट्टाभिषेकं प्राप्नुवन् रामः, ध्याने निमग्नः बुद्धः इत्यादीनां चित्राणि भित्तौ दृश्यन्ते स्म । परिवर्तनस्य कारणं प्रष्टव्यम् एव न आसीत् । एतेषां दर्शनतः मनसः काचित् सन्तृप्तिः जाता । 'एतत् गृहं मदीयम्' इति भावः उत्पन्नः । अत्रत्यः परिसरः मत्संस्काराननुगुणः न इति भावः प्राप्तः । मन्मुखदर्शनात् एव मदीयम् अन्तरङ्गभावम् ऊहितवती लिल्ली ।

"भवता ह्यः यत् उक्तं तद्विषये मया चिन्तनं कृतम् । भवतः वचनं मयि अशान्तिं जनितवत् आसीत् । आरात्रि मया चिन्तनं कृतम् । भवतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वचनस्य सत्यता मया अवगता । एतेषां दर्शनतः 'एतानि अस्माकं संस्कारस्य परम्परायाश्च अनुगुणानि सन्ति' इति भावः मयि अपि उत्पन्नः । पूर्वं यानि आसन् तानि सुन्दराणि स्युः चेदपि अस्मदनुगुणानि तु सर्वथा न ।''

आ विवाहात् अहं लिल्ल्याः आचारव्यवहारादीन् परिशीलयन् आसम् । हिन्दुमहिलायाः श्रेष्ठगुणाः एव तस्यां दृश्यन्ते स्म । 'तस्याः निमित्तं मया विधर्मः आश्रितः यत् तत् अनुचितं कार्यम्' इति विचारः तदा तदा मनसि भवति स्म । किन्तु तस्याः मुखस्य दर्शनस्य समनन्तरम् एव सः विलुप्तः भवति स्म । चिन्तां प्राप्नुवन् अहं स्वयं कष्टम् अनुभवन् ताम् अपि व्यथयामि स्म । पत्युः सन्तोषार्थं यत्किमपि कर्तुं सिद्धायाः तस्याः सुखार्थम् अहमपि यत्किमपि कर्तुं सिद्धः आसम् । तां प्राप्तुम् अहं क्रैस्तमतीयः जातः आसम् । किन्तु तत् कस्याश्चित् निकृष्टगुणायाः क्षुद्रायाः निमित्तं तु न आसीत् ।

अपरस्मिन् दिने विद्यालयतः मम प्रत्यागमनसमये तस्याः ललाटे तिलकं राजते स्म । तां प्रकोष्ठे उपवेश्य तस्याः मुखम् अहं निर्निमेषं दृष्टवान् । मुखे अपूर्वा शोभा दृश्यते स्म । अद्यावधि आकर्षणकारणतः अनुरागकारणतः च मम दृष्टिः ताम् उपसर्पति स्म । अद्य तु आकर्षणम् अनुरागं च अतिक्रम्य स्थितः कश्चन उन्नतः भावः तस्याः दर्शनात् उत्पन्नः आसीत् मयि ।

''लिल्लि ! पत्न्याम् अनुरागप्रदर्शनं पत्युः धर्मः । पत्न्या पतिः आकृष्टः भवति यत् सः प्रकृतिधर्मः । सौजन्येन व्यवहृत्य पतिः तां सुखिनीं करोति यत् सः मानवधर्मः । एतस्मात् अपि श्रेष्ठतरः कश्चन धर्मः अस्ति । पत्नीविषये कश्चन भक्तिभावोऽपि पतौ स्यात् । गृहे दैवत्वकान्त्याः कल्पयित्री देवता भवति गृहिणी । अतः एव स्यात् प्राचीनाः तां 'गृहलक्ष्मी'पदेन निर्दिष्टवन्तः ।''

सा अर्धनिमीलितनेत्रा – ''क्वचित् भवतः वचनस्य आशयः एव मया न अवगम्यते । अनुभावी इव क्वचित् वदति भवान्'' इति उक्तवती ।

''अहं कश्चित् अनुभावी न । हिन्दुकुटुम्बविषये केनचित् उक्तं तत् वचनं मया भवत्याः मुखस्य दर्शनात् स्मृतम् । पत्न्यां गृहलक्ष्मीभावः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदा भवति तदा सा अविरततया द्रष्टव्या इति इच्छा भवति । तत्काले हस्तेन स्पर्शनात् अपि भीतं भवति मनः । देवस्थाने एतादृशी अवस्था भवति । देवदर्शनाकाङ्क्षया वयं निर्निमेषं देवविग्रहं पश्यामः । किन्तु तं हस्तेन न स्पृशामः । उत्कृष्टशैल्या विकसितं दाम्पत्यजीवनम् अपि गच्छता कालेन तां दशां प्राप्नोति । मनः यथा पक्वं भवति तथा शारीरकम् आकर्षणं स्थगितं भवेत् । पत्नी च देवतास्वरूपिणी इव भासेत । परमहंसस्य कथा एतदवसरे स्मृतिपथम् आयाति । वार्धके या अवस्था सिद्धा भवेत् तां परमहंसः विवाहकाले एव प्राप्तवान् आसीत् ।''

लिल्ल्याः मनः भावसमाधौ लीनम् इव भासते स्म । अहम् अपि मौनेन स्थितवान् । आवाम् उभौ अपि मौनेन उपविष्टवन्तौ । तावता द्वारताडनशब्दः श्रुतः । अहं गत्वा द्वारम् उद्घाटितवान् । आगता तु राचम्मा । सा पुत्रीम् उन्नीय आगतवती आसीत् । शान्ता इति पुत्र्याः नाम । मातुः वर्णं, मुखलक्षणं, सौम्यभावं, पितुः औन्नत्यं च प्राप्तवती आसीत् सा । वात्सल्येन ताम् अहम् उन्नीतवान् ।

''बालाः भवतः नितरां प्रियाः । अचिरात् एव भवान् अपि अपत्यं प्राप्नुयात्'' इति वदन्ती अन्तः आगतवती सा ।

आवां गृहस्य पुरतः अङ्गणे आसन्दे उपविष्टवन्तौ । बालिका शान्ता मृदुलेन हस्तेन मम मुखं स्पृशति स्म । तस्याः सुन्दरे नीले नेत्रे पश्यन् अहम् उपविष्टवान् ।

''लिल्ली न दृश्यते खलु ? कुत्र सा ?'' इति पृष्टवती राचम्मा ।

तावता लिल्ली एव तत्र उपस्थिता । तस्याः मुखं दृष्ट्वा उक्तवती राचम्मा - ''सत्य ! चतुरः भवान् । अस्माकं बालिकां हिन्दुधर्मीयां कुर्वन् अस्ति । एतत् यदि बिषप्वर्येण ज्ञायेत तर्हि प्रलयकोलाहलः भवेत् । किमिदं, गृहे सर्वत्र एतादृशानि चित्राणि ?'' इति ।

लिल्ली उत्थाय अन्तः गत्वा कुङ्कुमपात्रं गृहीत्वा बहिः आगत्य - ''भवत्याः ललाटे अपि कुङ्कुमं धारयामि'' इति उक्त्वा राचम्मायाः ललाटे कुङ्कुमं निक्षिप्य - ''इदानीं भवती दर्पणे स्वमुखं पश्यतु । तत्र विलक्षणा कान्तिः दृश्यते । यदि कुङ्कुमधारिणीं भवतीम् अग्रजः पश्येत् तर्हि निश्चयेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नितरां सन्तुष्टः भवेत्'' इति उक्त्वा मम अङ्के उपविष्टायाः शान्तायाः ललाटे, मम ललाटे च कुङ्कुमं निक्षिप्तवती ।

राचम्मा उत्थाय अन्तः गत्वा स्वमुखं दृष्ट्वा प्रत्यागत्य - ''अग्रजः यदि पश्येत् तर्हि सन्तुष्टः भवेत् इति भवत्या उक्तं खलु ? ततः अहम् एकं प्रसङ्गं स्मृतवती । कदाचित् अहम् आर्यपुत्रं पृष्टवती आसं - 'यदि मया तिलकं ध्रियेत तर्हि कथं दृश्येत ?' इति । तदा सः - 'भवती यदि कुङ्कुमं न धरेत् तर्हि न कापि चिन्ता । भवत्याः ललाटे इदानीं यत् वध्यचिह्नं दृश्यते तत् यदि भवती अपनेतुं शक्नुयात् तर्हि अहम् उपकृतः भवेयम्' इति उक्तवान् आसीत् ।''

''सत्यम् । मतधर्मविषये सः सर्वदा उपेक्षावान् एव ।''

''गृहे कस्यापि देवस्य चित्रं न भवेत् इति तस्य आज्ञा । मया भानुवासरे अपि क्रिस्तालयं प्रति न गन्तव्यम् । 'किं क्रिस्तालयं प्रति गमनेन ? चलनचित्रं वा दृष्ट्वा आगच्छतु । ततः पुण्यं लभ्येत' इति वदति सः । मतसम्बद्धाः विचाराः प्रस्तुताः चेत्, धर्माधिकारिणां नाम गृहीतं चेत् च सः नितरां क्रुध्यति । भवत्या एव दृष्टं खलु - प्रकोष्ठे श्मश्रुधारिणः मार्क्सस्य चित्रम् अस्ति । कस्माचित् पुस्तकात् छित्त्वा आवरणं योजयित्वा तत्र स्थापितं तत् । बहिः स्वागतप्रकोष्ठे जोगजलपातस्य, नदीतीरे स्थितस्य उपाहारमन्दिरस्य च चित्रम् अस्ति । एतावता अलम् इति वदति सः ।''

मतविषये देवप्रसादस्य का धारणा इति अहं जानामि स्म । तस्य स्वभावः उत्तमः एव । उत्तमत्वं प्राप्तुम् उत्तमः स्वभावः, उत्तमाः आचारविचारादयः च सन्ति चेत् पर्याप्तम् । गभीरदृष्टियुक्तः वेदान्तिमनोभावः आवश्यकः एव इति नास्ति । देवप्रसादः जीवनविषये न चिन्तयति इति न । वस्तुस्थितिम् अवगत्य यावदस्ति तावता सन्तोष्टव्यम् इति तस्य विचारः । भावुकादर्शानाम् अनुसरणतः जीवने सम्भ्रान्तिं प्राप्तुं न इच्छति स्म सः ।

राचम्मा पुनः उक्तवती - ''पितापुत्रयोः सम्बन्धः कदापि मधुरः न आसीत् । क्रिस्तालयार्थं विषपृनिमित्तं च सर्वस्वम् अर्पयितुम् अपि सिद्धः भवति पिता । पुत्रः तु क्रिस्तालयादीनां नामश्रवणात् एव कुध्यति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अध्ययनकाले एव पितापुत्रयोः मतभेदः आरब्धः । आर्यपुत्रः यदा स्नातकोत्तरपदवीधरः जातः तदा बिषप्पवर्यः उक्तवान् आसीत् - 'सः अस्माकं विद्यालये उद्योगी भवतु' इति । किन्तु आर्यपुत्रः तत् निराकृत्य - 'अहं यथारुचि तिष्ठामि । मह्यं स्वातन्त्र्यम् आवश्यकम्' इति उक्त्वा सर्वकारीयोद्योगार्थं प्रयत्नं कृतवान् । इच्छानुसारं तेन उद्योगः प्राप्तः । विवाहानन्तरं पृथक् गृहे वासः आरब्धः ।''

राचम्मा प्रतिगमनसमये - ''श्वः शान्तायाः जन्मदिनम् । मध्याह्ने भवन्तौ उभौ अपि भोजनार्थम् आगच्छताम्'' इति उक्त्वा माम् उद्दिश्य - ''विद्यालयं गत्वा द्वादशवादनसमये भवान् साक्षात् अस्मद्गृहम् एव आगच्छतु । ततः पूर्वं लिल्ली तत्र प्राप्स्यति । भवता यत् न खाद्यते तादृशं किमपि न सज्जीक्रियते । निश्चिन्तः भवतु भवान्'' इति उक्तवती ।

अनन्तरदिने भोजनसमये देवप्रसादस्य अनुजः एकः एव उपस्थितः आसीत् । मातापित्रादयः उपस्थिताः न आसन् । प्रायः ते न निमन्त्रिताः आसन् ।

पुनः सप्ताहः अतीतः । सायं पञ्चवादने यदा अहं गृहम् आगतः तदा लिल्ल्याः मुखं मुकुलितम् आसीत् । मम आगमनात् किञ्चित् पूर्वम् अश्रु मार्जितम् इव दृश्यते स्म । मां दृष्ट्वा मन्दहासं प्रकटयितुं सा प्रयत्नं कृतवती । तावता कोऽपि गृहम् आगतः । अहं परिवृत्य दृष्टवान् । आगतः आसीत् मम प्राचीनस्नेहितः तिरुनारायण-अय्यङ्गार्यः । अहं तं स्वागतीकृत्य उपवेशितवान् । लिल्ली अन्तः गतवती । यदा अहम् अनाथालये वसन् पठन् आसं तदा तिरुनारायणः मम सहपाठी आसीत् । वयं तं 'नाणिः' इति निर्दिशामः स्म । सः आ बाल्यात् सम्प्रदायशीलः । प्रातः सन्ध्यावन्दनं कृत्वैव आहारसेवनम् । परीक्षादिने अपि अष्टोत्तरशतवारं गायत्रीं जपति स्म । शिरसि अङ्गुष्ठमात्रशिखा इदानीम् अपि दृश्यते । ललाटे रक्तनाम अपि यथापूर्वम् अद्यापि दृश्यते । वेष्टी धृता आसीत् तेन । मम अनाथालयपरित्यागानन्तरम् अपि सः तत्रैव वसति स्म । स्वभावतः भीरुः सः ।

इदानीं स्नातकपरीक्षायां सः उत्तीर्णः अस्ति । कुत्रापि उद्योगः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न प्राप्तः आसीत् । प्राप्त्याशा अपि न आसीत् । सः मां प्रशंसन् उक्तवान् - ''सुपरिचितः भवान् उन्नते पदे अस्ति । भवान् मुख्याध्यापकः अस्ति यत् तत् अस्माकम् अभिमानस्य विषयः । देवो दयालुः । भवान् सुखेन अस्ति । भवान् यदि मनः कुर्यात् तर्हि मम साहाय्यं कुर्यात् । भवतः शालायाम् एकं स्थानं रिक्तम् अस्तीति श्रूयते । भवता यदि सूच्यते तर्हि आवेदनपत्रं प्रेषयिष्यामि. । भवान् तु मम अग्रजः इव । .....''

अस्माकं विद्यालये स्थानं रिक्तम् अस्ति इति तु सत्यम् एव । किन्तु तदर्थं कोऽपि क्रैस्तमतीयः न प्राप्तः चेदेव अहं तम् उद्योगं नाणये दापयितुं शक्नुयाम् । सः क्रैस्तमतं स्वीकर्तुं सिद्धः चेत् तेनैव सः उद्योगः प्राप्तुं शक्यः । सः उद्योगः अमुकाय दापनीयः इति शालासमितिजनाः बिषप्वर्यः वा चिन्तितवन्तः वा न वा इति अहं न जानामि स्म । व्यवस्थाविषये स्वातन्त्र्येण निर्णयं कर्तुं मम न आसीत् अधिकारः ।

तावता लिल्ली मां सङ्केतेन अन्तः आहूतवती । मया शालातः आगत्य पानीयं न पीतम् आसीत् । अहं काफीचषकद्वयं गृहीत्वा बहिः आगतः । एकं तिरुनारायणाय दातुम् अहम् उद्युक्तः । तदा सः - ''अलमलम् । अहं काफीं न पिबामि एव । बहोः कालात् तथैव । काफी सर्वथा न रोचते मह्यम्'' इति उक्तवान् ।

सः चषकं न स्पृष्टवान् अपि । एतत् ज्ञात्वा लिल्ली नारङ्गफलम् आनीय तस्य पुरतः स्थापयित्वा काफीचषकम् अन्तः नीतवती । 'काफीपानस्य अभ्यासः एव नास्ति मम' इति नाणिः असत्यम् उक्तवान् आसीत् । विद्यार्थिदशायाम् अहम् एव तस्मै बहुवारं काफीं दापितवान् आसम् । प्रातः स्नानसन्ध्यावन्दनादिकं समाप्य सः काफीपानाय धावति स्म । कदाचित् वयं विनोदेन 'काफीप्रियः अय्यङ्गार्यः=काफी-अय्यङ्गार्यः, मध्यमपदलोपः' इति वदामः स्म ।

नाणिः नारङ्गं खादित्वा उद्योगदापनं पुनः स्मारयित्वा ततः निर्गतवान् ।

तस्य निर्गमनस्य अनन्तरं लिल्ली माम् आहूतवती । अहं पाकशालां गतवान् । मां क्षणकालं निर्निमेषं दृष्ट्वा सा उक्तवती - ''स्नेहितस्यापि विषये विचिन्त्य व्यवहरणीयम् । तस्य दर्शनात् एव मया ऊहितम् आसीत् -

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एषः अस्मद्गृहे जलम् अपि न सेवते इति । किन्तु भवता तत् न अवगतम् एव । अस्माभिः दत्तं कोऽपि तिरस्करोति चेत् महत् दुःखं भवति । अतः दानात् पूर्वम् एव चिन्तनीयम्'' इति ।

तया उक्तं युक्तम् एव आसीत् ।

तस्याः मुखे खेदातिशयः दृश्यते स्म । शालातः आगमनसमये एव मया तत् लक्षितम् आसीत् । किन्तु वार्तालापारम्भतः पूर्वम् एव नाणिः उपस्थितः आसीत् । मया सानुरोधं पृष्टं चेदपि लिल्ल्या खेदस्य कारणं न उक्तम् । 'यदि न उच्यते तर्हि मया भोजनम् एव न क्रियते' इति दृढतया यदा उक्तं तदा कथनम् अङ्गीकृतवती सा ।

भोजनानन्तरं सा उक्तवती – ''अद्य मध्याह्ने त्रिवादने कीदृशानि सोफासनानि आनाययितव्यानि इति प्रष्टुं पिता आगतः आसीत् । सम्भाषणसमये तेन भित्तिस्थानि हिन्दुदेवचित्राणि दृष्टानि । प्रश्नार्थकदृष्ट्या तेन मम मुखं दृष्टम् । मम मुखे स्थितं कुङ्कुमतिलकं तस्य दृष्टिपथम् अगच्छत् । झटिति तस्य कोपः तीव्रः जातः । 'एवं करोतु इति केन वा आदिष्टम् ? एषः विषयः क्रिस्तालयेन यदि ज्ञायेत तर्हि न भवती जीवति, न वा भवत्याः पतिः । कर्तव्याकर्तव्यं ज्ञात्वा क्रिस्तमतानुसारं जीवनयापनं शोभते । अस्मन्मतविरुद्धतया नीचदेवानां चित्राणां स्थापनं कथं वा युज्येत ? कुङ्कुमं धृतम् अस्ति अपि भवत्या । किं भवती क्रिस्तमतीययोः मातापित्रोः पुत्री, उत जातिभ्रष्टयोः पुत्री ?' इत्येवं बहुधा तर्जयित्वा सः गतः । सोफासनस्य आनयनवार्ता तत्रैव स्थगिता अभवत् । सः मां निन्दितवान् इत्यतः अहं न रुदितवती । किन्तु यत् वयम् अमूल्यं भावयामः तत् अन्ये नीचातिनीचं भावयन्ति यत् तत् मयि महत् दुःखं जनयति ।''

तस्यां रात्रौ आवाभ्याम् उभाभ्याम् अपि निद्रा न प्राप्ता । लिल्ल्याः विचारधारा केन मार्गेण प्रवहति स्म इति अहं न जाने । मम मनः तु विविधान् विकल्पान् चिन्तयति स्म । 'मनसः तृप्त्यर्थं मया गृहे हिन्दुदेवानां चित्रं स्थापितम् । मम पत्नी तिलकं धृतवती तदर्थम् एव । तथापि नाणिः आवयोः गृहे जलम् अपि न पीतवान् । सकृत् निर्गताय हिन्दुसमाजः पुनः प्रवेशावकाशं न ददाति । सर्वानुकूल्ययुक्ता, सुखजीवनार्थम् अपेक्षितायाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यवस्थायाः कल्पयित्री स्थितिः मया किमर्थं निवारणीया ? निवारणेन वा कः लाभः ? मनस्तृप्तिः, उच्चलक्ष्यं, संस्कारः इत्यादयः केचन अंशाः यावत् पादेन न विमर्द्यन्ते तावत् जीवने सन्तृप्तिः न भवति ।'

प्रातः उत्थाय अहं लिह्नीम् आदिष्टवान् - ''गृहे भित्तौ स्थापितानि हिन्दुदेवानां चित्राणि अपनीय तेषां स्थाने, पूर्वं स्थितानि एव स्थापयतु'' इति ।

''किमिदम् ? भवतः कथनं विचित्रम् इव भाति !''

''चर्चा मास्तु । यथा मया उक्तं तथा करोतु'' इति आदेशस्वरेण मया उक्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एकस्मिन् दिने रोमेलः मम गृहम् आगतः आसीत् । किञ्चित्कालं विनयवार्तालापं कृत्वा सः मत्समीपम् आगत्य हस्तं मम कर्णस्य समीपम् आनीय - ''श्रीमन्, भवतः स्वभावः तु उत्तमः । भवन्तं परितः स्थिताः जनाः किं किं कुर्वन्ति इति भवता न ज्ञायते । भवता जागरूकता आश्रयणीया'' इति प्रस्तावनाम् उक्त्वा - ''भवतः सहायकः थामसः अस्ति खलु, सः - 'अहम् एव प्राचार्यपदं प्राप्स्यामि' इति स्वप्नं पश्यन् आसीत् । सः क्व ? भवान् क्व ? येसुस्वामिनः दयया एव भवान् प्राचार्यः जातः । सः भवद्विषयिण्या असूयया व्यवहरन् प्रतिदिनं बिषप्पवर्यस्य पुरतः दोषारोपणं करोति ।''

''सः वदेत् चेदपि विषप्पवर्यः किं शृणुयात् ?''

'' स तु ज्येष्ठः । ज्येष्ठानां व्यवहारस्य विमर्शम् अहं कथं कुर्याम् ? थामसस्य ज्येष्ठपुत्री अनुवैद्या अस्ति खलु, सा बहूनां ज्येष्ठानां विश्वासं सम्पादितवती अस्ति । सा ज्येष्ठानां द्वारा बिषप्पवर्यस्य पुरतः भवद्विषयकदोषान् वाचयति इति श्रूयते । भवते यावत् वेतनं दीयते तावतः दानम् अन्याय्यम् इति, तस्याः पिता यावत् कार्यं करोति तावतः पादभागम् अपि भवान् न करोति इति च चिकित्सालये सर्वान् वदन्ती भवति सा । बहवः वैद्याः तस्याः वचने विश्वासं प्रकटयन्ति । तस्याः व्यवहारशुद्धताविषये चिकित्सालयस्य सेवकाः किमपि किमपि वदन्ति । आस्तां तावत् सा कथा । अहं थामसश्च नितराम् आत्मीयौ ।''

परिचितेभ्यः चतुर्भ्यः छात्रेभ्यः अग्रिमवर्षे पूर्णरूपेण निश्शुल्कभोजन-वसतिव्यवस्थायाः दापने मम साहाय्यं प्राप्तुं सः आगतः आसीत् । तस्य प्रतिगमनान्तरं थामसविषये मम मनः सन्देहं प्राप्नोत् । रोमेलस्य वचनम् उत्प्रेक्षायुक्तं स्यात् नाम, तथापि थामसः सरलः तु न । मनुष्यस्वभावः एव तादृशः । विंशतिवर्षाणां सेवायाः अनन्तरं यत् पदं तस्मै दातव्यम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीत् तत् तस्मै अदत्त्वा मह्यं दत्तम् आसीत् । मम विशेषार्हता नाम जानूतन्मध्यजामातृत्वम् । बिषप्वर्यः अपि एषु दिनेषु मम कार्यस्य विषये असन्तोषं प्रकटयन् आसीत् । शालायां बैबल्पठनस्य अनिवार्यताकल्पनार्थं कृतः प्रयत्नः असफलः जातः आसीत् । हिन्दुबालकेषु स्वाभिमानः ऐक्यभावना धैर्यं च वर्धमानं दृश्यते स्म । इदानीम् आंग्लानां शासनं तु न आसीत् । अतः श्वेतचर्मणः आज्ञां कोऽपि शिरसि न धरति स्म । यदि मम स्थाने स्वयं बिषप्वर्यः एव तिष्ठेत् तर्हि अपि बैबल्पठनस्य अनिवार्यतां कल्पयितुं न अशक्ष्यत् । 'यदि एतदर्थं बलस्य उपयोगः क्रियते तर्हि विद्याधिकारिणे निवेदयिष्यामः' इति कोऽपि छात्रः उक्तवान् आसीत् । अन्यस्य विद्यार्थिनः पिता, यश्च न्यायवादी, सूचितवान् आसीत् यत् बलात्कारः कृतः चेत् व्यवहारं न्यायालयं नेष्यामि इति ।

बिषप्वर्यः मद्विषये असन्तुष्टः आसीत् यत् तस्य अपरम् अपि कारणम् आसीत् । 'क्रिस्मस्दिने कार्यक्रमे भाषणं करणीयं भवता' इति सः मां सूचितवान् आसीत् । मया निराकृतिः प्रदर्शिता । भाषणे मयि उत्साहः न आसीत् । अन्यच्च भाषणार्थं यावत् पाण्डित्यम् आवश्यकं तावत् क्रैस्तमतविषये मया न पठितम् आसीत् । क्रैस्तमतविषये मम आदरः आसीत् । तथापि बैबल्ग्रन्थे प्रतिपादिताः सर्वे अंशाः मम सम्मताः न आसन् । मनः विमर्द्य वेदिकाम् आरुह्य जनमनोवशीकरणपुरस्सरं भाषणं यथा कुर्यां तथा मदीयम् अन्तश्चैतन्यं मृतं न आसीत् । अतः अहं भाषणं निराकृतवान् आसम् । तदा बिषप्वर्यः उक्तवान् आसीत् - "देवेन दत्ता भाषणशक्तिः देवकार्यार्थं यदि न उपयुज्येत तर्हि तया किं प्रयोजनम् ? सर्वेषाम् अपि जनानां नैतिकबन्धनं किञ्चन भवति । उपकारस्मरणं कृतज्ञताभाववहनं च सर्वस्य अपि क्रैस्तमतीयस्य गुणः भवेत्" इति ।

सूच्यतया उक्तम् अन्तिमं वचनं माम् उद्दिश्य एव उक्तम् इति मया अवगतम् । प्रतिवचनं किमपि अनुक्त्वा अहं प्रत्यागतवान् आसम् । 'तस्मिन् मद्विषयकः अनादरः उत्पन्नः यत् तत्र अहम् अपि कारणीभूतः' इति तु सत्यम् । रोमेलेन यथा उक्तं तथा थामसः कर्णेजपताम् आश्रितवान् स्यात् अपि इति विचारः मनसि आगतः । तथापि 'विना प्रमाणं कस्यचित्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषये अन्यथाभावप्राप्तिः अनुचिता' इति मया निर्णीतम् ।

कदाचित् सर्वेषाम् अध्यापकानां निर्गमनस्य अनन्तरम् अहं थामसं मत्कार्यालयं प्रति आहूतवान् । आवाम् उभौ अपि तत्रैव उपविश्य काफीं पीतवन्तौ । अनन्तरम् अहं तं पृष्टवान् - ''अहं किञ्चित् प्रष्टुम् इच्छामि । विषयः भवत्सम्बद्धः स्यात् । तथापि अन्यथाभावम् अप्राप्नुवन् भवान् किं यथायोग्यम् उत्तरं दातुं शक्नुयात् ?''

''निस्सङ्कोचं पृच्छतु श्रीमन् । भवद्विषये मया अन्यथाभावः प्राप्येत चेत् प्रभुः किं मां क्षमेत ?'' इति यथापूर्वं विशिष्टोच्चारणपूर्वकम् आंग्लभाषया उक्तवान् थामसः ।

''भवतः रोमेलस्य च सम्बन्धः कथम् अस्ति ? भवता वस्तुस्थितिः वक्तव्या ।''

''आवां तु आत्मीयौ सुहृदौ ।''

एतत् वचनं कृत्रिमम् इति श्रवणमात्रेण एव मया ज्ञातम् । अधिकमैत्रीभावेन यदा पृष्टं तदा - ''स तु क्षुद्रजनः श्रीमन् ! परमस्वार्थी सः । छात्रैः दत्तं धनं स्वनिमित्तम् उपयुञ्जानः सः प्रभूतं धनं सञ्चितवान् अस्ति । धनिकपुत्रेभ्यः छात्रावासे निश्शुल्कप्रवेशं दत्त्वा तेभ्यः स्वनिमित्तं तण्डुल-धान्यादीनि आनाययति सः । तस्य तत्पत्न्याः च वयसः अन्तरं महान् ! अहो, अलङ्कारः तस्याः ! अहो, नटनम् एतस्य !! एतत्सर्वं यदि न स्यात् तर्हि तौ कथं वा एतावतीं सम्पत्तिं प्राप्तुम् अशक्ष्यताम् ? अन्यच्च .....'' इति वचनं मध्ये एव स्थगितवान् सः ।

मया अनुरोधपूर्वकं पुनः यदा पृष्टं तदा सः उक्तवान् - ''मम पुत्री अनुवैद्या अस्ति खलु ? तस्याः स्नेहं सम्पाद्य तां वाममार्गं प्रति आक्रष्टुं प्रयत्नं कृतवती आसीत् रोमेलस्य पत्नी । तदर्थं तेन सह अहं कदाचित् कलहं कृतवान् आसम् अपि !''

'किमर्थम् एतद्विषये पृष्टम् ?' इति पृष्टवान् थामसः । अहं वास्तविकं कारणम् अनुक्त्वा अन्यविधेन उत्तरेण तं समाधाय प्रेषितवान् । रोमेल-थामसयोः कतरः उत्तमः इत्येव मया न ज्ञातम् । 'अनयोः कतरस्य दुष्टता न्यूना' इति पुनः प्रश्नः यदा उद्भूतः तदा थामसस्य विषये एव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अल्पः सदभिप्रायः दृष्टः । थामसं सम्प्रेष्य अहं बहिः आगतः । मनः नितरां खिन्नम् आसीत् । द्विचक्रिकाचालने अपि उत्साहः न आसीत् । अतः तां नुदन् एव अहं गृहं प्रति प्रस्थितवान् । मध्येमार्गं धूमपानं कुर्वन् गच्छन् देवप्रसादः दृष्टः । बहोः कालात् मया न दृष्टः आसीत् सः । मां दृष्ट्वा सः गमनं स्थगितवान् । मम मुखभावं दृष्ट्वा सः पृष्टवान् - ''किं वेदान्तिवर्यः गहनचिन्तने निमग्नः इव भासते !'' इति ।

सः कदाचित् एवं विनोदार्थं मां वेदान्तिशब्देन सम्बोधयति स्म ।

उभौ अपि तदीयं गृहं गतवन्तौ । शयनप्रकोष्ठे आवयोः उपवेशनस्य अनन्तरं राचम्मा - ''लिल्लीं दृष्ट्वा आगच्छामि'' इति उक्त्वा गृहात् निर्गतवती । मम मनः नितराम् अस्वस्थम् आसीत् । एतद्विषये देवप्रसादेन सह वार्तालापः यदि क्रियेत तर्हि किञ्चित् शान्तिः लभ्येत इति विचिन्त्य अहं पृष्टवान् - ''यथा मम भवति तथा भवतः अपि मनः किं तदा तदा अशान्तं भवति ?'' इति ।

''एकैकस्य स्वभावः एकैकः । भवतः अशान्तेः किं कारणम् ?''

रोमेल-थामसयोः स्वभावं निवेद्य बिषप्वर्यस्य कोपम् अपि निवेद्य - ''बिषप्वर्यः मम विषये असन्तुष्टः भवेत् इति मया न निरीक्षितम् आसीत् । मम कार्येषु अहं व्यापृतः भवामि निर्वञ्चनया । किन्तु तेन उच्यमानेषु सर्वेषु कार्येषु मम मनः कथं वा प्रवर्तेत ?'' इति मया उक्तम् ।

मञ्चस्य उपरि स्थापितां शय्याम् अवलम्ब्य धूमवर्तिकां सेवमानः मन्दगत्या धूमं त्यजन् उक्तवान् देवप्रसादः - ''भवतः विषये बिषप्वर्यः असन्तुष्टः यत् तस्य कारणम् अस्ति । भवान् तस्य आशायाः भङ्गं कृतवान् अस्ति । विवाहात् पूर्वम् एव सः भवत्तः बहु निरीक्षते स्म । किन्तु भवता तस्य निरीक्षायाः एकः अंशः अपि न पूरितः । अतः तस्य कोपः सहजः एव खलु ?''

बिषप्वर्यः मत्तः किं निरीक्षते इति मया न अवगतम् । अस्पष्टतया कथनं देवप्रसादस्य स्वभावः न । सः धूमपानं समाप्य धूमवर्तिकाशेषं भस्मकरण्डे पातयित्वा आंग्लभाषया उक्तवान् - ''मतविषये मम आशयः कः इति भवान् जानाति एव । जनवञ्चनार्थं सृष्टं मद्यं भावयामि तत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिल्ल्याः परिणयार्थं भवान् मतपरिवर्तनार्थं यदा सिद्धः जातः मया तत्र आश्चर्यं किमपि न दृष्टम् । स्त्रीपुरुषयोः आकर्षणशक्तेः प्राबल्यम् अहम् अवगच्छामि । यदि भवान् लिल्लीं न परिणयेत् तर्हि भवता यावत् दुःखम् अनुभूयेत ततोऽपि अधिकं दुःखम् अनुभूतवती स्यात् लिल्ली । मम भगिन्याः सन्तोषार्थं वा मया विवाहे साहाय्यं करणीयम् आसीत् । मतविषये एव अविश्वासवतः मम दृष्ट्या भवतः हिन्दुत्वपरिरक्षणस्य, क्रिस्तमतावलम्बनस्य च भेदः कोऽपि न आसीत् । भवान् मतान्तरस्वीकारम् अङ्गीकृतवान् चेदपि मम पिता भवते स्वपुत्रीं दातुं सिद्धः न आसीत् । मतभेदात् अपि अधिकतया आर्थिकस्तरभेदः पुत्रीदाने तं बाधते स्म । भवतः क्रिस्तमतावलम्बनमात्रं दृष्ट्वा सः भवते स्वपुत्रीं न दद्यात् एव । अतः मया मध्ये प्रवेशः कृतः ।''

''भवता किं कृतम् ? 'पितुः अङ्गीकारप्राप्तिविषये मम अग्रजस्य हस्तक्षेपः महान् अस्ति' इति लिल्ली वदति स्म ।''

''प्रौढशालास्तरे एव भवान् वाग्मी आसीत् इति बिषप्वर्यः जानाति स्म । पूर्वं कदाचित् अमेरिकीयः मतप्रचारकः यदा आगतः आसीत् तदा भवान् धैर्येण तं विरुध्य व्यवहृतवान् आसीत् । एतदपि बिषप्वर्यः जानाति स्म । एकदा अनाथालयं प्रति प्रेषितान् बैबल्ग्रन्थान् प्रतिप्रेष्य भवान् तैः सह भगवद्गीताम् अपि प्रेषितवान् आसीत् । तत् भवता पारितोषिकरूपेण प्राप्तम् । तदुपरि भवतः नाम आसीत् । उत्साही तरुणः भवान् यदि क्रिस्तमतावलम्बी भवेत् तर्हि उत्साहेन एव क्रैस्तमतविस्तारे साहाय्यं कुर्यात् इति तेन चिन्तितम् आसीत् । मतान्तरं यः अवलम्बते सः एव धर्मान्धः भवति । 'भवान् यदि क्रिस्तमतीयः भवेत् तर्हि स्ववाक्चातुर्येण मित्राणि अपि आकृष्य आनयेत् । तेषां द्वारा अन्ये केचन क्रिस्तमतं स्वीकुर्युः' इति तस्य चिन्तनम् आसीत् । तस्मिन् एव समये भवान् लिल्ल्याः परिणयार्थं क्रिस्तमतस्य अङ्गीकाराय सिद्धः जातः ।''

''ततस्ततः ?''

''बिषप्वचने मम पितुः महती श्रद्धा । एतदवसरे मया वस्तुस्थितिः परोक्षतया निवेदिता, न तु प्रत्यक्षम् । यतः मम मुखदर्शनात् सः जुगुप्सितः भवति स्म । सः विषयं ज्ञात्वा मम पितरम् आहूय 'भवते कन्या दातव्या'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति सूचितवान् । मम पिता यदा निराकृतिं दर्शितवान् तदा सः - 'यदि भवान् मनः कुर्यात् तर्हि जामातुः सम्पन्नताकल्पनं किं कष्टकरम् ? तं पुत्रं परिभाव्य तस्मै अपि सम्पत्तेः एकं भागं ददातु । क्रिस्तालयतः अपि साहाय्यं करिष्यते । यदि भवान् एतत् निराकुर्यात् तर्हि पवित्रमतस्वीकारात् एकः च्युतः भवति, तद्द्वारा आगन्तारः सहस्रशः जनाः अपि न आगच्छन्ति । तस्मिन् बालके इदानीं सत्यस्य प्रकाशः उदितः अस्ति । अन्यथा सः क्रिस्तमतं सर्वथा न अङ्गीकुर्यात् एव । यदि अत्र भवान् विघ्नं कुर्यात् तर्हि देवः कुपितः भवेत् । भवान् अक्षम्यः पापी भवेत्' इति उक्तवान् । बिषप्वर्यस्य वचनं मम पिता श्रद्धया अङ्गीकृतवान् । ततः अल्पे एव काले लिल्ली गृहबन्धनात् मुक्ता जाता । तस्मिन् दिने सः मां स्वयं गृहं प्रति आहूतवान् । अग्रे यत् प्रवृत्तं तत् भवान् जानाति एव ।''

''एवं वञ्चनामार्गम् अवलम्ब्य भवता किमर्थं विवाहे साहाय्यं कृतम् ?'' - मया सः पृष्टः ।

''अत्र वञ्चना का ? यदि लिल्ली परिणीता न स्यात् तर्हि भवान् उन्मत्तः अभविष्यत् । सा अपि जीवितवती न स्यात् । मया अनुसृतः मार्गः अतिप्रशस्तः न स्यात् नाम । तथापि तेन भवतोः साहाय्यं तु जातम् एव । मम पितुः स्वभावः विलक्षणः । वित्तकोषे सञ्चितं धनं प्रभूततया अस्ति । वाहनसमीकरणागारतः बहु धनं प्राप्यते । भाटकधनम् अपि तेन प्राप्यते । यदि सः इच्छेत् तर्हि गृहे कार्यानद्वयं स्थापयितुम् अर्हेत् । तथापि सः धनव्ययं किञ्चिदपि न करोति । मम विवाहार्थं यः व्ययः जातः सः मया स्वधनेन एव निरूढः । एतत् गृहम् एकं पित्रार्जितं मत्समीपे अस्ति । एतस्मात् ऋते नास्ति किञ्चिदपि मत्समीपे पित्रार्जितम् । भवतः विवाहकाले तेन महान् व्ययः कृतः यत् तत्र औदार्यं कारणं न । बिषप्वर्यस्य प्रेरणया, परलोकस्य प्रभोः प्रीत्यर्थं च तेन तथा कृतम् । एतस्य सर्वस्य कारणं किमपि स्यात् नाम । तेन अन्ते आनुकूल्यम् एव सिद्धम् । तदेव मम सन्तोषाय ।''

देवप्रसादः पुनः धूमपानं कुर्वन् उक्तवान् - ''क्रिस्तालयधनेन भवते प्रतिमासं त्रिशतं रूप्यकाणि वेतनरूपेण दीयन्ते यत् तदपि एतेन एव उद्देशेन ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सरलभाषया वशीकरणशैल्या भाषणकर्तारः भवादृशाः विरलाः । एतया शक्त्या भवान् मेषान् इव जनान् प्रवाहरूपेण आनयेत् इति उद्देशेन सर्वं कृतम् । किन्तु भवान् एकस्यापि आनयने उपकारकः न जातः अद्यावधि । एवं स्थिते भवद्विषये असन्तोषः कुतो वा न स्यात् ? न केवलम् असन्तोषः, क्रोधः अपि भवेत् तस्य । क्रिस्तालयीयः बिषप्वर्यः न महात्मा गान्धी इव सरलः, अपि तु धूर्तः व्यवहारकुशलः । एषा शक्तिः यस्य न भवति सः तत् पदम् अलङ्कर्तुं न अर्हति ।''

एतावत् उक्त्वा सकृत् धूमवर्तिकाधूमम् अन्तः स्वीकृत्य वलयाकारेण तं मुखेन प्रेषयन् उत्तानतया शयनं कृतवान् देवप्रसादः ।

अहं पृष्टवान् - ''तस्य निरीक्षायाः अनुगुणः व्यवहारः न शक्यते एव चेत् मम का गतिः भवेत् ?''

''अग्रे का गतिः इति भवता महती चिन्ता करणीया नास्ति । यदि आंग्लानाम् एव शासनम् अनुवर्तमानं स्यात् तर्हि प्रायः अस्मादृशैः चिन्ता करणीया अभविष्यत् । किन्तु इदानीं तादृशी स्थितिः नास्ति । क्रिस्तालयविरोधं सम्पादितवन्तः सन्ति मादृशाः बहवः । ते सर्वे सुखेन एव जीवन्तः सन्ति, यथा अहम् । इदानीं विद्यमानः उद्योगः यदि न भवेत् तर्हि अन्यत्र उद्योगः प्राप्येत एव । समग्रः देशः बिषप्वर्यस्य अधीनः तु नास्ति ।''

देवप्रसादस्य वचनस्य श्रवणात् मया वस्तुस्थितिः अवगता । लिल्ल्याः पिता विवाहम् अङ्गीकृतवान् यत् तस्य पृष्ठभूमौ एतावन्तः विलक्षणव्यवहाराः सन्ति इति मया न ऊहितम् आसीत् अपि । अहं लिल्ली च व्यक्तिगतेन अनुरागेण विवाहार्थं सिद्धौ जातौ आस्व । किन्तु विवाहः प्रवृत्तः क्षुद्रोद्देशानां सहकारेण ! क्रैस्तमतावलम्बनपूर्वकम् एव अशान्तिरहितं जीवनं यापनीयम् इति बहुधा प्रयत्नं कुर्वन् आसम् । तादृशः प्रयत्नः मम जीवने अपरिहार्यः आसीत् अपि । एतदभ्यन्तरे एतस्य सर्वस्य श्रवणात् मनसि वैचारिकसङ्घर्षः आरब्धः । मनः पुनरपि शून्यं जातम् । शिरसि महती वेदना उत्पन्ना । अत्रान्तरे राचम्मा प्रत्यागता । अहं मम गृहं प्रति प्रस्थितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुखशान्त्यादयः मम ललाटे लिखिताः न आसन् इति भाति । मम मनसः अशान्तेः तापः लिल्लीं यथा न बाधेत तथा विशेषप्रयत्नं कुर्वन् आसम् अहम् । तस्याः हासः मम मनः शीतलीकरोति स्म । मयि प्रवर्तमानस्य सङ्घर्षस्य निवेदनात् तस्याः हासम् उन्मूलयितुम् अहं न इच्छामि स्म । किन्तु लिल्ली सूक्ष्मग्राहीणी । मापकयन्त्रम् इव सा मम मनसि प्रवर्तमानान् सूक्ष्मान् विचारतरङ्गान् अपि कथञ्चित् अभिजानाति स्म । क्वचित् स्वयं प्रश्नं कृत्वा मम मनः आलोडयितुं सा न इच्छति स्म । अतः मौनम् अवलम्बते स्म ।

मम व्यक्तित्वं शुष्कं जातम् आसीत् । बिषप्वर्यस्य तन्त्रानुगुणं व्यवहरन् यन्त्रम् इव अहम् आसम् । भावनावेगस्य प्रवाहे पतितः अहम् अननुगुणे परिसरे पतितः सन् ताम्यन् आसम् । बाह्यपरिसरस्य अन्तरङ्गध्वनेः च सङ्घर्षः निरन्तरं प्रचलति स्म । मनः रणरङ्गायते स्म । पक्षविपक्षयोः प्रहारात् तत् झर्झरितं जातम् आसीत् ।

ततः सप्ताहस्य अनन्तरं मम विद्यालयसङ्केताय एकं भारयुतं पिहितपत्रम् आगतम् । मङ्गलूरुतः आगतं तत् । पत्रस्य अन्ते शङ्करस्य नाम आसीत् । सः लिखितवान् आसीत् - ''अहं मङ्गलूरुनगरे अस्मि । भवतः क्रैस्तमतस्वीकारः ज्ञातः । अपन्थानं गच्छते सहोदराय पत्रस्य लेखनतः न किमपि प्रयोजनम् इति विचिन्त्य अद्यावधि मौनेन आसम् । किन्तु मनसः लिलेखिषायाः तीव्रतायाः कारणतः प्राचीनं विश्वासं मनसि निधाय पत्रं लिखन् अस्मि ।

कोऽपि अशिक्षितः, हिन्दुधर्मविषये यः किमपि न जानाति सः, यदि स्वधर्मं परित्यज्य क्रैस्तमतम् अवलम्बेत तर्हि मम आश्चर्यं न अभविष्यत् । भवान् न अशिक्षितः । भवता हिन्दुधर्मविषये कियन्तः ग्रन्थाः न पठिताः ? महत्या जिज्ञासया कुतूहलेन च भवान् चर्चां करोति स्म । उभयोः अपि तौलनिकम् अध्ययनं कृत्वा यदि भवान् स्वधर्मं त्यक्तवान् स्यात् तर्हि अहं खिन्नः न अभविष्यम् । जन्मना प्राप्ताः संस्काराः, दीर्घकालं कृतं विमर्शात्मकम् अध्ययनम् इत्यादीनां मिथ्यामिथ्यता ज्ञातव्या चेत् अल्पः कालः न पर्याप्तः । सत्यं वद मित्र ! किं भवान् अन्तस्साक्षितया क्रिस्तमते

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसक्तिं प्राप्य क्रिस्तमतम् अवलम्बितवान् ? किं धनादिकं भवति प्रलोभनम् अजनयत् ? भवान् धनादिप्रलोभनया वशीकर्तुं शक्यः न इति अहं सम्यक् जानामि । मया श्रुतं यत् कस्याञ्चित् तरुण्याम् अनुरक्तः सन् भवान् एवं कृतवान् इति ।

मित्र ! किमर्थम् एव कृतम् ? अथवा वस्तुस्थितिः या कापि स्यात् नाम । एकस्मिन् विषये भवता आत्मसाक्षितया चिन्तनीयम् । भवतः परिवर्तितं नाम क्रिस्तालयस्य पुस्तके उल्लिखितं स्यात् नाम । हिन्दुधर्मे तादृशं पुस्तकं किमपि न भवति । यतः हिन्दुधर्मः न काचित् संस्था । सदस्यत्वस्य गणनायाः रक्षकः कार्यालयः अपि न । स च कश्चन जीवनमार्गः । भवान् क्रिस्तमतीयः जातः चेदपि भवतः नाडीषु हिन्दुरक्तम् एव प्रवहति । भवतः चिन्तनशक्तिः रूपिता अस्ति हिन्दुधर्मस्य प्रभावतः । वंशतः, जन्मना, विद्याभ्यासेन, अन्यसंस्कारेण च भवान् हिन्दुः एव । अत्र भवतः अन्तरङ्गम् एव साक्षि । सायङ्कालसमये मानवः स्वछायाम् अतिक्रान्तुं यथा न शक्नोति तथैव भवान् अपि पूर्वसंस्कारात् पृथग्भूतं जीवनं कर्तुं न अर्हति । तथा कर्तुं यत्नः क्रियते चेदपि द्विव्यक्तित्वं दीर्घकालं न जीवेत् ।

भवते पत्रं लिखन् अस्मि यत् तस्य अन्यत् अपि कारणम् अस्ति । पूर्वम् अमेरिकीयं मतप्रचारकं धैर्येण सम्मुखीकृतवान् भवान् एव इदानीं स्वविद्यालये बैबल्पठनं हिन्दुविद्यार्थिभिः अपि अनिवार्यतया करणीयम् इति नियमं कुर्वन् अस्ति इति ज्ञातम् । किम् एतत् सत्यम् ? भवान् यत्र इच्छति तत्र विश्वासं करोतु नाम । किन्तु क्रिस्तमतावलम्बनमात्रेण किं भवति धर्मान्धिता उत्पन्ना । सर्वे धर्माः अन्ते एकम् एव भगवन्तं प्राप्नुवन्ति इति वयं हिन्दवः विश्वसिमः । 'क्रिस्तात् ऋते न मुक्तिः, सर्वे तस्य अवलम्बनेन एव देवराज्यं प्राप्नुयुः' इति तु भवतां दृष्टिः । एतदवसरे एका घटना मम स्मृतिपथम् आयाति । शृङ्गेरीस्वामिनः सद्यःकाले एव स्नानसमये पादस्खलनात् पतिताः सन्तः मुक्तिं प्राप्तवन्तः इति वार्ता भवता श्रुता स्यात् । पूर्वं कदाचित् कश्चन अमेरिकीयः तेषां दर्शनार्थम् आगतः आसीत् । सः अत्रत्यसंस्कृत्याः प्रभावं प्राप्य स्वामिपादान् निवेदितवान् यत् मां हिन्दुधर्मीयं कुर्वन्तु इति । तदा स्वामिभिः उक्तम् - 'भवान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्तमः क्रैस्तः भवतु । तेन हिन्दुत्वं प्राप्तम् इव' इति । हिन्दुधर्मस्य सारः एव बोधितः आसीत् तैः एकवाक्येन । विश्वतोमुखी दृष्टिः, परमतसहिष्णुता च यदि भवति स्यात् तर्हि भवान् बलात् क्रैस्ततत्त्वस्य आरोपणार्थं प्रयत्नं न अकरिष्यत् । चिन्तयतु एतद्विषये ।

क्रैस्तमतं तु भवता अवलम्बितम् एव । तदेव अनुसरन् अन्येषु मतनायकेषु विशालदृष्टिम् आनेतुं प्रयत्नं करोतु । भवता झेवियर्सत्यदासत्वं प्राप्तं स्यात् चेदपि भवति सत्यनारायणत्वं न नष्टं पूर्णतः इति अहं भावयामि ।''

शङ्करस्य सुदीर्घं पत्रं मम बुद्धिशक्तेः आधारम् एव उन्मूलितवत् आसीत् । सुप्तमनसि प्रवर्तमानः हिंसात्मकः सङ्घर्षः एतेन जागृदवस्थां प्राप्तवान् । 'अहम् इदानीं कुत्र अस्मि ? अहं सत्यनारायणः एव इत्यत्र नास्ति संशयः । तथापि मया एवं किमर्थं कृतम् ?' शङ्करस्य व्यक्तित्वं मम नेत्रयोः पुरतः आगतम् । हिन्दुधर्मस्य विषये मम आस्थां वर्धितवान् आसीत् सः । मम ज्ञानं विस्तारितवान् आसीत् सः । सः एव इदानीं मयि प्रज्वलन्तम् अग्निम् उद्दीपयन् आसीत् । मध्ये किञ्चित्कालम् आवयोः सम्पर्कः स्थगितः आसीत् । व्यवस्थिततया पत्रलेखनप्रवृत्तिः न आसीत् तस्य । शिवमोग्गातः मङ्गलूरुनगरं गतवान् आसीत् सः ।

जीवने कोऽपि सारः न दृश्यते स्म । 'जीवनीयम्' इति इच्छा एव क्षीयमाणा आसीत् । वस्त्रे, आहारे, सुखसाधनेषु वा मनः न रमते स्म । 'किम् एतैः ?' इति भावः प्राप्यते सम । यदा लिल्ली पार्श्वे भवति स्म तदा काचित् क्षणिकशान्तिः प्राप्यते स्म । तस्याः अनुपस्थितौ मनः एकान्तताम् अनुभवति स्म । तदा तत्र द्वैधीभावः । तयोः उभयपक्षयोः सङ्घर्षः । अहं निश्चेष्टः सन् दुर्बलसाक्षी च सन् तं सङ्घर्षं मौनेन पश्यामि स्म ।

* * *

एकदा विद्यालयसङ्केताय एकं पत्रम् आगतम् । शङ्करस्य अग्रजस्य रामण्णस्य विवाहः । वधूः मैसूरुनगरीया एव । शिवरामपेटप्रदेशे स्थिते कल्याणमण्डपे विवाहः । सायङ्काले मङ्गलाक्षतकार्यक्रमसमये गत्वा आगन्तव्यम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति विचारः आगतः । अपरक्षणे एव मनसि भीतिप्रेरितः विकल्पः । 'तत्र शङ्करस्य दर्शनं भवेत् । रामण्णेन सह वार्तालापः करणीयः भविष्यति । शङ्करस्य मातापितरौ, अन्ये सुहृदः चापि तत्र उपस्थिताः भवेयुः एव । सर्वेषां पुरतः कथं मुखं प्रदर्शयेयम् ..... ?'

'सत्यं, मया मतान्तरम् अवलम्बितम् । तत् तु धैर्येण एव कृतम् । चौर्यादिलज्जास्पदकार्यं तु न कृतम् । एवं स्थिते किमर्थं न गन्तव्यं मया ?'

लघुविषये अपि शीघ्रनिर्णयसामर्थ्यं विलुप्तम् आसीत् मयि । अतः गन्तव्यं न वेति विकल्पः । अन्ते आत्मविश्वासं दृढीकृत्य 'गन्तव्यम् एव' इति निर्णीतं मया । 'लिल्ली अपि नेतव्या' इत्यपि निर्णीतम् ।

अनन्तरदिने सायम् अष्टवादनसमये लिल्ल्या सह कल्याणमण्डपः गतः मया । आमन्त्रिताः सर्वे आगत्य गताः आसन् । अहं लिल्ल्या सह साक्षात् अन्तः गतवान् । वेष्टीम् उत्तरीयं च धृत्वा रामण्णः विवाहमण्डपे उपविष्टः आसीत् । पार्श्वे उपविष्टः पुरोहितः धार्मिकविधिं कारयन् आसीत् । आवां गत्वा कटे उपविष्टवन्तौ । रामण्णः माम् अभिज्ञाय मन्दहासं दर्शितवान् । कोऽपि चतुष्पादिकाम् आनीय मत्पार्श्वे स्थापितवान् । मया धृतस्य वेषस्य निमित्तं तत् आवश्यकम् एव आसीत् । नीतं कुङ्कुमपात्रं लेखनीं च अहं पुरोहितस्य हस्ते अर्पितवान् । वेदमन्त्रोच्चारणपूर्वकम् आशीर्वादपुरस्सरं तदुभयं वधूवरयोः कृते दत्तवान् पुरोहितः । तदनन्तरं मत्समीपम् आगतवान् रामण्णः । तावता कुङ्कुमपात्रं गृहीत्वा काचित् आगता । सा रामण्णस्य अनुजा । तया सह काश्चन अन्याः अपि आसन् । सा लिल्ल्यै हरिद्राकुङ्कुमबन्धं पुष्पं च दत्तवती । तया गृहीतात् पात्रात् कुङ्कुमं स्वीकृत्य धृतवती लिल्ली ।

''भवतः आगमनं महते सन्तोषाय जातम्'' इति उक्तवान् रामण्णः ।

अत्रान्तरे तत्र तदीयौ मातापितरौ आगतौ । माता तु यथापूर्वम् आत्मीयतां दर्शयन्ती - ''किं भोः, विरलदर्शनः जातः । एषा भवतः पत्नी खलु ? तस्याः नाम वदतु तावत्'' इति हसन्ती उक्तवती ।

एतदवसरे एव शान्तप्पश्रेष्ठी तत्र आगतः । रामण्णः तत्समीपं गतवान् । शान्तप्पवर्यः मत्पार्श्वे एव आगतः सन् अपि अपरिचितेन सह व्यवहरन् इव दूरं गतवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''किं श्रेष्ठिवर्य ! परिचयः न प्राप्तः ? अस्माकं सत्यः एषः'' इति यदा रामण्णः उक्तवान् तदा शान्तप्पवर्यः मत्समीपम् आगत्य मां सम्यक् दृष्ट्वा - ''वार्धक्यं बाधते । दृष्टिशक्तिः क्षीणा । भवान् तु परिवृत्तः अस्ति । अन्यच्च सूट्वेषः यदि ध्रियते तदा अभिज्ञानप्राप्तिः अपि कष्टाय । आस्तां तावत् । भवतः दर्शनं सन्तोषाय'' इति अवदत् ।

शान्तप्पवर्यस्य कथनं स्वाभाविकम् एव स्यात् । तथापि तस्य श्रवणात् मम मनसि खेदः उत्पन्नः । तावता कृष्णवर्णीयः कश्चित् मत्समीपम् आगतः । यदा सः दूरे आसीत् तदा अभिज्ञानं न प्राप्तम् एव । समीपदर्शनात् अभिज्ञातम् । सः आसीत् शङ्करः । तस्य कार्श्यं कार्ष्ण्यं च वर्धितम् आसीत् । नेत्रे कुहरस्थे इव दृश्येते स्म । उरोस्थीनि युतकस्य अन्तर्भागे अपि दृश्यन्ते स्म । अचिरात् एव अपगतास्वास्थ्यः इव दृश्यते स्म सः । ''कदा आगतः भवान् ?'' इति पृच्छन् सः मत्समीपम् आगतः ।

तस्य दर्शनात् महान् सन्तोषः जातः । तस्य हस्तौ सुदृढं गृहीतौ मया ।

शङ्करः उक्तवान् - ''निमन्त्रिताः सर्वे मध्याह्ने एव आगताः आसन् । विवाहविधयः सर्वे समाप्तप्रायाः । रामण्ण ! भवान् पुरोहितसमीपं गच्छतु । शास्त्रविधयः शीघ्रं समाप्ताः भवन्तु । सत्य ! भवता भोजनं समाप्य एव गन्तव्यम् ।''

'भोजनं समाप्य एव गन्तव्यं, न अन्यथा' इति रामण्णः, तदीया माता च सानुरोधम् उक्तवन्तौ ।

शङ्करः उक्तवान् - ''भवतः पत्नी अत्रैव वार्तालापं कुर्वती भवतु । भोजनारम्भार्थम् इतोऽपि अर्धघण्टात्मकः विलम्बः स्यात् एव । तदभ्यन्तरे, यदि भवतः पत्नी अनुमन्येत तर्हि, आवां किञ्चिद्दूरं गत्वा आगच्छाव'' इति ।

''भवती अत्रैव तिष्ठतु । एषोऽहम् अर्धघण्टाभ्यन्तरे प्रत्यागमिष्यामि'' इति लिल्लीम् उक्त्वा अहं शङ्करेण सह प्रस्थितवान् ।

''किमर्थम् एवं कृशः भवान् ? अस्वास्थ्यं किमपि आसीत् किम् ?'' इति पृष्टं मया ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उभौ अपि वार्तालापं कुर्वन्तौ जनपदकार्यालयसमीपं गतवन्तौ । अत्र अनागतस्य मम वर्षम् अतीतम् आसीत् ।

''वर्षात् पूर्वम् एव शिवमोग्गा त्यक्तं मया । मङ्गलूरुनगरं केन्द्रीकृत्य दक्षिणकन्नडजनपदे उत्तरकन्नडजनपदे च सङ्घकार्यं विस्तारयन् अस्मि । एषु दिनेषु मैसूरुनगरं न आगतम् एव मया । अविश्रान्ततया कार्यं प्रचलति । उभयोः अपि जनपदयोः एकम् अपि ग्रामम् अविहाय प्रवासः कृतः मया । सङ्घकार्यविस्तारः राष्ट्रभक्तिजागरणं च मम कार्यम् । मङ्गलूरुनगरीयः आतपः मम देहस्थितेः अनुगुणः न । अतः मासद्वयम् अस्वस्थः सन् चिकित्सालये आसम् । स्वयंसेवकाः, अन्ये समाजबान्धवाः च तत्काले प्रीत्या मम सेवां कृतवन्तः । इतः परं मासं यावत् मङ्गलूरुनगरे स्थित्वा उत्तरकर्णाटकभागं गमिष्यामि । श्वः एव मङ्गलूरुनगरं प्रति गमनं मम'' - शङ्करः अवदत्।

अर्धघण्टां यावत् वार्तालापं कृत्वा आवां कल्याणमण्डपं प्रत्यागतौ। वार्तालापसमये शङ्करः एकवारम् अपि मतान्तरस्वीकारविषये प्रश्नं न कृतवान् । यथापूर्वम् महता स्नेहेन वार्तालापः प्रवृत्तः । प्रत्यागमनसमये तं यथापूर्वं 'अग्रज' इति सम्बोधितवान् आसम् । कल्याणमण्डपप्राप्तिसमये भोजनार्थं पत्राणि प्रसारितानि आसन् । मां लिल्लीं च अन्यस्मिन् प्रकोष्ठे उपवेश्य भोजनं परिविष्टम् ।

ताम्बूलं प्राप्य आवां प्रस्थितवन्तौ । रामण्णः आवयोः निमित्तं शकटम् आनायितवान् । प्रतिगमनसमये लिल्ली - ''तत्र पाके, परिवेषणे, व्यवहारे च विलक्षणं सौन्दर्यं दृष्टं मया । तस्य दर्शनात् भासते यत् आ सहस्रवर्षेभ्यः अनुवर्तमानं एतत् इति । भवतः निर्गमनानन्तरं अहं रामण्णस्य अनुजया सह वार्तालापं कुर्वती उपविष्टवती । दूरे उपविश्य बहवः विषयः मया परिशीलिताः । तत्र सन्तोषकरः कश्चन परिसरः दृष्टः मया'' इति वदन्ती सन्तोषं सूचितवती ।

अपेक्षितात् अपि अधिकं स्नेहम् आदरं च तस्मिन् दिने अहं प्राप्तवान् आसम् । मनसि अनिर्वचनीयः आनन्दः, शान्तिः च अभिव्यक्तः आसीत् । सन्तोषाधिक्यवशात् रात्रौ निद्रा न प्राप्ता मया । शङ्करस्य वैशिष्ट्यं विचारान् च अहं लिल्लीम् उक्तवान् । निद्राप्राप्तिसमये उषःकालः उपस्थितः आसीत् ।

किन्तु एषा तृप्तिः, शान्तिः च चिरकालं नै अनुवृत्ता । अनन्तरदिने

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जागरणसमये यथापूर्वं मनसः मौढ्यम् । पूर्वदिनस्य अनुभवः घण्टाद्वयाभ्यन्तरे अदृश्यतां गतः आसीत् । स च अनुभवः स्मृतिपथे स्थातुं योग्यः विषयः आसीत्, न तु नित्यजीवने अनुसरणयोग्यः । वास्तविकता यथा यथा दृष्टिगोचरतां गता तथा तथा मनसः अस्वस्थता प्रवृद्धा । जीवने स्थिता जुगुप्सा दिनद्वयाभ्यन्तरे एव प्रवृद्धा । आहारादिसेवने आस्था न दृश्यते स्म । कस्मिंश्चिदपि कार्ये उत्साहः अपि न दृश्यते स्म । सप्ताहाभ्यन्तरे एव शरीरे महती निश्शक्तिः उत्पन्ना । द्विचक्रिकया शालां प्रति गमनागमनं अपि क्लेशाय भवति स्म । अतः अश्वशकटेन गमनागमनम् आरब्धं मया । मम शरीरस्थितिं दृष्ट्वा लिल्ली चिन्ताक्रान्ता जाता । किन्तु तया उपशमयितुम् अनर्हम् अस्वास्थ्यम् आसीत् तत् ।

ततः सप्ताहाभ्यन्तरे मया शय्या आश्रिता । सप्ताहं यावत् अस्वास्थ्यम् अनुवृत्तम् । शून्यं पश्यन् एकाकितया यदा अहं शयनं करोमि स्म तदा मनः पक्षी इव भूतकाले एव सदा विहरति स्म । किन्तु तत् निराशामयं भविष्यं कदापि न पश्यति स्म । भविष्यविषये यत्र सर्वथा अनास्था तादृशे जीवने को वा स्यात् सारः ? अस्वास्थ्यकाले लिल्ल्या दर्शिता प्रीतिः आस्था च दृष्टा चेत्, तया कृता सेवा मनसि आगता चेत्, 'जीवनीयम्' इति आशा उत्पद्यते स्म ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

- २२ -

यदा किञ्चित् उल्लाघता प्राप्ता तदा अहं विद्यालयगमनम् आरब्धवान् । वैद्यस्य सूचनानुगुणं लिल्ली प्रतिदिनं फलानि, क्षीरं, शक्तिवर्धकम् औषधं च ददाति स्म । कदाचित् विद्यालयसङ्केताय एका तन्त्रीवार्ता आगता - 'भवतः पिता मरणावस्थाम् आपन्नः अस्ति । झटिति प्रस्थीयतां - गङ्गमाटः' इति ।

तन्त्रीवार्तायाः तात्पर्यं झटिति न अवगतम् । मम पिता अद्यावधि कुत्र आसीत्, इदानीं कुत्र अस्ति, मया कः ग्रामः गन्तव्यः, अयं गङ्गमाटनामकः कः इत्यादयः प्रश्नाः माम् अबाधन्त । अर्धघण्टां यावत् चिन्तनानन्तरं सर्वं स्मृतम् । गङ्गमाटः मद्ग्रामीणः एव । मम पित्रा, अन्यैः संन्यासिभिः च सः सर्वदा मिलति स्म । यदा मम पिता एकतन्त्रीं वादयति स्म तदा अयम् आतोद्यवाद्यं वादयति स्म ।

'एतावत्पर्यन्तं यः जीवन् अपि मम विषये अजीवितः इव आसीत् तस्य मरणकाले मया किमर्थं गन्तव्यम् ?' इति विचारः मनसि आगतः । तथापि तं दूरीकृत्य अहं प्रस्थितवान् । त्वरया गन्तव्यम् आसीत् इत्यतः कार्यानेन प्रस्थितम् । मया सह आगन्तुं लिल्ली अपि सिद्धा आसीत् । किन्तु सा मया न नीता । सा शय्यावस्त्रादिकं सज्जीकृत्य कार्याने स्थापितवती ।

मैसूरुतः मम जन्मस्थलम् अशीतिक्रोशदूरे अस्ति । चलुवरायपत्तनमार्गेण गन्तव्यम् । प्रयाणसमये बाल्यकालः स्मृतः । पितुः स्वार्थस्वभावः, मातुः अतिमृदुतायुक्तम् औदार्यम् इत्यादयः मया स्मृताः । माता तु पतितम् अपि पतिं परमदैवं भावयति स्म । तस्याः पतिभक्तिं स्मृतवति मयि तस्याः विषये भक्तिः उत्पन्ना । आ प्रयाणं मातुः चित्रमेव मनसि भवति स्म । ग्रामप्राप्तिसमये पञ्चवादनं जातम् आसीत् । गङ्गमाटस्य गृहम् अहं जानामि स्म । अतः यानं साक्षात् तस्य गृहं प्रति एव नीतवान् । 'भवतः पिता

Kirtikant Sharma Collection, Najafgarh

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

ग्रामात् बहिः स्थिते संन्यासिमन्दिरे अस्ति । गङ्गमाटः अपि तत्रैव अस्ति' इति तद्गृहीया काचित् उक्तवती । यानं मया तत्रैव नीतम् ।

ग्रामात् बहिः स्थितस्य आलयस्य संन्यासिमन्दिरम् इत्येव नाम । वस्तुतः तत् आञ्जनेयमन्दिरम् । पूजादिकं तत्र न प्रचलति स्म । कश्चन संन्यासी तत्र दीर्घकालं स्थितवान् आसीत् कदाचित् । अतः तस्य 'संन्यासिमन्दिरम्' इत्येव नाम जातम् आसीत् ।

गर्भगृहस्य पुरतः स्थिते मण्डपे कटस्य उपरि मम पितरं शायितवान् आसीत् गङ्गमाटः । पार्श्वे एव इष्टिकाभिः चुल्लीं निर्माय क्षीरम् उष्णीकुर्वन् आसीत् सः । तदीयं वार्धक्यं प्रवृद्धं दृश्यते स्म । अधोवस्त्रत्वेन रूक्षवेष्टीं धृत्वा प्रावारकेण ऊर्ध्वभागम् आवृतवान् आसीत् सः । प्रावारकस्य अन्तः युतकं न आसीत् । सर्वदा अयम् एव वेषः तस्य । शिरसि आमध्यभागं केशाः न आसन् । अधोभागे केचन श्वेतकेशाः दृश्यन्ते स्म । आ उदरात् आवक्षःस्थलं श्वेता रोमराजिः दृश्यते स्म । वार्धक्यकारणतः प्रायः दन्तरहितम् आसीत् तदीयं मुखम् ।

मां दृष्ट्वा झटिति न अभिज्ञातवान् सः । अहं यदा स्वपरिचयम् उक्तवान् तदा सः - "आगतं खलु भवता ! यथाकथञ्चित् भवतु इति मया तन्त्रीवार्ता प्रेषिता आसीत्" इति ग्राम्यशैल्या उक्तवान् ।

मन्दिरस्य भित्तौ एकतन्त्री आतोद्यवाद्यं च दृश्यते स्म । मृत्युशय्यायां स्थितं मम पितरम् आच्छादकेन आच्छादितवान् आसीत् गङ्गमाटः । तथापि मक्षिकाः बाधन्ते स्म एव । तेषां निवारणार्थं गङ्गमाटः पूगपत्रनिर्मितं व्यजनं पार्श्वे स्थापितवान् आसीत् । मम पिता अर्धसंज्ञावस्थायाम् आसीत् ।

"अहं यानम् आनीतवान् अस्मि एव । एतं मैसूरुनगरं नेष्यामि" इति अहम् उक्तवान् ।

"किमर्थं तत् ? यदि इहलोकसम्बन्धः इतोऽपि अवशिष्टः स्यात् तर्हि सः रात्रिमात्रं जीवेत् । मुम्बयीनगरं प्रति नीतं चेदपि ततोऽपि अधिकं न जीवेत् एव सः । एवं स्थिते किं नयनेन ? यानस्य कम्पनात् मार्गे एव सः मरणं प्राप्नुयात् किम् ?" इति उक्तवान् गङ्गमाटः । अहं कार्चालकाय धनं दत्त्वा तं प्रेषितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रस्थानसमये लिल्ली शय्यया सह विशालं मशकजालम् अपि स्थापितवती आसीत् । खादनार्थं द्वित्रान् बिस्किट्बन्धान् अपि स्थापितवती आसीत् सा। मया अस्वस्थाय दातुं कानिचन नारङ्गफलानि क्रीतानि आसन् । 'मम शय्यां प्रसार्य तदुपरि एतं शाययामि' इति अहम् उक्तवान् । ''रात्रिमात्रं जीवते शय्यासौभाग्यं किमर्थम् ?'' इति गङ्गमाटः पृष्टवान् ।

कटतः शय्यां प्रति नयनसमये जायमानां श्रान्तिं सोढुम् अपि मम पितरि शक्तिः न दृश्यते स्म । अतः मलिनम् आच्छादकम् अपनीय मया आनीतम् आच्छादकं तदुपरि अहं प्रसारितवान् । भित्तौ आणिं योजयित्वा मशकजालम् अपि प्रसारितम् । गङ्गमाटेन उष्णीकृतं क्षीरं किञ्चित् पायितम् । अर्धभागः बहिः आगच्छति स्म ।

पिता मया एकादशवर्षेभ्यः पूर्वं दृष्टः आसीत् । इदानीं तस्य शरीरम् अतिकृशं जातम् आसीत् । तस्य शरीरे महता प्रयत्नेन अपि बिन्दुमात्रं रक्तं, मुष्टिमितं मांसं वा अन्वेष्टुं शक्यं न आसीत् । मुखं दन्तहीनम् आसीत् । शिरसि एकोऽपि केशः न दृश्यते स्म ।

अन्धकारः यदा प्रसृतः तदा गङ्गमाटः नेयदीपं ज्वालितवान् । तावता तस्य पुत्रः आगतः । 'एतस्य निमित्तं गृहे पाकं सज्जीकुर्वन्तु' इति पुत्रं सूचितवान् सः । अहं भोजनं निराकृतवान् । गङ्गमाटः पुनः पुनः अनुरोधं कृतवान् । अन्ते अहं - 'मया आनीतानि बिस्किटानि खादिष्यामि । किञ्चित् क्षीरम् आनाययतु । तावता अलम्' इति उक्तवान् । कूप्या आनीतं मृत्तैलं नेयदीपे स्थापयित्वा प्रतिगतवान् तदीयपुत्रः ।

आवाम् आरात्रि सम्भाषणं कृतवन्तौ । मध्ये मध्ये रोगिणम् अपि पश्यन्तौ आस्व । कदाचित् रोगी प्राप्तसंज्ञः जातः । कान्तिहीनाभ्यां नेत्राभ्याम् आवां दृष्टवान् सः ।

''भवतः पुत्रः उपस्थितः अस्ति'' इति तस्य कर्णसमीपे उक्तवान् गङ्गमाटः ।

कथनस्य अवगमनस्य चिह्नं तस्य मुखे दृष्टम् । तस्य इहलोकव्यापारसमाप्तिं प्रतीक्षमाणौ आवाम् उपविष्टवन्तौ । गङ्गमाटः तदीयजीवनगाथां श्रावितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''पत्न्याः मरणस्य अनन्तरं तेन जीवने विरक्तिः प्राप्ता । पूर्वं यः मन्दिरे वसति स्म सः संन्यासी षण्मासेभ्यः पूर्वम् एव सञ्चारार्थं निर्गतः आसीत् । ग्रामे स्थातुं भवतः पितुः इच्छा न आसीत् । अतः सः एकदा कमपि अनुक्त्वा यावन्ति लब्धानि तावन्ति आभरणानि स्वीकृत्य गृहात् पलायितवान् । आभरणानि विक्रीय बेङ्गलूरुनगरे कानिचन दिनानि स्थितं तेन । यदा हस्तः रिक्तः जातः तदा तिरुपतिं प्रति गतम् । रिक्तहस्तस्य विषये वेङ्कटेशः प्रसन्नः न जातः । अतः तेन भोजनप्राप्तिः अपि दुष्करा जाता । अत्रान्तरे क्षेत्रदर्शनार्थम् आगतात् परिचितात् कस्माचित् रूप्यकद्वयं प्राप्य व्याममिता तन्त्री क्रीता । कथञ्चित् प्रयत्नेन शुष्कम् अलाबु, वेणुदण्डः, मधूच्छिष्टं च सम्पाद्य कौशलेन एकम् एकतन्त्रीवाद्यं सज्जीकृतम् । तदीयः कण्ठः उत्तमः । तत्त्वगीतानि मुखे आसन् एव । अतः ग्रामं ग्रामं गच्छन् गीतं गायन् भक्तिं च बोधयन् सः सञ्चारम् आरब्धवान् । ग्रामे भक्ताः पाकार्थं तस्मै वस्तूनि यच्छन्ति स्म ।

गच्छता कालेन शरीरे काषायवस्त्रम् आगतम् । यत्र प्राप्यते तत्र भोजनम् अपि आरब्धम् । सर्वजातीयेषु अपि गृहेषु तेन भोजनं कृतम् । एवं दश वर्षाणि यावत् तेन दक्षिणभारते सञ्चारः कृतः । दक्षिणभारतीयाः सर्वाः अपि भाषाः तेन ज्ञाताः ।

गतेषु त्रिषु मासेषु कदाचित् अस्वास्थ्यं प्राप्तम् । ततः उपशान्तिः तु प्राप्ता । तदीयं मनः अवदत् - इहलोकव्यापारः दीर्घकालं न अनुवर्तिष्यते इति । 'जन्मस्थले एव प्राणत्यागः करणीयः' इत्येषः सङ्कल्पः तम् अत्र आनयत् । पक्षात् पूर्वं सः ज्वरसहितः एव एतं ग्रामम् आगतवान् । अत्रैव शयानः कश्चित् उद्दिश्य - 'गङ्गमाटः अस्ति किम्.?' इति अपृच्छत् । तस्य द्वारा वार्ता ज्ञात्वा अहम् अत्र उपस्थितः । एतस्मिन् ग्रामे स्थिताः सर्वे तत्परिचिताः एव । बहवः अत्र आगत्य एतं दृष्ट्वा गताः । किन्तु कोऽपि स्वगृहं प्रति तं न आहूतवान् । दिनत्रयात् पूर्वम् अस्वास्थ्यं तीव्रतां गतम् । एतस्मिन् एव मन्दिरे प्राणाः त्यक्तव्याः इति तस्य चरमेच्छा । अतः एषः मया अन्यत्र न नीतः ।''

गङ्गमाटः आ बहोः कालात् मम पितुः शिष्यः एव । उभौ अपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वम् अत्र वसतः संन्यासिनः शिष्यौ आस्ताम् ।

इदानीं यमपुरीं प्रति प्रस्थितस्य स्वामिनः सेवां वृद्धः गङ्गमाटः श्रद्धया कुर्वन् अस्ति । रात्रौ अपि एकाकितया तस्य पार्श्वे विना निद्रां तिष्ठति स्म सः । गतासु षट्सु रात्रिषु तेन निद्रा एव न कृता ।

''भवान् क्रिस्तमतावलम्बी जातः अस्ति इति ग्रामे सर्वे जानन्ति । एतं ग्रामं प्रति एषु दिनेषु आगतः माध्यमिकविद्यालयस्य अध्यापकः भवतः विद्यालयस्य भूतपूर्वच्छात्रः । सः भवतः सङ्केतं जानाति स्म । तस्य द्वारा एव मया भवते तन्त्रीवार्ता प्रेषिता । जातिभ्रष्टस्य मुखं द्रष्टुम् अहं न इच्छामि इति पूर्वं भवतः पिता वदति स्म । ह्यः प्रातः यदा पुनः पृष्टं तदा 'आनाययतु तम्' इति सः सूचितवान् । जातिः या काऽपि भवतु, पितापुत्रसम्बन्धः कथं नश्येत् ? जन्मदाता पिता खलु सः ? तदस्तु, वत्स ! भवता किमर्थं क्रैस्तमतम् अवलम्बितम् ? ब्राह्मणकुले जातः भवान् किमर्थम् एवं कृतवान् ?'' इति पृष्टवान् सः । मया उत्तरं किमपि न उक्तम् ।

प्रातः चतुर्वादनसमये मम पितुः श्वासनिष्क्रमणकालः सन्निहितः । मुखतः शब्दः श्रूयते स्म । 'अन्तिमक्षणः सन्निहितः । मुखे किञ्चित् जलं पातयतु वत्स !' इति सूचितवान् गङ्गमाटः ।

तेन दत्तं चषकं गृहीत्वा अहम् आसन्नमरणस्य पितुः समीपं गतवान् । सः संज्ञावान् आसीत् इति भाति । मया दत्तं जलम् अन्तः यथा न गच्छेत् तथा मुखं सुदृढं पिहितवान् सः । गङ्गमाटः मम मुखं दृष्टवान् । चषकं स्वहस्तेन स्वीकृत्य सः - ''किञ्चिज्जलं पाययामि । मुखम् उद्घाटयतु श्रीमन्'' इति उक्तवान् ।

पित्रा किञ्चिदिव मुखम् उद्घाटितम् । गङ्गमाटेन दत्तस्य जलस्य अर्धभागः अन्तः गतः । अवशिष्टं बहिः आगतम् । 'मम हस्तात् सः जलं पातुं न इच्छति स्म' इत्यंशः गङ्गमाटेन अपि अवगतः ।

श्वासोत्क्रमणवेगः अधिकः जातः । दशनिमेषाभ्यन्तरे सः क्रमेण क्षीणतां गतः । मुखे शून्यभावः दृश्यते स्म । नेत्रे यद्यपि उद्घाटिते आस्तां तथापि एतल्लोकीये कस्मिंश्चित् अपि वस्तुनि अलग्नं भासेते स्म ते ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षीणतां गतः श्वासः शान्तः जातः, प्रशान्तः जातः । शरीरयातना पूर्णतः स्थगिता ।

गङ्गमाटस्य नेत्रे सजले जाते । 'समाप्ता भवतः पितुः कथा' इति सगद्गदम् उक्त्वा अश्रूणि मार्जितवान् सः । दशनिमेषानन्तरम् आत्मानं समाधाय सः शवस्य हस्तपादौ पुटीकृतवान् । मन्दिरस्य पुरतः काष्ठखण्डान् मेलयित्वा अग्निं ज्वालितवान् सः ।

प्रातः कासारं प्रति गच्छन्तः जनाः अग्निं दृष्ट्वा तत्र आगताः । ग्रामप्रमुखः अपि आगतः । स एव मम अभिज्ञानं प्राप्य वार्तालापं कृतवान् । जीवतः सम्पत्तिम् उपायेन वशीकृतवान् सः मृतस्य संस्कारार्थं साहाय्यं कर्तुम् उत्साहेन उद्युक्तः । जनान् मेलयित्वा काष्ठसङ्ग्रहार्थं सः निर्गतः । अष्टवादने ग्रामस्य ब्राह्मणाः तत्र आगताः । किन्तु तेषु कोऽपि शवसमीपं न गतवान्, न स्पृष्टवान् वा । गङ्गमाटात् ऋते कस्यापि सम्बन्धः मम पितुः न आसीत् इति अभासत ।

ग्रामस्य कासारस्य पार्श्वे आम्रोद्यानस्य निकटे स्थिते श्मशाने काष्ठसङ्ग्रहं कृत्वा आगत्य 'सर्वं सिद्धम्' इति वार्तां श्रावितवान् ग्रामप्रमुखः । श्मशानं प्रति शवस्य नयने साहाय्यं कर्तुं कोऽपि अग्रे न आगतः । तत्र ब्राह्मणाः, लिङ्गायताः, गौडाः, तन्तुवायाः इत्यादयः एव उपस्थिताः आसन् । मृतः तु तत्तज्जातीयानां सर्वेषां गृहे कृतभोजनः संन्यासी एव । तस्य स्पर्शः कस्यापि पावित्र्यं न नाशयति स्म ।

ग्रामप्रमुखः एकं शकटम् आनायितवान् । गङ्गमाटस्य साहाय्येन शवं शकटे आरोप्य अहं तत् श्मशानं नीतवान् । कः अग्निस्पर्शं कुर्यात् इत्ययम् अंशः अचर्चितः अपि निर्णीतः आसीत् इव । गङ्गमाटः एव चितायाम् अग्निस्पर्शं कृतवान् । घण्टाभ्यन्तरे कार्यं समाप्तम् ।

द्वादशवादनयानेन अहं प्रतिप्रस्थितवान् । गङ्गमाटस्य पुत्रः एकां रोटिकां काफीं च आनीतवान् । रोटिका न अरोचत । काफी पीता । गङ्गमाटः शय्याम् उन्नीय मया सह स्थानकपर्यन्तम् आगतवान् । मार्गे माध्यमिकशालाध्यापकः मिलितवान् । सः एव तन्त्रीवार्ता प्रेषितवान् आसीत् । सः स्वपरिचयम् उक्तवान् । सः नञ्जुण्डस्य मित्रम् अपि । तस्य मुखात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञातं यत् नञ्जुण्डः इदानीम् अरसीकेरेनामके उपमण्डले सत्यनकोप्पलुग्रामे वसति इति । तं ग्रामं प्रति गमनार्थं केन यानेन गत्वा कुत्र अवतरणीयम् इत्यादिकमपि सः सूचितवान् । शालारम्भसमयः आसन्नः इत्यतः सः ततः गतवान् । आवां स्थानकं प्राप्तवन्तौ । द्वादशवादने यानागमनशब्दः श्रुतः । गङ्गमाटे मम भक्तिः उदिता । अहं तस्य पादौ स्पृष्ट्वा नमस्कृतवान् ।

सर्पदर्शनात् इव भीतः सः पदद्वयं पृष्ठतः गत्वा - ''किम् एतत् कृतं वत्स ! अलम् अकृत्येन । भवान् जात्या ब्राह्मणकुले जातः । भवता मम पादौ स्पृष्टौ चेत् मम अहितं स्यात्'' इति उक्तवान् । 'ममापि कालः अतीतः इव । देवः यदा आह्वयति तदा गन्तुम् अहं सिद्धः अस्मि' इति सः यावत् वदन् आसीत् तावता लोकयानम् आगतम् । अहं यदा आरुह्य उपविष्टवान् तदा सः 'गमिष्यति वा वत्स !' इति उक्तवान् । तत्काले तस्य नेत्रे सजले आस्ताम् ।

मम पितुः गङ्गमाटस्य च न समानं कुलं, न वा समाना जातिः । तयोः स्वभावे अपि न साम्यम् । गङ्गमाटः आदिनं परिश्रमं कृत्वा सायङ्काले तत्त्वपदानि श्रोतुम् आगच्छति स्म । यथाशक्ति परसेवां करोति स्म च । न जाने मम पितुः गङ्गमाटस्य च कस्य जन्मनः बन्धुत्वम् आसीत् इति, मरणात् पूर्वं सः गङ्गमाटसमीपम् आगतवान् । तेन अन्तिमकाले यदा जलम् अर्पितं तदा प्राणाः त्यक्ताः । औरसः पुत्रः अहम् उपस्थितः आसम् । तथापि मया स्पृष्टं जलं न पीतवान् एव सः ।

मैसूरुप्राप्तिसमये रात्रेः सप्तवादनं जातम् आसीत् । लिल्ली विवरणं किमपि अनुक्त्वा अहं मुख्यांशमात्रं निवेदितवान् । अभूतपूर्वा बुभुक्षा बाधते स्म । अतः भोजनसमये द्विगुणितं भुक्तं मया । रात्रौ शयनसमनन्तरम् एव निद्रा प्राप्ता ।

अनन्तरदिनतः पुनरपि यथापूर्वं मनसः मौढ्यम् । विस्मर्तुं प्रयतमानस्य मम नेत्रयोः पुरतः अन्तिमोदकपानं निराकुर्वतः पितुः चित्रम् एव विलसति स्म । एकादशवर्षात्मके काले तेन सर्वमतीयानां गृहे अपि जलं पीतं स्यात् । भोजनम् अपि कृतं स्यादेव । गङ्गमाटेन दत्तं जलं पीतवतः तस्य दृष्ट्या औरसः पुत्रः अहम् अस्पृश्यः आसम् । पिता-पुत्रसम्बन्धः यादृशः मधुरः भवेत् तादृशः तु आवयोः मध्ये कदापि न आसीत् एव । मम पिता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जीवति इति भावना एव मयि न आसीत् । एवम् अपरिचितः इव स्थितः सः मम जीवने आकस्मिकप्रवेशं कृत्वा वेदनापूर्णं परिणामं जनयित्वा अदृश्यतां गतः आसीत् । मतपरिवर्तनरूपात् एकमात्रकारणात् अहं जन्मदातुः पितुः दृष्ट्या अस्पृश्यः जातः आसम् ।

कुत्रापि सामञ्जस्यं न दृश्यते स्म मया । सर्वं निरर्थकं भासते स्म । मनः झर्झरितम् आसीत् । शालां गतेन मया किं करणीयम् इति न ज्ञायते स्म । थामसस्य निर्देशानुगुणं सर्वं प्रचलति स्म । मुख्यलिपिकारः यत्र सूचयति तत्र अहं हस्ताक्षरमात्रं करोमि स्म यान्त्रिकतया। अन्ये अध्यापकाः 'आरोग्यं सम्यक् नास्ति किम् ?' इति पृच्छन्ति स्म । किन्तु विना कारणम् अहं तेषु कोपं दर्शयामि स्म । मयि जातम् एतत् परिवर्तनं ज्ञात्वा ते मम प्रकोष्ठं प्रति आगमनम् एव परित्यक्तवन्तः ।

तेषु दिनेषु अहं कथम् आसम् इति स्मरन् अद्यापि लज्जाम् अनुभवामि । मम पत्नी वदति स्म - 'रात्रौ भवान् दन्तान् घर्षयति स्म । निद्रामग्नः स्वप्नवचनानि किमपि किमपि वदति स्म' इति । रात्रौ यदा कदापि जागरणं भवति स्म । मम स्वभावसहजः मार्दवभावः ह्रासं गच्छन् आसीत् । विना कारणं लिल्ल्याः विषये अपि कोपं करोमि स्म । तया कृतः पाकः न रोचते स्म । तस्याः सम्भाषणस्य श्रवणात् कोपः वर्धते स्म ।

एकदा प्रातः उत्थाय मुखं प्रक्षाल्य प्रत्यागमनतः पूर्वं लिल्ली शय्यां पुटीकृतवती आसीत् । 'माम् अपृष्ट्वा किमर्थं शय्या पुटीकृता ?' इति ताम् अहं कोपेन तर्जितवान् । अन्यस्मिन् दिने सा मम प्रावारकम् उद्बन्धके असंस्थाप्य पेटिकायां स्थापितवती आसीत् । तदर्थं कोपं प्राप्य अहं प्रावारकम् अधृत्वा एव विद्यालयं गतवान् ।

विनाकारणं कोपः न करणीयः इति अहं जानामि स्म । शान्ततया उपविश्य यदा चिन्त्यते तदा मदीयः दोषः स्वयं ज्ञायते स्म । कदाचित् अहं लिल्ल्याः हस्तं गृहीत्वा क्षमां प्रार्थितवान् ।

''अहं सर्वं ज्ञातुं शक्नोमि । भवान् तूष्णीं तिष्ठतु । भवतः मनः तपति निरन्तरम् । तदर्थम् एव एतत्सर्वं प्रचलति'' इति वदन्ती लिल्ली अश्रूणि स्रावितवती । एतदनन्तरम् अर्धघण्टाभ्यन्तरे एव अहं विनाकारणं तां तर्जितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पितुः इव मातुः अपि स्मरणं पौनःपुन्येन भवति स्म । यदि माता जीविता स्यात् तर्हि आवयोः मध्ये प्रीतिवात्सल्ययोः बन्धः सुदृढः अभविष्यत् । तदा प्रायः मम जीवनम् एतादृशं न अभविष्यत् । एतानि सर्वाणि ऊहारेखाभिः लिख्यमानानि चित्राणि ! मातुः चित्रं यदा मनःपटले भवति स्म तदा शकुन्तला स्मृतिपथम् आयाति स्म । शकुन्तला मातरम् एव अनुकरोति स्वभावेन गुणेन आकारेण च । सा वा द्रष्टव्या इति विचारः मनसि आगतः । तस्याः विषये मया अनौचित्यम् आचरितम् इति मनः वदति स्म ।

कदाचित् मध्यरात्रसमये मया जागरणं प्राप्तम् । अहं लिल्लीम् उत्थाप्य- ''मम भगिन्याः गृहं गच्छाव । अरसीकेरेनगरं प्रति गमनार्थं प्रातः षड्वादने एकं लोकयानम् अस्ति । तेन गन्तव्यम् । तदर्थं भवती सिद्धा भवतु'' इति सूचितवान् ।

सा क्षणकालं विचिन्त्य उक्तवती- 'भवान् एकाकी गत्वा आगच्छतु ।'

मम कोपः आगतः । अहं तां कपोले प्रहृत्य - 'भवती धनिकपुत्री । मम भगिनी निर्धनकुलीया । अतः तत्र गमनम् अवमानकरं खलु ?' इति गर्जितवान् ।

लिल्ली अञ्चलेन अश्रूणि मार्जितवती । ताडितं यत् तदर्थं मया पश्चात्तापः अनुभूतः । तस्याः सान्त्वनं कृतं मया ।

''एतदवसरे भवान् एकः एव गत्वा आगच्छतु । आगमनसमये भगिनीम् अपि अत्र आनयतु । पुनः कदाचित् उभौ अपि मिलित्वा गच्छाव'' इति सूचितवती सा ।

तस्याः सूचना युक्ता इति अभासत । षड्वादनयानेन गमनार्थं सा शय्यावस्त्रादीनि सज्जीकृतवती । 'यदि तत्र वासः प्रियः भवति तर्हि सप्ताहं यावत् वा भवता तत्र स्थातव्यम्' इति उक्त्वा विद्यालयाय विरामपत्रं लिखित्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मम हस्ताक्षरं स्वीकृतवती सा । षड्वादने मार्गे गच्छत् एकम् अश्वशकटम् आहूय माम् उपवेश्य सा अपि उपविष्टवती । यानस्थानके फलपुष्पादीनि क्रीत्वा मम स्यूते स्थापितं तया । 'स्वास्थ्यविषये जागरूकता भवतु' इति संसूच्य गृहं गतवती सा ।

अरसीकेरेनगरं प्राप्य अहं सिरानगरीये याने उपविष्टवान् । निर्वाहकः यदा पृष्टः तदा तेन उक्तम् - ''इतः अष्टादशमैल्दूरे अस्ति सत्यनकोप्पलुग्रामः । यानात् अवतीर्य मैल्दूरं पादाभ्यां गतं चेत् स च ग्रामः प्राप्यते । ग्रामं प्रति गमनार्थं शकटमार्गः अस्ति'' इति । 'सत्यनकोप्पलुस्थानके माम् अवतारयतु' इति तं संसूच्य अहं मम स्थाने उपविष्टवान् । मध्याह्ने द्विवादने सत्यनकोप्पलुस्थानके अहं यानात् अवतीर्णः । मम अवतरणसमनन्तरम् एव मनसि विचारः आगतः - 'किमर्थं मया अत्र आगतम् ? प्रतिगमनम् एव वरम्' इति । 'एतावद्दूरम् आगत्य शकुन्तलाम् अदृष्ट्वा प्रतिगमनं न युज्यते । मम अद्वितीया भगिनी सा । तस्याः दर्शनानन्तरं वर्षद्वयम् अतीतम् । अतः सा द्रष्टव्या एव' इति निश्चितवान् अहम् । ततः अनतिदूरे द्वौ बालकौ क्षेत्रे कार्यं कुर्वन्तौ दृष्टौ मया । तयोः अन्यतरम् आहूय - ''सत्यनकोप्पलुपर्यन्तं मम वस्तूनि नीयन्ते चेत् रूप्यकद्वयं दास्यामि'' इति अहम् उक्तवान् । ज्येष्ठः बालः एतत् अङ्गीकृत्य मम बन्धम् उन्नीतवान् ।

तं ग्रामं प्रति यः मार्गः अस्ति सः नारिकेलोद्यानमध्ये प्रसृतः अस्ति । ग्रामः यदा आसन्नः तदा एकं क्रिस्तमन्दिरं दृष्टिगोचरं जातम् । बालकः माम् उक्तवान् - 'एषः क्रैस्तबहुलः ग्रामः' इति । ग्रामं प्रविश्य अहम् एकां क्रैस्तमहिलां पृष्टवान् - ''अध्यापकस्य नञ्जुण्डस्वामिनः गृहं कुत्र ?'' इति ।

सा पूर्वदिशं हस्तेन निर्दिशन्ती - ''एतेन मार्गेण फर्लाङ्गद्वयमितं दूरम् अतिक्रान्तं चेत् कासारः लभ्यते । तत्पार्श्वे शाला अस्ति । शालायाः पार्श्वे एव तस्य गृहम्'' इति सूचितवती ।

मध्याह्नस्य घोरे आतपे पुनः अग्रे गतं मया । मया सह आगतः भारवाहकः बालकः अपि श्रान्तः आसीत् । शकुन्तलादर्शनकुतूहलेन अहं वेगेन पदानि स्थापितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मार्गे मिलितात् कस्माचित् कृषिकात् ज्ञातं यत् शालायाः पृष्ठतः स्थितायां गृहपङ्क्तौ प्रथमगृहम् एव नञ्जुण्डस्य इति । तद्दिने भानुवासरः इत्यतः शालापरिसरे कोऽपि न आसीत् । अहं साक्षात् नञ्जुण्डस्य गृहं गतवान् । गृहस्य द्वारं पिहितम् आसीत् । द्वारस्य उपरि नञ्जुण्डस्य नाम आसीत् । सुधाखण्डेन त्रिपुण्ड्रं विलिख्य 'श्वः आगच्छ' इत्यपि लिखितम् आसीत् तत्र । तदुपरि आंग्ललिप्या WEL COME इत्यपि लिखितम् आसीत् । अहं द्वारसमीपं गत्वा शब्दं कृतवान् ।

अन्तर्भागतः ध्वनिः श्रुतः - ''कः तत्र ?'' एषः कण्ठस्वरः शकुन्तलायाः एव ।

''अहम्'' - मया उक्तम् ।

शकुन्तला - ''सः अद्य वार्तालापं न करोति । पुनः कदाचित् आगम्यताम्'' इति उक्तवती ।

मुखे शीतजलं पातितम् इव । उत्साहेन वात्सल्येन च एतावद्दूरम् आगतस्य मम एतादृशः तिरस्कारः ! 'धिक् भगिनीम्, धिक् एतान् बान्धवान् !' इति स्वगतं वदन् अहं प्रतिगन्तुम् उद्युक्तः । शय्याबन्धम् आनीतवान् बालकः मन्दम् आगच्छन् आसीत् । 'शय्याबन्धं मार्गपर्यन्तं प्रतिनेतव्यम्' इति अहं तं सूचितवान् । सः किमपि वक्तुम् उद्युक्तः ।

''अलं किमपि कथनेन । पुनरपि रूप्यकद्वयं दास्यामि । मया यथा उक्तं तथा आचरतु'' इति अहं सूचितवान् ।

श्रान्तः अपि सः माम् अनुसृतवान् । ग्राममध्ये स्थिते मार्गे गमनसमये बह्व्यः महिलाः मां दृष्टवत्यः । द्वित्राः पुरुषाः मां पृष्टवन्तः - 'कुतः आगमनम् ?' इति । अहं किमपि उत्तरम् अदत्त्वा अग्रे गतवान् ।

'प्रपञ्चे स्थितः एषः भगिनीभ्रातृसम्बन्धः एव मिथ्या । महता प्रेम्णा आगतम् अग्रजं निर्दाक्षिण्यं तिरस्कृत्य प्रतिप्रेषितवती शकुन्तला । वस्तुतः मया अत्र आगतं यत् सः एव दोषाय । अहम् इदानीम् अन्यजातीयः अस्मि । मां सा कथं वा गृहम् आहूय सत्कुर्यात् ?'

उपरि फाल्गुनमासस्य सूर्यः तपति स्म । अधः भूमिः तापयति स्म । वाटिकामार्गे गमनसमये अल्पा छाया प्राप्यते स्म । शय्याबन्धं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वहन् बालकः इतोऽपि न आगतः इत्यतः अहं विश्रान्त्यर्थं वृक्षस्य छायायां किञ्चित् स्थितवान् । तावता वाटिकातः कश्चन कृषिकः मत्समीपम् आगतवान् । 'ग्रामे अग्निपेटिकां धूमवर्तिकां वा प्राप्तुम् एवं जनाः समीपम् आगच्छन्ति । अतः तादृशः एव कश्चित् स्यात्' इति चिन्तितं मया ।

सः पृष्टवान् - ''कुतः आगतम् ?''

''मैसुरुतः''

''कुत्र गतम् आसीत्...?''

मया उत्तरं किमपि न उक्तम् । किं वक्तव्यम् इत्यपि न ज्ञातम् । स तु एतस्य ग्रामस्य प्रमुखेषु अन्यतमः इव भासते स्म । नञ्जुण्डविषये दोषारोपणं कर्तुं मम इच्छा न आसीत् । असत्यं किमपि उक्तं चेत् एतेन ज्ञायेत एव ।

मम मौनं दृष्ट्वा सः पुनः पृष्टवान् - ''इदानीं कुत्र गम्यते ?''

''अरसीकेरेनगरं प्रति ।''

''तत्र गमनार्थं सायं पञ्चवादनात् पूर्वं किमपि यानं नास्ति ।''

मम उपरि आकाशः एव पतितः इव !

''आगच्छतु मया सह । एषा वाटिका ममैव । नारिकेलजलं वा पिबतु । भवतः मुखस्य दर्शनात् भासते यत् भवतः भोजनम् अपि न समाप्तम् इति ।''

तस्य कथनशैली प्रिया आसीत् । निराकरणे मतिः न उत्पन्ना । भगिन्यां यत् न दृष्टं तत् प्रेम एतस्मिन् दृश्यते स्म । तावता बन्धनेता बालकः उपस्थितः । आवाम् उभौ अपि स्ववाटिकां नीतवान् सः कृषिकः। वेणुदण्डसाहाय्येन नारिकेलानि पातयित्वा उभयोः कृते अपि पातुं दत्तवान् सः । नारिकेलजलपानात् श्रान्तिः अपगता । प्रावारकम् अपनीय शय्याबन्धम् आलम्ब्य अहं वृक्षच्छायायाम् उपविष्टवान् ।

मम पार्श्वे उपविश्य सः कृषिकः पृष्टवान् - ''कुत्र गतमासीत् तत्रभवता ?'' इति ।

''कुत्रचित् गतवान् आसम् । किं तद्विषये कथनेन ?'' इति झटिति मया उक्तम् । तदा सः मौनम् आश्रितवान् । 'मम मनसः वेदना एतत्समीपे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वक्तव्या' इति इच्छा अनन्तरक्षणे मयि उत्पन्ना ।

''एतस्मिन् ग्रामे निवसतः नञ्जुण्डस्वामिनः पत्न्याः अग्रजः अहम् । भगिनीं द्रष्टुं तद्गृहं गतवान् आसम् । द्वारताडनशब्दं श्रुत्वा मम भगिनी एव 'सः अद्य वार्तालापं न करोति । पुनः कदाचित् आगम्यताम्' इति माम् उक्तवती । खेदेन प्रत्यागतं मया ।''

''एवं तर्हि सत्यनारायणनामकः भवान् एव ?''

''आम्''

''शय्यां बालकेन वाहयित्वा गच्छन् भवान् मया दूरतः एव दृष्टः । सूट्वेषं धृत्वा आगन्तुम् अर्हः अस्मद्ग्रामस्य बन्धुषु कोऽपि नास्ति । अतः भवान् अध्यापकस्य बन्धुः मित्रं वा स्यात् इति मया चिन्तितम् आसीत् । भवतः प्रत्यागमनं दृष्ट्वा मया आश्चर्यं प्राप्तम् । तत् आस्तां तावत् । भवतः आगमनवार्ता भगिन्या आवुत्तेन वा ज्ञायते स्म किम् ?''

''न''

''भवता द्वारताडनशब्दमात्रं कृतम्, उत सम्भाषणम् अपि कृतम् ?''

''द्वारताडनशब्दं श्रुत्वा 'कः तत्र ?' इति यदा पृष्टं तदा 'अहम्' इति उत्तरं दत्तं मया ।''

''अहम् इति एतावदेव उक्तम् । नाम न उक्तम् ।''

क्षणकालस्य चिन्तनस्य अनन्तरं सः उक्तवान् - ''श्रीमन्, भवतः मुखस्य दर्शनात् भासते यत् भवान् कोपवशात् विशेषचिन्तनम् अकृत्वा प्रत्यागतः इति । अद्य तस्मिन् गृहे त्रयोदशाहकार्यक्रमः प्रचलति । ह्यः अहम् एव अस्माकं वाटिकातः कदलीपर्णानि कदलीफलानि कदलीस्तम्भसारं च प्रेषितवान् अस्मि । ब्राह्मणगृहे और्ध्वदैहिककार्यक्रमसमये अन्यजातीयैः सह वार्तालापः न क्रियते । केनापि अन्यजातीयेन आगतं स्यात् इति मत्वा तया तथा उक्तं स्यात् इति अहं भावयामि । अग्रजः उपस्थितः अस्ति इति सा कथं वा जानीयात् ? मम तु भाति यत् भवता एव अन्यथा गृहीतम् इति ।''

आकाशं पश्यन् अहं तस्य कृषिकस्य वचनं पर्यालोचितवान् । तस्य कथने सामञ्जस्यं दृश्यते स्म । कोपवशात् मया सहसा प्रवृत्तम् आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'कः' इति तया यदा पृष्टं तदा मया मदीयं नाम न उक्तम् आसीत् ।

''भवता युक्तम् उक्तं श्रीमन् !''

''किञ्चित् विश्रम्य तत्र पुनः गन्तुम् अर्हति भवान्'' इति उक्तवान् सः कृषिकः । बालकाय चत्वारि रूप्यकाणि दत्त्वा तं प्रेषितवान् अहम् ।

तस्य कृषिकस्य मुखात् एव तदीयः परिचयः जातः । ''मम नाम दिस्तीनगौडः इति । सत्यनकोप्पलुग्रामस्य प्रमुखः अस्मि अहम् । एतस्मिन् ग्रामे पादोनभागजनाः क्रैस्तमतीयाः । पञ्चाशद्वर्षेभ्यः पूर्वम् एतस्य ग्रामस्य नाम सुङ्कनहळ्ळि इति आसीत् । मतान्तरस्वीकारः आधिक्येन यदा प्रवृत्तः तदा एतस्य ग्रामस्य नाम परिवृत्तं जातम् ॥''

चतुर्वादनसमये अहं दिस्तीनगौडेन सह नञ्जुण्डस्य गृहं प्रति प्रस्थितवान् । ग्रामप्रवेशानन्तरं स्वगृहं प्रदर्श्य 'विरामसमये अत्र आगन्तव्यम्' इति निमन्त्रितवान् सः । दिस्तीनगौडस्य कर्मकरः शय्याबन्धं स्वीकृतवान् आसीत् । नञ्जुण्डस्य गृहपर्यन्तम् अपि आगतवान् दिस्तीनगौडः । नञ्जुण्डः तत्समये गृहे न आसीत् । अतः गौडः एव 'अम्ब !' इति आहूतवान् । शकुन्तला पाकशालातः आगतवती । 'भवत्याः अग्रजम् आनीतवान् अस्मि' इति यदा गौडः उक्तवान् तदा शकुन्तला मां दृष्टवती । ''इदानीं आगतं किम् ?'' इति मां पृष्टवती च ।

गृहे श्राद्धचिह्नानि दृश्यन्ते स्म । भित्तेः पार्श्वे द्रोणाः, दर्भाः, अन्ये श्राद्धपरिकराः च स्थापिताः दृश्यन्ते स्म । भूमौ तिलाः पतिताः दृश्यन्ते स्म । शकुन्तला मम उपवेशनार्थं कटं प्रसारितवती । पाकशालातः आगता रङ्गाम्बा - ''कुशलं खलु ?'' इति पृष्टवती । सा शकुन्तला च शुचिव्रतिन्यौ आस्ताम् । मया आनीतानि फलपुष्पादीनि अहं तयोः पुरतः स्थापितवान् । तानि स्वीकृत्य उभे अपि अन्तः गतवत्यौ । पाकशालाकार्याणि असमाप्तानि दृश्यन्ते स्म । गौडः स्वगृहं गतवान् ।

बहिः अहम् एकः एव आसम् । पञ्चनिमेषाभ्यन्तरे नीरसता उत्पन्ना । तावता नञ्जुण्डस्य अनुजः कदलीपत्रबन्धं गृहीत्वा अन्तः आगतवान् । प्रायः सः मां न अभिज्ञातवान् स्यात् । अभिज्ञातवान् स्यात् चेदपि सः मया सह धैर्येण वार्तालापं न अकरिष्यत् । इदानीं सः पञ्चदशवर्षीयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पत्रबन्धम् एकत्र स्थापयित्वा सः पाकशालां प्रविष्टवान् । तावता नञ्जुण्डः अन्तः आगतवान् । हस्ते आर्द्रवस्त्रं, कूर्चसहितं ताम्रपात्रं च आसीत् । आतपात् अन्तः आगमनात् इति भाति, सः मम उपस्थितिं न लक्षितवान् । अहम् एव तं पृष्टवान् - ''किं पिण्डत्यागार्थं गतम् आसीत् ?'' इति ।

झटिति मां दृष्ट्वा सः - ''सत्य ! कदा आगतं भवता ?'' इति पृष्टवान् । पितरम् अनुसृत्य चतुर्वर्षीयः तदीयः पुत्रः अपि अन्तः आगतवान् । तं समीपम् आहूय अहं चाकलेहान् दत्तवान् । हस्तस्थानि वस्तूनि अन्तः स्थापयित्वा बहिः आगतः नञ्जुण्डः भित्तिपार्श्वे उपविश्य कुशलप्रश्नान् पृष्टवान् । 'केन यानेन आगतम् ?' इति तेन पृष्टम् । 'मया अष्टमासेभ्यः पूर्वम् अत्र आगतम्' इति उक्तवान् सः ।

अन्तः गतः सः ततः एव - 'हस्तपादं प्रक्षालयतु सत्य' इति सूचितवान् । गृहस्य पुरतः अनतिदूरे एव कासारः दृश्यते स्म । 'एषोऽहं कासारसमीपं गत्वा आगच्छामि' इति उक्त्वा प्रावारकादिकम् अपनीय अहं ततः निर्गतवान् । मध्ये मार्गं स्मृतं यत् मया प्रोञ्छः न आनीतः इति । अतः अहं प्रत्यागतवान् ।

मम प्रत्यागमनं गृहजनाः न जानन्ति स्म । प्रकोष्ठे प्रचलन् मन्दस्वरोपेतः वार्तालापः मया श्रुतः ।

शकुन्तला उक्तवती - ''अहं पृथक् पाकं सज्जीकरिष्यामि । अद्यतनपाकः सर्वेभ्यः न परिवेषणीयः'' इति ।

नञ्जुण्डः उक्तवान् - ''धिक् भवत्याः सम्प्रदायम् । मया यथा उच्यते तथा क्रियताम् ।''

रङ्गाम्बा उक्तवती - ''अये शकुन्तले ! किम् एतत् ? अति सर्वत्र वर्जयेत् । सः अन्यजातीयः जातः स्यात्, तथापि एतस्य तु सः अधिकारी एव । वस्तुतः तस्यैव अत्र परमाधिकारः । अतः नञ्जुण्डः यथा वदति तथैव अस्तु रे'' इति ।

''अम्ब ! अग्रजे मम प्रीतिः न न्यूना । तथापि प्रीतिः धर्मात् अपि श्रेष्ठा सर्वथा न । अग्रजाय अहं भूरिभोजनम् एव सज्जीकृत्य दातुं सिद्धा अस्मि । दशाधिकविधानि भक्ष्याणि अपि सज्जीकरवाम ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेषां चर्चायाः विषयः मया अवगतः । ब्राह्मणाः श्राद्धार्थं सज्जीकृतं पाकम् अन्यजातीयेभ्यः न यच्छन्ति । तत्रापि शुचिव्रतविषये विशेषश्रद्धावती शकुन्तला क्रिस्तमतीयाय मह्यं प्रसादपाकस्य दाने आक्षेपं कुर्वती आसीत् । अहं प्रोञ्छम् अस्वीकृत्य विना शब्दं प्रतिगतवान् । कासारं गत्वा मुखं प्रक्षाल्य युतकभागेन एव मुखं मार्जितवान् । प्रत्यागमनसमये मम निमित्तं कटं प्रसार्य कदलीपत्रं स्थापितम् आसीत् । अहम् अन्तः गत्वा पर्णस्य पुरतः उपविष्टवान् । नञ्जुण्डः तदनुजः च पाकशालायाम् एव भोजनार्थम् उपविष्टवन्तौ । रङ्गाम्बा एव परिवेषितवती । भोजनसमये सा नञ्जुण्डः च मया सह सम्भाषेते स्म । श्राद्धार्थं सज्जीकृताः सर्वे पदार्थाः मह्यं परिवेषिताः । किन्तु मह्यं भोजनं न अरोचत । 'किमर्थं वत्स ! सङ्कोचः किमर्थम् ! इति पृच्छन्ती रङ्गाम्बा मया निषिध्यमाना अपि अनुरोधपूर्वकं वटकलड्डुकादिकं परिवेषितवती । तां खेदयितुम् अनिच्छन् अहं वटकद्वयं खादितवान् । तक्रान्नखादनसमये नञ्जुण्डः उक्तवान् - ''भवतः गुरुः स्वामिवर्यः अत्रैव अस्ति इदानीम् । स एव अस्माकं मुख्याध्यापकः'' इति ।

चलुवरायपत्तनस्य त्यागानन्तरं सः न दृष्टः आसीत् मया । 'तस्य गृहं कुत्र ?' इति मया पृष्टम् । 'इतः तृतीयमेव तस्य गृहम्' इति उक्तवान् नञ्जुण्डः ।

भोजनानन्तरं कदलीपत्रम् उन्नीय अहम् एव बहिः क्षिप्तवान् । हस्तं प्रक्षाल्य अन्तः आगत्य गोमयेन भोजनस्थलस्य उपलेपनार्थम् अहम् उद्युक्तः ।

तावता बहिः आगता रङ्गाम्बा मम कार्यं दृष्ट्वा - ''किम् एतत् वत्स ! भोजनपत्रं भवता किमर्थम् उन्नीतम् ? उपलेपनं स्थगयित्वा हस्तं प्रक्षालयतु तावत् । किम् एतत् अनुचितं कृत्यं भवतः ?'' इति असन्तोषेण उक्तवती ।

एतत् श्रुत्वा नञ्जुण्डः अपि अन्तर्भागतः उक्तवान् - ''भवान् उपलेपनं मा करोतु सत्य !'' इति ।

अहं तु उपलेपनं पूर्णतः कृत्वा हस्तं प्रक्षालितवान् । 'स्वामिवर्यं दृष्ट्वा आगमिष्यामि' इति उक्त्वा ततः निर्गतवान् च ।

मम आगमनम् एव निरीक्षमाणः स्थितः स्वामिवर्यः - ''आगच्छतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तावत् । भवतः आगमनसमनन्तरम् एव मया वार्ता ज्ञाता । दूरतः भवान् दृष्टः अपि । इदानीं भवतः आगमनं यदि न स्यात् तर्हि अचिरात् एव कश्चित् अप्रेषयिष्यम्'' इति उक्तवान् ।

स्वामिवर्यः इदानीं चत्वारिंशद्वर्षीयः । शिरसि प्रभूततया श्वेतकेशाः दृश्यन्ते । आवाम् उभौ अपि कुशलवार्तालापं कृतवन्तौ । तस्य पत्नी प्रकोष्ठस्य द्वारे स्थित्वा एव मया सह वार्तालापं कृतवती । तस्याः व्यवहारे पूर्वतनस्नेहः न आसीत् । स च स्नेहाभावः मम महार्घवेषकारणतः, उत मम क्रैस्तमतस्वीकारकारणतः इति मया न ज्ञातम् । तयोः पुत्री इदानीं चतुर्दशवर्षीया । सा मां न अभिजानाति स्म । उभौ पुत्रौ अपि स्वामिवर्यस्य स्तः इदानीम् ।

''भवतः आवुत्तः पत्रं लिखितवान् आसीत् किम् ?'' इति वार्तालापमध्ये पृष्टवान् स्वामिवर्यः ।

''किन्निमित्तं तेन लेखनीयम् आसीत् ?''

''पत्रम् अवश्यं लिखतु । सोऽपि उपस्थितः भवतु इति मया सूचितम् आसीत् । 'मम पत्नी मास्तु इति वदन्ती अस्ति' इति सः वदति स्म । अन्ततो गत्वा पत्रं लिखितं खलु तेन ?''

स्वामिवर्यस्य कथनस्य तात्पर्यं मया न अवगतम् । नञ्जुण्डतः मया किमपि पत्रं न प्राप्तम् आसीत् । विवाहानन्तरं तु आवयोः मध्ये पत्रव्यवहारः पूर्णतः स्थगितः आसीत् ।

स्वामिवर्यः पृष्टवान् - ''अद्य वा विषयः ज्ञातः स्यात् खलु ।''

''कः विषयः ?''

''भवतः पितुः श्राद्धस्य विषयः ?''

मया किमपि न अवगतम् ।

''भवतः पितुः मरणस्य वार्ता अष्टदिनेभ्यः पूर्वम् अत्र ज्ञाता । 'पुत्रः तु उत्तरक्रियां कर्तुं न अर्हति । तत्कारणतः मृतस्य आत्मा निर्गतिकः न भवेत्' इति विचिन्त्य नञ्जुण्डस्वामी एव उत्तरक्रियां कर्तुं सिद्धः जातः । अतः एव पञ्चभ्यः दिनेभ्यः पूर्वं तस्य माता अत्र आगता । जामाता अपि पुत्रसमानः । अतः पिण्डप्रदानार्थं जामाता अपि अधिकारी एव ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आ दिनत्रयात् भवतः आवुत्तः विरामे अस्ति । 'अल्पव्ययेन गृहे सर्वं करोतु, महाव्ययं मा चिन्तयतु' इति मया एव सः बोधितः । 'मम पिता तिलोदकप्राप्तिं विना पिशाचत्वं प्राप्स्यति, तस्य सद्गतिप्राप्तिः न भविष्यति' इति वदन्ती भवतः भगिनी रोदिति स्म । इदानीं तस्याः अपि तृप्तिः जाता अस्ति । 'भवते पत्रं लेखनीयम्' इति अहं नञ्जुण्डं सूचितवान् आसम् । तेन न लिखितं चेदपि भवान् तु उपस्थितः । अतः एव पूर्वजाः वदन्ति 'पितृऋणं दूरस्थम् अपि आकर्षति एव' इति । प्रसादः तु लब्धः भवता ।''

सत्यं, मया प्रसादः लब्धः आसीत् । मया निराकृतं चेदपि रङ्गाम्बा बलात् वटकादिकं परिविष्टवती आसीत् । मया अपि वटकद्वयं खादितम् आसीत् ।

''पार्श्वगृहे स्थितः अध्यापकः ब्राह्मणः । अन्ये ब्राह्मणाः पुरोहिताः अनतिदूरे स्थितात् ग्रामात् आगताः आसन् । अद्य त्रयोदशाहश्राद्धं प्रवृत्तम् । श्वः वैकुण्ठसमाराधनं भविष्यति'' इति स्वामिवर्येण उक्तम् ।

सर्वस्य श्रवणात् - 'अत्र मम अनागमनम् एव वरम् अभविष्यत्' इति भावः मम मनसि आगतः । उपस्थितं तु आसीत् एव । 'श्वः अस्थित्वा गमनं न शोभते' इति मया निर्णीतम् ।

''भवान् क्रिस्तमतावलम्बी जातः इति श्रुतम् । कस्याश्चित् अनुरक्तः सन् भवान् एवं कृतवान् इति वार्ता । किम् एतत् सत्यम् ?'' इति पृष्टवान् स्वामिवर्यः ।

मया किम् उत्तरं दातव्यम् ? ''गतं तु गतम् एव । तद्विषये इदानीं वार्तालापः मास्तु'' इति मया उक्तम् ।

''अस्तु । सर्वं विधिविलसितम् । ब्रह्मणा ललाटे यत् लिख्यते तत् परिवर्तयितुं न कोऽपि क्षमः'' इति वदन् सः मौनम् आश्रितवान् ।

तस्मिन् दिने रात्रेः अष्टवादनपर्यन्तम् अपि अहं तेनैव सह वार्तालापं कुर्वन् उपविष्टवान् । रात्रौ नञ्जुण्डगृहम् आगत्य 'मम भोजनेच्छा नास्ति' इति उक्तम् । तथापि नञ्जुण्डेन महान् अनुरोधः कृतः । अतः मया किञ्चित् भुक्तम् । नञ्जुण्डस्य गृहं विशालं न आसीत् इत्यतः शय्यावस्त्रं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वीकृत्य अहं स्वामिवर्यस्य गृहम् आगतवान् । मध्यरात्रपर्यन्तम् अपि आवयोः वार्तालापः प्रवृत्तः ।

'एषः कश्चन कुग्रामः । स्थानान्तरं प्रति गन्तव्यम् इति मया महान् यत्नः अनुष्ठितः। तथापि साफल्यं न प्राप्तम् । अत्र ये चत्वारः अध्यापकाः सन्ति तेभ्यः ऋते इस्पीट्क्रीडार्थम् अत्र अन्यः कोऽपि न उपलभ्यते । एतैः सह क्रीडनसमये जयं प्राप्य यदि मया धनं लभ्येत तर्हि अनन्तरदिने तेषां गृहे पाकार्थं मया एव धनं दातव्यं भवति । ऋणरूपेण दत्तं धनं कष्टेन अपि न प्रत्यागच्छति । मम पत्नी तु 'इस्पीट्क्रीडा सर्वथा मास्तु । अन्येषाम् अध्यापकानां पत्न्यः प्रतिदिनं भवन्तं शपन्ति' इति वदति । अतः मया तत् व्यसनं त्यक्तप्रायम्' इति उक्त्वा - "भवान् क्रीडति किम् ? यदि भवता सा क्रीडा ज्ञायते तर्हि किञ्चित्कालं क्रीडाम तावत्" इति अवदत् ।

"धूमपानस्य अभ्यासः अस्ति किं भवतः ?" इति तेन पृष्टम् ।

"अभ्यासः तु नास्ति । कदाचित् मित्राणाम् अनुरोधतः द्वित्रवारं धूमपानं कृतं स्यात् ।"

"तर्हि स्वीकरोतु एतत् । इदानीम् अपि मत्तः भेतव्यं नास्ति । सङ्कोचः करणीयः नास्ति" इति उक्त्वा धूमवर्तिकाम् एकां सः मह्यं दत्तवान् ।

धूमपाने अपि मया तद्दिने विशेषरुचिः दृष्टा । उषःकाले शीतमारुतस्य कारणतः यदा जागरणं प्राप्तं तदा मया एव पृष्ट्वा अन्या धूमवर्तिका स्वीकृता । प्रातः उत्थाय उभौ अपि बहिः गत्वा मुखं प्रक्षाल्य आगतवन्तौ । तत्पत्न्या सज्जीकृतः उपाहारः उभाभ्यामपि सेवितः ।

स्वामिवर्येण उक्तम् - "भवान् कथञ्चित् उपस्थितः अस्ति एव । श्वः अस्माकं शालायां चर्चाकार्यक्रमं व्यवस्थापयिष्यामि । भवान् आध्यक्ष्यं वहतु" इति ।

मम तु कुत्रापि आसक्तिः न आसीत् । अतः - "तादृशं किमपि मास्तु" इति उक्त्वा काफीं पीत्वा अहं नञ्जुण्डस्य गृहम् आगतः । तत्र काश्चन महिलाः उपस्थिताः आसन् । द्वित्राः ब्राह्मणाः अपि तत्र दृश्यन्ते स्म । अन्तः पाकसन्नाहः प्रचलति स्म । तत्रत्यानां वार्तालापतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मया ऊहितं यत् अद्य भोजनार्थं सप्तत्यधिकाः जनाः उपस्थिताः भवेयुः इति ।

नञ्जुण्डः कश्चित् वृद्धं वदन् आसीत् - ''अत्र तु स्थलस्य अपर्याप्तता । अतः शालायाम् एव भोजनपरिवेषणम् । मुख्याध्यापकः अस्माकं प्रार्थनां पुरस्कृत्य शालायाः विरामं घोषितवान् अस्ति । द्वादशवादने भोजनस्य आरम्भः भवेत् एव । समये उपस्थातव्यम् इति सर्वे सूचिताः खलु'' इति ।

मां दृष्ट्वा सः - ''प्रातः भवतः आनयनार्थं कश्चित् प्रेषितः आसीत् मया । तत्काले भवान् स्वामिवर्येण सह बहिः गतः आसीत् । अये कृष्ण, सत्याय काफीम् आनयतु'' इति उक्तवान् ।

''मम उपाहारः पानीयसेवनं च समाप्तम्'' इति मया सूचितम् ।

''भवतः परिचयः न प्राप्तः'' इति कश्चित् माम् उक्तवान् ।

''एषः मम श्यालः'' इति नञ्जुण्डः एव उत्तरं दत्तवान् ।

एतत् श्रुत्वा पार्श्वस्थौ उभौ परस्परमुखं दृष्टवन्तौ । 'एतादृशे परिसरे स्थितिः कष्टं जनयति' इति मत्वा अहं 'किञ्चित् अटित्वा आगमिष्यामि' इति उक्त्वा ततः निर्गतः । 'मम गृहम् आगच्छतु' इति निमन्त्रितवतः दिस्तीनगौडस्य गृहं प्रति गतं मया ।

तस्य गृहे अपि वध्यचिह्नं गतस्य क्रिस्तस्य चित्रम् आसीत् । सङ्गीतप्रीतेः द्योतकरूपेण एकं हार्मोनियंवाद्यं मुरजयुगलं च तत्र आसीत् । एकस्य दीर्घपीठस्य उपरि विंशत्यधिकानि पुस्तकानि आसन् । तस्यैव दीर्घपीठस्य उपरि राङ्कवं प्रसार्य माम् उपवेशितवान् गौडः । तानि पुस्तकानि उद्घाट्य परिशीलितानि मया । लङ्कादहनं, नलचरित्रं, प्रह्लादचरित्रं, शूरसेनकथा, दानशूरकर्णः, भट्टिविक्रमादित्यः इत्यादीनि पुस्तकानि तत्र दृष्टानि ।

''एतानि किमर्थम् ? किं भवान् नाटकाभ्यासं कारयति ?''

''आम् । बहोः कालतः अत्र मम विशेषाभिरुचिः । समीपस्थेषु सर्वेषु ग्रामेषु जनाः मां 'भागवतः दिस्तीनगौडः' इत्येव अभिजानन्ति । केचन नाटकगौडः इत्यपि निर्दिशन्ति ।''

तस्य मुखं परीक्षादृष्ट्या दृष्टं मया । जनैः उच्यमानानि नामानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्वर्थानि इति अभासत । पुरुषप्रमाणकः दृढः कायः तस्य । आकारसदृशं श्मश्रु मुखे विराजते । दीर्घाः केशाः पृष्ठभागोन्मुखतया प्रसाधिताः आसन् । राजसूययागनाटकस्य धर्मराजः इव भासते स्म सः ।

''गौडवर्य । अहम् एकं प्रश्नं पृच्छामि । वास्तविकम् एव उत्तरं दातव्यम् ।''

''कः सः प्रश्नः ?''

''क्रिस्तमतीयः सन् भवान् हिन्दुपुराणीयनाटकानाम् अभ्यासं कारयति यत् तत् आश्चर्याय । क्रिस्तालयजनाः एतत् अनुमन्यन्ते किम् ?''

'' आ बाल्यात् एषा एव प्रवृत्तिः मम । मम पिता अपि एतादृशप्रवृत्तिमान् एव आसीत् । नाटकविषयः यस्यकस्यचित् मतस्य भवेन्नाम । का हानिः तेन ? वयम् अपि हिन्दवः एव । हिन्दुषु गौडः, दासगौडः, वैष्णवः, तन्तुवायः इत्यादयः जातयः सन्ति । अस्माकं जातिः अपि तासु अन्यतमा इति मम मतिः।''

''भवतः कथनं विलक्षणं विनूतनं च अस्ति । क्रिस्तालयजनाः किम् एतत् अङ्गीकुर्वन्ति ?''

''तेषाम् अङ्गीकारेण अनङ्गीकारेण वा किम् ? पञ्च वर्षेभ्यः पूर्वं कश्चन नूतनः धर्मगुरुः एतं ग्रामम् आगतः आसीत् । सः उक्तवान् आसीत् यत् नाटकपाठनाभ्यासः यदि न परित्यज्यते तर्हि क्रिस्तालये प्रवेशः न भविष्यति इति । अहम् एतद्विषये उपेक्षां दर्शितवान् । 'यदि नाटकाभ्यासे महती रुचिः तर्हि क्रिस्तकथाघटितनाटकानि अभ्यासयतु' इति तेन उक्तम् । क्व क्रिस्तदेवनाटकानि ? क्व हिन्दुदेवनाटकानि ? क्रिस्तनाटकं लिख्येत चेदपि तत् हरिश्चन्द्र-कर्ण-वसन्तसेना-सदारमादीनां कथा यथा, तथा रोचकं किं भवेत् ? अतः मया तस्य वचनं न पालितम् । एतस्मिन् ग्रामे अहं प्रभावशाली अस्मि इत्यतः मां कम्पयितुं न शक्तवन्तः ते । प्रतिवर्षं व्ययानन्तरं षट्सहस्ररूप्यकाणि अवशिष्यन्ते मम गृहे । मम एतादृशं सामर्थ्यं यदि न स्यात् तर्हि मम उच्चाटनम् अकारयिष्यन् ते ।''

''एतस्य परिणामतः पुत्री-पुत्रादीनां विवाहविषये क्लेशः न भवति किम् ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''न कोऽपि क्लेशः । मम ज्येष्ठपुत्र्याः विवाहः गतवर्षे एव सम्पन्नः । भगिनीपुत्राय सा दत्ता अस्ति ।''

गौडः काफीम् आनीय दत्तवान् । कदलीफलानि अपि दत्तवान् । सर्वस्य सेवनस्य अनन्तरं सः कोषतः धूमवर्तिकाकोषं निष्कास्य पृष्टवान् –''सेव्यते वा एतत् श्रीमन् ?'' इति ।

धूमपानेच्छा मयि जागरिता । अतः एका धूमवर्तिका गृहीता । गौडः स्वयं एकां स्वीकृत्य स्वकीयां ज्वालयित्वा मदीयाम् अपि ज्वालितवान् ।

''भवतः भगिनी आवुत्तः च कथं स्तः ?''

''योग्यः उपचारः एव कृतः ताभ्याम् ।''

गौडस्य सम्भाषणं हृत्पूर्वकम् आसीत् । आत्मीयतापूर्णं च आसीत् । ह्यः आरभ्य यद्यत् प्रवृत्तं तत्सर्वं निवेद्य अहम् उक्तवान् - ''अद्य प्रवर्तमानं मम पितुः एव और्ध्वदैहिककार्यम् । अद्य अन्तिमं दिनम् ।''

''तन्नाम वैकुण्ठसमाराधनम् ?''

''आम् ।''

''पश्यतु, ऋणानुबन्धः भवन्तम् आकृष्य आनीतवान् अस्ति । तस्मात् मुक्तिः सर्वथा न सम्भवति'' इति उक्त्वा धूमवर्तिकाकोषं दर्शयन् सः पृष्टवान् - 'अपरा अपेक्ष्यते किम् ?'' इति ।

''भवतः आवुत्तः एव सर्वं विवृतवान् कदाचित् । सर्वं पूर्वजन्मनः कर्मणः फलम् । ललाटलिखिता रेखा केन वा परिमार्ष्टुं शक्या ?''

''पूर्वजन्मकर्मविषये भवान् अपि विश्वसिति किम् ?''

''विश्वासः करणीयः एव खलु ? भवान् यावत् अधीतवान् तावत् मया न अधीतम् । तथापि वदामि - पूर्वजन्मकर्मफलादिकम् अस्ति एव । क्रिस्तालयस्य धर्मगुरुः एतत् न अनुमन्यते । सप्ताहे एकवारं क्रिस्तालयं गत्वा पापनिवेदनं कृतं चेत् किं पापानि अपगच्छेयुः ? किं पापस्य निमित्तं दण्डनं न भवेत् ? अस्माभिः कृतस्य पापस्य फलम् अस्माभिः एव अनुभोक्तव्यम् । एतस्मिन् जन्मनि अकृतस्य अपि कर्मणः फलम् अनुभूयते यत् तस्मात् सिद्ध्यति - पूर्वजन्मनः स्थितिः ।''

''क्रैस्तमतस्य अवलम्बनस्य अनन्तरं मया कीदृशः मानसिकक्लेशः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुभूतः इति तु भगवान् एव जानाति । एतादृशी व्यथा, क्लेशः मम एकस्यैव अस्ति, उत मतान्तरम् अवलम्बितवतां सर्वेषाम् इति मया न ज्ञायते । भवता कदापि एतादृशी मानसिकी व्यथा अनुभूता किम् ?''

''कदाचित् मनसि विचारः भवति - मया एतस्मिन् मते कुतो वा जन्म प्राप्तम् इति । किन्तु यादृशी व्यथा भवता अनुभूता स्यात् तादृशी तु मया न अनुभूयते । भवान् तु अध्ययनशीलः । भवता हिन्दुधर्मविषये बहु अधीतम् इति भवतः आवुत्तस्य मुखात् एव मया श्रुतम् । अतः एव एतादृशी मानसिकव्यथा भवतः । एतद्विषये ये चिन्तनं न कृतवन्तः ते सुखेन एव सन्ति । मम भवतश्च अस्ति महान् भेदः । मम जन्म तु एतन्मतीयकुले एव जातम् । अतः सर्वं सम्मतं इव अस्ति । भवतः तु एतादृशी स्थितिः नास्ति । दिनेषु गतेषु सम्यक् भवेत् ।''

''तथा न भाति गौडवर्य । एतावता एव बहूनि दिनानि गतानि । तथापि एषा एव स्थितिः ।''

''समाश्वासनं प्राप्तव्यं श्रीमान् । समाश्वासनं प्राप्तव्यम् । विवेकी भवान् एव एवं वदति चेत् कथम् ? पूर्वं महाराजः नलः ऋतुपर्णस्य पाचकः आसीत् । राजा हरिश्चन्द्रः किं श्मशानरक्षकः न आसीत् ? भगवान् परमेश्वरः एव ब्रह्महत्यादोषतः कपालपाणिः सन् अटितवान् इति श्रूयते । ते सर्वे कथं समाश्वासनं प्राप्तवन्तः ? स्मरतु तत् । अद्य भवतः या व्यथा अस्ति सा भवत्सन्ततेः न भविष्यति । तैः विना विरोधं अङ्गीकृतं भविष्यति । एवं ननु ?''

अहं मुक्तमनस्कः सन् वार्तालापं कृतवान् आसम् । अद्यावधि मम मानसिकव्यथाविषये केनापि सह एव मुक्तमनस्कतया वार्तालापः न कृतः आसीत् । स्वकीयया विशिष्टया शैल्या मम समाश्वासनं कृतवान् आसीत् गौडवर्यः ।

''अस्माकं भाग्यम् एव तादृशम् । हिन्दवः अस्मान् न स्वीकुर्वन्ति । यदि अल्पविरोधः क्रियेत तर्हि अपि अस्माभिः क्रैस्तमतीयानां विरोधः सम्मुखीकरणीयः भवेत् । ते अपि अस्मान् बहिष्कुर्युः चेत् अग्रे अस्माकं का वा गतिः ? यदि हिन्दवः अङ्गीकुर्युः तर्हि एतत्परिसरे वसन्तः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विंशत्यधिककुटुम्बीयाः मातृधर्मं स्वीकर्तुं सिद्धाः सन्ति अद्यापि । अहम् अपि तादृशः एव अस्मि । किन्तु अस्मान् स्वीकर्तुं हिन्दवः एव सिद्धाः न सन्ति । तदर्थम् अस्माभिः किं वा कर्तुं शक्येत ? मौनम् एव शरणम् ।''

एतावता एव मध्याह्नः उपस्थितः आसीत् । गौडतः पुनः एकां धूमवर्तिकां स्वीकृत्य अहं ततः प्रस्थितवान् ।

''त्रिचतुराणि दिनानि स्थीयते किम् ?''

''न जाने । मनः यथा व्यवहरति तथा ।''

''तिष्ठतु द्वित्राणि दिनानि । परश्वः रात्रौ अनतिदूरस्थे हूविनकेरेग्रामे नाटकं भविष्यति । द्रष्टुं गच्छाम । नाटकम् उत्तमं भविष्यति ।''

''अस्तु'' इति उक्त्वा ततः निर्गतं मया ।

गमनसमये गौडवर्यस्य वचनानि एव कर्णे गुञ्जन्ति स्म । सर्वं प्राचीनकर्मणः फलम् । नल-हरिश्चन्द्र-परमेश्वरादयः यत् कष्टम् अनुभूतवन्तः तदपि प्राचीनकर्मफलात् एव । प्राचीनकर्मविषये जनाः केचन विमतिं दर्शयेयुः नाम, मम तु तत् सम्मतम् आसीत् ।

यदा अहं नञ्जुण्डस्य गृहं प्राप्तवान् तदा सर्वे भोजनरताः आसन् । शालायां सर्वत्र जनाः उपविष्टवन्तः आसन् । पञ्चषाः परिवेषणं कुर्वन्तः आसन् । मां दृष्ट्वा नञ्जुण्डः पृष्टवान् - ''कुत्र गतः आसीत् भवान् ? सर्वत्र अन्वेषणं कृतं मया'' इति'।

मया प्रतिवचनं किमपि अदत्त्वा गृहस्य पुरतः मौनेन उपविष्टम् । परिवेषकाः मां कटाक्षेण पश्यन्तः एव अटन्ति स्म । मम मनसि तु गौडवर्येण प्रारब्धकर्मविषये यत् उक्तं तदेव आवर्तते स्म । 'अद्य स्नानं न समाप्तम्' इति विषयः झटिति मया स्मृतः । स्वामिवर्यस्य गृहं गत्वा प्रोञ्छं वेष्टीं च स्वीकृत्य कासारं प्रति प्रस्थितं मया । 'शीतलजलेन स्नानं मास्तु । उष्णजलं सज्जीकारयिष्यामि' इति स्वामिवर्यः अवदत् । तथापि अहं कासारं गत्वा स्नात्वा धौतवेष्टीं धृतवान् । यावत् अहं गृहं प्राप्तवान् तावता सर्वे भोजनं समाप्य ताम्बूलार्थं शालायाः पुरतः वितर्द्याम् उपविष्टवन्तः आसन् । अहं धनकोषं उद्घाट्य दृष्टवान् । तत्र नवतिः रूप्यकाणि आसन् । दश रूप्यकाणि मम व्ययार्थं स्थापयित्वा अवशिष्टानि नञ्जुण्डस्य पुरतः संस्थाप्य - ''एतानि दक्षिणारूपेण ददातु'' इति अवदम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नञ्जुण्डः सकृत् मम मुखं दृष्ट्वा - ''मास्तु । एतानि प्रतिस्वीकरोतु'' इति सूचितवान् ।

''विना प्रतिवचनं मया यथा उक्तं तथा करोतु'' इति अनुरोधपूर्वकं अहं यदा उक्तवान् तदा सः धनं स्वीकृतवान् ।

तानि सर्वाणि पञ्चरूप्यककागदानि । नञ्जुण्डः ताम्बूलपत्रस्य उपरि एकैकं रूप्यकागदं स्थापितवान् । नञ्जुण्डः शकुन्तला च ताम्बूलदाने उद्युक्तौ जातौ । अहम् तौ अनुसृतवान् । नञ्जुण्डः ज्येष्ठेभ्यः, शकुन्तला ज्येष्ठाभ्यः च पञ्चरूप्यकसहितं ताम्बूलं दत्तवन्तौ । एतत् दृष्ट्वा सर्वे आश्चर्येण स्तब्धाः जाताः । सर्वे माम् आश्चर्येण दृष्टवन्तः । महिलानां मध्ये परस्परवार्तालापः आरब्धः । वार्तालापः स्पष्टतया न श्रूयते स्म मया । तथापि तासां वार्तालापस्य विषयः मां तुदति स्म । बालकेभ्यः अर्धरूप्यकं पादरूप्यकं वा दक्षिणारूपेण दत्तवान् नञ्जुण्डः । वेदघोषस्य अनन्तरं नञ्जुण्डः शकुन्तला च वैदिकान् सुमङ्गलीः च चरणस्पर्शपूर्वकं नमस्कृतवन्तौ । अहं दूरात् सर्वान् नमस्कृत्य - 'सर्वेभ्यो नमस्कारः' इति उक्तवान् । मम शिरसः उपरि अपि मन्त्राक्षताः पतिताः । ततः उत्थाय अहं मौनेन बहिः आगतवान् । इहलोकव्यापारं समापितवान् मम पिता वैकुण्ठं प्राप्तवान् । दक्षिणारूपेण पञ्च रूप्यकाणि प्राप्य सन्तुष्टौ उभौ ब्राह्मणौ मत्समीपम् आगतवन्तौ । तौ मम शिरसः उपरि मन्त्राक्षतान् पातयित्वा - ''भवतः मनः विशालम् । पितृनिमित्तं भवता उदारतया दानं कृतम् । भवतः आयुरारोग्यवृद्धिरस्तु, समस्तसन्मङ्गलानि भवन्तु'' इति उक्तवन्तौ ।

मम समीपे दानार्थं धनं नासीत् । अतः अहं मौनेन स्थितवान् । निमेषं यावत् मत्सविधे स्थित्वा अपि किमपि अप्राप्य निराशया तौ प्रतिगतवन्तौ ।

अर्धघण्टाभ्यन्तरे भुक्तावशेषं अपसार्य उपलेपनं कृतम् । प्रथमपङ्क्तौ ये परिवेषितवन्तः ते सर्वे भोजनार्थम् उपविष्टवन्तः । नञ्जुण्डस्य गृहस्य पुरतः पत्रद्वयं प्रसारितम् आसीत् । स्वामिवर्यः आगतः । आवां तत्र भोजनार्थम् उपविष्टवन्तौ । भोजनसमये कोऽपि मनःक्लेशः मां न अबाधत । अहम् आतृप्ति भोजनं कृतवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''भवान् भोजनपत्रं मा अपनयतु । शालायाः सेवकः तत् करिष्यति'' इति उक्तवान् स्वामिवर्यः । अहम् उत्थाय हस्तं क्षालितवान् ।

अद्यावधि शकुन्तला मया सह सम्भाषणं न कृतवती आसीत् । तस्याः कार्यबाहुल्यं यद्यपि आसीत्, तथापि सम्भाषणस्य अकरणे तदेव कारणं न आसीत् । सा मम विषये औदासीन्यं दर्शयति स्म । नञ्जुण्डः रङ्गाम्बा च मम मुखं दृष्ट्वा औपचारिकतया वा हासं दर्शयतः स्म । शकुन्तला तु निर्विकारभावं वोढुं यद्यपि प्रयतते स्म, तथापि औदासीन्यं, निराशा, व्यथा च तस्याः मुखे स्फुटं दृश्यते स्म । विरामसमये तया सह वार्तालापः करणीयः इति निश्चितं मया ।

तस्मिन् दिने सायं सा यदा कासारे पात्रं क्षालयन्ती आसीत् तदा अहं तत्र गतः । तस्याः पुत्रः जलेन क्रीडन् आसीत् । मां दृष्ट्वा सः 'मामः आगतवान्' इति वदन् समीपम् आगतवान् । किन्तु तम् उन्नेतुम् अहं यदा उद्युक्तः तदा सः दूरं गतवान् । शकुन्तला शिरः अवनमय्य पात्रं क्षालयन्ती आसीत् ।

'शकुन्तले !' - अहम् आहूतवान् ।

सा प्रतिवचनं किमपि न उक्तवती । तस्याः नेत्रे अश्रुपूर्णे आस्ताम् । सा आञ्चलेन नेत्रे पिधाय सगद्गदं रुदितवती । अहं विग्रहः इव उपविष्टवान् । किञ्चित्कालानन्तरं सा दुःखं निगृह्य शिरः उन्नीय मां पश्यन्ती पृष्टवती - ''किमर्थम् एवं कृतं भवता ?''

''अहम् एव कारणं न जानामि भगिनि ।''

क्षणकालं मौनेन स्थित्वा प्रक्षाल्यमाणं पात्रम् एव पश्यन्ती सा उक्तवती - ''मम मातापितरौ तु न स्तः । मातृगृहीयः भवान् एकः आसीत् । भवान् अपि दूरं गतः ।......''

तस्याः वचने निहितायाः यातनायाः तीक्ष्णता मां दहति स्म । किन्तु मया किं वा कर्तुं शक्येत ? अहं मौनेन आसम् । मम कार्यस्य विषये आरोग्यविषये च कांश्चन प्रश्नान् पृष्टवती सा । मौनस्य दूरीकरणार्थम् आवां वार्तालापं कृतवन्तौ । पात्रक्षालनसमाप्त्यनन्तरम् आवां प्रत्यागतौ । तस्याः पुत्रः तु पूर्वम् एव गृहं प्राप्तवान् आसीत् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रात्रौ स्वामिवर्यस्य गृहे एव मया शयनं कृतम् । वार्तालापं कुर्वन्तम् एव स्वामिवर्यं निद्रा आलिङ्गितवती । मम नेत्रयोः पुरतः रुदत्याः शकुन्तलायाः एव चित्रम् । 'किमर्थम् एवं कृतम् ?' इत्येषः यातनापूर्णः तस्याः प्रश्नः मम यातनां वर्धयति स्म । निद्रायाः अप्राप्तितः समययापनं कष्टाय जातम् । नेयदीपस्य मन्दप्रकाशे स्वामिवर्यस्य शिरसः पार्श्वे स्थापितः धूमवर्तिकाकोषः अग्निपेटिका च मम दृष्टिपथम् आगच्छत् । तदुभयं गृहीत्वा अहं बहिः आगतः । 'मया अत्र किमर्थम् आगतम् ?' इत्येषः प्रश्नः मां भृशम् अबाधत । भावनावेशवशात् अहम् अत्र आगतः आसम् । पूर्वजन्मनः वासना अपि अत्र कारणं स्यात् कदाचित् । 'आगतेन मया पितुः प्रसादः तु प्राप्तः । इतः परं मम किं वा कार्यम् अत्र ?' कोषस्य अन्तिमा धूमवर्तिका अपि यदा समाप्ता तदा रात्रेः एकवादनम् । अन्तः गत्वा अहं शयितवान् । निद्रा प्राप्ता मया ।

प्रातः चतुर्वादने मया जागरणं प्राप्तम् । शय्यायाम् इतस्ततः लुण्ठन् कथञ्चित् घण्टाद्वयं यापितं मया । षड्वादने मया नञ्जुण्डस्य गृहं प्रति गतम् । तावता तत्र सर्वे उत्थिताः आसन् । ''प्रथमयानेन अहं गच्छन् अस्मि'' इति मया उक्तम् । 'अहं द्वित्राणि दिनानि वसेयम्' इति तैः निरीक्षितम् आसीत् । ''द्वित्राणि दिनानि वा तिष्ठतु सत्य !'' इति उक्तवान् नञ्जुण्डः । ''सप्ताहं यावत् वा तिष्ठतु भ्रातः'' इति रुदती उक्तवती शकुन्तला । ''मम विरामः नास्ति'' इति एतावत् एव उक्त्वा प्रस्थानसन्नाहः आरब्धः मया । मम निर्गमनवार्तां श्रुत्वा स्वामिवर्यः तत्पत्नी च आश्चर्यं प्रकटितवन्तौ प्रस्थानसमये तौ नमस्कृतौ मया । रङ्गाम्बा अपि दूरात् नमस्कृता । शालायाः सेवकः मम शय्याबन्धम् उन्नीय अग्रे गतवान् ।

''साधयामि तावत्'' इति मया यदा उक्तं तदा शकुन्तला - ''ग्रीष्मविरामः आसन्नः खलु ? विरामकाले पत्नीं सकृत् अत्र आनयतु'' इति उक्तवती । चत्वारि पदानि अग्रे निक्षिप्य अहं मुखं परिवृत्य दृष्टवान् । सा अश्रूणि मार्जयन्ती आसीत् ।

मार्गपर्यन्तं नञ्जुण्डः स्वामिवर्यः च आगतवन्तौ । उद्यानसमीपे दिस्तीनगौडः मिलितः । सोऽपि अस्मान् अनुसृतवान् । गमनसमये द्विवारं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सः मह्यं स्वामिवर्याय च धूमवर्तिकां दत्तवान् । यानं यदा आगतं तदा नञ्जुम्डः उक्तवान् - ''पुनः मिलाम ।''

यावत् अहं अरसीकेरेनगरं प्राप्तवान् तावता प्रथमलोकयानं निर्गतम् आसीत् । अहं मध्याह्नस्य रैल्याने उपविष्टवान् । तत् प्रतिस्थानकं तिष्ठति स्म । समययापनार्थं मया जीवने ऐदम्प्राथम्येन एकः धूमवर्तिकाकोषः क्रीतः । धूमपानसमये मनसि स्थितः अन्धकारः किञ्चिदिव अपगतः भवति स्म ।

यानं विलम्बेन मैसूरुनगरं प्राप्नोत् । रात्रौ नववादने अहं गृहं प्राप्तवान् । शरीरे महती श्रान्तिः दृश्यते स्म । मनः भ्रमति स्म इव । गृहं प्राप्नुवन्तं मां लिल्ली स्वागतीकृतवती । मरियम्मया सह तिष्ठन्ती सा सप्ताहं यापितवती आसीत् । रात्रौ तस्याः अनुजः आगत्य शयनं करोति स्म ।

गृहं प्रविश्य उपविष्टवते मह्यं लिल्ली एकां चिटिकां दत्तवती । बिषप्वर्येण प्रेषितं पत्रं तत् 'एतत्पत्रप्राप्तिसमनन्तरम् एव अहं द्रष्टव्यः' इति । वार्तां प्रेषितवान् आसीत् सेवकद्वारा पत्रं प्रेषयन् । 'अहं बिषप्वर्यं दृष्ट्वा आगमिष्यामि' इति उक्त्वा अहम् प्रस्थातुम् उद्युक्तः । 'श्वः प्रातः तं पश्यतु । किम् इदानीं गमनेन ?' इति लिल्ली उक्तवती । तथापि अहं गृहात् निर्गतः ।

द्विचक्रिकाम् आरुह्य अहं बिषप्वर्यस्य गृहं प्राप्तवान् । तावता गृहस्य द्वारं पिहितम् आसीत् । बहिः स्थितः सेवकः 'आर्यः सुप्तः अस्ति' इति अवदत् । तावता मम ध्वनिं श्रुत्वा बिषप्वर्यः एव स्वयं बहिः आगतः । 'तम् अन्तः प्रेषयतु' इति सः सेवकं सूचितवान् । आहम् अन्तः गतवान् ।

सः सोफासने उपविष्टः आसीत् । तस्य बुद्धिः स्वाभाविकसमतोलनस्थितौ न आसीत् । तदीयनेत्रे असन्तोषकारणतः आरक्ते आस्ताम् ।

''आगमनसमनन्तरम् एव अहं द्रष्टव्यः इति भवता पत्रं प्रेषितम् आसीत् ।''

''आम् । माम् अनुक्त्वा मम अनुमतिम् अपि अप्राप्य यथेच्छं विरामपत्रं सम्प्रेष्य गमनं किम् उचितम् ?''

''अपरिहार्यतया अकस्मात् त्वरया मया भगिनीगृहं गन्तव्यम् आसीत् । अतः अत्र आगन्तुं भवतः अनुमतिं प्राप्तुं च न शक्तं मया ।'

''एतादृशः व्यवहारः अविधेयतां द्योतयति इति किं भवान् जानाति ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बिषपुर्वर्यस्य कण्ठस्वरः सहजः न आसीत् ।

''तद्विषये श्वः चर्चां करवाम । इदानीं एषोऽहं प्रस्थितः'' इति उक्त्वा अहं ततः प्रस्थितः ।

मध्येमार्गम् एकस्य लघ्वापणस्य समीपे द्विचक्रिकातः अवतीर्य अहम् एकं धूमवर्तिकाकोषं क्रीतवान् । बुद्धेः निग्रहः असाध्यः जातः आसीत् । शरीरं मनसः निग्रहं कर्तुम् असमर्थम् आसीत् । द्विचक्रिकां नुदन् कष्टेन पदानि स्थापयन् अहं गृहं प्राप्तवान् । धूमपानरतं मां दृष्ट्वा लिल्ली दिग्भ्रान्ता । 'किम् एतत् ?' इति आश्चर्येण पृष्टवती सा ।

''मया शयनं करणीयम् । शय्यां सज्जीकरोतु भवती ।''

''पञ्चनिमेषाभ्यन्तरे उष्णः पाकः सिद्धः भविष्यति । भोजनं कृत्वा शयनं करोतु तावत्'' इति उक्तवती सा ।

अहं भोजनं न इच्छामि स्म । अतः गत्वा शयनं कृतवान् । लिल्ली यावत् क्षीरम् उष्णीकृत्य आगतवती तावता अहं धूमवर्तिकात्रयं सेवितवान् आसम् । ततः मनसः विलक्षणा तृप्तिः ।

''लिल्लि । उपविशतु अत्र । भवत्याः अङ्के शिरः निधाय शयनं करिष्यामि अहम् ।''

''आदौ क्षीरं पीयताम्'' - प्रार्थितवती लिल्ली ।

तावता मया उग्रकोपः प्राप्तः । ''तत् क्षीरं मार्गे पातयतु'' इति मया गर्जितम् ।

लिल्ली मञ्चे उपविष्टवती । तस्याः अङ्के शिरः निधाय अहं शयनं कृतवान् । मम नेत्रे अग्निगोलके इव ज्वलतः स्म । तापम् असहमानः अहं नेत्रे निमीलितवान् । नेत्रस्था ज्वाला मस्तिष्कं प्रविष्टवती इव । अग्रे किं प्रवृत्तम् इति न ज्ञातं मया ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इहलोकसंज्ञां प्राप्य अहं यदा नेत्रे उद्घाटितवान् तदा कस्यचिद्दिनस्य प्रातःकालः आसीत् । अहं मञ्चस्य उपरि शयितः आसम् । पार्श्वे औषधकूप्यः, चषकः, चमसः इत्यादयः आसन् । गृहे निश्शब्दता आसीत् । पाकशालायां प्रचलतः सम्भाषणस्य अस्पष्टः ध्वनिः श्रूयते स्म । निश्शक्तिकारणतः पार्श्वपरिवर्तने अपि मया कष्टम् अनुभूतम् । अतः अहं नेत्रे निमील्य सुप्तवान् ।

अल्पे एव काले मत्समीपं आगच्छतः पादध्वनिः श्रुतः । अतः अहं नेत्रे उद्घाटितवान् । लिल्ली मम पार्श्वे स्थिता आसीत् । तस्याः मुखे सन्तोषः उत्पन्नः । तस्याः ललाटे विशालं कुङ्कुमतिलकं दृश्यते स्म । सा अवनम्य हस्तद्वयेन मम मुखं गृहीत्वा आसक्त्या दृष्टवती ।

'लिल्लि !' इति क्षीणस्वरेण अहं ताम् आहूतवान् । सा मञ्चस्य पार्श्वे उपविष्टवती । अहं किमपि वक्तुं मुखम् उद्घाटितवान् ।

''सम्भाषणं मास्तु । सम्भाषणेन भवतः श्रान्तिः भवति । अलं साहसेन'' इति उक्तवती लिल्ली ।

अहं मौनम् आश्रितवान् । लिल्ली उत्थाय गतवती । तया सह राचम्मा आगता । लिल्ली मञ्चस्य कोणे उपविष्टवती । राचम्मा समीपे आसनं संस्थाप्य तस्मिन् उपविष्टवती । अहं श्रान्तिकारणतः नेत्रे निमीलितवान् ।

वैद्यः दिने द्विवारम् आगत्य गच्छति स्म ।

अष्टदिनाभ्यन्तरे मया सम्भाषणार्थं शक्तिः प्राप्ता । राचम्मा मम गृहे एव तिष्ठति स्म । पाकादिकार्यं सा एव निर्वहति स्म । देवप्रसादः अत्र एव आगत्य भोजनं समाप्य गच्छति स्म । राचम्मायाः पुत्री शान्ता लघुपदानि कष्टेन निदधती सञ्चरति स्म मम शयनप्रकोष्ठे । चत्वारि पदानि निधाय पतति स्म सा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिने एकवारं मम श्वशुरः तम्मर्यवर्यः, श्वश्रूः च आगत्य गच्छतः स्म । लिल्ली रात्रौ अपि निद्राम् अकुर्वती मम पार्श्वे उपविशति स्म । दिने अपि मम पार्श्वं न त्यजति स्म । स्वप्राणान् पणीकृत्य श्रद्धया भक्त्या यां सेवां करोति स्म सा मां मूकं करोति स्म ।

एकदा सायङ्कालस्य चतुर्वादिनसमयः । राचम्मा स्वगृहं गता आसीत् । गृहे अन्यः कोऽपि न आसीत् । लिल्ली मम पार्श्वे उपविश्य व्यजनेन वीजयन्ती आसीत् ।

''अद्य कः दिनाङ्कः'' इति मया पृष्टम् ।

''एप्रिल्मासस्य षोडशः दिनाङ्कः'' इति उक्तवती लिल्ली । अहं किमपि चिन्तयितुं यदा उद्युक्तः तदा लिल्ली पुनः उक्तवती – 'भवतः शयनानन्तरं दिनत्रयाधिकः मासः अतीतः ।''

अहं पार्श्वस्थायाः तस्याः हस्तं गृहीतवान् । सा मम हस्तं सुदृढं गृहीतवती ।

''लिल्लि ! मृत्युमुखात् पतिं विमोच्य आनीतवती इत्यतः वयं सावित्रीं पूजयामः । इदानीं भवती अपि मां मृत्युमुखात् रक्षितवती अस्ति । पुराणोक्तसावित्र्याः भवत्याः च न महान् भेदः ।''

''अलं स्तुत्या । महात्मभिः देवैः सह मां मा तोलयतु कृपया'' इति वदन्ती मम मुखस्य उपरि हस्तं स्थापितवती सा । तस्याः नेत्रयोः अश्रूणि उद्गतानि । मम उरसि मुखं निधाय रुदती उक्तवती सा – ''मम सौभाग्यम् आसीत् । अतः देवः भवन्तम् उज्जीवितवान् ।''

क्रमेण रोदनं निगृह्य सा उक्तवती – ''हिन्दवः हरिद्राकुङ्कुमसौभाग्यम् इति वदन्ति । कदाचित् रात्रौ द्विवादनम् आसीत् । भ्रातृजाया अत्रैव शयितवती आसीत् । अग्रजः भित्तिपार्श्वे अपरस्मिन् मञ्चे सुप्तवान् आसीत् । मया निद्रा न प्राप्ता आसीत् । भवतः उरसि स्थापितः शीतवस्त्रन्धः तथैव आसीत् । अहं भवतः मुखम् एव पश्यन्ती आसने उपविष्टवती आसम् । भवतः मुखे विविधविलक्षणभावनाः गमनागमनं कुर्वन्ति स्म । 'भवतः पत्नीम् आनयतु इति सा उक्तवती । न तु मम भ्रातृजायाम् आनयतु इति' इति भवान् स्वप्नवचनानि वदन् आसीत् । धूमपानं कृत्वा धूमं त्यजन् इव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवान् ओष्ठे वर्तुलीकरोति स्म । सर्वदा भवतः विसंज्ञता । ज्वरः तु निरन्तरं तपति स्म । सद्योदध्यायितस्य क्षीरस्य जलम् अहम् पायितवती । भवता मौनेन स्थितम् ।

उषःकाले आसने उपविष्टा एव अहं लघुनिद्रां प्राप्तवती । तदा मया एकः स्वप्नः दृष्टः । काचित् हिन्दुधर्मीया वृद्धा मया दृष्टा । रामण्णस्य विवाहदिने मया दृष्टा खलु - तदीया माता, सा एव आसीत् सा । सा मत्समीपम् आगत्य मम ललाटे कुङ्कुमं धारितवती । मन्दगत्या प्रतिगतवती च । जागरणं प्राप्य मया अवगतं यत् दृष्टं सर्वं स्वप्ने एव इति । तथापि तस्यां घटनायां मम विश्वासः उत्पन्नः । भवतः प्राणापायः न भविष्यति इति मया विश्वासः प्राप्तः । अतः तद्दिने किञ्चिद् भोजनमपि कृतम् । तस्मिन् एव दिने मया कुङ्कुमधारणम् आरब्धम् । अत्र आगतः पिता तत् दृष्ट्वा अपि किमपि न उक्तवान् । दिनेषु गतेषु भवति उल्लाघता दृष्टा ।''

अहं लिल्ल्याः मुखं निर्निमेषं दृष्टवान् । तस्याः मुखे अपूर्वा काचित् शोभा दृश्यते स्म । सा कुङ्कुमधारणमात्रेण उत्पन्ना तु न । अतः अहं ताम् उक्तवान् - ''लिल्लि ! अद्य यत् अपूर्वं सौन्दर्यं भवत्यां दृश्यते तत् इतः पूर्वं न दृष्टम् आसीत् मया । अपूर्वा शोभा । कुङ्कुमधारणमात्रेण प्राप्यमाणा न सा ।''

लिल्ली मन्दहासं प्रकटितवती ।

''भवान् विलक्षणतया किमपि वदति । अहं तादृशं किमपि न जानामि'' इत्युक्त्वा लिल्ली कटाक्षेण मां दृष्टवती । मया अग्रे किमपि न उक्तम् । अनन्तरम् ज्ञातं यत् षण्मासाभ्यन्तरे अहं पिता भविष्यामि इति । एषः विषयः मयि सन्तोषम् अजनयत् ।

पुनः पक्षः अतीतः । अहं गृहे सञ्चारे समर्थः जातः । वैद्यः औषधदानं स्थगितवान् आसीत् । शक्तिवर्धकेन उत्तमाहारेण च शक्तिः प्राप्ता स्यात् इति सूचितं तेन । राचम्मा देवप्रसादः च स्वगृहं गतवन्तौ आस्ताम् । ग्रीष्मविरामः सम्प्राप्तः आसीत् इत्यतः मम विद्यालयकार्यं न्यूनम् आसीत् । थामसः तदा तदा आगत्य मम हस्ताक्षरं प्राप्य गच्छति स्म । 'मासानन्तरं ग्रीष्मविरामः समाप्तः भविष्यति । ततः पूर्वम् एव वातावरणपरिवर्तनार्थं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुत्रापि गमनं वरम्' इति वैद्यः सूचितवान् । माम् एकाकिनं प्रेषयितुं लिल्ली सिद्धा न आसीत् । मासं यावत् उभयोः वासार्थं योग्यं स्थलं चिन्तनीयम् आसीत् । 'नीलगिरिं प्रति गच्छताम्' इति देवप्रसादेन सूचितम् । 'तत्र शैत्यम् अधिकम् । सद्यः एव उल्लाघतां प्राप्तवान् रोगी तत्र कष्टम् अनुभवेत्' इति वैद्येन उक्तम् । 'बेङ्गळूरुनगरं गच्छाव' इति सूचितवती लिल्ली । तत्र अस्मदर्थं व्यवस्थां कर्तुम् अर्हः कोऽपि न आसीत् । अन्ते राचम्मायाः सूचनानुगुणं निर्णीतं यत् हासने मासं यावत् स्थितिः इति । हासने राचम्मायाः भगिनी आवुत्तः च वसतः । राचम्मा तयोः कृते पत्रं लिखितवती । 'सर्वविधानुकूल्ययुक्तम् एकं गृहं निश्चितम् अस्ति' इति ततः पत्रम् आगतम् । एकस्मिन् दिने प्रातःकालिकयानेन मरियम्मया सह आवां हासनं प्रति प्रस्थितवन्तौ ।

राचम्मायाः भगिनी आवुत्तश्च महता प्रेम्णा अस्मान् स्वागतीकृतवन्तौ । 'अन्यस्मिन् गृहे वासः किमर्थम् ? अस्माकं गृहे एव भवतोः वासः भवतु' इति ताभ्याम् उक्तम् । किन्तु आवां तत् न अङ्गीकृतवन्तौ । प्रशान्ते बोरनहळ्ळिविस्तरणे एकं गृहं ताभ्यां अस्मदर्थं निश्चितम् आसीत्। क्षीरं, दधि, शांकः इत्यादीनाम् अपि व्यवस्था कृता आसीत् ताभ्याम्। पाकादिनिमित्तं अपेक्षितानि पात्राणि स्वगृहात् प्रेषितं ताभ्याम् ।

हासने दिनानि सुखेन गतानि । सायङ्कालसमये लिल्ल्या सह अहं विहारार्थं गच्छामि स्म । स्वास्थ्ये अपि प्रगतिः दृश्यते स्म । 'अत्र आगमनं वरम् एव जातम्' इति आवाभ्यां चिन्तितम् । लिल्ली क्षणमात्रम् अपि मया विरहिता न भवति स्म । बहिर्गमनसमये कदाचित् धूमपानेच्छा भवति स्म । तथापि लिल्लीं खेदयितुम् अनिच्छन् अहं ताम् इच्छां निवारयामि स्म ।

हासनं प्रति आगमनानन्तरं पक्षः अतीतः । शरीरे शक्तिः वर्धमाना आसीत् । पक्षाभ्यन्तरे प्रशान्तः एषः परिसरः त्यक्तव्यः आसीत् । गमनात् पूर्वं बेलूरुमन्दिरं द्रष्टव्यम् इति आवाभ्यां निर्णीतम् । आसक्तिजनकानाम् अस्मद्देशीयानां मन्दिराणां विषये मया पठितम् आसीत्, न तु प्रत्यक्षं दृष्टम् आसीत् । लिल्ली अपि बेलूरुदेवालयस्य कलावैभववर्णनं पुस्तकेषु पठितवती

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीत् । एकदा प्रातः लोकयानेन आवां प्रस्थितवन्तौ ।

देवस्थानप्रवेशसमये क्षणमात्रं निराशा जाता । यतः मन्दिरस्य गात्रं चित्ताकर्षकं तु न आसीत् । कश्चन अर्चकः आवयोः साहाय्यार्थम् आगतवान् । मन्दिरस्य गात्रम् अल्पं चेदपि कलानैपुण्यं सुमहत् आसीत् । समग्रं मन्दिरं सूक्ष्मैः शिल्पैः अलङ्कृतम् अस्ति । दशवादनानन्तरम् आवाभ्यां देवालयस्य स्तम्भाः छदयः च दृष्टाः । बहिर्भागे स्थितानां शिलाबालिकानां दर्शनसमये तु आवाम् इहलोकम् एव विस्मृतवन्तौ । शिलाभिः काव्यं लिखता, शिलाभिः आनन्दम् अभिव्यञ्जयता शिल्पिना शिलाबालिकानां द्वारा सङ्गीतप्रतिभा अपि प्रकाशिता आसीत् । त्रिभङ्गीनृत्यरता, भस्ममोहिनी, धनुर्धारिणी इत्यादयः आसन् तत्र । एकस्यां दृश्यमानाः भावाः अपरस्यां न दृश्यन्ते स्म । भगवदर्पणभावः रसऋषित्वं वा यस्मिन् नास्ति तादृशेन एतादृशम् अपूर्वम् शिल्पं निर्मातुं न शक्येत एव ।

अहम् अलौकिकानन्दे लीनः आसम् ।

लिल्ली वाचामगोचरीं स्थितिं प्राप्तवती आसीत् । कलाकारस्य सम्मोहनास्त्रम् आवाम् इहलोकप्रज्ञाशून्यौ कृतवत् आसीत् । तस्मिन् मन्दिरे सौन्दर्यम् अलङ्कारम् अतिशेते स्म । जीवरसः सौन्दर्यम् अतिशेते स्म ।

मन्दिरसौन्दर्यदर्शकाय यथायोग्यं धनं दत्त्वा आवां प्रेषितवन्तौ । ततः आवाम् एकवादनसमये भोजनालयं गतवन्तौ । मम मनः देवालयस्य सौन्दर्यम् एव चिन्तयति स्म । यदा आवां मन्दिरं पश्यन्तौ आस्व तदा बहवः फलपुष्पादिभिः सह मन्दिरं प्रविश्य देवाय समर्प्य निर्गतवन्तः आसन् । आवामपि फलपुष्पादिकं समर्प्य तीर्थं प्रसादं च प्राप्तवन्तौ । देवः साष्टाङ्गं नमस्कृतः अपि आसीत् । 'परम्पराकारणतः देवालयविषये यत् स्वाभाविकं स्वत्वं भवति तस्मात् अहं वञ्चितः अस्मि । कलाकृतिः परम्पराम् अतिक्रम्य तिष्ठति इत्येतत् सत्यम् एव चेदपि सा कस्याश्चित् परम्परायाः अभिमानावहविषयः भवति इति तु न तिरस्कारार्हः । आधुनिकाः यथा भावयन्ति तथा एषः देवालयः कलादृष्टिमात्रेण निर्मितः न जातः । भारते कोणे कोणे कलाप्रौढिमयुक्ताः देवालयाः दृश्यन्ते । किन्तु तेषु कोऽपि लौकिकदृष्टिमात्रेण निर्मितः न । राजा स्वधनागारम् एव तदर्थम् विनियुक्तवान्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यात् । शिल्पी धनाशामात्रेण तं न निर्माति । अन्ये पुष्पफलादिभिः वेदमन्त्रैः, भक्त्या, ज्ञानमार्गेण वा उपासनां कुर्वन्ति । शिल्पी तु स्वस्य शिलासाधनैः टङ्कमुद्गरादिभिः उपासनां कृतवान् भवति । तस्य अनन्तभक्तेः द्योतकरूपेण एषः देवालयः तिष्ठति अद्यापि । भारतीयस्य सर्वविधस्य अपि कलाप्रकारस्य मूलस्फूर्तिः धर्मतः एव । यदि धर्मस्फूर्तिः न स्यात् तर्हि कापि कलाकृतिः एतं गुणस्तरं प्राप्तुं न अशक्ष्यत् । ....' एवं चिन्तयते मह्यं भोजनं न अरोचत ।

"किं तत् चिन्त्यते ?" लिल्ली पृष्टवती ।

"देवस्थानस्य कलाप्रौढिमा चिन्त्यते ।"

"स्यात् तत् । किन्तु चिन्तनविषयः तावन्मात्रम् एव न स्यात् । वेदनाजनिका अन्या कापि चिन्ता भवन्तं बाधते इति भाति । का सा ? वदतु तावत् ।"

मम मनसि आगतं विचारम् उक्त्वा - "अहं बेलूरुमन्दिरं दृष्ट्वा न केवलं सन्तोषं प्राप्तवान्, अपि तु शिल्पिनः भक्तेः भागम् अपि प्राप्तवान् अस्मि । मयि धर्मसंस्कृत्योः संस्कारः अस्ति । भवती अपि भक्तिभावं प्राप्तवती अस्ति । भवती हिन्दुसंस्कृतिविषये महतीं श्रद्धां वहति । किन्तु आवयोः अपत्यानां दृष्ट्या एतत् मन्दिरं प्रेक्षणीयस्थलमात्रं भवेत् । 'एषः अस्मदीयः' इति अभिमानेन उत्साहेन च एतस्य महत्त्वम् अभिज्ञातुं ते न शक्नुयुः । बेलूरुसदृशीम् अपरां कलाकृतिं निर्मातुं समर्थः कोऽपि अस्मद्वंशे जन्म यदि प्राप्नुयात् तर्हि सः बेलूरुसदृशं मन्दिरं न निर्मायात्, अपि तु गाथिक्शैलीयां क्रिस्तालयं निर्मायात् । भारतीयासु साहित्य-सङ्गीत-नृत्यकलासु अस्माकं प्रवृत्तिः न भविष्यति । अस्मद्वंशीयाः क्रिस्तालये स्थितं पियानोरागं ज्ञास्यन्ति । क्वचित् तत्र ते देशीयरागान् अपि जानीयुः । किन्तु तस्मिन् रागे त्यागराजपुरन्दरादीनां सङ्गीतस्य गन्धः अपि न भवति । भारतीयरागार्थं कष्टेन विस्तार्य हार्मोनियं निमित्तं रचितानाम् आंग्लगीतानाम् अनुवादं ज्ञास्यन्ति ते । अन्यच्च आंग्लगीतानाम् अनुवादं कृत्वा देशीयरागेन गानं जनानाम् आकर्षणार्थम् एव, न तु देशीयपरम्परायाः संवर्धनार्थम् । देशीयसंस्कृतिं क्रिस्तालयः विमातृपुत्रीं भावयति । ....."

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''बेलूरुदेवालयः मत्सम्बद्धः मद्वंशसम्बन्धः वा न इदानीम् । भारतीया भव्या परम्परा अस्मत्सन्ततेः अभिमानावहं रिक्थं न भविष्यति'' इति खेदेन उक्तवान् अहम् ।

मम कथनम् आस्थया श्रुत्वा लिल्ली उक्तवती - ''भवदुक्तं युक्तम् अस्ति ।''

भोजनं समाप्तम् । 'आतपस्य अपगमानन्तरं पुनरपि देवालयं सकृत् दृष्ट्वा प्रतिगन्तव्यम्' इति आवाभ्यां निर्णीतम् । भोजनालयस्वामी एकं लघुप्रकोष्ठम् अस्मदुपयोगाय दत्तवान् । लिल्ली श्रान्ता आसीत् । 'दीर्घपीठस्य उपरि भवती शयनं करोतु' इति ताम् अहं सूचितवान् । ममापि शरीरं श्रान्तम् आसीत् एव । मनः तु नितराम् आलोडितम् आसीत् । 'भारतीयसंस्कृतिसम्बद्धः अहं नास्मि' इत्ययम् अंशः मां नितरां बाधते स्म । सकृत् धूमपानं करणीयम् इति निश्चित्य अहं बहिः आगतवान् । भोजनालयात् अनतिदूरे स्थिते आपणे धूमवर्तिकाकोषम् अहं यदा क्रीणन् आसं तदा कश्चित् यानचालकः मत्समीपम् आगत्य 'अये सत्य !' इति मां सम्बोधितवान् । अहं मुखम् उन्नीय दृष्टवान् । पुरतः स्थितः श्रीकण्ठः यश्च अनाथालयस्य कार्यदर्शिनं कपोले प्रहृत्य मया सह एव तस्मात् निर्गतः मम प्राचीनमित्रम् आसीत् ।

''किं श्रीमन् अत्र आगतः भवान् ?'' - पृष्टवान् सः ।

''रे, किं भवतः गौरवदानेन ? पूर्वं यथा सम्बोधितं तथैव सम्बोधयतु'' इत्युक्त्वा अहम् आगमनकारणम् अपि उक्तवान् ।

''भवत्पत्नीम् आनयतु । अनतिदूरे एव अस्ति मम गृहम् । किमर्थं भोजनालये स्थितिः ?'' इति सूचितवान् सः ।

अहं लिल्ल्या सह तस्य गृहं गतवान् । तच्च लघुगृहम् । आ सप्ताहात् स्वच्छता न कृता इति अभासत । गृहदर्शनात् एव ज्ञातं यत् अत्र कापि गृहिणी न वसति, अयम् एकाकितया वसति इति । श्रीकण्ठः अन्तः प्रकोष्ठे एकं कटं प्रसारितवान् । लिल्ली तत्र शयनं कृतवती । आवां बहिः प्रकोष्ठे उपविष्टवन्तौ । मया निषिध्यमानः अपि श्रीकण्ठः काफीम् आनायितवान् । काफीपानानन्तरं मया पृष्टं - ''किं श्रीकण्ठ ! भवतः विवाहः किं न जातः ?''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''विवाहः जातः आसीत् । पत्नी दिवं गता ।''

तस्य वचने जुगुप्सा तिरस्कारः च दृश्यते स्म । तावता कश्चन बालकः 'विल्लि !' इति आह्वयन् अन्तः आगतवान् । श्रीकण्ठम् उद्दिश्य ''विल्लि ! रात्रौ अष्टवादने चिक्कमङ्गलूरुं प्रति गन्तव्यम् इति स्वामिना सूचितम् अस्ति'' इति अवदत् ।

''भवतु'' इति श्रीकण्ठः यदा उक्तवान् तदा सः निर्गतवान् । श्रीकण्ठस्य जीवनविषये मम कुतूहलम् उत्पन्नम् । 'अध्ययनं परित्यज्य तेन किं कृतं स्यात् ? यानचालकवृत्तिः किमर्थम् अवलम्बिता ? सः बालकः 'विल्लि' इति किमर्थं सम्बोधितवान् ?' इत्यादयः प्रश्नाः मयि उद्भूताः । अहं तान् प्रश्नान् तं पृष्टवान् ।

''सा च महती कथा । किं तस्याः ज्ञानेन ?'' इति वदन् सः धूमवर्तिकां मुखे स्थापितवान् ।

अहम् अनुरोधपूर्वकं ''भवता वक्तव्यमेव'' इति उक्तवान् । सः प्रश्नार्थकदृष्ट्या प्रकोष्ठं दृष्टवान् । मया अन्तः गत्वा दृष्टम् । लिल्ली निद्रितवती आसीत् । यदा मया 'सा निद्रितवती अस्ति' इति उक्तं तदा श्रीकण्ठः स्वजीवनकथां वक्तुम् उद्युक्तः अभवत् ।

''अनाथालयतः बहिष्कृतः अहं पितामहस्य दर्शनार्थं तदीयं ग्रामं गतवान् । किन्तु तत्रत्यस्य कष्टस्य दर्शनात् अभासत यत् मया प्राप्तस्य कष्टस्य निवेदनम् उचितं न इति । एकदिनमात्रं तत्र स्थित्वा अहं प्रत्यागतवान् । भोजनोपाहारादिनिमित्तं महत् कष्टम् अनुभवन् अहं सप्ताहद्वयं कष्टेन यापितवान् । उद्योगप्राप्त्यर्थं सर्वत्र प्रयत्नः कृतः । किन्तु कुत्रापि न लब्धम् । अन्ते अहं मैसूरुनगरं परित्यज्य चिटिकां विनैव रैल्यानम् आरुह्य बेङ्गलूरुनगरं प्राप्तवान् । तत्रापि उद्योगप्राप्त्यर्थं सर्वत्र प्रयत्नः कृतः । कण्टोन्मेण्ट्प्रदेशे एकस्मिन् लघुनि उपाहारमन्दिरे वितारकोद्योगः दैवात् प्राप्तः मया । भोजनस्य अप्राप्त्या महत् कष्टम् अनुभवतः मम पुरतः स्वर्गद्वारम् एव उद्घाटितम् इव अभवत् ।

अहं दृढकायः । कार्ये अपि उत्साही आसम् । अतः षण्मासाभ्यन्तरे तस्मिन् कार्ये अहम् अनुभवी जातः । उत्तमानि वस्त्राणि क्रीत्वा अल्पमूल्यकां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घटीं क्रीत्वा धरन् मम आकर्षकताम् अहं वर्धितवान् । तत् उपाहारमन्दिरम् प्रति प्रातःकाले एका अनुवैद्या प्रतिदिनम् उपाहारसेवनार्थम् आगच्छति स्म । श्वेतवस्त्रधारिणी सा पञ्चविंशतिवर्षीया । मत्तः त्रिभिः वर्षैः ज्येष्ठा सा । कथञ्चित् विधिवशात् आवयोः सम्बन्धः प्रवृद्धः ।

एकदा सायम् अहं मम कार्यं समाप्य अटनार्थं यदा गतः आसं तदा चिकित्सालयतः आगच्छन्ती सा मार्गे मिलितवती । मन्दहासपूर्वकं वार्तालापं कृतवती च । ततः प्रतिदिनम् आवयोः मेलनं भवति स्म । कदाचित् अहं तस्याः लघुगृहम् अपि गतवान् आसम् । तस्याः गृहे अन्यः कोऽपि न आसीत् । मिषन्चिकित्सालये कार्यं कुर्वती देशीयक्रैस्ता सा । तस्याः नाम ग्रेसा इति । मम शरीरे तारुण्यं प्रवहति स्म खलु ? तस्य फलतः अहं कदाचित् तस्याः अनुरागगर्ते पतितः।

दिनानि गतानि । कदाचित् सा उक्तवती – ''अहं गर्भिणी अस्मि'' इति । मम प्राणाः गताः इव । किन्तु अहम् अनन्यगतिकः आसम् । अहं क्रिस्तमतीयः अभवम् । मम नाम विलियम् इति परिवर्तितम् । क्रिस्तालये उभयोः अपि विवाहः प्रवृत्तः । सा एव उपाहारमन्दिरकार्यं परित्याज्य चिकित्सालये सहायक(अटेण्डर्)कार्यं दापितवती । चिकित्सालययानेन वैद्यादीनां गृहं प्रति गमनागमनं, तेषां पुत्राणां शालां प्रति नयनानयनम् इत्यादीनि मम कार्याणि आसन् । एतेन यानचालकः मम मित्रं जातः । सः मां यानचालनं पाठितवान् । कदाचित् सः यानचालकः यदा अस्वस्थः जातः तदा अहम् एव यानं चालितवान् । चिकित्सालयजनाः एव अनुमतिपत्रं (लैसन्स्) दापितवन्तः । ततः आरभ्य अहम् एव तस्य यानस्य चालकः जातः । एतदभ्यन्तरे ग्रेसायां मातृत्वप्राप्तिचिह्नानि न लक्षितानि ।

अतः हं कदाचित् तां पृष्टवान् । तदा सा उक्तवती – ''महिलानां विषये भवान् अधिकं न जानाति । तूष्णीं तिष्ठतु तावत् ।''

विवाहानन्तरं नव मासाः अतीताः चेदपि ग्रेसा माता न जाता । एतद्विषये कुपितः अहं यदा पृष्टवान् तदा सा उक्तवती – ''चिकित्सालये कार्यं कुर्वती अपि अनपेक्षितसन्तानस्य माता भवितुं किम् अहं मूर्खा ? सर्वं मदधीनम् अस्ति ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''तर्हि मां किमर्थं भायितवती भवती ? किमर्थं बलात् मां विवाहे प्रवर्तितवती ?'' इति मया क्रोधेन एव पृष्टम् । तदा सा निरुद्विग्नस्वरेण उक्तवती - ''एतत्सर्वं भवता पूर्वम् एव अवगन्तव्यम् आसीत्'' इति ।

अचिरात् एव तस्याः व्यवहारः मयि सन्देहम् अजनयत् । सा वैद्यैः सह, अन्यैः सह च अतिस्नेहेन व्यवहरति स्म । तदा तदा सा रात्रिकार्यार्थं गच्छति स्म । कदाचित् अहं तस्याः रात्रिकार्यकाले चिकित्सालयं गतवान् । किन्तु सा तत्र न आसीत् । चिकित्सालयस्य रक्षकः मां दृष्ट्वा उपहासपूर्वकम् उपेक्षया हसितवान् । अनन्तरदिने सा यदा गृहं प्रत्यागता तदा अहं तां सम्यक् ताडितवान् । एतत् ज्ञात्वा दिनद्वयानन्तरं कश्चन वैद्यः मां चिकित्सालयं प्रति आहूय - 'यदि भवता इतः परम् एवं पत्नी ताडयिष्यते तर्हि भवान् उद्योगात् निष्कास्यते' इति सूचितवान् । तस्यैव वैद्यस्य विषये मम सन्देहः आसीत् ।

''मम पत्नीं अहं ताडयामि चेत् भवतः का हानिः ?''

''पत्नीं ताडयितुं भवते केन अधिकारः दत्तः ? प्रष्टुं ममापि अधिकारः दत्तः अस्ति एव'' इति वैद्येन उक्तम् ।

तत्काले क्रोधं निग्रहितुं मया न शक्तम् । अग्रे गत्वा अहं वैद्यं सम्यक् ताडितवान् । एतेन चिकित्सालयजनाः माम् उद्योगात् निष्कासितवन्तः। तस्मिन् नगरे वासतः जुगुप्सा उत्पन्ना । अतः अहं तत् नगरं परित्यज्य अत्र आगतः । अत्र कश्चित् धनिकः भारवाहकद्वयस्य स्वामी अस्ति । परिचितः कश्चित् मह्यम् एतम् उद्योगम् अदापयत् । अचिरात् एव मम स्वामी एकं लोकयानं क्रेष्यति । अहं तस्य चालकः भविष्यामि।''

''अग्रे ग्रेसायाः का गतिः जाता ?''

''धिक् ताम् । तस्याः नामोल्लेखम् अपि मम पुरतः मा करोतु भवान्'' इति वदन् सः लिल्ल्याः अन्तः उपस्थितिं विस्मृत्य अवाच्यशब्दैः उच्चस्वरेण बहुधा तां गर्हितवान् ।

''षण्मासेभ्यः पूर्वम् अत्र आगत्य - 'मया दोषः कृतः । क्षन्तव्या अहम् । कृपया गृहं प्रत्यागच्छतु' इति प्रार्थितवती । तदा क्रुद्धः अहं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वारसमीपे दृश्यते किल, तया पादरक्षया सम्यक् ताडयित्वा प्रतिप्रेषितवान् । इदानीं सा कमपि वैद्यं कटाक्षेण अपि न पश्यति इति मित्रद्वारा ज्ञायते ।''

श्रीकण्ठः सदापि अविचिन्त्य व्यवहरति स्म । किन्तु तस्य स्वभावः तु कोमलः । 'तस्य जीवने एवं न भवितव्यम् आसीत्' इति मया चिन्तितम् । अल्पकालस्य मौनस्य अनन्तरं सः अन्यां धूमवर्तिकां ज्वालयन् - ''मम जीवनं तु एतादृशं जातम् । आस्तां तावत् सा कथा । भवान् तु सुखेन अस्ति खलु ? भवान् प्रौढशालायाः मुख्याध्यापकः अस्ति इति मया श्रुतम् । कस्मिन् नगरे ? कः विद्यालयः ?'' इति पृष्टवान् ।

''मैसूरुनगरे वेलिङ्गटन्-क्रिश्चियन्-प्रौढशालायाम् अस्मि ।''

''क्रिस्तमतीयाः हिन्दुकुलजातं भवन्तं कथं प्रधानाध्यापकं कृतवन्तः ?''

लिल्ली कुङ्कुमं धृतवती आसीत् । तस्याः कण्ठे स्थितं वध्यचिह्नयुक्तं मङ्गलसूत्रं न लक्षितवान् स्यात् श्रीकण्ठः । वस्तुस्थितिकथने मम रुचिः न आसीत् । अन्यच्च लिल्ली अन्तः सुप्तवती आसीत् । 'एतावता सा जागरितवती अपि स्यात्' इति विचिन्त्य अहम् व्याजवचनेन सम्भाषणं स्थगितवान् ।

पुनरपि देवस्थानं द्रष्टुं न शक्तं मया । श्रीकण्ठः पुनरपि काफीपानीयदानेन आवां सत्कृत्य सायङ्कालीनं यानम् आरोप्य - ''अहं पुनर्मिलामि तावत् । रात्रौ चिक्कमगलूरुनगरं प्रति भारवाहकं नेतव्यम् अस्ति मया'' इति उक्त्वा ततः निर्गतवान् ।

दशनिमेषानन्तरं यानं ततः प्रस्थितम् । किञ्चित्कालम् आवयोः मध्ये मौनम् आसीत् । 'यया परम्परया बेलूरुदेवस्थानं निर्मापितं ततः अहं बहिर्भूतः अस्मि' इत्येषा भावना मां तीव्रं बाधते स्म ।

''भवतः मित्रस्य कथा मया अपि श्रुता । कथारम्भसमये एव जागरणं प्राप्तम् आसीत् मया । शयानया मया सर्वं श्रुतम् ।''

''सहसा प्रवर्तनं तस्य स्वभावः । तथापि प्रपञ्चे एवम् अपि प्रवर्तते वा इति मम प्रश्नः ।''

''तस्य पत्न्याः विषये खलु भवान् वदति ? तादृश्यः सन्ति बह्व्यः ।''

रात्रौ सप्तवादनसमये आवां हासनं प्राप्तवन्तौ । प्रयाणश्रान्तिकारणतः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिल्ली शयनसमनन्तरम् एव निद्रां प्राप्तवती । मम मनसि सः चिन्ताकीटः निरन्तरं रन्ध्रं कुर्वन् आसीत् । 'श्रीकण्ठसदृशाः अनेके स्युः । मम श्रीकण्ठस्य च जीवने एकस्मिन् अंशे सादृश्यं दृश्यते । किन्तु लिल्ली तु तत्पत्नीसदृशी न ।'

लिल्ल्याः सौम्यं मुखं मातृत्वलक्षणप्राप्त्या अधिकतरं सौम्यं दृश्यते स्म । लिल्ल्याः गर्भे आकारं प्राप्नुवतः अपत्यस्य विषये मम चिन्तनं प्रसृतम् । 'उत्पद्यमानः शिशुः प्राप्तवयस्कः सन् किम् आवाम् इव बेलूरुमन्दिरं द्रष्टुं गच्छेत् ?', 'एषः मत्परम्परासम्बद्धः आलयः इति किं साभिमानं वदेत् ?' इत्यादयः नेत्यात्मकप्रश्नाः मम मनसि निरन्तरम् उत्पन्नाः । तेषाम् अन्तराले निराशा निहिता आसीत् । समग्ररात्रौ मया निद्रा न प्राप्ता । प्रातः लिल्ली यदा उत्थितवती तदा 'अल्पा वा निद्रा प्राप्तव्या' इति अहं प्रयतमानः आसम् ।

अनन्तरदिने समग्रे मनसः मौढ्यम् आसीत् । सायं सञ्चारार्थं यदा निर्गतं तदा अल्पसञ्चारेण एव श्रान्तिः उत्पन्ना । 'मम स्वास्थ्यं पुनः कलुषितम्' इति शङ्कितवती लिल्ली ।

तस्याः शङ्का वास्तविकी जाता । रात्रौ शयनानन्तरं घण्टाभ्यन्तरे ज्वरः आरब्धः । मध्यरात्रे सः अधिकः जातः ।

अनन्तरदिने प्रातः एव लिल्ली मरियम्माद्वारा राचम्मायाः आवुत्तम् आनायितवती । सः एकं वैद्यम् आनीतवान् । ज्वरयुक्तम् अपि मां स्वीकृत्य मध्याह्नयानेन एव लिल्ली मरियम्मया सह प्रथमश्रेणीके प्रकोष्ठे मैसूरुं प्रति प्रयाणं कृतवती । मैसूरुप्राप्त्यनन्तरम् अपि मम स्वास्थ्यं सम्यक् न जातम् । वैद्येन दत्तम् औषधं प्रयोजनाय न जातम् । लिल्ल्याः अनुरोधेन अहम् औषधं स्वीकरोमि स्म । आहारसेवनं च करोमि स्म ।

दशदिनाभ्यन्तरे विद्यालयः आरब्धः । प्रतिदिनम् अपि अश्वशकटेन अहं विद्यालयं गच्छामि स्म । घण्टां यावत् तत्र उपविश्य अश्वशकटेन एव गृहं प्रत्यागच्छामि स्म ।

कदाचित् लिल्ली कोपेन उक्तवती - ''भवान् यदि मनःसमाधानं न प्राप्नोति तर्हि अस्वास्थ्यं न अपगच्छति'' इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"तत् अहम् अपि जानामि ।"

"ज्ञात्वा अपि किमर्थम् एवं क्रियते ?"

"किं मया बुद्ध्या क्रियते ? प्रयत्नम् अतिक्रम्य तिष्ठति मनसः प्रवृत्तिः ।"

"अहं तत् अवगच्छामि । तथापि .... तथापि .... किं करवाम ?" इति वदन्ती सा शून्यदृष्ट्या मां दृष्टवती ।

पुनः सप्ताहाभ्यन्तरे मम शक्तिः नितरां क्षीणा जाता । पुनरपि अहं संज्ञाहीनः सन् चेतनारहितः सन् शयितवान् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतदवसरे मासं यावत् सुप्तः आसम् । किञ्चित् उल्लाघतां प्राप्य कदाचित् प्रातःकाले गृहस्य पुरतः अङ्गणे सुखासने उपविष्टवान् आसम् । क्षीरस्य पानात् शरीरे अल्पः उत्साहः दृश्यते स्म । मार्गे सुदूरे गच्छत् अश्वशकटं पश्यन् उपविष्टवान् आसम् । तदा वेष्टीधारी कश्चन कृष्णवर्णीयः पुरुषः अस्मद्गृहं प्रति आगच्छन् मया दृष्टः । स्पष्टदर्शनात् ज्ञातं यत् आगतः शङ्करः इति ।

''अहो, शङ्कर !'' अहम् उच्चस्वरेण उक्तवान् ।

मम ध्वंनिः श्रुतः इति भाति - लिल्ली बहिः आगतवती । ज्ञातपूर्वेण सुपरिचितेन सह व्यवहरन्ती इव सा शङ्करं नमस्कृतवती । ''कदा आगतम् ?'' इति स्नेहेन पृष्टवती च । 'एतयोः परिचयः कदा जातः ?' इति मया न ज्ञातम् । अतः अहम् आश्चर्यम् अनुभूतवान् । शङ्करः मम पार्श्वे उपविष्टवान् । लिल्ली अन्तः गतवती ।

शङ्करः रैल्यानेन बस्यानेन वा आगतः इव भासते स्म । अतः मया पृष्टम् - ''कुतः आगतं भवता ?''

''श्रीरङ्गपत्तने अस्माकं सङ्घस्य वर्गः आसीत् । गतेषु चतुर्षु दिनेषु अहं तत्र आसम् । ह्यः रात्रौ मैसूरुं प्रति आगतं मया ।''

शङ्करः मम आरोग्यविषये पृष्टवान् । 'अस्वास्थ्यस्य कारणं किम् ?' इत्यपि सः पृष्टवान् । मया किमपि उत्तरं न दत्तम् । शङ्करं स्वीकृत्य अहं शयनप्रकोष्ठं गतवान् । मञ्चे उपधानम् अवलम्ब्य उपविष्टं मया । मम पुरतः वेत्रासन्दे उपविष्टवान् शङ्करः । बहुषु विषयेषु आवयोः वार्तालापः प्रवृत्तः । शङ्करः इदानीम् अपि मङ्गलूरुनगरे अस्ति इति, तदीयानि कार्याणि सम्यक् प्रचलन्ति सन्ति इति च मया ज्ञातम् । वार्तालापसमये क्षीरपात्रं गृहीत्वा लिल्ली तत्र आगतवती । क्षीरं पिबन् उक्तवान् शङ्करः - ''ममापि निमित्तं मध्याह्नपाकं करोतु भवती । अहम् अपि अत्रैव भोजनं करिष्यामि ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिल्ली अन्तः गतवती । मम आश्चर्यं जातम् । सनातनहिन्दुधर्मस्य वीरभक्तः एषः क्रिस्तमतीयस्य मम गृहे 'भोजनं करिष्यामि' इति स्वयम्प्रेरणया वदन् अस्ति ! 'अहिन्दुजनानां गृहे भोजनं न करणीयम्' इत्येतं नियमं सः अनुसरन् अस्ति वा न वेति अहं न जानामि स्म । तद्विषये प्रष्टुम् अवसरः न प्राप्तः आसीत् ।

''शङ्कर ! भवतः व्यवहारे परिवर्तनं दृश्यते ! क्रैस्तमतीयस्य मम गृहे किं भवान् भोजनं करोति ?'' - मया कुतूहलेन पृष्टम् ।

शङ्करः क्षणकालं गाम्भीर्येण आसीत् । अनन्तरं सः स्वकोषतः दशपुटपरिमितम् एकं दीर्घं पत्रं निष्कास्य मम पुरतः स्थापयित्वा 'एतत् पठतु' इति उक्तवान् । केन लिखितम् इति परिशीलितं मया । लिल्ल्याः पत्रं तत् । 'अग्रज !' इति सम्बोध्य सा पत्रे मम अस्वास्थ्यं विवृतवती आसीत् । आ बहोः कालात् हिन्दुधर्म-संस्कृत्योः विषये स्थिताः स्वभक्तिप्रेमादिकं वर्णितवती आसीत् सा ।

''यदि आवयोः विवाहकाले हिन्दुधर्मं स्वीकर्तुं अवकाशः मम स्यात् तर्हि आर्यपुत्रेण क्रिस्तमतम् अवलम्बनीयं न अभविष्यत् । किन्तु हिन्दुसमाजः आगन्तुकानां कृते प्रवेशम् अयच्छन् स्वार्थमन्दिरम् इव अस्ति । आवयोः विवाहार्थम् आर्यपुत्रेण अनन्यगतिकतया हिन्दुधर्मः परित्यक्तव्यः आसीत् । यत् सुखं प्राप्येत इति आवां भव्यकल्पनां कृतवन्तौ आस्व तस्य लेशमात्रम् अपि विवाहानन्तरं न प्राप्तं मया'' इति लिखित्वा सा मया अनुभूयमानायाः मानसिकव्यथायाः कथां, मम वेदनां, तस्याः परिणामं, क्षीयमाणस्य मम शरीरस्य दुर्दशां च विस्तरेण वर्णितवती आसीत् ।

''हिन्दुधर्मविषये मया केचन ग्रन्थाः पठिताः । हिन्दुमौल्यानां विषये सामान्यज्ञानम् अस्ति एव मम । मम पितामहादयः हिन्दवः एव आसन् । आ सहस्राधिकवर्षेभ्यः अनुवर्तमानेन संस्कारेण युक्तं हिन्दुरक्तम् एव मयि अपि प्रवहति । मम जीवनसौभाग्यं केन सिद्ध्यति इति अहं जानामि । यदि आर्यपुत्रस्य मनोव्यथा एवम् एव अनुवर्तेत तर्हि मम सौभाग्यं कदाचित् विलुप्तं भवेत् अपि । तस्य मनोव्यथाहेतुकस्य अस्वास्थ्यस्य निवारणं केनापि वैद्येन कर्तुं न शक्यते ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''भवतः भगिनी सती चरणौ प्रणम्य प्रार्थयामि, आञ्चलं प्रसार्य प्रार्थयामि - भवता सकृत् मम गृहं प्रति आगन्तव्यम् । आर्यपुत्रस्य मानसिकक्लेशस्य परिहारार्थं कोऽपि उपायः चिन्तनीयः । स च भवता एव शक्यः । धर्मसंस्कृत्यादीनां प्रस्तावः यदा भवति तदा आर्यपुत्रः भवतः नाम उल्लिखति एव । अतः भवता अत्र आगन्तव्यं, न केवलं तस्य मनःक्लेशस्य परिहारार्थम्, अपि तु भवतः भगिन्याः परमसौभाग्यस्य रक्षणार्थम् अपि ।''

पत्रं पठित्वा अहं मूकः जातः ।

''मम सङ्केतस्य प्राप्त्यर्थं भवतः पत्नी आनेकरोटिविस्तरणे समग्रे अटितवती अस्ति । दिनद्वयस्य अन्वेषणानन्तरं तया मम गृहं प्राप्तम् । रामण्णस्य विवाहार्थं यदा आगतम् आसीत् तदा सा ज्ञातवती आसीत् यत् आनेकरोटिप्रदेशे मम गृहम् अस्ति इति । मम भ्रातृजायातः सा सङ्केतं प्राप्तवती अस्ति'' इति उक्त्वा शङ्करः निमेषद्वयानन्तरं पुनः उक्तवान् - ''क्रैस्तमतीयानां गृहे भोजनं न करणीयम् इति भावना पूर्वं मयि अपि आसीत् । एषु दिनेषु तत्र परिवर्तनम् आगतम् अस्ति । अन्यच्च भवतः पत्नी हिन्दुधर्मीया एव इति अहं भावयामि । भगिनीगृहम् आगतः को वा भ्राता भोजनम् अकृत्वा गच्छेत् ?'' इति ।

अनन्तरं मम विषये आवयोः वार्तालापः प्रवृत्तः । अहं बेलूरुप्रयाणस्य परिणामं विवृतवान् । तावता मध्याह्नस्य द्वादशवादनं जातम् । शङ्करः भोजनार्थम् उपविष्टवान् । आपणतः कदलीपत्रम् आनीय भोजनार्थं स्थापितवती आसीत् सा । भोजनं करणीयम् इति मयि अपि इच्छा उत्पन्ना । किन्तु लिल्ल्या मह्यं भोजनं न दत्तम् । यवागूं चषकेण दत्तवती सा । भोजनानन्तरम् आवां शयनप्रकोष्ठे उपविष्टवन्तौ । लिल्लीम् अपि तत्रैव आहूतवान् शङ्करः ।

लिल्ल्याः आगमनान्तरं सः उक्तवान् - ''इदानीं हिन्दुसमाजस्य मानसिकता परिवृत्ता अस्ति । टागोरवर्यः कस्मिंश्चित् कथापुस्तके लिखितवान् आसीत् - 'हिन्दुसमाजरूपात् महासौधात् असङ्ख्यजनानां निर्गमनार्थं विशालानि अनेकानि द्वाराणि वातायनानि च सन्ति । किन्तु कश्चित् लघुजीवी अपि तस्य अन्तः प्रवेशं न अर्हति' इति । किन्तु इदानीं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तादृशी स्थितिः नास्ति । अस्माकं समाजस्य अधोगतेः कारणविषये बहवः समाजहितचिन्तकाः चिन्तनं कृतवन्तः दृश्यन्ते । हिन्दुसमाजात् केनचित् कारणेन बहिर्गताय पुनः प्रवेशार्थम् अवकाशः कल्पनीयः इति केचन प्रतिपादयन्तः सन्ति । तावदेव न, कस्याश्चित् जातौ जातोऽपि कश्चित् निष्कल्मषभावेन हिन्दुत्वं प्राप्तुं यदि इच्छेत् तर्हि तस्मै अपि अवकाशः दातव्यः इति वदन्तः ते एतद्विषये विशेषकार्यं कुर्वन्तः सन्ति । अज्ञानेन, मतपरिवर्तकैः प्रदर्शितस्य प्रलोभनस्य कारणतः, मोहात्, भयात् वा स्वमतं परित्यज्य क्रैस्तमतीयाः मुसल्मानमतीयाः वा जाताः अनेके हिन्दुबान्धवाः इदानीं मातृधर्मं प्रति आगच्छन्तः सन्ति ।''

''तत् कथं सम्भवति शङ्कर !''

''तस्य सिद्ध्यर्थम् एव महत् अभियानं प्रवृत्तं, प्रचलत् अस्ति अपि । एतस्मिन् क्षेत्रे आर्यसमाजेन सुमहती सिद्धिः प्राप्ता अस्ति अपि । यः हिन्दुत्वं प्राप्तुम् इच्छति तस्य शुद्धिं सम्पाद्य ते तं हिन्दुधर्मीयं कुर्वन्ति । तादृशेभ्यः मातृधर्मम् आगतेभ्यः सामाजिके धार्मिके च क्षेत्रे समानता परिकल्प्यते अपि । तादृशानां कुलस्य विवाहादिसम्बन्धः अपि अङ्गीक्रियते । अतः आर्यसमाजस्य द्वारा भवन्तौ शुद्धिं प्राप्तुम् अर्हतः ।''

एतत् श्रुत्वा लिल्ली उत्साहेन - ''भवतु, तथैव करवाव'' इति वदन्ती मम मुखं दृष्टवती ।

''विवाहात् पूर्वम् एव भवन्तौ परस्परानुरागविषये मां किमर्थं न सूचितवन्तौ ?'' - शङ्करः पृष्टवान् ।

''यदि सूचितवन्तौ स्याव तर्हि अपि किम् अभविष्यत् ?''

''आर्यसमाजस्य पद्धत्यनुगुणम् एतस्याः शुद्धिं सम्पाद्य हिन्दुसम्प्रदायानुसारं विवाहं व्यवस्थापयितुं शक्यम् अभविष्यत् । भवतः एषः मनःक्लेशः प्रायः निवारितः अभविष्यत् ।''

''शङ्कर ! वस्तुस्थितिः एषा - यदि विषयः ज्ञायेत तर्हि भवान् मां दुर्बलमनस्कं भावयेत, मत्तः लिल्लीं दूरीकर्तुं प्रयत्नं कुर्यात् इति विचिन्त्य मया विषयः न निवेदितः आसीत् ।''

''आस्तां तावत् सा कथा । गतं तु गतम् एव । एवं करणीयम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति सूचनीयम् इति षड्भ्यः मासेभ्यः पूर्वम् एव मया सकृत् चिन्तितम् आसीत् । किन्तु एतद्विषये भवतः पत्न्याः सम्मतिः अस्ति वा न वेति मया न ज्ञायते स्म । तस्याः अङ्गीकारे असति यदि अहं भवन्तं 'शुद्धिं प्राप्नोतु' इति वदेयं तर्हि भवता स्वमतं परित्यक्तव्यम् अभविष्यत् । पवित्रं दाम्पत्यं विच्छेद्य स्वमतानुयायिनां सङ्ख्या वर्धनीया इत्येतत् जघन्यचिन्तनं विवेकी कोऽपि हिन्दुः कर्तुं न अर्हति । क्वचित् तादृशं कार्यं क्रैस्तमतप्रचारकाः कुर्युः, न अन्ये । इदानीं भवती अपि सम्मतिं दर्शितवती अस्ति इत्यतः विना विघ्नं मातृधर्मस्वीकारः भवितुम् अर्हति ।''

अहं लिल्ल्याः मुखं दृष्टवान् । सन्तोषः, भाविजीवनविषये सुन्दराः स्वप्नाः, सुखस्य सम्भावना च तस्याः नेत्रयोः दृश्यन्ते स्म ।

मया पृष्टं - ''आर्यसमाजस्य विषये अहम् अपि किञ्चित् जानामि । ते विग्रहाराधनं न अङ्गीकुर्वन्ति । अन्यच्च जनाः तेषां विषये विविधान् विरोधाभिप्रायान् वदन्तः दृश्यन्ते अपि ।''

''एतद्विषये आस्थया अध्ययनं कर्तुं किं भवता कदापि प्रयत्नः कृतः ?''

''न''

''तेषां विषये मया अपि पूर्वम् अन्यथाभावः प्राप्तः आसीत् । वेदकाले अत्र विग्रहाराधनं न आसीत् । आर्यसमाजीयाः वेदप्रतिपादितां धार्मिकव्यवस्थाम् एव महत्त्वपूर्णां मन्यन्ते । वेदाः सर्वश्रेष्ठाः इति सर्वे हिन्दवः भावयन्ति । किन्तु ते इतिहासकाले व्यवहारपथम् आगतायां पूजापद्धतौ अपि विश्वासं कुर्वन्ति । आर्यसमाजस्य विषये विरोधाभिप्रायाः श्रूयन्ते यत् तत्र कारणम् - आर्यसमाजीयानां कालातीतं प्रगतिपरचिन्तनम् । हिन्दुसमाजस्य अवनतेः कारणभूतां जातिभेदव्यवस्थां ते क्रान्तिकारकेण मनोभावेन खण्डयन्ति ।''

''एवं तर्हि वर्णाश्रमव्यवस्था किम् असमीचीना ?''

''वर्णाश्रमव्यवस्थायाः महत्त्वं वैज्ञानिकस्तरे कोऽपि निराकर्तुं न अर्हति इति तु सत्यम् एव । तथापि 'जन्मना जातिः' इत्येषा व्यवस्था, या च अयोबन्धः इव अभेद्या भवति सा, हिन्दुधर्मस्य ऐक्यस्य भङ्गं कृतवती इति तु सर्वैः अङ्गीकरणीयम् एव भवति । आर्यसमाजीयाः तु जातिभेदस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

निवारणे मन्दगतिम् अनिच्छन्तः क्रान्तिगत्या अग्रे सरन्तः दृश्यन्ते । अतः एव हिन्दवः बहवः तान् संशयात्मकदृष्ट्या पश्यन्ति । एतदवसरे एकं तु स्मर्तव्यम् एव । अहं पूर्वम् अपि एतत् उक्तवान् आसम् । सर्वान् जनान् अपि सर्वैः प्रकारैः तर्पयितुं समर्था काऽपि संस्था, कोऽपि धर्मो वा लोके नास्ति । अन्यच्च, पश्चात्तापं प्राप्य स्वधर्मं प्रति आगच्छन्तं धीरोदात्ततया स्वागतीकर्तुम् अर्हः कोऽपि अन्यः विभागः हिन्दुसमाजे नास्ति ।''

''शङ्कर ! भवतः अभिप्रायः सम्मतः अस्ति मम । किं भवान् अपि आर्यसमाजीयः भवितुम् इच्छति ?''

''अहम् उदारमनस्कः अस्मि । उदात्ताः सर्वे विचाराः मम मनसि निर्बाधं प्रवेष्टुं अर्हन्ति । किन्तु अहं कस्यचित् एकस्य एव सम्प्रदायस्य अनुयायी, एकस्यैव अभिप्रायस्य समर्थकः वा न । यस्मिन् अहं कार्यं करोमि तस्य सङ्घस्य परित्यागस्य विचारः मम मनसि कदापि न आगतः । किन्तु आर्यसमाजः यत् शुद्धीकरणान्दोलनं करोति तस्मिन् मम विशेषसम्मतिः अस्ति । तत्कारणतः तेषु मम विशेषादरः अपि ।''

एतावता लिल्ली अन्तः गतवती । त्रिभ्यः अपि काफीं सज्जीकृत्य आनीतवती सा । शङ्करः काफीं न पीतवान् । तस्मै क्षीरम् आनीय दत्त्वा पुनः उपविष्टं तया ।

क्षीरं पिबन् उक्तवान् शङ्करः - ''मया सूचितम् इत्यतः एव कोऽपि निर्णयः करणीयः नास्ति भवद्भ्याम् । एतस्मिन् नगरे अपि आर्यसमाजशाखा अस्ति । तत्र भवन्तौ गत्वा कार्यकर्तॄणां पुरतः भवतोः सर्वान् सन्देहान् उपस्थापयताम् । तदीयग्रन्थालयतः पुस्तकानि आनीय पठताम् । मतपरिवर्तनतः पूर्वं मनःपरिवर्तनं भवतु । सर्वं सम्मतं चेदेव शुद्धीभवनम् अङ्गीक्रियताम्'' इति ।

सायं पञ्चवादनपर्यन्तम् अपि सम्भाषणं कुर्वन् स्थितवान् शङ्करः । रात्रियानेन बेङ्गलूरुनगरं प्रति गन्तव्यम् इत्यतः सः अस्मद्गृहतः प्रस्थितवान् । 'पुनः कदाचित् आगन्तव्यम्' इति निवेद्य लिल्ली पादौ स्पृष्ट्वा तं नमस्कृतवती ।

तस्य निर्गमनानन्तरं लिल्ल्याः मुखं दृष्टं मया । मनोरङ्गे भविष्यतः विषये स्वप्नसौधं निर्मान्ती लक्षिता सा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अग्रिमभानुवासरे सायङ्काले आवाम् आर्यसमाजस्य कार्यालयं गतवन्तौ । आवयोः प्राप्तिसमये तत्र एकं भाषणं प्रचलत् आसीत् । उभौ अपि आवाम् अन्तः गत्वा उपविष्टवन्तौ । लिल्ली महिलानां मध्ये उपविष्टवती । भाषणकारः आंग्लभाषया दयानन्दसरस्वतीवर्यस्य जीवनं, तदीयं लक्ष्यं, तेन साधितां प्राप्तिं च विस्तरेण सुस्पष्टतया विवृण्वन् आसीत् । हिन्दुधर्मस्य विषये वदन् सः उक्तवान् - ''आ इतिहासकालात् परमतीयानां कृते प्रवेशः दत्तः अस्ति हिन्दुधर्मेण । राजपुत्राः बहवः अत्र आगमनात् पूर्वं हिन्दवः न आसन् । बहवः जनसमुदायाः अत्र आगताः । अस्माकं धर्मेण ते सर्वे आत्मनि अन्तर्भाविताः । चालनात्मकगुणः अत्र अज्ञातपूर्वः न । समग्रे देशे बौद्धमतस्य प्राबल्यं यदा अधिकम् आसीत् तदा शङ्कराचार्येण अद्वैतमतस्य प्रचारः कृतः । तेन बहवः बौद्धमतीयाः अद्वैतमतीयाः जाताः । अन्यमतीयानाम् अपि एषा एव कथा आसीत् । किन्तु गच्छता कालेन अन्धश्रद्धायाः कारणतः अस्मदीयेषु सङ्कुचिता दृष्टिः उत्पन्ना । विविधैः कारणैः मुसल्मानजातिं श्रितवतां भारतीयानां विषये औदार्यं प्रदर्श्य यदि ते मातृधर्मं प्रति निमन्त्रिताः स्युः तर्हि पाकिस्थानदेशस्य पृथक् स्थितिः अद्य न अभविष्यत् ।''

भाषणकारस्य कथनं वास्तविकम् आसीत् । सः कथनम् अनुवर्तितवान् - ''अस्माकं समाजस्य एव अङ्गभूताः हरिजनाः यदि समानभावनया दृष्टाः पुरस्कृताः च स्युः तर्हि तेषु बहवः क्रैस्तमतीयाः न अभविष्यन् । स्वागतद्वारम् उद्घाट्य यदि वयं कार्यरताः स्याम तर्हि परदेशात् आगताः क्रैस्तप्रचारकाः एव प्रायः एतद्धर्मानुयायिनः अभविष्यन् । एतस्यां भूमौ रोमन्शैल्या निर्मितानाम् आलयानां स्थितिः, अन्यदेशं प्रति धर्मनिष्ठायाः गमनं चापि न अभविष्यत् । आ सहस्राधिकवर्षेभ्यः या स्पृश्यास्पृश्यभावना अत्र स्थिता तस्य फलम् अद्य राष्ट्रियसमस्यारूपं प्राप्तवत् अस्ति । अस्माकं भ्रातरः एव अस्मासु शत्रुताम् आचरन्ति । यदि इदानीं वा हिन्दुसमाजः जागरितः न भवेत् तर्हि हिन्दुत्वं भविष्यत्काले ऐतिहासिकांशत्वेन तिष्ठेत्, न तु जीवज्जनसमुदायरूपेण । यदि आंग्लाः पुनरपि भारतं स्वाधीनं कुर्युः तर्हि पूर्वं पाकिस्थानस्य निर्माणविषये यथा तथा एसुस्थानस्य निर्माणविषये अपि आन्दोलनं प्रचलेत् ।''

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपन्याससमाप्तेः अनन्तरं पार्श्वस्थः मया पृष्टः - 'उपन्यासकर्ता कः ?' इति । तेन उक्तं - ''मुम्बयीनगरस्थः आर्यसमाजीयः कार्यकर्ता कश्चित् ।''

''सः पूर्वं क्रैस्तमहाविद्यालये पठति स्म । जन्मना हिन्दुः आसीत् सः । किन्तु विद्यालयप्रमुखाणाम्, अध्यापकानां, धर्मगुरूणां च बोधनस्य कारणतः सः क्रिस्तमतीयः जातः । स्नातकपदव्याः प्राप्तेः अनन्तरं तेन वर्षद्वयं यावत् क्रिस्तालये कार्यं कृतम् । विद्यालयसञ्चालयित्री क्रिस्तीयसंस्था काचित् क्रैस्तमतस्य विशेषाध्ययनार्थं तं रोमनगरं प्रति प्रेषितवती । रोमनगरे तेन सप्त वर्षाणि यावत् अध्ययनं कृतम् । तावता तस्मिन् तद्विषये जिहासा उत्पन्ना । तात्त्विकस्तरे वेदान्तस्तरे च क्रैस्तमतं मानवस्य जिज्ञासुतां ज्ञानदाहं वा तर्पयितुं समर्था न भवति इति तेन अवगतम् । ततः भारतम् आगतः सः भारतीयं तत्त्वशास्त्रं धर्ममीमांसां च पठितुम् उद्युक्तः अभवत् । पूर्वम् आत्मना यत् अनुचितं कृतं तद्विषये तेन पश्चात्तापः अनुभूतः । ततः सः मुम्बयीस्थे आर्यसमाजे शुद्धतां प्राप्तवान् । ततः आरभ्य एषः आर्यसमाजस्य प्रमुखकार्यकर्तृषु अन्यतमः अस्ति ।''

अनन्तरदिने सायम् अपि भाषणम् आसीत् । अहं लिल्ल्या सह तदपि श्रोतुं गतवान् । भाषणसमाप्तेः अनन्तरम् अहं तत्रत्यैः कार्यकर्तृभिः सह वार्तालापं कृत्वा ग्रन्थालयतः कानिचन पुस्तकानि आनीतवान् । आदौ लालालजपतरायेण लिखितानि पुस्तकानि पठितानि आवाभ्याम् ।

ततः दिनद्वयस्य अनन्तरं बिषप्वर्यः 'आगन्तव्यम्' इति वार्तां प्रेषितवान् । मया यदा तस्य वासगृहं गतं तदा सः क्रोधेन - ''अनारोग्यव्याजं कथयन् भवान् सायं भ्रष्टजनानां भाषणस्य श्रवणार्थं गमने न किमपि कष्टम् अनुभवति'' इति तर्जितवान् ।

आर्यसमाजं प्रति मया दिनद्वयं गतम् इति वार्ता बिषप्वर्येण अपि ज्ञाता अस्ति इति मया अवगतम् । अहं शान्ततया उपविष्टः आसम् । ''भवादृशेषु उपकारस्मरणहीनेषु यदि विश्वासः क्रियेत तर्हि भवन्तः क्रिस्तं पुनरपि वध्यस्थानम् आरोपयेयुः'' इति पुनरपि क्रोधेन उक्तवान् सः ।

'भवन्तः तस्य उज्जीवकाः' इति वक्तव्यम् इति मनसि उत्कटभावना उत्पन्ना । तथापि कष्टेन मौनम् अवलम्बितं ...

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

"एतत् मम प्रथमम् अन्तिमं च जागरूकतास्मारकवचनम् । यदि एवम् एव अग्रे अपि क्रियेत तर्हि जीवनोपायः विच्छिन्नः भवेत् । भवान् तम्मय्यवर्यस्य जामाता इत्यतः महती सहना प्रदर्श्यमाना अस्ति मया" इति कठोरवचनैः उक्तवान् सः । 'धन्यवादाः' इति उक्त्वा ततः निर्गतं मया ।

गृहं प्राप्तवन्तं मां लिल्ली उक्तवती - "पिता आगतः आसीत् । आर्यसमाजं प्रति आवयोः गमनस्य वार्ता तेन अपि ज्ञाता अस्ति । बिषप्वर्यः तं तां वार्ताम् उक्तवान् अस्ति । 'पतिं सन्मार्गम् आनेतुं प्रयत्नम् अकुर्वती भवती तस्य तालानुगुणम् एव नृत्यं करोति चेत् आवयोः सम्बन्धः विच्छिन्नः भविष्यति । स्मरतु एतत्' इति उक्त्वा गतः सः ।"

अहं खेदेन - "लिल्ली ! मत्कारणतः भवत्याः अपि ....." इति यावत् किमपि वक्तुम् उद्युक्तः तावता सा मम वचनं मध्ये एव स्थगयन्ती - "अलम् अधिककथनेन । मम सौभाग्यं कुत्र अस्ति इति अहं जानामि" इति उक्तवती ।

सप्ताहानन्तरम् आवाम् आर्यसमाजीयान् कार्यकर्तॄन् उद्दिश्य शुद्धिप्राप्त्यपेक्षां निवेद्य विश्वासदृढीकरणार्थं शपथग्रहणं कृतवन्तौ । शुद्धिसंस्कारतः पूर्वम् आर्यसमाजीयम् एकं विवरणपत्रं प्रपूर्य हस्ताक्षरं कृतवन्तौ ।

अनन्तरभानुवासरे प्रातः आवाम् आर्यसमाजस्य कार्यालयं गतवन्तौ । समाजीयाः अन्ये अपि बहवः तत्र सम्मिलिताः आसन् ।

कार्यालयस्य एकस्मिन् कोणे यज्ञशाला आसीत् । आवां स्नात्वा शुचिर्भूय शुभ्रवस्त्रं धृत्वा अग्निकुण्डस्य पुरतः उपविष्टवन्तौ । हसन्तिकासदृशे कस्मिंश्चित् अयःकुण्डे अग्निः प्रतिष्ठापितः आसीत् । शुद्धजलेन सम्प्रोक्ष्य आचार्यः मन्त्रान् वाचयित्वा तेषाम् अर्थम् अपि विवृतवान् । उभयोः अपि यज्ञोपवीतधारणं प्रवृत्तम् । स्त्रीपुरुषयोः उभयोः अपि यज्ञोपवीतधारणं वेदाध्ययनाधिकारं च अङ्गीकरोति आर्यसमाजः । ततः गायत्रीमन्त्रोपदेशः प्रवृत्तः । तस्य अर्थः अपि बोधितः । अनन्तरं समिद्भिः लाजैः आज्येन च यथाविधि अग्निहोत्रं कारितम् । वेदमन्त्रपुरस्सरम् आज्यं समर्प्य पूर्णाहुतिः कृता । शुद्धिसंस्कारः समाप्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

मम नाम सत्यनारायणः इति पुनः निश्चितम् अभवत् । मम पत्न्याः नाम 'धर्मश्रीः' इति निश्चितं मया ।

एकादशवादने होमकार्यं समाप्तम् । ततः तत्र उपस्थितानां परिचयः कारितः । महाविद्यालयस्य तत्त्वशास्त्रबोधकः भास्कररायवर्यः, केचन वणिजः, केचन प्रौढशालाध्यापकाः, केचन यन्त्रागारोद्योगिनः इत्यादयः पञ्चाशत् जनाः तत्र उपस्थिताः आसन् । रामण्णः तत्पत्नी च आवयोः निमन्त्रणानुसारम् उपस्थितौ आस्ताम् ।

द्वादशवादने भोजनार्थं कदलीपत्राणि प्रसारितानि । समाजमन्दिरे एव भोजनव्यवस्था अपि उपकल्पिता आसीत् । आवाम् आपोशनं दत्तवन्तौ । परिवेषणम् अपि कृतम् आवाभ्याम् । द्वितीयपङ्क्तौ आवाम् उपवेश्य परिवेषितवत्यः काश्चन महिलाः ।

सायं चतुर्वादनसमये गृहं प्राप्तम् । मम शरीरे यद्यपि श्रान्तिः दृश्यते स्म तथापि मनः उल्लसितम् आसीत् । सुखासने मया उपविष्टम् । तथैव निद्रा प्राप्ता मया ।

षड्वादनसमये मया जागरणं प्राप्तम् । "भ्रातृजाया आगता आसीत् । 'यदि पूर्वम् एव अहम् अपि सूचिता स्यां तर्हि शुद्धिक्रियायाः दर्शनसौभाग्यं मया अपि प्राप्तम् अभविष्यत्' इति सा उक्तवती" इति उक्तवती मम पत्नी ।

अर्धघण्टानन्तरम् एकं पत्रं मम हस्ते निक्षिप्य - 'अत्र हस्ताक्षरं करोतु' इति सा सूचितवती । मया पत्रं पठितम् । प्रौढशालायाः उद्योगस्य त्यागार्थं सज्जीकृतं त्यागपत्रं तत् । तया एव सज्जीकृतम् आसीत् तत् । मम हस्ताक्षरानन्तरं सा उक्तवती - "अद्य रात्रितः कानिचन दिनानि भ्रातृजायायाः गृहे वसाव । आवयोः निमन्त्रणार्थम् एव तां प्रेषितवान् आसीत् अग्रजः । अल्पभाटकलभ्यं किमपि गृहं प्राप्तुं प्रयत्नं करवाव । आवयोः जीवनं कथञ्चित् प्रचलेत् एव" इति शान्तस्वरेण दृढतया उक्तवती सा ।

अहं यथाकथञ्चित् स्यां चेदपि राचम्मा तु अङ्गीकरिष्यति एव । किन्तु न जाने, शकुन्तला किं वदेत् इति ।

* * *

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



'एस. एल्. भैरप्प' – (सन्तेशिवर लिङ्गण्णय्य भैरप्प) इति नाम कन्नडे यथा तथा अन्यासु अपि भाषासु विख्यातम् अखिलेऽपि भारतवर्षे । साहित्यक्षेत्रे तादृशी अनुपमा सिद्धिः तस्य । तदीयासु कृतिषु जीवनानुभवः यथा प्रतिफलितः भवति तथा न कस्यापि अन्यस्य साहित्यकारस्य कृतिषु इत्यत्र नातिशयोक्तिः ।

आकर्षिका निरूपणशैली, प्रतिग्रन्थं विभिन्नस्य सामाजिकमुखस्य चित्रणम्, अत्यन्तं समर्थतया पात्रचित्रणम् – इत्येते तस्य कृतीनां प्रधानगुणाः । पठनसमाप्तेः अनन्तरम् अपि कानिचन दिनानि पठिता पुस्तकोक्तविषये अगाढं चिन्तनं यथा कुर्यात् तथा कर्तुं समर्था भैरप्पवर्यस्य लेखनी लोकोत्तरा हि ।

Kirtikant Sharma Collection, Najafgarh